
Barcode : 99999990292935
Title - Ath achar ratna
Author - Javaji,Tukaram
Language - sanskrit
Pages - 263
Publication Year - 1914
Barcode EAN.UCC-13



BHARATIYA V
LIBRAR

॥ अथ आचाररत्नप्रारंभः ॥

यो देवः सवितास्माकं धियो धर्मादिगोचरे । प्रेरयेत्तस्य तद्भर्गस्तद्वरेण्यमुपास्महे ॥



मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिन्दुकलानिबद्धमुकुटां तत्त्वार्थवर्णात्मिकाम् ।
गायत्रीं वरदाभयांकुशकशाशुभ्रं कपालं गुणं शंखं चक्रमथारविन्दयुगुलं हस्तैर्वहंतीं भजे ॥

अथात्रकिंचित्प्रास्ताविकम् ।

आचाररत्ननामधेयोऽत्ययंब्राह्माचारप्रतिपादकोऽभिनवआह्निकप्रमाणनिबंधः। अत्रारुणोदयादारभ्याद्वितीयसूर्योदयमहरहःकर्तव्यानां ब्राह्मणकर्तृकाचाराणांतत्तद्विधिनिषेधानामकरणप्रत्यवायानांचयथावद्विचारःप्रमाणैर्निर्णीतोस्ति । तत्रकोनामायंब्राह्माचारःकिंचब्राह्मणलक्षणमितिसंभवतिजिज्ञासेतितदत्रकिंचिदुल्लिख्यते—**आचारः**प्रवृत्तिविषयत्वं, यथाऽऽलौकिकाविगीतशिष्टाचारविषयत्वमिति, अपिच—विद्वेषरागरहिताअनुत्तिष्ठंतियद्द्विजाः । विद्वांसस्तंसदाचारधर्ममूलविदुर्बुधा । इत्याचारलक्षणम् । **ब्राह्मणश्चा**ऽदृष्टविशेषप्रयोज्यधर्मवान् । ब्रह्म वेद, परब्रह्मवा वेत्त्यधीतेवेतिब्राह्मणशब्दव्युत्पत्तिः । **लक्षणंच**—विशुद्धमातापितृजन्यत्वंब्राह्मणत्वमिति । विशुद्धत्वंनामषट्कर्माधिकारवत्त्वम् । तथा—जात्याकुलेनवृत्तेनस्वाध्यायेनश्रुतेनच । एभिर्युक्तोहियस्तिष्ठेन्नित्यंसद्विजउच्यते । इति । **वसिष्ठोपि**—योगस्तपोदमोदानंसत्यं शौचंदयाश्रुतम् । विद्याविज्ञानमास्तिक्यमेतद्ब्राह्मणलक्षणम् । इत्याह । **ब्राह्मणगुणप्रयुक्तंफलंतु**—सर्वत्रदांता श्रुतपूर्णकर्णाजितेंद्रियाःप्राणिवधान्निवृत्ताः । प्रतिग्रहेसंकुचिताग्रहस्तास्तेब्राह्मणास्तारयितुंसमर्थाः । इति । एवंगुणविशिष्टत्वमीप्सिततममस्तिलोकानाम् । तदेवचेह ब्रह्मवर्चसतेजोर्पकत्वेनात्यंतनिश्रेयसकरभवतिस्वःपदास्पदंचामुत्र । तदिदंयथावद्ब्राह्माचारावगमपूर्वकाचरणमृतेनसुलभं सदाचारोप्याह्निकप्रमाणनिबंधैकवेद्यइत्यन्योन्यसंबद्धत्वादत्यंतावश्यकीतज्ज्ञानापेक्षा । आचाराशसकाविद्यन्तेयद्यपिभूयिष्ठाआह्निकग्रंथास्तथापिनैकेनपुंसानेकेपासग्रहालोचनपरस्परविसंवादमार्जनादिशक्यमिति श्रीमद्वाराणसीक्षेत्रमंडनायमानश्रीमन्नारायणभट्टपौत्रेणलक्ष्मणभट्टत्रिदुपाखिलाह्निक-

निर्णायकप्रमाणसमुच्चयात्मकोयंग्रंथोन्यरचि । सोयंभूयसायासेनसंपाद्ययथामतिसंशोध्यानंक्यचप्रकाशितोस्माभिरधुना । अस्यादर्शपुस्तकेष्वेकं गोमांतकांतर्गतमाशेलग्रामवासिभिः वे. शा. सं. वासुदेवशास्त्रिधूपकरैर्दत्तमाद्यंतेपद्धागरहितमंतरांतरात्रुटियुङ्नातिशुद्धंच । द्वितीयंश्रीकाशीक्षेत्रवासिभिः वे. शा. सं. वायुरामचंद्रदीक्षितजडेइत्याख्ययाप्रसिद्धैर्दत्तंपांक्तंनातिशुद्धंचेत्युभाभ्यांप्रतिस्खलंपरस्परविसदृशाभ्यामप्यस्मत्पुस्तकंसंवाद्ययथाकथंचित्संस्कृत्यप्रकाशितमिमंग्रंथंनिसर्गदयालवोविद्वांसोत्रत्यानि शोधनावसरेमानुपशेमुषीसुलभानिस्खलितानिपरिशोध्यानेनाभिनवग्रंथरत्नेनस्वीयस्वीयभारतीकोशोदवसितानिमंडयंत्वित्याशास्ते—

विद्वदेकांतवशंवदःपणशीकरोवासुदेवशर्मा ।

आचाररत्नविषयानुक्रमणिका ।

विषयाः	पत्रं
मंगलाचरणम्	१
परिभाषा	१
उपवीतविचारः	२
ऊर्ध्वपुण्ड्रलक्षणम्	२
उपवीतमानम्	२
उपवीतस्यैकधागरोहणेप्रायश्चित्तम्	३
उत्तरीयविचारः	३
आचमनम्	३
प्राणायामः	३
विण्मूत्रविधिः	४
अर्घपात्रादिपात्रस्थविचारः ...	४
दन्तधावनविचारः	४

विषयाः	पत्रं
सङ्कल्पनिर्णय	४
नित्यकर्मसंख्या	४
ग्रामेगव्यूतक्षेपपर्यन्तानि ...	५
प्रौढपादलक्षणम्	५
शुक्लादावन्येनशतंजीवेतित्रिकथनम्	५
रात्रिशरीरमर्दनविचारः... ..	५
दीर्घायुष्यायापर्जनम्	५
मौनस्थानानि	५
कर्मकर्तुर्दिङ्नियम	६
मुख्यकालासंभवेगौणकालानुज्ञा	६
रात्रावपिविहितकर्माणि ...	६
अन्यद्वादरवादयुप कालेपिकर्म	६

विषयाः	पत्रं
स्नानोत्तरकर्माभ्यंगचरणानुज्ञा ...	६
प्रधानांगादरयादिविचारः ...	६
वारिधारयाकर्मनिषेध ...	७
दक्षिणबाहूद्धारविचार ...	७
जपकालेऽसंभाष्या	७
तत्कालव्यापिनीतिथिविचारः ...	७
एकद्वित्र्यह मुकर्मलोपेप्रायश्चित्तम्	७
गृहिणाकर्तव्यानि	७
द्वारदेशेरंगवल्यादिकरणम् ...	७
मार्जनीचुल्लपाषाण्यवत्रिकमणीयानि	७
अग्निमाह्मणगोऽनन्तरागमनीयाः	७
पादप्रक्षालनविधिस्थानानि ...	७

विषयाः	पत्रं
देशपरत्वेनाचारभेद ...	७
अथाह्निकम्	८
ब्राह्ममुहूर्तलक्षणम्	८
मातृपित्रादिनमनम्	८
अभिवादाभिवादनविचारः ...	८
वामपाणिपादचापल्यादिनिषेध	८
मातृपित्रादिभि कलहनिषेध ...	९
पापगंधाघ्राणादौप्रायश्चित्तम् ...	९
प्रात स्मरणादि	९
बहिर्विहार मलमूत्रोत्सर्गविचार	१०
शौचेप्राणायामः	१०
शौचकालेउपवीतधारणविचारः	११

विषयाः	पत्रं
कर्णोपवीतरशनेत्रायश्चित्तम्	११
शौचस्थलविचारः	११
शुद्धिपक्षाणि	१२
शौचेउपानद्धारणनिषेधः ...	१२
दिन-रात्रि-संध्याकालविचारः	१२
श्रुतिस्मृतिविरोधेश्रुतेःप्रामाण्यम्	१२-५८
प्राणाभ्यंगात्पुरमूत्रपुरीषोत्सर्ग-निषेधः	१२
अभ्यंगलक्षणम्	१२
मक्षमूत्रंविनाभुक्तौमलोत्सर्गेचप्राय०	१२
देवोद्यानेमूत्रोत्सारेदंडः ...	१३
बालादीनामेतेनियमाः ...	१३
शौचविचारः	१३
शौचैकृतिविशेषादोषाणाः ...	१३
गृहिब्रह्मचार्यादिभेदेनशौचम् ...	१४
आतुरस्त्रीशूद्रादिशौचम् ...	१४
संध्यालेपसंबंधाच्छौचम् ...	१४

विषयाः	पत्रं
नाभेरूर्ध्वंदशहस्तोऽधस्तुजानुः...	१४
पादप्रक्षालननिर्णयः	१५
गंडूषदेहशा	१५
नृणांद्वादशमलाः	१५
शौचनियमातिक्रमेप्रायश्चित्तम्...	१५
आचमनविचारः	१५
हस्तार्तित्राह्मादितीर्थानि ...	१६
सव्योपवीतीदक्षहस्तेफलाधिक्यम्	१६
घृतब्रह्मग्रंथिपवित्रोनाचामेत् ...	१६
आचमनेजलप्रमाणम्	१६
गोकर्णाकृतिहस्तेनाचमनम् ...	१६
आचमनेशीर्षण्यानांस्रानांस्पर्शः	१७
उपरशौदश-शंखादिमतभेदौ	१७-१८
व्याघ्रादमतेनाचमनम् ...	१७
गायत्रीमादैर्व्याहृतिभिर्वाचमनम्	१७
आचमननिमित्तानि	१८
रौद्रपित्र्यागुरुमंत्रांतेऽप्रसार्शः ...	१८

विषयाः	पत्रं
आचमनासंभवेकर्णस्पर्शः ...	१९
द्विर्त्रिराचमननिमित्तानि ...	१९
कालतआचमनापवादः... ...	१९
महानिशालक्षणम्	२०
निमित्तेष्यनाचमनेप्रायश्चित्तम् ...	२०
आचमनापवादः	२०
आचमननिषेधः	२०
यज्ञोपवीतेनस्पृष्टविचारः	२०
आचांतेष्यशुचित्वम्	२१
अनुच्छिष्टस्थलानि	२१
अलाब्वादियतिपात्राणि... ...	२१
यतेःपरदत्तोदकेनाचमनम् ...	२१
दंतधावनम्	२१
दंतधावनकाष्ठानि	२१
निषिद्धकाष्ठानि...	२२
दंतधावनेनिषिद्धदिनानि ...	२२
विहितनिषिद्धानिकाष्ठानि ...	२२

विषयाः	पत्रं
प्रोषितभर्तृकायारजस्वलायाश्चदंत धावन निषेधः	२२
कर्तुर्नियमाःप्रतिनिधेरविस्युः ...	२२
दंतधावननिषेधेपिजिह्वोल्लेख्या ...	२३
उपःपानलक्षणम्	२३
पुंड्रधारणम्	२३
आज्यावलोकनम्	२३
कुशविचारः	२३
पवित्रकरणप्रकारः	२३
वृत्तग्रंथिब्रह्मग्रंथिलक्षणम् ...	२४
पवित्रस्यमंत्रवद्धारणम् ...	२४
पवित्रेदर्भसंख्या	२४
हेम-रजत-खड्गधारणविचारः ...	२४
लोहत्रयधारणविचारः ...	२४
रक्षार्थमंगुलीयकम्	२५
माणिक्यादिरत्नखचितांगुलीयकधारणम्	२५

विषयाः	पत्रं
कुशग्रहणविचारः	२५
कुशानांसमूलनिर्मूलग्रहणनिर्णयः	२५
शमेष्यादर्भाः	२५
दर्भग्रहणमंत्रः	२६
दशविधादर्भाः	२६
गोरोमकृतपवित्रधारणम् ...	२६
प्रातःस्नानम्	२६
तर्पणतृप्तकाणामशिरस्कंस्नानम् ...	२६
उपःकालस्वरूपम्	२७
आश्रमभेदेनप्रातर्मध्याह्नत्रिपवण-स्नानविचारः	२७
कंठस्नानमातुरादीनाम्	२७
नदीस्नानप्रशंसा	२७
महानदीपुरुषमुद्रगासुविशेषः ...	२७
पारक्यजलाशयस्नानेमृत्पिंडोद्धारः	२७
स्नानेनिषिद्धजलानि	२८
रजस्वलास्नुनदीपुनस्नानम् ...	२८

विषयाः	पत्रं
नदीलक्षणम्	२८
महानदीपरिगणनम्	२८
रजस्वलास्नपिनोत्सर्जनादौस्नाननिषेध.	२८
रात्रौनद्यादिस्नाननिषेधः ...	२८
मंगलेषुविहितनिषिद्धस्नानानि ...	२९
नित्यस्नानेतिथ्यादिनविचार्यम्...	२९
द्विवास.स्नानमेकवाससाच ...	२९
स्नानेमृदादिसंभाराः	२९
शिखाबंधः	२९
स्रोतोभिमुखंसूर्याभिमुखंवास्नानम्	२९
गृहेगृहमुखंस्नानम्	३०
स्नानकालेकर्णनासादिनिरोधः	३०
स्नानकालेगंगादिस्मरणम् ...	३०
परिशिष्टोक्त.स्नानविधिः ...	३०
शंखमुद्रालक्षणम्	३०
योनिमुद्रालक्षणम्	३०
असामर्थ्येमंत्रस्नानप्रकारः ...	३०

विषयाः	पत्रं
कुशप्रतिकृतिद्वारास्नानम् ...	३१
स्नानांगतर्पणविचारः	३१
नित्येतिलनिषेधः	३१
निवीतस्थलानि...	३२
दर्भत्यागस्थलानि	३२
स्नानलोपेप्रायश्चित्तम्	३२
स्नानोत्तरंकृत्यम्	३२
पुनःस्नानहेतून्यस्पृश्यवस्तूनि ...	३२
स्नानवस्त्रेणनांगमार्जनम् ...	३२
वस्त्रधारणविचारः	३२
वस्त्रधारणेमंत्राः	३२
वर्णपरत्वेनवस्त्रवर्णाः	३३
निषिद्धवस्त्राणि	३३
विधवायानीलीधारणनिषेधः ...	३३
नीलवस्त्रनिषेधः	३३
धौतवस्त्रप्रागग्रमुदग्भंवाप्रसारयेत्	३३
क्षाणक्षौमादिधारणम्	३३

विषयाः	पत्रं
उत्तरीयलक्षणम्	३३
उत्तरीयस्थानेतृतीयंयज्ञोपवीतम्	३४
कच्छविचारः	३४
तिलकविचारः	३४
त्रिपुंड्रविचारः	३४
ऊर्ध्वपुंड्रविचारः	३५
गोपीचंदनाद्याधार्यामृदः ...	३५
जलेनापितिलकोमृद्रसासंभवे	३५
तिलकप्रमाणानि	३५
कर्मभेदेनतिलकभेदः	३६
ग्राह्यंभस्म	३६
भस्मधारणेमंत्राः	३६
शंखचक्रादिमृत्तिलकाः	३६
उपासनाभेदेनतिलकभेदाः ...	३६
तप्तमुद्राधारणविचारः	३७
संध्यानिर्णयः	३७
यथाकालेजलाभावेधूल्यार्घ्यदानम्	३७

विषयाः	पत्रं
संध्याप्रशंसा	३८
संध्यास्वरूपम्	३८
आसननिर्णयः	३८
प्राणायामनिर्वचनम्	३९
पूरक-कुंभक-रेचकलक्षणम् ...	३९
मात्रास्वरूपम्	३९
नासिकाधारणेगुण्यः	४०
प्रणवस्वरविचारः	४०
ऋष्यादिस्मरणविचारः ... :::	४०
व्याहृतीनामुपयः	४०
न्यासविचारः	४०
संध्यायांजलग्रहणविचारः ...	४०
मार्जनम्	४०
मंत्राचमनम्	४१
नवर्चाभिर्द्वितीयंमार्जनम्... ...	४१
अघमर्षणम् ... ::: ...	४१
सूर्यार्घ्यदानम्	४१

विषयाः	पत्रं
संध्याभेदेनार्घ्यभेदाः	४२
अर्घ्योत्तरंकृत्तिर्पणम्	४२
गायत्रीस्वरूपम्	४२–४४
गायत्र्याश्चतुर्थपादः	४२
आत्मरक्षा	४२
प्रणवन्यासः	४२
महाव्याहृतिन्यासः	४२
अक्षरन्यासः	४३
पदन्यासः	४३
पादन्यासः	४३
अक्षरदेवताः	४३
मुद्राप्रकारः	४३
गायत्रीजपप्रकारः	४४
जपस्थानानि	४५
जपकालेऽदर्शनीयानि	४५
जपगताविधिभेदाः	४५
जपमालाविचारः	४६

विषयाः	पत्रं
मालासंस्कारविधिः	४६
अमाह्यामालाः	४६
अंगुलिभिर्जपप्रकारः	४७
विधानांतरम्	४७
गायत्रीतर्पणम्	४७
गायत्रीपुरश्चरणम्	४७
पुरश्चरणप्रयोगः	४८
उपस्थानम्	४८
अभिवादनम्	४९
नामविचारः	४९
उत्तरकृत्यम्	४९
संध्यायाउक्तकालातिक्रमेप्रायश्चित्तम्	४९
रात्रिप्रहरपर्यंतंदिवाकर्माभ्यनुज्ञा	५०
औपासनहोमनिर्णयः ...	५०
औपासनहोमः	५०
अन्यकर्तृकहोमेविशेषः ...	५१
अनुदितादिलक्षणम्	५१

विषयाः	पत्रं
अनुदितहोमिनोगौणकालः ...	५१
होमेमुख्यगौणकालावाह ...	५१
होमकालातिक्रमेप्रायश्चित्तम्	५१–५२
अर्धाधानिनोहोमक्रमः ...	५२
सुसमिद्धेग्नौहोमविधानम् ...	५२
अग्नियमनसाधनानि	५२
होमद्रव्याणि	५२
आहुतिमानम्	५२
आपत्कालेहोमप्रकारः ...	५२
समस्तहोमः	५२
पुनराधानप्रसंगाः	५२
औपासनविच्छेदेप्रायश्चित्तम् ...	५३
ग्रामसीमालक्षणम्	५३
ब्रह्मचारिणोऽग्निकार्यम्	५३
अग्निकार्यलोपेप्रायश्चित्तम् ...	५३
ऋत्विजोवियमाः	५३
व्रतिनामभक्ष्यवस्तूनि	५

विषयाः	पत्रं
दिनद्वितीयेदेवपूजापंचमेवा	५४–७१
नित्यदानम्	५४
शुभवस्त्रालंभः...	५४
तृतीयभागेदेवादिदर्शनानि ...	५४
चतुर्थभागेमध्याह्नस्नानम् ...	५४
मृदास्नानेनिषिद्धदिनानि ...	५४
गोमयस्नानम्	५५
बौधायनोक्त स्नानविधिः ...	५५
कात्यायनोक्त स्नानविधिः ...	५५
आश्वलायनपरिशिष्टोक्तंस्नानम्	५५
पाद्मभविष्योक्त स्नानविधिः ...	५५
स्नानगताभेदा	५६
अनेकस्नानानांयुगपत्प्राप्तौव्यवस्था	५६
स्नाननिमित्तानि...	५६
अंजलपरिगणनम्	५६
एकशरावेकपाषाणयोर्भाडालोपवेशे	५७
स्पृष्टास्पृष्टिविचारः	५७
रात्रिस्नानेविशेषः	५७

विषयाः	पत्रं
रजस्वलयाआतुरायाःशुद्धिः ...	५८
आमलकस्नानम्	५८
अभ्ययस्नानम् १२–	५८
तिथ्यृक्षपरत्वेनविहितनिषिद्धदिनानि	५८
उष्णोदकस्नानम्	५९
मंत्रस्नानंवह्वृचपरिशिष्टे ...	५९
विभूतिस्नानम्	५९
स्नानप्रकार क्रियासारे	६०
पंचमहायज्ञाः	६०
ब्रह्मयज्ञ.	६०
तद्विधिस्तैत्तिरीयकश्रुतौ ...	६०
पंचयज्ञाकरणेप्रायश्चित्तम् ...	६१
पंचमहायज्ञाधिकारिणः.... ...	६२
तर्पणेतिलग्रहणविचारः ...	६२
मन्वाद्यायुगाद्याश्च	६३
कस्मिन्संस्कारेकतिदिनंतर्पणंवर्ज्यम्	६३
आर्द्रवासवाप्यभ स्थेनकर्मकार्यम्	६३
उद्धृतजलेनतर्पणेविशेषः ...	६३

विषयाः	पत्रं
पितृगाथायांतर्पणप्रशंसा ...	६४
पितृगणक्रमोवोपदेवस्य ...	६४
अग्रसविस्तरोनिर्णयः	६४
विधवाकर्तृकतर्पणम्	६५
तर्पणेदर्भा कथंग्राह्याः	६५
अंजलिसंख्या	६५
प्रत्यंजलिमंत्रावृत्तिः	६६
अंजलिनातर्पणनिर्णयः	६६
तर्पणेविभक्तिविचारः	६६
संवुद्ध्यतेनद्वितीयातेनवातर्पणम्	६७
नामग्राहंवौधायनः	६७
काङ्क्ष्यादितर्पणम्	६८
यमतर्पणेविशेषः	६८
भीष्मतर्पणम्	६८
मोदप्रमोदादितर्पणम्	६९
श्राद्धांगतर्पणम्	६९
वस्त्रनिष्पीडनविचारः	७०

विषयाः	पत्रं
मध्याह्नसंध्या	७०
देवपूजा ५४–	७१
पूजापात्राणि	७१
पूजोपचारक्रमः	७१
देवप्रबोधनम्	७२
प्रतिमाविचारः	७२
मधुपर्कमानम्	७३
देवानास्नानप्रकारः	७३
ताम्रप्रतिमायामपिगव्याभिषेकः	७३
स्नानादिपुद्रव्यमानम्	७३
महाभिषेकस्नानमानम्	७३
माषपलादिमानम्	७३
वस्त्रादिविचारः	७३
यज्ञकर्दमः	७४
पुष्पार्पणविचारः	७४
निषिद्धपुष्पाणि	७४
पर्युषितविचारः...	७४

विषयाः	पत्रं
तुलसीग्रहणादौविशेषः ...	७५
अधोमुखपुष्पार्पणनिषेधः ...	७६
लक्षपूजायांविशेषः	७६
विल्वपत्रेषुविशेषः	७६
धूपविचारः	७६
विजयधूपः	७६
दीपविचारः	७६
वर्त्त्यादिप्रमाणम्	७७
दीपनिर्वाणनिषेधः	७७
नैवेद्यविचारः	७७
पक्वनैवेद्यवैश्वदेवस्यपूर्वापरीभावः	७७
नैवेद्यांशदानम्	७७
फलताम्बूलदानम्	७७
प्रणामविधिः	७७
प्रदक्षिणाविधिः	७८
गीतवादित्रादिदानम्	७८
शंखपूजा	७८

विषयाः	पत्रं
शंखमानम्	७८
प्रस्थप्रमाणम्	७८
पूजाधिकारिणः	७८
क्षत्रियादीनांपूजाप्रकारः ...	७८
स्त्रीशूद्रविषयेविचारः	७८
देवप्रतिष्ठाधिकारिणः	७८
श्रौतार्चनम्	७९
न्यासादिविधिः	७९
पुरुषसूक्तन्यासः	८०
षडंगन्यासः	८०
पुरुषसूक्तेनार्चनक्रमः	८०
पूजांतेहोमः	८०
ब्रह्मविष्णुदुर्गादिपूजाविचारः ...	८०
पौराणक्रमः	८१
आगमोक्तक्रमः	८१
पंचायतनस्थापनविचारः ...	८१
पूज्यपूजकांतरालंग्राची	८१

विषयाः	पत्रं
पूजनेदिङ्नियमः	८१
सूर्यपूजा	८१
परार्थपूजाजपादौदोषः ...	८१
पुष्पविचारः	८२
गणेशपूजा	८२
पुष्पाध्यायोदेवीपुराणीयः ...	८२
शिवपूजा	८३
रुद्राक्षधारणविचारः	८३
शिवमूर्तिलिंगादिविचारः ...	८४
शिवनाभिर्लिंगलक्षणम्	८४
लिंगमानम्	८४
बौधायनोक्तशिवपूजा	८४
शिवपूजायांविशेषः	८५
विहितनिषिद्धपुष्पाणि	८५
धूपविचारः	८६
प्रदक्षिणाप्रमाणम्	८६
सोममूत्रविचारः	८६

विषयाः	पत्रं
शिवनिर्माल्यलंघननिषेधः ...	८६
पुरुषार्थप्रबोधेचतुर्धाव्यवस्था ...	८७
नैवेद्यग्रहणाग्रहणविचारः ...	८७
चंडाधिकारः	८७
विष्णुनैवेद्योग्राह्यः	८८
विष्णुपूजा	८८
विष्णुपूजाप्रशंसा	८८
केशवादिचतुर्विंशतिमूर्तयः ...	८८
पंचायतनपूजासारेशालग्रामपूजा-विचारः	८९
पूजालोपेदिनसंख्ययार्चाशुद्धिः	८९
चंद्रिकायांविष्णुपूजाविधिः ...	८९
अत्रपुष्पाणि	९०
द्वात्रिंशदपराधाः	९०
प्रकारांतरेणद्वात्रिंशदपराधाः ...	९१
शालग्रामचिह्नविशेषेणमूर्तयः	९१
पूज्यशालिग्रामपरिगणनम् ...	९१

विषयाः	पत्रं
लाज्याशिला	९२
द्वारवतीचक्रमाहात्म्यम् ...	९२
शालग्रामतीर्थप्रशंसा	९३
तीर्थग्रहणविचारः	९३
वैश्वदेवः	९३
विभक्तावभक्तानांवैश्वदेवविचारः	९४
वैश्वदेवाहुतिमानम्	९४
वैश्वदेवकालः	९५
असंहितान्यनाहिताग्निभिन्नता	९५
अग्रनित्यश्राद्धविचारः ...	९५।१००
वैश्वदेवश्राद्धयोःपाकविचारः ...	९५
पाकनिष्पत्तिविचारः	९५
वैश्वदेवेऽग्निनिर्णयः	९६
स्मार्तपाकपक्षेविशेषः	९६
अन्नाभावेतंदुलाभ्यनुज्ञा ...	९६
प्रोक्षितेषिवैश्वदेवः	९६
हविष्यानि	९७

विषयाः	पत्रं
फलाहारेणापिवैश्वदेवः	९७
फलमूलरसादिभिरपि	९७
वैश्वदेवेनिषिद्धद्रव्याणि... ...	९७
क्षारपरिगणनम्	९७
उत्तानहस्तेनहवनम्	९७
भूतयज्ञः	९८
पक्ष्याअप्यधिकारः	९८
विष्णुपुराणेऽन्येपिबलयः ...	९८
बलिदेशसंस्कारः	९९
बलिहरणेविशेषः	९९
काकबलिः	९९
बलिहरणभेदाः...	९९
बल्युद्धरणम्	९९
पितृयज्ञः	९९
नित्यश्राद्धम्	१००
स्वधापितृभ्यदत्तत्रगोत्रायूहः	१००
इदंतत्रापि	१००

विषयाः	पत्रं
नित्यश्राद्धनेदेशकालादिनियमः	१००
स्वीयाहारेणापिश्राद्धंभवति ...	१००
नांदीश्राद्धोक्तरवर्ज्यानि... ...	१००
नित्यश्राद्धविधिः	१०१
अत्रवर्ज्यकृत्यानि	१०१
नित्यश्राद्धलोपेप्रायश्चित्तम् ...	१०१
नित्यश्राद्धप्रयोगः	१०१
मनुष्ययज्ञः	१०२
अतिथिप्रतीक्षा...	१०२
अतिथिलक्षणम्	१०२
अतिथिपूजामंत्रः	१०२
ग्रास–अग्र–पुष्कलानांप्रमाणम्...	१०२
संन्यासिनेभिक्षादानप्रकारः ...	१०३
गोग्राससमर्पणम्	१०३
भोजनविधिः	१०३
पंचार्द्रंभोजनंचरेत्	१०३
भोजनशालायामाचमननिषेधः	१०३

विषयाः	पत्रं
भोजनपात्राणि	१०३
निषिद्धपात्राणि...	१०३
तिथिपरत्वेनपात्रविचारः ...	१०४
शूद्रस्पृतपात्रावलिनिषेधः ...	१०४
भोजनेदिगादिनियमाः	१०४
मंडलविचारः	१०४
आसंद्यांपात्रस्थापनविचारः ...	१०४
भोजनकालविचारः	१०५
दिवाभोजनद्वयविचारः... ...	१०५
ब्रह्मचारिगृहिणोर्द्विर्भोजनम् ...	१०५
द्वादश्यादौवर्ज्यानि	१०५
तिथिपरत्वेनभोजनविचारः ...	१०५
उपवासेश्राद्धशेषावग्रहणम् ...	१०६
भक्ष्याभक्ष्यविचारः	१०६
वर्ज्यान्नानांविचारः	१०६
स्वसुतान्नभोजननिषेधः ...	१०६
निषिद्धभोजनेऽविधानोक्तानिप्राय-श्चित्तानि	१०६

विषयाः	पत्रं
शूद्रादेरपिप्राह्यवस्तूनि	१०७
पुनर्निषिद्धान्नानि	१०७
घृततैलपक्वान्यापणादपिग्राह्याणि	१०७
पित्रानुच्छिष्टंग्राह्यम्	१०७
केशकीटपिपीलिकाद्युपहृतंलाज्यम्	१०८
विशेषान्नेकाकालुपहतेप्रदाणानुज्ञा	१०८
पलांड्वादिनिषिद्धवर्गः	१०८
यतिवतिवर्ज्यानि	१०९
तालफलादिभक्षणनिषेधः ...	१०९
विद्वज्जानांतंडुलीयादीनांनिषेधः	१०९
आज्यपात्रस्थंतक्रंताम्रस्थंगव्यंच- निषिद्धम्	१०९
श्रुतवचोभिहतादिनिषिद्धम् ...	१०९
पिण्याकाद्युद्धृतसारंनिषिद्धम् ...	१०९
आमिषगणः	१०९
अनिर्देशंगव्यादिवर्ज्यम्	११०
सौरकारभोजननिषेधः	११०

विषयाः	पत्रं
धात्रीफलंरात्रौवर्ज्यम्	११०
दिवाकपित्थंरात्रौदधिचवर्ज्यम्...	११०
तिथिपरत्वेनवर्ज्यानि	११०
वारपरत्वेनवर्ज्यानि	११०
परिवेषणम्	११०
हस्तेनाऽपरिवेषणीयानि ...	११०
आयसपात्रनिषेधः	११०
एकपंक्तौवैषम्यकरणनिषेधः ...	११०
परिवेष्टुरुच्छिष्टस्पर्शे	११०
आपोशनप्राणाहुत्यादि	१११
आपोशनमृतेपिभक्ष्याणि ...	१११
रसधान्यादिलक्षणम्	१११
चित्राहुतिबलिदानादि	१११
तत्रनमःस्वाहाकारादिविचारः ...	१११
श्राद्धेचित्राहुतिनिषेधः ...	१११
चित्राहुतिपुनिषिद्धपदार्थाः ...	१११
वल्युद्धरणावश्यकता	१११

विषयाः	पत्रं
आपोशनविचारः	१११
पात्रधारणेविशेषः	११२
भोजनकालेमौनविचारः ...	११२
प्राणाहुतिकल्पोगोभिलीयः ...	११२
प्राणाहुतिष्वंगुलिविचारः ...	११२
बौधायनीयःप्राणाहुतिकल्पः ...	११२
भोजनविचारः	११३
दर्भपाणिर्नभुंजीत	११३
भोजनकालेनिषिद्धानि	११३
खादितार्धंमोदकादिनपुनःखादेत्	१११
सघृतभोजनप्रशंसा	११३
भोजनेनिषिद्धस्थानानि... ...	११३
ग्रासशेषंपीतशेषंचवर्ज्यम् ...	११३
भोजनकालेस्पर्शास्पर्शेनिर्णयः ...	११३
दक्षहस्तान्वारब्धवामेनजलपानम्	११४
भोजनेग्रासप्रमाणम्	११४
भार्ययासहभोजननिषेधः ...	११४

विषयाः	पत्रं
विवाहेपथियात्रायांननिषेधः ...	११४
पंक्तिभेदावश्यकता	११४
उदक्यादिशब्दश्रवणनिषेधः ...	११४
घरट्टोलूखलशब्दाद्यश्राव्यम् ...	११५
भोजनकालेदीपनाशेविचारः ...	११५
भोजनेजठरमर्धंपूरयेत्	११५
भोजनेनिःशेषशेषाःपदार्थाः	११५
उत्तरापोशनम्	११५
दंतलग्नोद्धरणविचारः	११५
कांस्यपात्रेनगंडूषत्यागः ...	११५
भोजनशालायामाचमननिषेधः...	११५
शतपदगमनम्	११५
तांबूलभक्षणविचारः	११६
केवलपूगभक्षणंवर्ज्यम्	११६
श्राद्धदिनेतांबूलादिवर्ज्यानि ...	११६
दिनशेषभागकृत्यम्	११६
सायंसंध्याविचारः	११६

विषयाः	पत्रं
श्राद्धभोक्तुः सायंसंध्यानिषेधः ...	११६
श्राद्धभुजांप्रायश्चित्तम्	११७
सायंवैश्वदेवविचारः	११७
रात्रे प्रथमयामेकार्याणि ...	११७
शयनविचारः	११७
रात्रौकीदृशीशयनेयोग्या ...	११७
शयनेदिग्विचारः	११८
स्नापकाऽशिरोदेशेस्थाप्यानि ...	११७
शयनेजाप्यम्	११७।११८

विषयाः	पत्रं
स्वापेनिषिद्धस्थलानि	११८
संभोगेनिषिद्धदेशदिनानि ...	११८
तत्रवर्ज्यदिनानि	११८
पर्वाणिचतुर्दश्यादीनि	११८
निषिद्धवारनक्षत्रादि	११८
ऋतुदिननियमः	११९
आपदिपर्वस्वपिसंभोगाभ्यनुज्ञा...	११९
संभोगोत्तरंशौचविचारः ...	११९
श्रामहेमश्राद्धादौनश्राद्धनियमाः	११९

विषयाः	पत्रं
अनृतावपिस्त्रीसंभोगेक्वचिदनुज्ञा	११९
गम्याःस्त्रियः	११९
अगम्याःस्त्रियः...	१२०
गर्भिणीपतिवर्ज्यानि	१२०
सुखसंभोगयोगः	१२०
भार्याप्रशंसा	१२०
दु.स्वप्नशांतिः	१२०
आशौचेकार्याकार्यनिर्णयः ...	१२०
अत्रसंध्याहोमादेर्निर्णयः ...	१२०

विषयाः	पत्रं
आशौचेपंचमहायज्ञनिर्णयः ...	१२१
आशौचेवैश्वदेवविचारः ...	१२१
आशौचिनोदीक्षाश्रौतयोर्विचारः	१२१
ऋत्विजांदीक्षितानांनाशौचम् ...	१२१
श्रौतेविशेषः	१२२
भोजनोत्तरंकर्तव्याकर्तव्ये ...	१२२
एकादशाहेप्रातःसंध्यासूतकिवत्	१२२
ग्रंथोपसंहारः	१२२

॥ इत्याचाररत्नगतेविषयानुक्रमणिका ॥

श्रीगणेशायनमः ॥ श्रीवेदपुरुषायनमः ॥ **मंगलाचरणम्** । सिंदूरारुणगंडदेवंविघ्नौघतिमिरमार्तंडम् । नृत्यच्छुंडादंडंसिद्धीशंगणपतिं वदे ॥ १ ॥ सतिमिरजगदुद्द्योतद्युमणेर्वंशांकुरःश्रीमत् । तज्जयतिरामनामरजनिचराणांविभेदनंधाम ॥ २ ॥ नारायणंराजभिरर्चितांघ्रिनमामिहंसीवयदीयकीर्तिः । तेजोंतरात्तन्महसांविभेदंस्वस्यापिकीर्त्यैतरतस्तमाह ॥ ३ ॥ विद्याप्रद्योतनोद्द्योतखद्योतीकृतवादिनम् । पितरं रामकृष्णाख्यंवंदेस्नेहभरान्वितम् ॥ ४ ॥ स्पर्धामग्निनिवेशादुमयाप्राप्तामुमासमाख्यातः । द्युनदीनिर्मलचित्तांमातरमेकांसतींसदावंदे ॥ ५ ॥ येनोद्धृतास्वस्यकुलप्रतिष्ठामहावराहेणमहीवतोयात् । गगेवविद्याभिससारयस्माद्दिवाकरंनौमितमग्रजाग्र्यम् ॥ ६ ॥ अधीत्यलक्ष्मणाख्येनकमलाकरसोदरात् । आचाररत्नंसुधियाययामतिवितन्यते ॥ ७ ॥ ॥ **तत्रपरिभाषा** ॥ ॥ तत्रविधिरूपआचारेशुचित्वमधिकारितावच्छेदकम्—सदाकुर्याद्धर्मकार्यमापद्यपिशुचिर्नर इतिटोडरानंदेससर्पिस्मृतेः । श्रुतिस्मृत्युदितंकर्मनकुर्यादशुचिःक्वचिदितिप्रयोगपारिजातेभृगूक्तेश्च । अतएवत्रिकांडमंडनः—पतितोनैवकुर्वीतशास्त्रीयंकर्मकिंचन । अद्विजेष्वेवयोधर्मोधर्मःसाधारणोऽपिवा । सत्यंवक्तव्यमित्यादि.पतितोऽपिसमाचरेत् । नन्वेवंपतितस्यस्नानसंध्यादिनस्यात् । स्यात् । सचतेपूदकोपस्पर्शीशुद्ध्येदितिगौतमोक्तेः पतितस्यस्नानांगमंत्रप्राप्तिः सांगाधिकारन्यायात् । नचमंत्रहीनंस्नानम् । तद्राहित्यविध्यभावात् । अतएवाशौचेपिसमंत्रकंस्नानंभोजनंचभवतीत्युक्तं स्मृत्यर्थसारे । शुचिनाकर्मकर्तव्यमित्यस्यसर्वकर्मसाधारण्याच्छौचार्थसंध्याप्राप्तिः । संध्याहीनोऽशुचिर्नित्यमनर्हःसर्वकर्मस्वितिस्मृतेः । अत्रसंध्यापदंसर्वसंध्यापरमविशेषादितिविज्ञानेश्वरः । नचद्विजातिकर्मभ्योहानिः पतनमितिवचनान्नसंध्येतियुक्तम् । पतितस्यव्रतोपदेशात्तदंगत्वेनैवसंध्यादिप्राप्तेः । वचनंत्विज्याध्ययनादिनिवृत्त्यर्थमितिविज्ञानेश्वरः । तेनव्रतारंभात्प्राक्पतितावस्थायांसंध्यादि नेतिसिद्धम् । त्रिकांडमंडनः—पतितोऽपिनिषिद्धानांवर्जनेऽधिकृतोभवेदिति । केचितु—अदीक्षितस्यवामोरुकृतंसर्वंनिरर्थकमितिपाद्मात्कार्तिकमाहात्म्या

दागमदीक्षाप्यधिकारिविशेषणमित्याहुः । तन्न । उपक्रमानुरोधेनतस्यकार्तिकव्रतमात्रपरत्वात् । अनर्थकंपरमपुरुषार्थसाधनंनेत्याचारचं द्रोदयः। शक्तिश्चाधिकारिविशेषणम् । तदभावेऽन्येनकारणीयं पाष्ठन्यायात् ।—यथाकथंचिन्नित्यानिशक्त्यवस्थानुरूपतः । येनकेनापिकार्याणिनैवनित्यानिलोपयेदिति **माधवीयेबौधायनोक्तेश्च** । यथाकथंचित्किंचिदंगहीनेनापीत्यर्थः । येनकेनापि स्वतःपरतोवेत्यर्थः । नित्यानीतिनैमित्तिकप्रारब्धकाम्योपलक्षणम् । नैत्यिकस्याप्यकरणेप्रत्यवायात् । समाप्तेःशास्त्रार्थत्वेनप्रारब्धंकाम्यंनित्यायतइतिन्यायाच्च । यत्तु—काम्येप्रतिनिधिर्नास्तिनित्येनैमित्तिकेचसइति तदनारब्धकाम्यपरम् । अन्येनाप्यसंभवेनदोषः । अत्यंतरोगयुक्तेंगेराजचौरभयादिषु । गुर्वग्निदेवकृत्येपुनित्यहानौनपापभागिति**माधवीयेशौचागमात्** । अत्रनित्यपदेनप्रारब्धकाम्यग्रहणम् । औपदेशिकनित्यग्रहेणैवसिद्धावातिदेशिकनित्यग्रहेमानाभावात् । शौचेस्नानादौचनप्रतिनिधिः । अन्यशौचेनान्यस्याप्रायत्यानपगमात् । मंत्रस्नानादिविधिवैयर्थ्यापत्तेश्च । उपवासोऽप्यधिकारिविशेषणम् । स्नानंसंध्यातर्पणादिजपहोमामरार्चनम् । उपवासवताकार्यंसायंसंध्याहुतीर्विनेति**चाराहात्** । उपवासवताऽनश्नतेत्यर्थः । उपवासोऽनशनम् । अनुवादोयम्–सायंप्रातर्द्विजातीनां उपास्यपश्चिमांसंध्यामित्यादिनैवसिद्धेरितिकेचित् । तन्न । इहवचनाभावेकर्मवैगुण्यानापत्तेः । सायंसंध्याहुत्योःपौर्वाह्णिकस्यच भोजनोत्तरपूर्वकालत्वसिद्धावपिमाध्याह्निकादेरनश्नदधिकारित्वासिद्धेश्च । इक्षुरापःफलंमूलंतांबूलंपयऔषधम् । भक्षयित्वापिकर्तव्याःस्नानदानादिकाःक्रिया इति**चतुर्विंशतिमतेस्मृत्यर्थसारे**चेक्ष्वादिपरिगणनानुपपत्तेश्च । नचायमपूर्वविधिः । रागतःप्राप्तेः । नापिभक्षयित्वैवेतिनियमः । अपिशब्दवैयर्थ्यापत्तेः । इक्ष्वादिभक्षणोत्तरमनाचम्यापिक्रियाःकार्याइतिस्मृतिरत्नावली । तन्न—आचांतःकर्मशुद्धःस्यात्तांबूलौषधजग्धिकृदितिविष्णूक्तिविरोधात् । अनाचम्येत्यध्याहारप्रसंगाच्च । तस्मादशक्तंप्रत्येतदपिशब्दादितियुक्तम् । अस्नाताशीमलंभुंक्तेअजपीपूयशोणितम् । अहुताशीकृमीन्भुङ्क्तेअदत्वाविड्विभोजनः । अजपीअदत्वेत्यत्राशीत्यनुषज्यते ।

कालिकापुराणे—जलस्थापिनरश्रेष्ठप्राशनाद्धेयजाद्दते । नित्यक्रियानिवर्तेतकाम्यनैमित्तिकैःसह । शिवपुराणे—उपवाससयुतःकर्मशिव पूजादिकंचरेत् । स्नानमप्यधिकारिविशेषणम्—स्नातोऽधिकारीभवतिदैवेपित्र्येचकर्मणि । पवित्राणांतथाजप्येदानेचविधिदर्शित इतिवर्धमान परिभाषायांविष्णूक्तेश्च । पवित्रंपुनातेर्मंत्रःपवित्रमुच्यतइतिनिरुक्तात् । अस्नात्वानाचरेत्कर्मजपहोमादिकिंचनेतिदक्षोक्तेश्च । आग्नेये— स्नानानामपिसर्वेषांवारुणेनचमानवः । कर्तुमर्हतिकर्माणिविधिवत्सर्वदाद्विजः । मार्कंडेये—शिरःस्नातस्तुकुर्वीतदैवंपित्र्यमथापिवा । आ ग्नेये—अशिरस्कंभवेत्स्नानंस्नानाशक्तौतुकर्मिणाम् । तथा—असामर्थ्याच्छरीरस्यकालशक्त्याद्यपेक्षया । मंत्रस्नानादयःपंचएकइच्छंतिसूरयः । आर्द्रेणवाससावापिमार्जनंदैहिकंविदुः । उपवीतित्वंवद्धशिखत्वंचाधिकारिविशेषणम् ।—सदोपवीतिनाभाव्यंसदावद्धशिखेनच । त्रिशिखो व्युपवीतश्चयत्करोतिनतत्कृतमितिकात्यायनोक्तेः ॥ ॥ उपवीतंद्विधा—नवसूत्रंसंस्थानविशेषश्च । तत्राद्यंशूद्रस्यनेत्युक्तंमिताक्षरा याम् । अंत्यंशूद्रस्यापिभवति । उपवीतिनाकर्मकर्तव्यमित्यस्यापिसर्वकर्मशेषत्वेनशूद्रस्याप्यदृष्टार्थकर्मण्युपवीतावश्यंभावात् । यत्तुशूद्रंप्र कृत्य—नशिखीनोपवीतीस्यान्नोचरेत्संस्कृतांगिरमितिपाद्मंतदसच्छूद्रपरमकर्मकालपरंनवसूत्रपरंवा । उपवीताद्युत्तरीयवस्त्रेणापीतिपारिजा तकल्पतरू । विश्वामित्रः—यज्ञोपवीतेद्वेधार्येश्रौतेस्मार्तेचकर्मणि । तृतीयमुत्तरीयार्थंवस्त्राभावेतदिष्यते । तृतीयमुत्तरीयार्थमित्येताव तैवानुकल्पत्वेसिद्धेवस्त्राभावइत्युक्तिरुत्तरीयाभावएवानुकल्पत्वार्था । तेनतृतीयेधृतेउत्तरीयलाभेतदपिधार्यमितिकेचित् । तन्न । एकस्यैवकदा चिदनुकल्पत्वेप्राधान्येचविरोधात् । वयंतूत्तरीयस्यसर्वकर्मार्थत्वात्प्रतिकर्मधारणानुपपत्तेश्चतदुपवीतवत्सर्वार्थंसकृदेवधार्यम् । एवंतृतीयोप वीतमपितदंगीकारेणकर्मविशेषारंभोत्तरंमुख्योत्तरीयलाभेपिनतद्ग्रहः । षाष्ठन्यायात् । नचतृतीयत्यागापत्तिः । सर्वार्थत्वेनधृतत्वात् उत्तरीय

१ रोगिणामिति पाठः । २ उत्तरीयार्थं ।

स्यसर्वदासत्त्वासंभवादितियुक्तमुत्पश्यामः । शिष्टाचारोप्येवम् । **उपवीतमुक्तंगोभिलसूत्रे**—उपवीतंकुरुतेसूत्रंवस्त्रंवाकुशरज्जुमिति । सूत्रोपवीतकरणप्रकारश्छंदोगपरिशिष्टे—शुचौदेशेशुचिःसूत्रंसंहतांगुलिमूलके । आवेष्टयपण्णवत्यातत्रिगुणीकृत्ययत्नतः । त्रिगुणीकृत्य पण्णवतित्रयंगृह्णीयादित्यर्थः । अङ्गिलगकैस्त्रिभिर्मंत्रैःप्रक्षाल्योर्ध्ववृतंत्रिवृत् । सप्रदक्षिणमावर्त्यगायत्र्यात्रिगुणीकृतम् । ततःप्रदक्षिणावर्तसमं स्यान्नवसूत्रकम् । त्रिरावेष्टयद्दृढंबद्ध्वात्रह्मविष्ण्वीश्वरान्नमेत् । यज्ञोपवीतंपरमंतिमंत्रेणधारयेत् । सूत्रंसलोमकंचेत्स्यात्ततःकृत्वाविलोमकम् । सावित्र्यादशकृत्वोद्भिर्मंत्रिताभिस्तदुक्षयेत् । विधवारचितंसूत्रमनध्यायकृतंचयत् । विच्छिन्नंवाप्यधोयातंभुक्त्वानिर्मितमुत्सृजेत् । अधःकटिदेशात् ॥ ॥ **ऊर्ध्ववृत्तलक्षणंमदनरत्ने**—करेणदक्षिणेनोर्ध्वगतेनत्रिगुणीकृतम् । वलितंमानवेशास्त्रेसूत्रमूर्ध्ववृतंस्मृतम् । **श्राद्धालोके देवलः**—यज्ञोपवीतंकुर्वीतसूत्राणिनवतंतवः । एकेनग्रंथितस्तंतुर्द्विगुणस्त्रिगुणोथवा । त्रिगुणनवतंतुकासंभवेएकेनेतिगोपालसिद्धांतः । **हरनाथीयेश्राद्धालोकेचवृद्धमनुः**—त्रिवृताग्रंथिरेकेनत्रिभिःपंचभिरेववा । एकेनैतत्प्रवरसंख्ययाग्रंथौचवेष्टनमितिहरनाथः । **रत्नावल्याम्**—यज्ञोपवीतेमौञ्ज्यांचतथाकुशपवित्रके । ब्रह्मग्रंथिंविजानीयादन्यत्रतुयथारुचि । **देवलः**—सावित्र्यात्रिवृतंकुर्यान्नवसूत्रंचतद्भवेत् । वह्नीयात्तत्सजीवंतुपितृभ्योनमइत्यथ । भ्रमदेवोक्षितव्यंस्यात्पितृणांतृप्तिदंहितत् । त्रिस्ताडयेत्करतलेदेवानांतृप्तिदंहितत् । सव्येमृदं गृहीत्वास्मिंस्थापयेद्भूरितिब्रुवन् । अभिमंत्र्याथभूरग्निश्चेतिवृत्तत्रयंत्रिभिः । हरिब्रह्मेश्वरेभ्यश्चप्रणम्यचदधात्यथ । **मनुः**—ॐकारश्चाग्निनागौच सोमःपितृप्रजापती । वायुःसूर्यःसर्वदेवाइत्याहुस्तंतुदेवताइति ॥ ॥**उपवीतमानंछंदोगपरिशिष्टे**—पृष्ठवंशेचनाभ्यांचधृतंयद्विंदतेकटिम् । तद्धार्यमुपवीतंस्यान्नातोलंबंनचोच्छ्रितम् । **देवलः**—स्तनादूर्ध्वमधोनाभेर्नकर्तव्यंकदाचन । **मदनरत्नेभृगुः**—उपवीतंवटोरेकंद्वेतथेतरयोः स्मृते । एकमेवयतीनांस्यादितिशास्त्रविनिश्चयः । इतरौगृहिवनस्थौ । यतिस्त्रिदंडी । **स्मृत्यर्थसारे**—ब्रह्मचारिणएकंस्यात्स्नातस्यद्वेबहूनिवा ।

आपस्तंबः—बहूनिवायुष्कामस्येति । हेमाद्रौभरद्वाजः—दक्षिणंबाहुमुद्धृत्यवामस्कंधेनिवेशितम् । यज्ञोपवीतमित्युक्तंदैवकार्येपुशस्यते । कंठावलंबितंचैवनाभिसूत्रंयदाभवेत् । तन्निवीतमितिख्यातंशस्तंकर्मणिमानुषे । उत्क्षिप्तेवामबाहौतुदक्षिणस्कंधमाश्रितम् । प्राचीनावीतमित्युक्तंतत्पित्र्येष्वेवकर्मसु । कृष्णभट्टीयेऽत्रिः—ऋषितर्पणचंडालभाषणेशववाहने । विण्मूत्रोत्सर्जनेक्षीणांरतिसंगेनिवीतयः । देवलः—सकृन्नोद्धरणात्तस्यप्रायश्चित्तीयतेद्विजः । आशार्के—मंत्रन्यस्तोपवीतंयन्नोद्धरेत्तत्कदाचन । मोहाद्विजस्तदुद्धृत्यपुनर्मंत्रेणधारयेत् । हेमाद्रौभृगुः—मंत्रपूतंक्षितंकार्येयस्माद्यज्ञोपवीतकम् । नोत्तारयेत्ततःप्राज्ञोयइच्छेच्छ्रेयआत्मनः । देहस्थमेवतत्क्षाल्यमुत्तार्यनकदाचन । कृष्णभट्टीयेआचारचंद्रोदयेचभृगुः—चैत्रोमैत्रःकठःकण्वश्चरकोवाजसेनकः । कंठादुत्तीर्यसूत्रंतुकुर्याद्वैक्षालनंद्विजः । ऋङ्मृचःसामगश्चैवयश्चान्योयाजुषस्तथा । कंठादुत्तार्यसूत्रंतुपुनःसंस्कारमर्हति । अभ्यंगेचोदधिस्नानेमातापित्रोःक्षयेहनि । कंठादुत्तार्यसूत्रंतुकुर्याद्वैक्षालनंद्विजः । श्राद्धालोकेयमः—श्राद्धेधावनकालेचतैलाभ्यंगादिकर्मणि । अत्रकायाद्बहिःकुर्यान्नान्यत्रेत्यब्रवीन्मनुः । अपरार्के—उपानद्यौचवासश्चधृतमन्यैर्नधारयेत् । उपवीतमलंकारंछत्रंकरकमेवच । डोडरानंदेगौतमः—उपानद्वस्त्रेतुकृतानिर्णेजनेआपदिधार्येइति । मनुः—मेखलामजिनंदंडमुपवीतंचनित्यशः । अप्सुप्रास्यविनष्टानिगृह्णीतान्यानिमंत्रतः । हारीतः—मनोव्रतपतीभिश्चतस्रआज्याहुतीर्हुत्वापुनर्यथार्थंप्रतीयादिति । यथार्थंप्रतीयात् उपनयनोक्तमार्गेणसमंत्रकंधारयेदित्यर्थः ॥ ॥ स्कंधावरोहणेप्रायश्चित्तमुक्तंभृगुणाधर्मप्रकाशे—स्कंधावरोहणे यज्ञसूत्रेत्रिःप्राणसंयमः। पदक्रूपरगतेतस्मिन्द्विपट्कंमणिबंधके । वामहस्तव्यतीतेतुतत्त्यक्त्वाधारयेन्नवम् । तस्माद्यज्ञोपवीतस्यचलनंनकदाचनेति प्रायश्चित्तंसर्वोपवीतनाशे ॥ ॥ कात्यायनवाक्येपूर्वार्धेपुरुषार्थःशिखाबंधउक्तः । उत्तरार्धेतस्यकर्मार्थतोक्ता । प्रायश्चित्तद्वयार्थमनृतवदनवर्जनवत्नतुशिखाबंधद्वयंउपवीतेऽपिभेदापत्तेरित्युक्तंप्रयोगरत्नेपितामहचरणैः । वर्धमानोप्येवम् । एतेनप्रतिकर्मशिखाबंधोऽपास्तः । या

तुस्नानकालेशिखाबंधोक्तिःसादेवान्मुक्तशिखस्यशिखाबंधार्थंनतुसतीमपिशिखांमुक्त्वापुनर्बंधनीयेत्येतदर्थमित्याचारादर्शः । शूद्रस्यत्वनियताःकेशवेपाइतिवसिष्ठोक्तेःशिखाविकल्पः । सचसदसच्छूद्रविषयत्वेनव्यवस्थितइतिशिखाबंधेपिविकल्पइतिशूद्राचारशिरोमणिः । कौमुद्यांतुकर्मकालेशूद्रस्यनशिखाबंधनियमइत्युक्तम् । सर्वेषांशिरसिक्वचित्केशसत्वेतत्रैवशिखाबंधः । सशिखवपनेनखल्वाटत्वादिनावासर्वथा कशाभोवकौशीशिखाग्रन्थियुतादक्षिणकर्णेस्थाप्येतिदिवोदासः । तथाचाचारचंद्रोदयेकाठकगृह्ये—अथचेत्प्रमादान्नशिखास्यात्त दाकौशींशिखांग्रन्थियुतांदक्षिणकर्णेनिदध्यादिति । शिखाभिन्नकेशानामपिकर्मकालेबंधः । मुक्तकेशैर्नकर्तव्यंप्रेतस्नानंविनाक्वचित् । स्नानं दानंजपंहोमंमुक्तकेशोनकारयेदितिवृद्धवसिष्ठोक्तेः । नचपूर्वार्धेप्रेतस्नानान्यस्नानएवमुक्तकेशनिषेधः । उत्तरार्धेस्नानपदवैयर्थ्यापत्तेः । स्नाने तदनुवादेदानादौतद्विधौवैरूप्यापत्तेः उत्तरार्धेएवसर्वव्रतन्निषेधेवाक्यभेदापत्तेःपूर्वार्धवैयर्थ्यापत्तेश्च । नचप्रेतस्नानपर्युदासार्थंपूर्वार्धं । आद्यपाद वैयर्थ्यापत्तेः । तेनोत्तरार्धैकवाक्यतया प्रेतस्नानान्यकर्ममात्रेमुक्तकेशनिषेधः । नचोत्तरार्धवैयर्थ्यम् । सर्वकर्मप्राप्त्यर्थत्वात् । नचकेशपदंशिखा परम् । लक्षणायांमानाभावात् । मुक्तकेशइत्यत्रापितथापत्तेश्च ॥ ॥ उत्तरीयमप्यधिकारिविशेषणम् । सोत्तरीयस्ततःकुर्यात्सर्वकर्माणि भावितइतिब्रह्मांडात् । यत्तु—कर्तव्यमुत्तरंवासःपंचस्वेतेषुकर्मसु । स्वाध्यायोत्सर्गदानेषुभोजनाचमनेतथेतियौधायनोक्तौपंचग्रहणान र्थक्यप्रसंगान्नसर्वत्रवस्त्रद्वयनियमइति । तन्न । सर्वत्वस्यानुपसंहार्यत्वात् । अतःसर्वत्रवस्त्रद्वयनियमइतिमाधवः ॥ ॥ आचमनमप्यधि कारिविशेषणम् । देवार्चनादिकार्याणितथागुर्वभिवादनम् । कुर्वीतसम्यगाचम्यप्रयतोपिसदाद्विजइतिमार्कंडेयात् । यःक्रियाकुरुतेमोहाद नाचम्येहनास्तिकः। भवंतिहिवृथातस्यक्रियाःसर्वानसंशयइतिवर्धमानपरिभाषायांवायुपुराणाच्च ॥ ॥ प्राणायामोपि—प्राणानाय म्यकुर्वीतसर्वकर्माणिसंयतइतिवृद्धमनक्तेः । प्रयोगपारिजातेसंग्रहे—देवार्चनेजपेहोमेसंध्ययोःश्राद्धकर्मणि । यागेतानेवतेस्नानेप्र

णायामाक्षयस्त्रयः । **प्रणवोपि**—त्रिमात्रस्तुप्रयोक्तव्यःकर्मारंभेपुसर्वतइतिस्मृतेः । सर्वतइतिसार्वविभक्तिकस्तसिः । अनोंकृत्यकृतंसर्वंनभवेत्सि
द्धिकारकमितिशांतिहेमाद्रौयोगियाज्ञवल्क्योक्तेश्च ॥ ॥ **विद्वत्तापि**—नह्यविद्वान्विहितोस्तिहि विदुषएवकर्मण्यधिकारात् ॥
॥ आर्षंछंदोदैवतंचविनियोगस्तथैवच । ब्राह्मणेनप्रयत्नेनवेदितव्यंविपश्चिता । अविदित्वातुयःकुर्याद्याजनाध्यापनंजपम् । होममंतर्जलादीनि
तस्यचाल्पफलंभवेदितितत्रैवतदुक्तेश्च—मंत्रार्थज्ञोजपन्जप्यंकुर्वन्नध्ययनंद्विजः । स्वर्गलोकमवाप्नोतिनरकंत्वविपर्ययेइति**प्रयोगपारिजातेव्या
सोक्तेः** । अविदित्वामुनिंछंदोदैवतंयोगमेवच । योऽध्यापयेद्यजेद्वापिपापीयान्जायतेहिसः । ब्राह्मणंविनियोगंचछंदआर्षंचदैवतम् । अज्ञात्वा
पंचयोमंत्रेनसतत्फलमश्नुतइतिचंद्रिकायांव्यासोक्तेश्च । अयमेवऋष्यादिस्मरणक्रमः । **यत्तुसर्वानुक्रमेऋषिदैवतच्छंदांस्यनुक्रमिष्या
मोनह्येतज्ज्ञानमृतेश्रौतस्मार्तकर्मप्रसिद्धिरिति** तद्ऋग्वेदिपरम् । अथऋग्वेदाम्नायेशाकलकइत्युपक्रमात् । **कृष्णभट्टीयेसंग्रहे**—नचस्मरे
दपिच्छंदःश्राद्धेवैतानिकेमखे । ब्रह्मयज्ञेचवैतर्हियज्ञतर्पणकर्मणिइति ॥ ॥ **कटिसूत्रंगृहस्थेनधार्यम्** । कौपीनंकटिसूत्रंचब्रह्मचारीतुधारयेदिति
यमोक्तस्यतस्य सर्वेषांचैतदविरोधीतिगौतमीयेगृहस्थादावतिदेशात् । गृहस्थस्यकौपीननिषेधानुपपत्तेश्चेतिकेचित् । तन्न । यत्किंचित्कुरुतेध
र्मंवैदिकंवाथतांत्रिकम् । कटिबंधेनसंयुक्तंसर्वंतन्निष्फलंभवेत्। रौप्यंकार्पासकंहैमंपट्टसूत्रकृतंतथा । वर्जयेत्कर्मकालेपुकांचींविप्रोविशेषत इति**सं
स्कारप्रयोगपारिजातेगृहस्थधर्मेष्वाश्वलायनोक्तेः** । कटिबंधःकटिसूत्रबंधः । प्रकरणाद्गृहस्थस्यैवायंनिषेधः । कर्मकालग्रहादकर्मकाले
ननिषेधः । रौप्यादेरेवनिषेधेत्यंताद्दृष्टार्थत्वापत्तेरौर्णादेरपिनिषेधः। श्रुतौ नम्लेच्छितवैनापभाषितवैम्लेच्छोहवाएषयदपशब्दइतितत्कर्मकालपरम् ।
पर्वाणस्तर्वाणोनामऋषयोबभूवुस्तेपर्वाणस्तर्वाणइतिप्रयोक्तव्येयद्वानस्तद्वानइतिप्रयुंजतेयाज्ञेपुनःकर्मणिनापभाषंतइतिश्रुतेरितिकेचित् । अन्ये
तु तेसुराहेलयोहेलयइतिवदंतःपराबभूवुरित्यकर्मकालेपिदोषश्रुतेरकर्मकालेप्यपभाषणेदोषइत्याहुः । **पृथ्वीचंद्रोदयेनारदः**—आसनेशयने

मितिचंद्रिका । कामवर्जितइत्युक्तेःकाम्यपरतासात्तदपितत्रैवोक्तम्—नाहंकर्तासर्वमेतद्ब्रह्मैवकुरुतेसदा । एतद्ब्रह्मार्पणंप्रोक्तमृषिभिस्त त्त्वदर्शिभिः । **प्रचेताः**—तांबूलाभ्यंजनचैवकांस्यपात्रेचभोजनम् । यतिश्चब्रह्मचारीचविधवाचविवर्जयेत् ॥ ॥ **पंचायतनसारेषट्त्रिंशन्मते**—स्नानतर्पणदानेपुताम्रेगव्यंनदुष्यति । होमेकार्येतथादोहेपाकेचपरिवेषणे । **अपरार्केभरीचिः**—निंबस्यभक्षणंतैलंतिलैस्त र्पणमंजनम् । सप्तम्यांनैवकुर्वीततताम्रपात्रेचभोजनम् । **भारते**—बलिर्भिक्षातथार्घंचपितॄणांचतिलोदकम् । ताम्रपात्रेणदातव्यमन्यथाल्प फलंभवेत् । **श्राद्धहेमाद्रौपैठीनसिः**—लौहानांसीसकायसरीतिशेपाणिपात्राणिचेत्ययज्ञियानि । **ब्राह्मे**—कृत्वामूत्रपुरीषेचरथ्यामाक्रम्य वापुनः । पादप्रक्षालनंकुर्यात्स्वाध्यायेभोजनेतथा ॥ ॥ **शाट्यायनिः**—दानमाचमनंहोमंभोजनंदेवतार्चनम् । प्रौढपादोनकुर्वीतस्वा ध्यायंपितृतर्पणम् । इदंसर्वकर्मोपलक्षणम् । **प्रौढपादलक्षणंतेनैवोक्तम्**—आसनारूढपादोवाजान्वोर्वाजंघयोस्तथा । कृतावसक्थिकोयश्च प्रौढपादःसउच्यते । पादोपरिपाददाताप्रौढपादइतिहरदत्तः । तन्न । नाक्रम्यपादंपादेननचव्यवहितौकरौ । जपेन्नप्रौढपादस्तुनप्रकाशकरः सदेतिस्मृतिरत्नावल्यांपुनःप्रौढपादोक्तेः ॥ ॥ **मदनरत्नेवर्धमानपरिभाषायांचवायवीये**—दानंप्रतिग्रहोहोमोभोजनंबलिरे वच । सांगुष्ठेनसदाकार्यमसुरेभ्योऽन्यथाभवेत् । अंगुलिसंगतांगुष्ठेनेतिहेमाद्रिः । **बौधायनः**—भोजनंहवनंदानमुपहारःप्रतिग्रहः । वहि र्जानुनकार्याणितद्वदाचमनंस्मृतम् । **ज्योतिर्निबंधे**—क्षुतस्खलनजृंभासुनृणामायुःप्रहीयते । तदेतरेणकर्तव्योजीवपूर्वोंगुलिध्वनिः । **मद नरत्नेविष्णुपुराणे**—जीवेतिक्षुवतोब्रूयांजीवेशुक्लवेपिच ॥ ॥ **अपरार्केशापातपः**—अजाविरेणुसंस्पर्शादायुर्लक्ष्मीश्रहीयते । श्वका कोष्ट्रखरोलूकसूकरग्रामपक्षिणाम् । **कृष्णभट्टीये**—शूर्पवातोनखाग्रांबुस्नानवस्त्रंघटोदकम् । मार्जनीरेणुकेशांबुहंतिपुण्यंपुराकृतम् । दिवाकृत

1 जीवेत्युक्त सहेतिच इति पाठ ।

मितिकचित्पाठः । घटोदकंघटस्फोटप्रेतकुंभोदकम् । **स्मृतिसारे**—अजारजःखररजस्तथासंमार्जनीरजः । दीपमंचकयोश्छायाहंतिपुण्यंदिवाकृतम् ॥ ॥ **हारीतः**—समित्पुण्यकुशादीनिश्रोत्रियःस्वयमाहरेत् । शूद्रानीतैःक्रयक्रीतैःकर्मकुर्वन्व्रजत्यधः । अत्रशूद्रानीतैःक्रयक्रीतैरितिसामानाधिकरण्येनसंबंधः । अन्यथावेतनदानेनक्रयत्वाविशेषादारामादेःस्वयमपिपुष्पाद्याहरणेदोषापत्तेः । कुशेष्वप्येवम् । अतोद्विजेभ्यःकुशक्रयेनदोषः । स्वयमितिशक्तपरम् । तेनैवनियमसिद्धौशूद्राहृतनिषेधानुपपत्तेः । तेनस्वाशक्तौशिष्यपुत्राद्याहरणेप्यदोषः । **आद्धहे मादौ**—जपेहोमेतथादानेस्वाध्यायेपितृकर्मणि । तत्सर्वंनश्यतिक्षिप्रमूर्ध्वपुंड्रंविनाकृतम् । **स्कांदेकार्तिकमाहात्म्ये**—अधौतेनतुवस्त्रेणनित्यांनैमित्तिकींक्रियाम् । कुर्वन्फलंनचाप्नोतिदत्तंभवतिनिष्फलम् । **चंद्रिकायांयमः**—अभ्युक्षेत्तुप्रयत्नेनप्रातरात्युषितोगृहम् । मध्याह्ने चैवसायंचनचानभ्युक्षितेयजेत् । **तत्रैवप्रचेताः**—वैश्वानरेणयत्किंचित्कुरुतेप्रोक्षणंद्विजः । गंगातोयसमंसर्वंप्रवदंतिमनीषिणः । **भारते**—सर्वाणियेषांगांगेयैस्तोयैःकार्याणिदेहिनाम् । गांत्यक्त्वामानवाविप्रदिवितिष्ठंतितेजनाः । **मार्कंडेये**—दीपभांडमयीछायाविभीतककुरंटजा । वर्जनीयासदापुत्रयदिजीवितुमिच्छसि । अधोवस्त्रेणयोवायुंकुरुतेशिरसिद्विज । स्थालेनचर्मशूर्पाभ्यांसुकृतंतस्यनश्यति । **भारते**—रक्तंमाल्यंनधार्यंस्याच्छुक्लंधार्यंतुपंडितैः । वर्जयित्वातुकमलंतथाकुवलयंप्रभो । रक्तंशिरसिधार्यंतुतथावानेयमित्यपि । कांचनीयापियामालानसादुष्यतिकर्हिचित् ॥ ॥ **अग्निपुराणे**—प्रचारेमैथुनेचैवप्रस्रावेदंतधावने । स्नानेभोजनकालेचषट्सुमौनंसमाचरेत् । प्रचारःपुरीषोत्सर्गः । प्रस्रावोमूत्रोत्सर्गः । अत्रविशेषोवक्ष्यते । **नागदेवाह्निकेंगिराः**—संध्ययोरुभयोर्जप्येभोजनेदंतधावने । पितृकार्येचदैवेचस्नानेमूत्रपुरीषयोः । गुरूणांसंनिधौदानेयागेचैवविशेषतः । एषुमौनंसमातिष्ठन्स्वर्गमाप्नोतिमानवः । **चंद्रोदयेयोगीश्वरः**—यदिवाग्यमलोपःस्याज्जपादिषुकथं

---

१ वैश्वानरोऽजीजनत्तिलक ।

चन । व्याहरेद्वैष्णवंमंत्रंस्मरेद्वाविष्णुमव्ययम् । **छंदोगपरिशिष्टे**—यत्रदिङ्नियमोनस्याज्जपहोमादिकर्मसु । तिस्रस्तत्रदिशःप्रोक्ताऐंद्रीसौम्यपराजिता । तत्रैव—यत्रोपदिश्यतेकर्मकर्तुरंगंनकथ्यते । दक्षिणस्तत्रविज्ञेयःकर्मणांपारगःकरः । **मनुः**—कुत्सितेवामहस्तःस्याद्दक्षिणःसादकुत्सिते । **छंदोगपरिशिष्टे**—आसीनऊर्ध्वःप्रह्वोवानियमोयत्रनेदृशः । तदासीनेनकर्तव्यंनप्रह्वेणनतिष्ठता । **श्राद्धदीपकलिकायां विष्णुः**—दक्षिणाभिमुखःकर्मचरेत्पित्र्यंयथाविधि । उत्तराभिमुखोदैवमितिदिङ्नियमःस्मृतः । पित्र्येदक्षिणामुखत्वंबह्वृचेतरपरम् । तेपांपिंडपितृयज्ञप्रकरणेसर्वकर्माणितांदिशमितिसूत्रेपित्र्येआग्नेयीमुखत्वोक्तेः । **कात्यायनः**—मुख्यकालेयदावश्यंकर्मकर्तुनशक्यते । गौणकालेपिकर्तव्यंगौणोप्यत्रेदृशोभवेत् । **त्रिकांडमंडनः**—स्वकालादुत्तरःकालोगौणःसर्वस्यकर्मणः । उत्तरग्रहान्नपूर्वकालस्यगौणत्वम् । तेनसमस्यपक्षहोमादावल्पद्वादश्यांचमाध्याह्निकस्यचापकर्षेनप्रायश्चित्तम् । उत्तरकालावधिरुक्तोबृहन्नारदीये—दिवोदितानिकर्माणिप्रमादादकृतानिवै । यामिन्याःप्रथमंयामंयावत्कर्माणिकारयेत् । **चंद्रोदयेसंग्रहे**—रात्रौप्रहरपर्यंतंदिवाकर्माणिकारयेत् । ब्रह्मयज्ञंचसौरंचवर्जयित्वाविशेषतः । रात्रौब्रह्मयज्ञनिषेधस्तैत्तिरीयेतरपरः । तस्माद्भावनध्यायौयदात्माऽशुचिर्यद्देशइतितत्सूत्रात् । **तैत्तिरीयश्रुतौ**रात्रावपिब्रह्मयज्ञोक्तेश्च । नित्यश्राद्धमपिरात्रौवेतिवक्ष्यते । **त्रिकांडमंडनः**—यद्वागामिक्रियामुख्यकालस्याप्यंतरालवत् । गौणकालत्वमिच्छंतिकेचिन्नाक्तंकर्मणि । इदंश्रौतपरम् । **स्मृत्यर्थसारे**—सर्वत्रगौणकालेपुकर्मचोदितमाचरन् । प्रायश्चित्तंव्याहृतिभिर्हुत्वाकर्मसमाचरेत् ।—प्रायश्चित्तमकृत्वावागौणकालेसमाचरेत् । अनयोःपक्षयोःशक्ताशक्तविषयत्वेनव्यवस्थेतिपारिजातः । **रत्नावल्याम्**—मुख्यकालंसमाश्रित्यगौणमप्यस्तुसाधनम् । नमुख्यद्रव्यलोभेनगौणकालप्रतीक्षणम् । **कालहेमाद्रौस्कांदे**—यदाभवतिचाल्पातुद्वादशीह्यरुणोदये । उषःकालेदयंकुर्यात्प्रातर्माध्याह्निकंतदा । सर्वधर्मादिकंकृत्वाद्वादशींसाधयेन्नरः । यत्त्वत्तएवाब्दिकादिश्राद्धापकर्षोपीतिकेचित् । तन्न । तस्यापराह्णका

लनियमात् । धर्मपदस्यप्रातर्माध्याह्निकपदाभ्यामुपसंहाराच्च ॥ ॥ **शांतिहेमाद्रौ**—तस्मात्सर्वप्रयत्नेनस्वसूत्रंनविलंघयेत् । **वसिष्ठः**—पारंपर्यागतोयेपांवेदःसपरिवृंहणः । तच्छाखंकर्मकुर्वीततच्छाखाध्ययनंतथा । **वर्धमानपरिभाषायां**—स्वशाखांयःसमुत्सृज्यपरशाखाश्रयंद्विजः । कर्तुमिच्छतिदुर्मेधामोघंतत्तस्ययत्कृतम् । **शातातपः**—सर्वश्रुत्युपसंहारादुक्तःश्रौतोयथाविधिः । सर्वस्मृत्युपसंहारात्स्मार्तोप्युक्तस्तथाविधिः । अस्यापवादश्छंदोगपरिशिष्टे—बह्वल्पंवास्वगृह्योक्तंयस्यकर्मप्रचोदितम् । तस्यतावतिशास्त्रार्थेकृतेसर्वःकृतोभवेत् । अत्र कर्मोपासनाद्येवनतुश्राद्धादीतिस्मृतिरत्नावली—यत्तुस्वगृह्येनोक्तंयच्चसाकांक्षमुक्तंतत्परकीयमपिग्राह्यम् । तथाचकर्मप्रदीपे—यन्नाम्नातंस्वशाखायांपारक्यमविरोधिच । विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत् । अपरार्केप्येवम् । यत्त्वाशार्के—अक्रियात्रिविधाप्रोक्ताविद्वद्भिःकर्मकारिणाम् । अक्रियाचपरोक्ताचतृतीयाचायथाक्रिया । परोक्तापरशाखोक्ता । तत्स्वगृह्यविरुद्धपरशाखोक्तनिषेधकम् । शक्तस्यसर्वस्मृत्युपसंहारः । अशक्तस्यस्वगृह्योक्तमितिनिष्कर्षः । आपस्तंबादीनांस्वसूत्रेऽनुक्तौविशेषोयज्ञकांडे—आपस्तंबादिभिरपिस्वसूत्राभावतस्तथा । घौधायनोक्तंकर्तव्यमन्यथापतितोभवेत् । अग्निहोत्रादिकंचयच्छाखोक्तमाध्वर्यवंतदीयमेवांगीकार्यम् । आधानंयेनसूत्रेणतेनैवेज्यादिकाःक्रिया इतियज्ञपार्श्वोक्तेः । छंदोगपरिशिष्टे—प्रवृत्तमन्यथाकुर्याद्यदिमोहात्कथंचन । यतस्तदन्यथाभूतंततएवसमापयेत् । समाप्तेयदिजानीयान्मयैतदन्यथाकृतम् । तावदेवपुनःकुर्यान्नावृत्तिःसर्वकर्मणः । प्रधानस्याक्रियायांतुसांगंतत्क्रियतेपुनः । तदंगस्याक्रियायांतुनावृत्तिर्नच तत्क्रिया । अन्यथावैपरीत्येनेत्यर्थइतिहेमाद्रिः । तन्न । तदंगस्येत्यग्रिमग्रंथविरोधात् । गुणक्रमानुरोधेनप्रधानावृत्तेरन्याय्यत्वाच्च । अतस्त्यागस्तदर्थः । यतइति प्रयोगमध्येंगत्यागेप्रधानत्यागेवाज्ञातेतदारभ्यांगावृत्तिःप्रधानादिचकार्यमित्यर्थः । तावदेवेत्यंगपरम् । पुनस्त्वर्थे । तदंगस्येत्यंगांगपरम् । आवृत्तिःसांगप्रधानस्यतत्क्रियांगांगानुष्ठानं । तेनसांगप्रधानांगस्यांगांगस्यचोपवीतित्वादेरकरणे नसांगप्रधानप्रवृत्तिर्नापि

तन्मात्रकरणं किंतुविष्णुस्मरणादिकंप्रायश्चित्तमितिवर्धमानः । कल्पतरुरपिप्रधानांगस्यैवाकरणेप्रायश्चित्तंनत्वंगागाकरणइत्याह । अंगिराः—मार्जनंतर्पणंश्राद्धंनकुर्याद्वारिधारया । हारीतः—मार्जनार्चनबलिकर्मभोजनानिदेवतीर्थेनकुर्यादिति । अपरार्केपैठीनसिः—आचमनहोमतर्पणानिप्राजापत्येनकुर्यादिति । आपस्तंबः—देवागारेतथाश्राद्धेगवांगोष्ठेतथाध्वरे । संध्ययोश्चद्वयोःसाधुसंगमेगुरुसंनिधौ । अग्न्यगारविवाहेपुस्वाध्यायेभोजनेतथा । उद्धरेद्दक्षिणंबाहुंब्राह्मणानांक्रियापथे । उद्धरेत् सव्येसेउत्तरीयंकृत्वादक्षिणबाहुमुत्तरीयाद्बहिःकुर्यादित्यर्थः इतिव्रतहेमाद्रिः । बौधायनः—नाभेरधश्चसंस्पर्शकर्मयुक्तोविवर्जयेदिति । वृद्धपराशरः—अच्छन्नानिचदानानिज्ञानंचनिरहंकृतम् । जप्यानिचसुगुप्तानितेषांफलमनंतकम् । योगियाज्ञवल्क्यः—स्त्रीशूद्रपतितांश्चैवरासभंचरजस्वलाम् । जपकालेनभाषेतव्रतहोमादिकेषुच । अभ्यंगापवादमाहसएव—एतेष्वेवावसक्तेतुयद्यागच्छेद्द्विजोत्तमः । अभिवाद्यततोविप्रंयोगक्षेमंचकीर्तयेत् । कालहेमाद्रौस्कांदे—अभ्यंगेजलधिस्नानेदंतधावनमैथुने । जातेचनिधनेचैवतत्कालव्यापिनीतिथिः । भारते—प्रसाधनंचकेशानांदंतधावनमंजनम् । पूर्वाह्णएवकर्तव्यं देवतानांचपूजनम् । तत्रैव—नक्तंनकुर्यात्पित्र्याणिभुक्त्वाचैवप्रसाधनम् । पित्र्यंतर्पणश्राद्धादि । संध्योपासनहानौतुदिवास्नानंविलुप्यच । होमंचनैत्यकंशुद्ध्येत्पित्र्यष्टमहस्रकृत् । द्वादशशतंदक्षिणेतिचेदष्टाधिकंसहस्रम् । यत्तुजमदग्निः—एकाहंसमतिक्रम्यप्रमादादकृतंयदि । अहोरात्रोपितःस्नात्वागायत्र्याश्चायुतंजपेत् । द्विरात्रेद्विगुणंप्रोक्तंत्रिरात्रेत्रिगुणंतथा । त्रिरात्रात्परतश्चैवशूद्रएवनसंशयः । इति तदेकदिनसाध्यातिकलोपेज्ञेयम् । तथा—नित्ययज्ञात्ययेचैववैश्वदेवद्वयस्यच । भोजनेपतितान्नस्यचरुवैश्वानरोभवेत् । उज्ज्वलायाम्—दिवोदितानांनित्यानांकर्मणांममतिक्रमे । स्नातकव्रतलोपेचप्रायश्चित्तमभोजनम् । (गृहिणांकर्तव्यानि) मार्कंडेयः—उदुंबरेवसेन्नित्यंभवानीसर्व

---

१ उदुंबरोऽत्रभाषायां उंबराइतिप्रसिद्धः ।

देवता । ततःसाप्रत्यहंपूज्यागंधपुष्पाक्षतादिभिः । अशून्यादेहलीकार्याप्रातःकालेविशेषतः । यस्यशून्याभवेत्सातुशून्यंतस्यकुलंभवेत् । पाद स्पर्शनंतत्रस्नसंपूज्यचलंघनम् । कुर्वन्नरकमाप्नोतितस्मात्तत्परिवर्जयेत् । प्रातःकालेस्त्रियाकार्यंगोमयेनानुलेपनम् । निशायाःप्रथमेयामेधान्य संस्करणादिकम् । कुरुतेयातुमोहेनवन्ध्याजन्मनिजन्मनि । अकृतस्वस्तिकांयातुकमेलिप्तांचमेदिनीम् । तस्यास्त्रीणिविनश्यंतिवित्तमायुर्यश स्तथा । मार्जनींचुल्लिकांष्ठीवंदपदंचोपलंतथा । नाक्रमेदंघ्रिणाजातुपुत्रदारधनक्षयात् । उलूखलंचमुसलंतथाचैवघरट्टकम् । पादक्रमणात्पा पीयान्नाप्नुयादुत्तमांगतिम् ॥ ॥ **मदनरत्नेवसिष्ठः**—नाग्निब्राह्मणांतरेव्यवेयान्नान्योर्नब्राह्मणयोर्नगुरुशिष्ययोः अनुज्ञयाव्यवेयादिति । **अंगिराः**—दंपत्योर्विप्रयोरन्योर्विप्राग्न्योर्गोद्विजातिषु । अंतरंयदिगच्छेत्तुविप्रश्चांद्रायणंचरेत् । एतत्कामतोऽत्यंताभ्यासे । सकृत्त्वेत्वेकदि नाभोजनमिति**शूलपाणिः**। **आपस्तंबः**—अग्न्यगारेगवांगोष्ठेब्राह्मणानांचसंनिधौ । आहारेजपकालेचपादुकेपरिवर्जयेत् । आरुह्यपादुके यस्तुगृहात्परगृहंव्रजेत् । छेत्तव्यौचरणौतस्यनान्योदंडोविधीयते । **प्रयोगपारिजातेभृगुः**—नैकवासानचद्वीपेनांतरालेकदाचन । श्रुति स्मृत्युदितंकर्मनकुर्यादशुचिःक्वचित् । **द्वीपेविशेषस्तेनैवोक्तः**—वृषभैकशतंयत्रगवांतिष्ठत्यसंयतम् । नतद्धर्महतंद्वीपमितिब्रह्मविदोविदुः । **चंद्रिकायांदेवलः**—येषुदेशेषुयत्तोयंयाचयत्रैवमृत्तिका । येषुदेशेषुयच्छौचंधर्माचारश्चयादृशः । तत्रतन्नावमन्येतधर्मस्तत्रैवतादृशः ॥ इतिश्रीमन्नारायणभट्टात्मजरामकृष्णभट्टसुतदिनकरभट्टात्मजलक्ष्मणभट्टकृताचाररत्नेपरिभाषा ॥

अथाह्निके । [ब्राह्ममुहूर्तलक्षणं] चंद्रोदयेब्राह्मे—ब्राह्मेमुहूर्तेउत्थायचिंतयेदात्मनोहितम् । तल्लक्षणंतत्रैवस्कांदे—रजनी प्रांत्ययामार्धब्राह्मःसमयउच्यते । **विष्णुपुराणे**—रात्रेःपश्चिमयामस्यमुहूर्तोयस्तृतीयकः । सब्राह्मइतिविज्ञेयोविहितःसप्रबोधने ।

१ ष्ठीवं ष्ठीवनंथूत्कृतं । २ व्यपेयादितिपाठः ।

चंद्रिकायाम्—रात्रेस्तुपश्चिमोयामोमुहूर्तोब्राह्मउच्यते । **स्मृतिरत्नावल्याम्**—ब्राह्मेमुहूर्तेयानिद्रासापुण्यक्षयकारिणी । तांकरोतितु योमोहात्पादकृच्छ्रेणशुद्ध्यति । एतन्निषिद्धकर्मश्रान्तनिद्रापरम् । अन्यथातूक्तं**बह्वृचकारिकायाम्**—अविध्युक्तक्रियाश्रांतमतिनिद्राव शंगतम् । अर्कोऽभ्युदेतिचेदह्नःशेषंस्थित्वासवाग्यतः । उदितेयस्यतेविश्वेत्यृग्भिश्चतसृभीरविम् । उपतिष्ठेतविहितकर्मश्रांतस्यनेष्यते । ब्राह्ममुहूर्तोत्थानमावश्यकत्वार्थम् । **अंगिराः**—उत्थायपश्चिमेयामेरात्रिवासःपरित्यजेत् । प्रक्षाल्यहस्तपादास्यान्युपस्पृश्यहरिंस्मरेत् । **वामनपुराणे**—ब्राह्ममुहूर्तेबुद्ध्येतस्मरेद्देववरानृषीन् । स्मृतिरशुचित्वेऽपि । यदास्यादशुचिस्तत्रस्मरेन्मंत्रंनतूच्चरेदिति**नारसिंहात्** । नाशुचिर्देवर्षिपितृणांनामानिकीर्तयेदितिविष्णुभिन्नपरम् ॥ ॥ **ब्राह्मे**—उत्थायमातापितरौपूर्वमेवाभिवादयेत् । आचार्यमथविप्रांश्च भूमावेकेनपाणिना । इदंमूर्खकर्मके । अजाकर्णेनविदुषोमूर्खाणामेकपाणिनेति**विष्णूक्तेः** । श्रोत्रसमौकरौकृत्वापुनःसयुक्तेनकरद्वयेनेति **मदनपारिजातः** । अजावत्कर्णावानम्येतिवा । **यत्तु**—जन्मप्रभृतियत्किंचिद्व्रतंधर्मसमाचरेत् । सर्वंतन्निष्फलंतस्यएकहस्ताभिवादना दिति**मदनपारिजाते**वचनं तद्भूम्यसंस्पृष्टपाणिपरम् ॥ ॥ अत्रप्रसङ्गात् **अभिवाद्यनिर्णयः** । **जमदग्निः**—देवतामतिमांद्दृष्ट्वाय तिंद्दृष्ट्वाग्निदंडिनम् । नमस्कारनकुर्याच्चेदुपवासेनशुद्ध्यति । यतिग्रहणंमान्यमात्रपरमिति**स्मृतिरत्नावल्याम्** । यवीयसोमातुलादीन्नाभिवा दयेदित्याह**गौतमः** । ऋत्विक्श्वशुरपितृव्यमातुलानांप्रत्युत्थानमनभिवाद्याहितेइति । **बृहस्पतिः**—जपयज्ञगणस्थंचसमित्पुष्पकुशानलान् । उदपात्रार्घभैक्षान्नंवहंतंनाभिवादयेत् । **नारदीये**—तथास्नानंप्रकुर्वंतंजलमध्यगतंतथा । विवादशीलमशुचिंशयानंनाभिवादयेत् । **शाता तपः**—पाखंडंपतितंन्रात्यंमहापातकिनंशठम् । सोपानत्कंकृतघ्नंचनाभिवादेत्कदाचन । धावंतंचप्रमत्तंचमूत्रोच्चारकृतंतथा । उच्चारः

---

१ नाभिवादेदितिछंदोनुरोधात् । नाभिवादयेदित्यर्थः ।

पुरीषोत्सर्गः । भुंजानमाचमानार्हं(?)नास्तिकंनाभिवादयेत् । वमंतंजृम्भमाणंचकुर्वंतंदंतधावनम् । अभ्यक्तशिरसंचैवस्नांतंनैवाभिवादयेत् । स्रुक्पाणिकमनाज्ञातमशक्तंरिपुमातुरम् । योगिनंचतपःसक्तंकनिष्ठंनाभिवादयेत् । **स्मृत्यर्थसारे**—अभिवाद्यद्विजश्चैतानहोरात्रेणशुद्ध्यति । सर्वेवापिनमस्कार्याःसर्वावस्थासुसर्वदा । **विष्णुधर्मे**—समित्पुष्पकुशादीनिवहंतंनाभिवादयेत् । तद्धारीचैवनान्यान्हिनिर्माल्यंतद्धवेत्तयोः । **मदनरत्ने**—सभायांयज्ञशालायांदेवतायतनेपुच । प्रत्येकंतुनमस्कारोहंतिपुण्यंपुराकृतम् । **मिताक्षरायाम्**—दंतधावनगीतादिब्रह्मचारी विवर्जयेदिति । **योगीश्वरः**—वाक्पाणिपादचापल्यंवर्जयेच्चातिभोजनम् । **मनुः**—नेक्षेतोद्यंतमादित्यंनास्तंयंतंकदाचन । नोपसृष्टंनवारि स्थंनमध्यंनभसोगतम् । अत्रनञ्पर्युदासार्थोननिषेधार्थः । व्रतशब्दैकवाक्यत्वात् । **सएव**—नाश्नीयाद्भार्ययासार्धंनैनामीक्षेतचाश्नतीम् । क्षुवतींजृंभमाणांवानचासीनांयथासुखम् । नांजयंतींस्वकेनेत्रेनचाभ्यक्तामनावृताम् । नपश्येच्चप्रसूयंतींतेजस्कामोद्विजोत्तमः । **योगी**—ष्ठीवनासृक्शकृन्मूत्ररेतांस्यप्सुननिक्षिपेत् । पादौप्रतापयेन्नाग्नौनचैनमभिलंघयेत् । जलंपिबेन्नांजलिनानशयानंप्रबोधयेत् । शयानंश्रेष्ठम् । श्रेयांसं नप्रबोधयेदित्युक्तेः । नाक्षैःक्रीडेन्नधर्मज्ञैर्व्याधितैर्वानसंविशेत् । विरुद्धंवर्जयेत्कर्मप्रेतधूमंनदीतरम् । केशभस्मतुषांगारकपालेषुचसंस्थितिम् । नाचक्षीतधयंतींगांनाद्वारेणविशेत्क्वचित् । **गौतमः**—नवाग्न्यग्निविप्रादित्यापोदेवान्गाश्चप्रतिपादौप्रसारयेदिति । तत्रक्वचिद्दृष्टदोषःक्वचिददृष्टो बोध्यः । देवर्त्विक्स्नातकाचार्यराज्ञांछायांपरस्त्रियः । नाक्रमेद्रक्तविण्मूत्रष्ठीवनोद्वर्तनानिच । गुरोर्वध्रुणोदीक्षितस्यचेति**मनौ** । स्नानोदकंश्लेष्म वांतानिचनाक्रमेत् । दूरादुच्छिष्टविण्मूत्रपादांभांसिसमुत्सृजेत् । श्रुतिस्मृत्युदितंसम्यङ्नित्यमाचारमाचरेत् । विप्राहिक्षत्रियात्मानोनावज्ञेयाः कथंचन । आमृत्योःश्रियमाकांक्षन्नकंचित्कर्मणिस्पृशेत् । गोब्राह्मणानलान्नानिनोच्छिष्टोनपदास्पृशेत् । नर्निंदाताडनेकुर्यात्पुत्रंशिष्यंचताडयेत् ।

---

१ नोपरक्तंइतिपाठः । २ नपश्येत्प्रसवंतींच ।

कर्मणामनसावाचायत्नाद्धर्मंसमाचरेत् । अस्वर्ग्यंलोकविद्विष्टंधर्ममप्याचरेन्नतु । मातृपित्रतिथिभ्रातृजामिसंबंधिमातुलैः । वृद्धबालातुराचार्यवै
धसंश्रितबांधवैः । ऋत्विक्पुरोहितापत्यभार्यादाससुतादिभिः । विवादंवर्जयित्वातुसर्वांल्लोकान्जयेद्गृही । पराशय्यापरोद्यानगृह्यानानिवर्जयेत् ।
पराण्यदत्तानीति—दाक्षायणीब्रह्मसूत्रीवेणुमान्सकमंडलुः । कुर्यात्प्रदक्षिणंदेवमृद्गोविप्रवनस्पतीन् । दाक्षायणंहेम तन्मयेकुंडले । वैणवीं
धारयेद्यष्टिंसोदकंचकमंडलुम् । यज्ञोपवीतेदंडंचशुभैरौक्मेचकुंडलेइतिमनुः । योगीश्वरः—भूशुद्धिर्मार्जनाद्दाहात्कालाद्गोक्रमणात्तथा ।
सेकादुल्लेपनाल्लेपाद्गृहंमार्जनलेपनात् । गृहस्यपृथग्ग्रहोमार्जनलेपयोःप्रत्यहप्राप्त्यर्थइतिविज्ञानेश्वरः । बह्वृचगृह्ये—पापकंगंधमाघ्रायाक्षि
स्पंदनेकर्णध्वननेसुचक्षाअहमक्षीभ्यांभूयासंसुवर्चामुखेनसुश्रुत्कर्णाभ्यांमयिदक्षक्रतूइतिजपेदगमनीयांगत्वाऽयाज्ययाजयित्वाऽभोज्यंभुक्त्वाऽ
प्रतिग्राह्यंप्रतिगृह्यचैत्ययूपंवोपहत्य—पुनर्मामैत्विंद्रियंपुनरायुःपुनर्भगः । पुनर्द्रविणमैतुमांपुनर्ब्राह्मणमैतुमांस्वाहा । इमेधिष्ण्यासोअग्नयोयथा
स्थानमिहकल्पताम् । वैश्वानरोवावृधानोंतर्यच्छतुमेमनोद्वयंतरमृतस्यकेतुःस्वाहेतिजपेत् ॥ इतिश्रीमन्नारायणभट्टात्मजश्रीमद्रामकृष्णभट्टसूनु
दिनकरभट्टानुजलक्ष्मणभट्टकृतेआचाररत्नेप्रातःकृत्यपरिभाषाशेषः ॥ ॥

अथप्रातःस्मरणादि । विष्णुपुराणे—प्रातःस्मरामिभवभीतिमहार्तिशांत्यैनारायणंगरुडवाहनमंब्जनाभम् । ग्राहाभिभूतवरवारण
मुक्तिहेतुंचक्रायुधंतरुणवारिजपत्रनेत्रम् ॥ १ ॥ प्रातर्नमामिमनसावचसाचमूर्ध्नापादारविंदयुगुलंपरमस्यपुंसः । नारायणस्यनरकार्णवतारण
स्यपारायणप्रवणविप्रपरायणस्य ॥ २ ॥ प्रातर्भजामिभजतामभयंकरंतंप्राक्सर्वजन्मकृतपापभयापहृत्यै । योग्राहवक्त्रपतितांघ्रिगजेंद्रघोरशोकप्र
णाशमकरोद्धृतशंखचक्रः ॥ ३ ॥ **पंचायतनसारे**—प्रातःस्मरामिगणनाथमनाथबंधुंसिंदूरपूरपरिशोभितगंडयुग्मम् । उद्दंडविघ्नपरिखंड

१ भंजनाभमितिपाठः । २ सिंदूरपूर्णपरीतिपाठः ।

नचंडदंडमाखंडलादिसुरनायकवृंदवंद्यम् ॥ १ ॥ प्रातर्नमामिचतुराननवंद्यमानमिच्छानुकूलमखिलंचवरंदधानम् । तंतुंदिलंद्विरसनाधिपय ज्ञसूत्रंपुत्रंविलासचतुरंशिवयोःशिवाय ॥ २ ॥ प्रातर्भजाम्यभयदंखलुभक्तशोकदावानलंगणविभुंवरकुंजरास्यम् । अज्ञानकाननविनाशनहव्य वाहमुत्साहवर्धनमहंसुतमीश्वरस्य ॥ ३ ॥ श्लोकत्रयमिदंपुण्यंसदासाम्राज्यदायकम् । प्रातरुत्थायसततंयःपठेत्प्रयतःपुमान् ॥ ४ ॥ प्रातः स्मरामिखलुतत्सवितुर्वरेण्यंरूपंहिमंडलमृचोथतनुर्यजूंपि । सामानियस्यकिरणाःप्रभवादिहेतुंब्रह्माहरात्मकमलक्ष्यमचिंत्यरूपम् ॥ १ ॥ प्रात र्नमामितरणिंतनुवाङ्मनोभिर्ब्रह्मेंद्रपूर्वकसुरैःस्तुतमर्चितंच । वृष्टिप्रमोचनविनिग्रहहेतुभूतंत्रैलोक्यपालनपरंत्रिगुणात्मकंच ॥ २ ॥ प्रातर्भजा मिसवितारमनंतशक्तिंपापौघशत्रुभयरोगहरंपरंच । तंसर्वलोककलनात्मककालमूर्तिंगोकंठबंधनविमोचनमादिदेवम् ॥ ३ ॥ श्लोकत्रयमिदं भानोःप्रातःप्रातःपठेत्तुयः । सर्वव्याधिविनिर्मुक्तःपरमंसुखमाप्नुयात्॥ ४ ॥ प्रातःस्मरामिशरदिंदुकरोज्ज्वलाभांसद्रत्नवन्मकरकुंडलहारभूषाम्। दिव्यायुधोर्जितसुनीलसहस्रहस्तांरक्तोत्पलाभचरणांभवतींपरेशाम् ॥ १ ॥ प्रातर्नमामिमहिषासुरचंडमुंडशुंभासुरप्रमुखदैत्यविनाशदक्षाम् । ब्रह्मेंद्ररुद्रमुनिमोहनशीललीलांचंडींसमस्तसुरमूर्तिमनेकरूपाम् ॥ २ ॥ प्रातर्भजामिभजतामभिलाषदात्रींधात्रींसमस्तजगतांदुरितापहंत्रीम् । संसारबंधनविमोचनहेतुभूतांमायांपरामधिगतांपरमस्यविष्णोः ॥ ३ ॥ श्लोकत्रयमिदंदेव्याश्चंडिकायाःपठेत्तुयः । सर्वान्कामानवाप्नोतिविष्णु लोकेमहीयते ॥ ४ ॥ प्रातःस्मरामिभवभीतिहरंसुरेशंगंगाधरंवृषभवाहनमंबिकेशम् । खट्वांगशूलवरदाभयहस्तमीशंसंसाररोगहरंभौपथमद्वितीय म् ॥ १ ॥ प्रातर्नमामिगिरिशंगिरिजार्धदेहंसर्गस्थितिप्रलयकारणमादिदेवम् । विश्वेश्वरंविजितविश्वमनोभिरामंसंसाररोगहर० ॥ २ ॥ प्रात र्भजामिशिवमेकमनंतमाद्यंवेदांतवेद्यमनघंपुरुषंपुराणम् । नामादिभेदरहितंषड्भावशून्यंसंसार० ॥ ३ ॥ प्रातःसमुत्थायशिवंविचिंत्यश्लोकत्र

१ हारशोभाम् । दिव्यायुधैर्जितेतिपाठः । २ महिषासुरदात्रींइतिपाठः । ३ परांसमधिगम्येतिपाठः । ४ पठेन्नरः ।

यंयःपठतीहभक्त्या । सदुःखजातंविविधप्रभूतंहित्वापदंयातितदेवशंभोः ॥ ४ ॥ **पराशरमाधव्याम्**—ब्रह्मामुरारिस्त्रिपुरांतकारीभानुः शशीभूमिसुतोबुधश्च । गुरुश्चशुक्रःसहभानुजेनकुर्वंतुसर्वेममसुप्रभातम् ॥ १ ॥ भृगुर्वसिष्ठःक्रतुरंगिराश्चमनुःपुलस्त्यःपुलहःसगौतमः । रैभ्योमरीचिश्च्यवनश्चदक्षःकुर्वंतुसर्वेममसुप्रभातम् ॥ २ ॥ सनत्कुमारःसनकःसनंदनःसनातनोप्यासुरिपिंगलौच । सप्तस्वराःसप्तरसातलानि कुर्वंतुसर्वेममसुप्रभातम् ॥ ३ ॥ सप्तार्णवाःसप्तकुलाचलाश्चसप्तर्षयोद्वीपवराश्चसप्त । भूरादिकृत्वाभुवनानिसप्तकुर्वंतुसर्वेममसुप्रभातम् ॥ ४ ॥ पृथ्वीसगंधासरसास्तथापःस्पर्शीचवायुर्ज्वलितंचतेजः । नभःसशब्दंमहतासहैवकुर्वंतुसर्वेममसुप्रभातम् ॥ ५ ॥ श्रीःकामधेनुःसचवक्रतुंडश्चिंतामणिःश्रीतुलसीचगंगा । अरुंधतीकौस्तुभकल्पवृक्षाःकुर्वंतुसर्वेममसुप्रभातम् ॥ ६ ॥ इत्थंप्रभातेपरमंपवित्रंपठेत्स्मरेद्वाशृणुयाच्चभक्त्या । दुःस्वप्ननाशस्त्विहसुप्रभातंभवेच्चनित्यंभगवत्प्रसादात् ॥ ७ ॥ पुण्यश्लोकोनलोराजापुण्यश्लोकोयुधिष्ठिरः । पुण्यश्लोकाचवैदेहीपुण्यश्लोकोजनार्दनः ॥ १ ॥ कर्कोटकस्यनागस्यदमयंत्यानलस्यच । ऋतुपर्णस्यराजर्षेःकीर्तनंकलिनाशनम् ॥ २ ॥ अश्वत्थामबलिर्व्यासोहनूमांश्चविभीषणः । कृपःपरशुरामश्चसप्तैतेचिरजीविनः ॥ ३ ॥ सप्तैतान्संस्मरेन्नित्यंमार्कंडेयमथाष्टम् । जीवेद्वर्षशतंसाग्रमपमृत्युविवर्जितः ॥ ४ ॥ अहल्याद्रौपदीकुंतीतारामंदोदरीतथा । पंचैताःसंस्मरेन्नित्यंमानवोनैववध्यते ॥ ५ ॥ इत्यादिपठेत् ॥ **प्रयोगपारिजातेस्कांदे**—समुद्रवसनेदेविपर्वतस्तनमंडिते । विष्णुपत्निनमस्तेस्तुपादस्पर्शंक्षमस्वमे ॥ **कात्यायनः**—श्रोत्रियंसुभगंगांचअग्निमग्निचितंतथा । रोचनांचंदनंगंधंमृदंगंदर्पणंमणिम् । गुरुमग्निरविंपश्यन्नमस्येत्प्रातरेवहि । **आचारादर्शेविशेषःभारते**—अवलोक्योनचादर्शेमलिनोबुद्धिमत्तरैः ॥

१ शनिराहुकेतव इतिपाठ । २ ज्वलन सतेजा इतिपाठ । ३ सीतातारामदोदरीतथा । पंचकन्यास्मरेन्नित्यंमहापातकनाशनमितिपाठ ।

॥ **कात्यायनः**—पापिष्ठदुर्भगंमंधंनग्नमुत्कृत्तनासिकम् । प्रातरुत्थाययःपश्येत्तत्कलेरुपलक्षणम् । नंग्नंवालमिन्नम् । दुष्टत्वात् । इतिश्रीलक्ष्म णभट्टकृतेआचाररत्नेप्रातःस्मरणम् ॥

अथबहिर्विहारः ॥ **प्रयोगपारिजातेशौनकः**—ग्रामाद्बहिःसमागत्यमलमूत्रेसमुत्सृजेत् । **पराशरः**—ग्रामाद्धनुःशतंगच्छेन्नगरा च्चतुर्गुणम् । धनुर्द्विपदमितिकेचित् । चतुररत्नीतिस्मृत्यर्थसारे । **माधवीयेविष्णुपुराणे**—नैर्ऋत्यामिषुविक्षेपमतीत्याम्यधिकंभुवः । दूरादावसथान्मूत्रंपुरीषंचसमाचरेत् । **मनुरपि**—दूरादावसथान्मूत्रंदूरात्पादावनेजनम् । उच्छिष्टान्ननिषेकंचदूरादेवसमुत्सृजेत् । दिनपर मिदम् । रात्रौमूत्रपुरीषेतुगृह्याभ्याशेसमाचरेदितिसंग्रहादितिचंद्रोदयः । **देवलः**—विण्मूत्राद्याचरेन्नित्यंसंध्यासुपरिवर्जयेत् । एतन्निरु द्धेतरपरम् । नवेगंधारयेन्नोपरुद्धःकियांकुर्यादितिगौतमोक्तेः । **विष्णुः**—ब्राह्मेमुहूर्तेमूत्रपुरीषोत्सर्गंकुर्यादिति । स्नापादौनिमित्तेआचम्य मूत्रपुरीषेकुर्यादित्युक्तंचंद्रिकायाम् । **प्रयोगपारिजातेदक्षः**—उभेमूत्रपुरीषेतुपूर्वमादायमृत्तिकाम् । आददानश्चवैपश्चात्सचैलोजल माविशेत् । नचप्रह्वोनचोत्तिष्ठन्नाशुचिर्नलपन्द्विजः । क्रमादभ्यादिवाप्यंतदिङ्मुखोनाहरेन्मृदम् । **हलायुधे**—अष्टांगुलंखनित्वाचद्वादशांगु लमेववा । तदधोमृत्तिकाग्राह्यासर्वत्रैवविचक्षणैः । चाचतुरंगुलम् । **यत्तु**—विनालोहंविनाकाष्ठंमृत्तिकायेनचोद्धृता । विष्ठानुलेपनंतस्यपुनः स्नानेनशुद्ध्यतीत्याचारचंद्रोदयेवचनंतन्निर्मूलम् । **सायणीयेमरीचिः**—विप्रेशुक्लातुमृच्छौचेरक्ताक्षत्रेविधीयते । हारिद्रवर्णावैश्येतुशूद्रे कृष्णेतिनिर्दिशेत् । **कौमुद्यांकश्यपः**—कृष्णास्त्रीशूद्रयोस्तथेत्याह । **मनुः**—यस्मिन्देशेतुयत्तोयंयाचयत्रैवमृत्तिका । सैवतत्रप्रशस्तास्या

---

१ चाधनमंहतिपाठः । २ तत्प्रायश्चित्तमाह—ककोंटकस्यनागस्येतिश्लोकंपठेदितिस्मार्तकृत्यतत्त्वे । ३ छंदोविरहितोनमइतिवेदविरहितोब्राह्मणइत्यर्थइतितत्रैव ।
४ गृहेशौचस्थलाभावे—मूत्रोच्चारविसर्गंवागृहेकुर्याच्छुचिस्थलेदितिस्मरणात् । ज्योतिषग्रंथेपिगृहेमूत्रपुरीषस्थाननियमादितिशेषकृतआह्निके ।

त्तयाशौचंनिर्धीयते । एतेनयथोक्तमृदलाभेकिंचिदूनहीनामृदेवग्राह्यानतुतद्वर्णद्रव्यांतरंप्रतिनिधेयम् । युक्तंचैतत् । गुणीभूतशुक्लत्वानुरोधेन प्रधानीभूतमृत्त्वत्यागेमानाभावात् । **आश्वलायनः**—अंतर्जलेदेवगृहेवल्मीकेमूषकस्थले । अन्यशौचावशेषाश्चनग्राह्याःपंचमृत्तिकाः । अन्यशौचेत्यत्रकर्मधारयोनतुषष्ठीतत्पुरुषः । तत्पुरुषापेक्षयाकर्मधारयस्यलघुत्वात् । तेनैकस्यैवशौचांतरशेषाअपिनिपिद्धाः । **सएव**—मार्गेष्वाश्मशानस्थांपांशुलांमलिनांत्यजेत् । कीटांगारास्थिसहितांनाहरेच्छर्करान्विताम् । वापीकूपतडागेपुनाहरेद्ग्राह्यमृत्तिकाम् । अंतर्जलगताग्राह्या दूरतोमणियंधनात् । जलांतःस्थितमृन्निषेधउद्धृतोदकशौचविषयः । जलांतःशौचेतुयमः—वापीकूपतडागेपुनाहरेद्ग्राह्यतोमृदम् । इदंचारण्य विषयम् । **स्मृत्यर्थसारे**—आरण्यकेपुत्वेवंसाद्ग्राम्येष्वाहरणंविदुरित्युक्तेः । **स्मृतिचिंतामणावप्येवम् । आचारादर्शेहारीतः**—मृद्धात्रीकंठेममासज्यदक्षिणपार्श्वेकमंडलुमाधायेति । **चंद्रिकायांविष्णुः**—ब्रह्मसूत्रंग्रीवायामासज्योच्चरेदिति । तत्रैवापस्तंबः—कृत्वामूर्ध्युपवीतकमितिमाधवीयेंऽगिराः । कृत्वायज्ञोपवीतंतुपृष्ठतःकंठलंबितम् । विण्मूत्रंतुगृहीकुर्याद्यद्वाकर्णेसमाहितम् । पृष्ठेनिधानंचानेकव गम्य । एकवस्यसमांख्यायनेनयद्येकवस्त्रोयज्ञोपवीतंकर्णेकृत्वेत्युक्तेरितिपृथ्वीचंद्रचंद्रिकादयः । कर्णश्चदक्षिणः । पवित्रंदक्षिणेकर्णे कृत्वाविण्मूत्रमुत्सृजेदितिलिंगात् पवित्रस्यदक्षिणकर्णस्थत्वोक्तेरुपवीतमपितत्रैवेतिमाधवीये । द्विवस्त्रत्वे—नियम्यप्रयतोवाचंनिवीतांगो वगुंठितइतिमन्वुक्तेर्निवीतमित्याचारादर्शः । **मदनरत्नेप्येवम् । स्मृतिरत्नावल्यांतु**—दिवासंध्यासुकर्णस्थब्रह्मसूत्रउदङ्मुखइति ब्रह्मचारिप्रकरणेयाज्ञवल्क्योक्तेर्ब्रह्मचारिणःकर्णेनिधानं गृहिणस्तुपृष्ठलंबितमित्युक्तम् । वस्तुतस्तुनिवीतपृष्ठलंबितयोर्विवस्त्रादिपरत्वात् यद्येकवस्त्रइत्यस्यब्रह्मचारिपरत्वासंभवात् पृथ्वीचंद्रोक्तिरेवन्याय्या । ब्रह्मचारिप्रकरणेयाज्ञवल्क्योक्तिस्तुप्रथमंब्रह्मचारिधर्माभिधानात् प्रत्युतसाधिका । **गौतमीयेइतरेषांचैतदविरोधीतिगृहस्थादौब्रह्मचारिधर्मातिदेशसाधकत्वादित्युक्तम् । अतएवस्मृत्यर्थसारे**—उपवीतंनि

वीतंपृष्ठतःकंठलंबितंकृत्वाएकवस्त्रश्चेद्दक्षिणकर्णेनिधायेति । **ज्योतिर्निबंधे**—दक्षेकर्णेचमूत्रेतुपुरीषेवामकर्णके । धारयेद्ब्रह्मसूत्रंतुमैथुनेह्युप वीतवानित्युक्तम् । **स्मृतिसारेकृष्णभट्टीयेचैवम्** । अत्रमूलंमृग्यमित्यपिकेचित् । तत्रदेशाचारतोव्यवस्था । शूद्रस्यनकर्णेनिधानं उपवीताभावात् । नचोपवीतंवस्त्रविन्यासादिति**बौधायनादि**भिरुपवीतकार्यत्वेनोक्तस्यवस्त्रोत्तरीयादेःकर्णेनिधानंतत् कर्णेनिधानसंस्कारोननिवीतादिवदंगम् । मानाभावात् । विशिखोव्युपवीतश्चेत्यादेःश्रौतस्मार्तकर्मपरत्वात् । नचैतत्स्मार्तं रागतःप्राप्तेः । भोजनादौतुप्रायश्चित्तज्ञानात्तन्नियमः । नच—पिवतोमेहतश्चैवभुंजतोऽनुपवीतिनः । प्राणायामत्रयंपद्भिर्नक्तंचत्रितयंक्रमादितिवाक्यान्मेहनांगत्वं । तस्यद्विजपरत्वात् । तदाहवृद्धपराशरः—यज्ञोपवीतेनविनाभोजनंकुरुतेद्विजः । अथमूत्रपुरीषेवारेतःसेचनमेववा । त्रिरात्रोपोषितोविप्रःपादकृच्छ्रंतुभूमिपः । अहोरात्रोपितोवैश्यःशुद्धिरेषापुरातनी । अतःशूद्रस्योत्तरीयवाससोनकर्णेनिधानमिति**शूद्राचारशिरोमणिः** । तन्न । संस्कारत्वेमानाभावात्भोजनादावपिप्रायश्चित्तसद्विजपरत्वापत्तेश्च । नैमित्तिकंह्येदंकर्णेनिधानम् । केचित्तुब्यंगुलादिनिर्मितोत्तरीयस्यकर्णेनिधानंस्थूलवस्त्रादेरसंभवादित्याहुः । वस्तुतस्तुकर्मकालेएवोपवीतोत्तरीयादिधारणनियमात्सदोपवीताभावान्नकर्णेनिधानमिति ॥ ॥ **यमः**—राजमार्गश्मशानानिक्षेत्राणिचखलानि च । उपरुद्धोनसेवेतछायांद्वयंचतुष्पथम् । उदकंचोदकांतंचपंथानंचविवर्जयेत् । राजमार्गंचतुष्पथयोरुक्तिर्दोषाधिक्यार्था पथःपृथगुक्तेरित्येके । दंडधारणरूपदृष्टप्रयोजनिकेत्याचारादर्शः । समीपलक्षणार्थेतिहलायुधः । स्वच्छायायांत्वेवमेहेदित्युक्तेःपुरुषांतरच्छायापिनिषिद्धेत्याचारादर्शः । **शौनकः**—अशौचगच्छंस्तिष्ठन्वैरथ्यांतीर्थेश्मशानके । अंगारेगोमयेनद्यांयज्ञभूमिषुसर्वदा । फालेजलेचितायांचवल्मीके गिरिमस्तके । देवालयेनदीतीरेदर्भपुष्पकुशस्थले । सेव्यच्छायेषुवृक्षेषुमार्गगोष्ठांबुभस्मसु । स्थानेष्वेतेषुसर्वेषुकुर्यान्मूत्रादिकंचन । वायुवार्यर्कगोसोमतुलसीस्त्रीद्विजन्मनः । पश्यन्नभिमुखोमूत्रपुरीषादीन्नकारयेत् । नफालकृष्टेनजलेननद्यांनचपर्वतेइति**मनुना**पर्वतमात्रनिषेधात् । गिरि

मस्तकग्रहणंदोषाधिक्यार्थम् । अतःपर्वतवासिनांपर्वतापरिहारेपिमस्तकःपरिहार्यइतिचंद्रिका । **काल्यायनः**—मूत्रपुरीषेष्ठीवनंचातपेनकुर्यादिति । **याज्ञवल्क्यः**—नप्रत्यग्न्यर्कगोसोमसंध्यांवुस्त्रीद्विजन्मनः । **विष्णुः**—गोमयांगारवल्मीकफालकृष्टेंऽबरेतरौ । संसत्त्वेशाद्वलोद्या नेनमेहेतकदाचन । अंबरेंऽतरिक्षे । **विष्णुः**—नोच्चरेदाकाशेइति । आकाशेऽसंवृते । यदाकाशःस्मृतोभीमस्तस्मान्नासंवृतेक्वचित् । कुर्यान्मूत्रंपुरीषंवानभुंजीतपिबेन्नवेतिवायुपुराणात् । अतोट्टालिकादौननिषेधइत्याचारादर्शः । तन्न । अंतरिक्षनिषेधेनैवतन्निषेधात् । **चंद्रोदयेवृद्धमनुः**—दशहस्तंपरित्यज्यमूत्रंकुर्याज्जलाशयात् । शतहस्तंपुरीषेतुतीर्थेचैवचतुर्गुणम् । **मनुः**—दूरादावसथान्मूत्रदूरात्पादावनेजनम् । उच्छिष्टान्ननिषेकंचदूरादेवसमाचरेत् । **मदनपारिजातेवृद्धविष्णुः**—अंतर्धायतृणैर्भूमिंशिरःप्रावृत्यवाससा । वाचंनियम्ययत्नेनष्ठीवनोच्छ्वासवर्जितः । तृणैरयज्ञियै. । अयज्ञियैरनार्द्रैःसंच्छाद्यकाष्ठतृणैर्महीमितियमोक्तेः ॥ ॥ **यज्ञियकाष्ठान्युक्तानिब्राह्मे**—शमीपलाशन्यग्रोधप्लक्षवैकंकतोद्भवाः । अश्वत्थोदुंबरौबिल्वश्चंदनःसरलस्तथा । सालश्चदेवदारुश्चखदिरश्चेतियज्ञियाः । काष्ठाद्यंतर्धानंकुर्यान्नवेतिस्मृत्यर्थसारे । **प्रयोगपारिजातेसंग्रहे**—नसोपानत्पादुकीवाछत्रीवानांतरिक्षगः । **हारीतः**—घ्राणास्येसमावेष्टयेदिति । **याज्ञवल्क्यः**—दिवासंध्यासुकर्णस्थब्रह्मसूत्रउदङ्मुखः । कुर्यान्मूत्रपुरीषेचरात्रौचेद्दक्षिणामुखः । केचित्तुदिवापदेनैवसंध्याप्राप्तौपुनरुक्तिरहनिमनूक्तसुखमुखत्वबाधार्थेत्याहुः । तन्न । संध्यायादिवारात्रिभेदेनपुनरुक्तेरुपपत्तेः । अतएवाखंडमंडलावच्छिन्नःकालोदिवसः । खंडमंडलावच्छिन्नःकालःसंध्या । तद्विन्नारात्रिरितिशास्त्रेपुचव्यवहारः । अतोरात्रौदक्षिणामुखोऽन्यथोदङ्मुखइतिवाच्येपुनःसंध्याग्रहोऽन्यमिचारा

---

१ ससत्वप्राणिप्रचुरम् । २ स्नातकधर्मप्रस्तरणेआपस्तंब –नसोपानत्कोमूत्रपुरीषेकुर्यादिति । इदंचस्नातकधर्मप्रकरणात्स्नातकविषयम् । उपानद्दनिषेधस्तुस्नानदेवयाग्याद्युपयुक्तोपानद्दपरोदृष्टार्थं । सोपानत्क प्रकुर्वीतमूत्रोच्चारविसर्जनमितिस्मृत्यंतरात् ।

र्थइतितुवयम् । **यत्तु**—प्रत्यङ्मुखस्तुपूर्वाह्णेपराह्णेप्राङ्मुखस्तथा । उदङ्मुखस्तुमध्याह्नेनिशायांदक्षिणामुखइति**यमोक्तिः** सासूर्यसांमुख्यनिषे
धपरा । सदैवोदङ्मुखःप्रातःसायाह्नेदक्षिणामुखइति**देवलोक्तेरितिपृथ्वीचंद्रपारिजातादयः** । प्रातःपदंदिनपरम् । सायाह्नपदंरात्रि
परम् । **योगीश्वरोक्त्यनुसाराद्विकल्पइतिचंद्रिकामदनपारिजातकृत्यरत्नेषु** । युक्तस्तूपसंहारः सामान्यविशेषयोर्विकल्पायोगात् ।
तस्याष्टदोषग्रस्तत्वाच्च । केचित्तुतुल्यार्थत्वेपिमनुविपरीतायास्मृतिःसानशस्यतइति **बृहस्पतिस्मृतेरन्यस्मृतीनांदुर्बलत्वेनाप्रामाण्यंनतुविकल्प**
इत्याहुः । तन्न । प्रत्यक्षश्रुतिविरोधेपिस्मृतीनामप्रामाण्यंनास्तीत्युक्त**माचार्यैर्विरोधाधिकरणे** । किंत्वनुष्ठानलक्षणंतत् । स्मृतिविरोधेप्य
प्रामाण्यंस्मृतीनांदूरापास्तम् । **बृहस्पतिस्मृतिस्तुप्राशस्त्यार्थाकृतयुगपरा** । कृतेतुमानवाधर्मास्त्रेतायांगौतमाःस्मृताः । द्वापरेशंखलिखितौकलौ
पाराशरस्मृतिरिति**माधवीयेबृहस्पतिस्मृतेः** । **यत्तुमनुः**—छायायामंधकारेवारात्रावहनिवाद्विजः । यथासुखमुखःकुर्यात्प्राणवाधाभयेषुच ।
तन्नीहारादिजातदिङ्मोहविषयमिति**माधवः** । **शिवधर्मोत्तरे**—नविण्मूत्रमवेक्षेतछायांनैवात्मनोऽपिच । दर्शनेयमः—दृष्ट्वासूर्यंनिरीक्षे
तगामग्निंब्राह्मणंतथा । **कृत्यरत्नेजाबालिः**—स्नानंकृत्वार्द्रवासास्तुविण्मूत्रंकुरुतेयदि । प्राणायामत्रयंकृत्वापुनःस्नानेनशुद्ध्यति । **कौर्मे**—तै
लाभ्यक्तोऽथवाकुर्याद्यदिमूत्रपुरीषके । अहोरात्रेणशुद्ध्येतश्मश्रुकर्मणिमैथुने ॥ ॥ **अभ्यंगउक्तःप्रायश्चित्तशूलपाणावायुर्वेदे**—मूर्ध्नि
दत्तंयदातैलंभवेत्सर्वांगसंगतम् । स्रोतांसितर्पयेद्वाहूअभ्यंगःसउदाहृतः । तैलमल्पंयदांगेपुनचस्नाद्वाहुतर्पणम् । सामार्ष्टिःपृथगभ्यंगोमस्तकादौ
प्रकीर्तितः । **माधव्यांशातातपः**—अनुदकमूत्रपुरीषकरणे सचैलंस्नानंव्याहृतिहोमंचकुर्यादिति । एतच्छौचंविनाचिरकालंस्थितावि
मदनपारिजातः । विलंबाभावेस्नानमात्रम् । विनाद्भिरप्सुवाप्यंतःशरीरंयोनिषेवते । सचैलोवाद्भिराप्लुत्यगामालभ्यविशुद्ध्यतीति**मनूक्तेः** ।
अत्यंतार्तस्येदमिति**शूलपाणिः** । **मिताक्षरायांमरीचिः**—ब्रह्मसूत्रंविनाभुंक्तेविण्मूत्रंकुरुतेतथा । गायत्र्यष्टसहस्रेणप्राणायामेनशुद्ध्य

ति । **स्मृत्यर्थसारे**—विनायज्ञोपवीतेनविण्मूत्रेपदप्राणायामाः । मत्याभक्षपानविण्मूत्रेत्वष्टशतजपइति । **प्रयोगपारिजातेभरद्वाजः**—मलमूत्रेत्यजेद्विप्रोविस्मृत्यैवोपवीतधृक् । उपवीतंतदुत्सृज्यदध्यादन्यत्रवंतदा । निवीतादिविस्मृत्येत्यर्थः । **स्मृत्यर्थसारे**—चांडालादिस्पृष्टश्चेत्पुरीषादिकरोतितदात्रिरात्रमुपवासइति । **माधवीयेसंवर्तः**—कृतमूत्रपुरीषोवाभुक्तोच्छिष्टोपिवाद्विजः । श्वादेःस्पर्शेजपेद्देव्याःसहस्रंस्नानपूर्वकम् । **प्रयोगपारिजातेकौर्मे**—देवोद्यानेतुयःकुर्यान्मूत्रोच्चारंसकृद्विजः । छिंद्याच्छिश्नंतुशुद्ध्यर्थंचरेच्चांद्रायणव्रतम् । देवायतनेप्येतत् । **विष्णुपुराणे**—तिष्ठेन्नातिचिरंतत्रेति । तत्र मूत्रपुरीषोत्सर्गस्थले । **हारीतः**—लोष्टेनत्रमृजीतशुष्ककाष्ठेनवेति । लोष्ठकाष्ठाभावेगौतमोक्तिविरोधादित्याचारादर्शः । **भरद्वाजः**—अपकृष्यचविण्मूत्रंकाष्ठलोष्ठतृणादिना । **यच्चुगौतमः**—नपर्णलोष्ठाश्मभिर्मूत्रपुरीषेअपकर्षयेदिति । तदशीर्णविषयं यज्ञियपर्णविषयंवा । मार्जनंवामहस्तेनवीरणाद्यैरयज्ञियैरितिस्मृत्यंतरात् । **गौतमोक्तिरुक्तकाष्ठादिसंभवइतिचंद्रिका** । **अत्रिः**—शुद्ध्यर्थंचत्रिभिःकाष्ठैस्तृणैर्वापिनिघर्षयेत् । **आश्वलायनः**—विण्मूत्रोत्सर्जनंकुर्याद्धृतशिश्नउदङ्मुखः । **स्कांदे**—वामेनपाणिनाशिश्नंधृत्वोत्तिष्ठेत्सदाद्विजः । **देवलः**—आशौचान्नोत्सृजेच्छिश्नंप्रस्रावोच्चारयोस्तथा । नैतेबालस्यनियमाउदङ्मुखादयः । तं अकृत्य—नतस्याचमनकल्पोविद्यतेनतस्योदङ्मुखोदिवारात्रौदक्षिणामुखइत्यादयोनियमाइति**गौतमोक्तेः** ॥ इतिश्रीमन्नारायणभट्टात्मजश्री० लक्ष्मणभट्टकृतेआचाररत्नेमूत्रपुरीषोत्सर्गविधिः ॥ ॥

अथशौचम् ॥ दक्षः—शौचेयत्नःसदाकार्यःशौचमूलोद्विजःस्मृतः । शौचाचारविहीनस्यसमस्तानिष्फलाःक्रियाः । **ब्रह्मांडपुराणे** सुनिर्णिक्तेमृदंदद्यान्मृदंतेत्वपएवच । सुनिर्णिक्तेक्षालितेपाणिपादादावितिकल्पतरुः । काष्ठादिप्रोंच्छितइत्यन्ये । **गौतमः**—गंधलेपाद्यपगमेशौचममेध्यस्यतदद्भिःपूर्वंमृदाचेति । अपगमइतिनिमित्तसप्तमी । **स्मृत्यर्थसारे**—त्रिपर्वपूरमात्रावामृत्तिकाक्षप्रमाणिका । अक्षोऽशीति

गुंजः । परिमाणमिदंनगुदे । अर्धप्रसृतिमात्रमितिदक्षेणगुदेप्रमाणांतरोक्तेरित्याचारादर्शः । मृद्ग्रहणंग्रावासक्तमृद्ग्रात्रीतः । तदसंभवेन्यतो वेति । शौचंदिवोदङ्मुखोरात्रौदक्षिणामुखःकुर्यादित्युक्तम् । **चंद्रिकायांशौनकः**—लिंगशौचंपुराकार्यंगुदशौचंततःपरम् । एकातुमृत्तिका लिंगेतिस्रःसव्यकरेमृदः । करद्वयेमृद्वयंस्यान्मृत्प्रमाणमथोच्यते । आर्द्रामलकमात्राचलिंगशौचेतुमृत्तिका । मूत्राच्चद्विगुणंशुक्रेमिथुनेत्रिगुणं भवेत् । शुक्रेमैथुनंविनाशुक्रोत्सर्गे । पुरीषेतु—पंचापानेमृदःक्षेप्याःकरेवामेदशस्मृताः । हस्तयोःसप्तदातव्याःपुरीषेमृत्प्रमाणकम् । अर्धप्र सृतिमात्रंस्यात्तदर्धंततःपरम् । ऐकैकंपादयोर्दद्याद्धस्तयोर्लिंगशौचवत् । एकैकमितिमूत्रपरमितिकृष्णभट्टीये । उभयपरमितियुक्तम् । **दक्षः**—अर्धप्रसृतिमात्रातुप्रथमामृत्तिकास्मृता । द्वितीयाचतृतीयाचतदर्धार्धाःप्रकीर्तिताः । लिंगेष्येवंसमाख्याताःत्रिपर्वीपूर्यतेयया । **चंद्रि कायांत्वंगिराः**—प्रथमाप्रसृतिर्ज्ञेयाद्वितीयातुतदर्धिका । तृतीयामृत्तिकाज्ञेयात्रिभागकरपूरिणीति । एकालिंगइतिमूत्रशौचे । पंचापानेइति विट्शौचे । पंचापानेदशैकस्मिन्नुभयोःसप्तमृत्तिकाइति**याज्ञवल्क्योक्तेः** । **यत्तुविश्वरूप**—तिस्रोमृदोलिंगशौचेग्राह्याःसांतरमृत्तिकाः । वामेपाणौमृदःपंचतिस्रःपाण्योर्द्वयोरपीति । सांतराःकिंचिन्न्यूनाइत्यर्थः । **यच्चयमः**—द्वेलिंगेमृत्तिकेदेयेइति । यदपिशंखः—मेहनेमृत्तिकाः सप्तलिंगेद्वेपरिकीर्तितइति । तल्लेपभूयस्त्वेविण्मूत्रोत्सर्गशुद्ध्यर्थम् । मृद्वार्यादेयमर्थवदिति**मनूक्तेः** । गुदेपंचेतिप्रयोगपारिजातपृथ्वीचं द्रादयः । **चंद्रिकाचारादर्शौतु**—एकालिंगेगुदेतिस्रस्तथैकत्रकरेदशेति**मनूक्तेर्गु**देतिस्रः । गुदेपंचसंख्यातु—अर्धप्रसृतिमात्रातुप्रथमामृ त्तिकाभवेत् । पूर्वपूर्वार्धमात्रास्तुचतस्रोन्याःप्रकीर्तिताइति**वृद्धवसिष्ठेनाल्पपरिमाणोक्तेरविरुद्धा** । **यत्तुशातातपः**—आर्द्रामलकमात्रास्तु

१ दशविभागाःकरमध्येचतस्रःपृष्ठेपडिति । षट्पृष्ठतइतिहारीतीयादितिमैथिलाः । २ अर्धामलकमात्रास्तुइतिपाठः ।

ग्रासाइंदुव्रतेस्मृताः । तथैवाहुतयःसर्वाःशौचार्थेयाश्चमृत्तिकाइति तद्धस्तशौचपरम् । गुदलिंगयोर्मृत्परिमाणांतरोक्तेरित्यूचतुः । यमः—
उभयोःसप्तदातव्याःपुनरेकागुदेतथेति पुनर्दानंसर्वपक्षेपुज्ञेयमितिचंद्रिका । हारीतः—दशसव्येपदृष्ठेसप्तोभाभ्यांतिसृभिःपादौक्षाल
येदिति । पृष्ठेसव्यहस्तस्य । तिसृभिरितिलेपभूयस्त्वइत्याचारादर्शः । एकत्वत्रित्वयोस्तुल्यवद्विकल्पइत्यन्ये । मिताक्षरायांशौनकः—
एतच्छौचंगृहस्थानांद्विगुणंब्रह्मचारिणाम् । त्रिगुणंस्याद्वनस्थानांयतीनांस्याच्चतुर्गुणम् । दिवायद्विहितंशौचंतदर्धंनिशिकीर्तितम् । तदर्धमातुरे
ग्रोक्तमातुरस्यार्धमध्वनि । द्वैगुण्यादिसंख्यामात्रेतदुत्तरंस्मृतिष्वभिधानादितिहोडरानंदः । नेदंयुक्तम् । संख्यार्धासंभवात् । अत्रमध्यामृद
र्धपरिमाणाग्राह्येतिस्मृतिकौमुदीशूद्राचारशिरोमणिश्च । आतुरेऽर्धमशक्तपरम् । शक्तस्यपूर्णमेव । दिवाशौचस्यनिश्यर्धंपथिपादोवि
धीयते । आर्तःकुर्याद्यथाशक्तिस्वस्थःकुर्याद्यथोदितमित्यादिपुराणादितिचंद्रिका । योगीश्वरः—स्त्रीशूद्रादेरशक्तानांबालानांचोपवीतिनाम् ।
गंधलेपक्षयकरंशौचंकुर्यान्नसंख्यया । वातादिनाशुष्केलेपेगंधनिवृत्तावपिलेपक्षयार्थंलेपग्रहः । तन्निवृत्तावपिगंधानुवृत्तौतद्वारणायगंधपदम् ।
बालस्यपंचमवर्षप्रभृतिमृदाद्यावश्यकम् ।—बालस्यपंचमाद्वर्षाद्रक्षार्थंशौचमाचरेदितिस्मृतेः । आदित्यपुराणे—स्त्रीशूद्रयोरर्धमानंप्रोक्तं
शौचंमनीषिभिः । एतच्छौचंद्विजातीनामर्धंशूद्रेप्रकीर्तितमिति । तद्गृहस्थशूद्रान्यपरम् । तस्य—एतच्छौचंगृहस्थानामित्येवसिद्धेरितिकेचित् ।
तन्न । गृहस्थेशूद्रेऽर्धेनैतच्छौचमित्यस्यबाधात् । अतएव—नयावदुपनीयंतेद्विजाःशूद्रास्तथांगनाः । गंधलेपक्षयकरंशौचमेषांविधीयतइतिपरा
शरस्मृतौ । स्त्रीशूद्रपदमकृतोद्वाहपरम् । अनुपनीतसाहचर्यात्पराशरमाधवीये । अतएवार्धसंख्यागृहस्थपरा । वस्तुतस्तुशूद्रगृहस्थप
दयोःसामान्यविशेषाभावस्तुल्यत्वाच्छूद्रगृहस्थस्यविकल्पइति सोपिव्यवस्थितः । विवाहाभावेद्वादशवर्षोत्तरंषोडशवर्षोत्तरंवामृत्संख्यानिय
मोऽन्यथानेतिकौमुदी । एतेन स्त्रिया अर्धसंख्याचशूद्रस्यचनविधवापरा । अन्यथागंधलेपक्षयकरशौचबाधापत्तेरित्याचारचंद्रोदयो

क्तिःपरास्ता । **वृद्धन्नारदीये**—व्रतस्थानांचसर्वेषांयतिवच्छौचमिष्यते । विधवानांचराजेंद्रएवंशौचंप्रकीर्तितम् । अतोऽर्धसंख्यासधवास्त्री परेतिवयंप्रतीमः । **यत्तुदक्षः**—एकस्मिन्विंशतिर्हस्तेद्वयोर्देयाश्चतुर्दशेति । तत्पूर्वोक्तशौचेनगंधलेपानपगमेज्ञेयमितिकेचित् । ब्रह्मचार्यादिप रमिति**माधवीये** । गृहस्थस्याप्यवदानसमामृत्स्यादिति**मरीच्युक्ता**ल्पपरिमाणश्रुतेरविरोधइति**चंद्रिका** । **अपरार्केदक्षः**—न्यूनाधिकंन कर्तव्यंशौचंशुद्धिमभीप्सता । प्रायश्चित्तेनयुज्येतविहितातिक्रमेकृते । इदंसंख्यामानमुभयपरमविशेषादिति**टोडरानंदः** । तदपि यावदुक्तेन गंधलेपनाशे । अनाशेत्वधिकम् । यावत्तुशौचंमन्येततावच्छौचंविधीयतइतित्रैवदे**वलोक्तेः** । तेनशौचंदृष्टार्थं संख्यानियमोऽदृष्टार्थइत्युक्त मित्या**चारादर्शः**परास्तः । यावन्नापैत्यमेध्याक्तोगंधोलेपश्चतत्कृतः । तावन्मृद्वारिचादेयंसर्वासुद्रव्यशुद्धिष्वितिम**नूक्ति**विरोधात् । **चंद्रि** काप्येवम् । इदंवाक्यद्वयंदक्षोक्तिविरोधाच्चातुराश्रम्येतरपरं तत्रसंख्यादेरश्रुतेरितिप्रांचः । सगंधलेपानामेवतेषांकर्मस्यादितियल्किंचिदेतत् । पुरीषाद्युत्सर्गेप्रवृत्तस्यतदभावे**सायणीयेप्रयोगपारिजातेच**वृद्धपराशरः—उपविष्टस्तुविण्मूत्रंकर्तुंयश्चनविंदति । सकुर्यादर्धशौचंतुख ल्वशौचस्यसर्वदा । दातव्यमुदकंतावन्मृदभावोयदाभवेत् । **बृहस्पतिः**—भुंजानस्यतुविप्रस्यकदाचित्प्रस्रवेद्गुदम् । उच्छिष्टमशुचित्वंचत स्यशौचंविधीयते । पूर्वंकृत्वैवशौचंतुततःपश्चादुपस्पृशेत् । ततःकृत्वोपवासंचपंचगव्येनशुद्ध्यति । **पैठीनसिः**—मूत्रोच्चारेकृतेशौचंनस्यादं तर्जलाशये । इदंनद्यादिविषयमितिप्र**योगपारिजाते** । असंभवइति**स्मृतिरत्नावल्याम्** । पात्रवतोवा । अपात्रस्यतु**विवस्वान्**— रत्निमात्रंजलंत्यक्त्वाकुर्याच्छौचमनुद्धृतैः । पश्चात्तच्छोधयेत्तीर्थमन्यथाह्यशुचिर्भवेत् । तीर्थशौचस्थानम् । यस्मिन्स्थानेकृतंशौचंवारिणातद्वि शोधयेदिति**ऋष्यशृंगोक्तेः** । **पराशरः**—धर्मविद्दक्षिणंहस्तमधःशौचेनयोजयेत् । तथाचवामहस्तेननाभेरूर्ध्वंनशोधयेत् । **देवलः**— प्रकृतिस्थितिरेषाहिकारणादुभयक्रिया । कारणाद्धस्तरोगादेः । उभयक्रियावामेनाप्यूर्ध्वंदक्षिणेनाप्यधइत्यर्थः । **स्मृतिसंग्रहे**—करस्थमुद

पात्रंचेत्कुर्यान्मूत्रपुरीषयोः । तज्जलंमूत्रसदृशंसुरापानेनतत्समम् । एतदपवादमाहवृद्धपराशरः—अरण्येनिर्जलेरात्रौचौरव्यालाकुलेपथि । कुर्वन्मूत्रपुरीषेतुद्रव्यहस्तोनदुष्यति । मृदादिहस्तेधृत्वानदुष्यतीत्यर्थः । स्मृतिदीपिकायामाचारादशौचदेवलः—प्रथमंप्राङ्मुखः स्थित्वापादौप्रक्षालयेच्छनैः । उदङ्मुखोवादैवत्येपैतृकेदक्षिणामुखः । इत्येवंमृद्भिराजानुप्रक्षाल्यचरणौपृथक् । हस्तौवामणिबंधाच्चकुर्यादाचमनंततः । यत्त्वापस्तंबआह प्रत्यक्पादावसेचनमिति तत्केवलपादक्षालनपरमित्याचारादर्शः । कृष्णभट्टीये—स्वयंप्रक्षाल्येत्पादौशूद्रादिर्वाकथंचन । शौचाद्तेवामपादंपश्चाद्दक्षिणमेवच । शौचेप्रथमंदक्षिणं अन्यत्रवामम् । अत्रदक्षिणंपादमवनेनिजे सव्यंपादमित्यादिलिंगात्पादप्रक्षालनक्रमोज्ञेयः । क्षत्रियवैश्ययोःक्षालयितृसत्वेसव्यंवापूर्वदक्षिणवेत्यनियमइतिनारायणवृत्तिः । दक्षिणोपक्रमंपादौ क्षालयेदितिकात्यायनभाष्याच्चशौचाद्तेवामपादमितिनिर्मूलम् ॥ ॥ निवीतंपृष्ठलंबितंकर्णस्थंवाआहस्तशौचात् । तावत्तयोरपवित्रत्वेनोपवीतसंबंधायोग्यत्वात् । अपवित्रत्वंचशौचाम्नानात् । उपवीतस्यकर्मांगत्वेनविधानान्निवीतादिनाचमनासंभवाच्च । अतएववृद्धपराशरः—कृत्वातुशौचप्रक्षाल्यपादौहस्तौचमृज्जलैः । निबद्धशिखकच्छस्तुद्विजआचमनंचरेत् । कृत्वोपवीतंसव्येसेवाग्यतःकार्यसंयतम्[1] । शिखकच्छइत्यत्रव्युत्क्रमोबोध्यः । कच्छबंधोक्तेःपूर्वशौचान्मुक्तकच्छत्वम् । शिखाबंधश्चदैवान्मुक्तशिखस्यशिखाबंधार्थंनतुमूत्रपुरीषोत्सर्गकालेशिखामोचनार्थम् । आश्वलायनः—कुर्याद्वादशगंडूषान्पुरीषोत्सर्जनेबुधः । मूत्रोत्सर्गेतुचतुरोभोजनांतेतुषोडश । भक्ष्यभोज्यावसानेचगंडूषाष्टकमाचरेत् । स्मृतिरत्नावल्याम्—पुरतःसर्वदेवाश्चदक्षिणेपितरस्तथा । ऋषयःपृष्ठतःसर्वेवामेगंडूषमुत्सजेत् । स्मृतिरत्नावल्यांकृष्णभट्टीयेच—चतुरष्टद्विषट्क्षष्टगंडूषैःशुद्ध्यतेक्रमात् । मूत्रेपुरीषेभुज्यंतेरेतःसंस्रवणेपिच । स्मृतिसंग्रहे—सकर्दमेतुवर्षासुप्रविश्यग्राम

---

१ कायसंयुत इतिपाठ ।

संकटम्। जंघयोर्मृत्तिकास्तिस्रःपादयोर्द्विगुणंभवेत्। **विष्णुः**—नाभेरधस्तात्कायिकैर्मलैःसुराभिर्वोपहतौमृत्तोयैस्तदंगंप्रक्षाल्याचांतःशुद्ध्येत्। अन्यत्रोपहतौमृत्तोयैस्तदंगंप्रक्षाल्यस्नात्वेन्द्रियोपहतस्तूपोप्यपंचगव्येनदशनच्छदोपहतश्चेति। **मनुः**—वसाशुक्रमसृङ्मज्जामूत्रविट्पूर्णविण्णखाः। श्लेष्माश्रुदूषिकास्वेदोद्वादशैतेनृणांमलाः। दूषिकानेत्रमलः॥ ॥ **अत्रशौचमाहवौधायनः**—आददीतमृदोयश्चपदसुपूर्वंपुशुद्धये। उत्तरेपुतुपदस्त्रिःकेवलाभिर्विशुद्ध्यति। **मनुस्तुद्वादशस्वपिमृज्जलाभ्यांशुद्धिमाह**—विण्मूत्रोत्सर्गशुद्ध्यर्थंमृद्वार्यादेयमर्थवत्। दैहिकानांमलानांचशुद्धिपुद्वादशस्वपीति। **कृत्यरत्नेयमः**—मूत्रादौपादयोस्तिस्रोहस्तयोस्तिस्रएवच। मृदःपंचदशामेध्येहस्तादीनांविशेषतः। एतदात्मीयमूत्रादिस्पर्शे। परस्यशोणितस्पर्शेरेतोविण्मूत्रजेतथा। चतुर्णामपिवर्णानांद्वात्रिंशन्मृत्तिकाःस्मृताः। **शूलपाणौदेवलस्तु**—मानुषास्थिवसांविष्ठामार्तवंमूत्ररेतसी। मज्जानंशोणितंवापिपरस्यदिसंस्पृशेत्। स्नात्वासंमृज्यलेपादीनाचम्यसशुचिर्भवेत्। तान्येवखानिसंस्पृश्यपूतःस्नात्वासंमार्जनात्। मार्जनोत्तरमाचमनंच। **शंखः**—तिस्रस्तुमृत्तिकादेयाःकृत्वाचनखशोधनम्। नखशोधनंनखांतर्गतमलशोधनम्। एवंपादयोः। **मनुः**—अज्ञानात्प्राश्यविण्मूत्रंसुरासंस्पृष्टमेवच। पुनःसंस्कारमर्हंतित्रयोवर्णाद्विजातयः। रेतःप्राशनेप्येवम्। **विज्ञानेश्वरीयेप्रचेताः**—नखकेशमृल्लोष्टभक्षणेअहोरात्रमभोजनाच्छुद्धिरिति। **संवर्तः**—कृत्वामूत्रंपुरीषंवायदानैवोदकंभवेत्। स्नात्वालब्धोदकःपश्चात्सचैलस्तुविशुद्ध्यति॥ ॥ **शौचोक्तेनियमातिक्रमेप्रायश्चित्तंस्मृतिरत्नावल्याम्**—गायत्र्यष्टशतंचैवप्राणायामत्रयंतथा। प्रायश्चित्तमिदंप्रोक्तं नियमातिक्रमेसति॥ इतिश्रीमन्नारायणभट्टात्मजं०लक्ष्मणभट्टकृताचाररत्नेशौचविधिः॥

अथाचमनम्। शौचोत्तरमाचामेत्—एवंशौचंतुनिर्वर्त्यपश्चादाचमनंचरेदितिवृहन्नारदीयात्। पूर्वोक्तवृद्धपराशरोक्तेश्च। **याज्ञव**ल्क्यः—अंतर्जानुशुचौदेशेउपविष्टउदङ्मुखः। प्राग्वाप्राङ्मुखेणतीर्थेनद्विजोनित्यमुपस्पृशेत्। उपस्पृशेदाचामेत्। अत्रविज्ञानेश्वरेणद्विजोनशूद्रा

दिरित्युक्तेःशूद्राचमनेउपवेशनादिनियमोनेतिकेचित् । युक्तंतुब्राह्मतीर्थस्यैवद्विजेनियमः । उपवेशनादिसर्वसाधारणम् । स्थितस्याचमननिषेधात् । **हारीतः**—ऐशान्यभिमुखोभूत्वोपस्पृशेत्तुयथाविधि । **हेमाद्रौदेवलः**—उदङ्मुखोवादैवत्येपैतृकेदक्षिणामुखः । **स्मृतिरत्नावल्याम्**—याम्यप्रत्यङ्मुखत्वेनकृतमाचमनंयदि । प्रायश्चित्ततदाकुर्यात्स्नानमाचमनंक्रमात् ॥ ॥ **तीर्थान्याह याज्ञवल्क्यः**—कनिष्ठादेशिन्यंगुष्ठमूलान्य ग्रंकरस्यच । प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् । **वसिष्ठः**—अंगुल्यग्रेपुमानुपंपाणिमध्येआग्नेयंतीर्थमार्षकनिष्ठिकामूलइतितीर्थानि । ब्राह्मणस्य दक्षिणहस्तेपंचतीर्थानीतिप्रचेतःस्मृतेः । दक्षिणेत्युपलक्षणम् । अंजलितर्पणेदक्षिणहस्ताभावेचवामहस्तेपितदपेक्षणात् । ब्राह्मणपदंक्षत्रियाद्युपलक्षणम् । ब्राह्मेणतीर्थेनद्विजोनित्यमुपस्पृशेदितियाज्ञवल्क्येनद्विजपदोक्तेः।हेमाद्रौचंद्रिकायामप्येवम्—कायंकनिष्ठिकामूलेतीर्थमुक्तं द्विजस्यैतिवर्धमानपरिभाषायांशंखोक्तेश्च । शूद्रस्यतर्पणादौपित्र्यादितीर्थाक्षेपाच्च । अतएव—ब्राह्मेणविप्रस्तीर्थेनेतिमनूक्तौविप्रपद माचमनकर्तृमात्रोपलक्षणमित्याचारादर्शः। अत्रविकल्पिततीर्थस्वीकरणमाचमनाद्यप्रयोगेवेद्यंनप्रतिप्रयोगमितिचंद्रिका। वस्तुतस्तुएकाचम नांतर्गतत्रिःप्राशनेप्येकमेवतीर्थम् । ब्राह्मेणनित्यमुपस्पृशेदितियाज्ञवल्क्योक्तेर्ब्राह्मंमुख्यम् । **यत्तुहेमाद्रौशंखः**—प्राजापत्येनतीर्थेनत्रिः प्राश्नीयाज्जलंशुचिरिति । **पद्मपुराणे**—कायत्रैदशिकाभ्यांवानपित्र्येणकदाचनेति । तद्ब्राह्मतीर्थसक्षताद्यवरोधेज्ञेयमितिपृथ्वीचंद्रः । **हारीतः**—वामहस्तेकुशान्कृत्वासमाचामतियोद्विजः । उपस्पृष्टंभवेत्तेनरुधिरेणमलेनच । वामहस्तेकेवले । उभयत्रस्थितैर्दर्भैःसमाचामतियोद्विजः । सोमपा नफलंतस्यभोक्तायज्ञफलंलभेदितिगोभिलोक्तेः । **श्राद्धहेमाद्रौगौतमः**—वामहस्तेस्थितेदर्भेदक्षिणेनपिबेन्नतु । वस्त्राजिनोपग्रहणेनदोषः पिबतोभवेत् । **चंद्रोदयेयमः**—तावन्नोपस्पृशेद्विद्वान्यावद्ग्रामेननस्पृशेत् । दक्षिणंकरमितिशेषइतिपृथ्वीचंद्रः । जलमितिचंद्रिकापरार्कौ । हस्तस्थंजलमित्याचारादर्शः । **आचारप्रदीपे**—दक्षिणेसंस्थितंतोयंतर्जन्यासव्यपाणिना । तत्तोयंस्पृशतेयस्तुसोमपानफलंलभेत् ।

आचारचंद्रोदयेप्येवम् । आश्वलायनः—ग्रंथीकृतपवित्रेणनभुंजीयान्नचाचमेत् । ग्रंथिर्नह्यग्रंथिः । नत्रह्यग्रंथिनाचामेन्नदूर्वाभिःकदा चनेतिचंद्रोदयेस्मृतिसारात् । कौशिकः—अपवित्रकरःकश्चिद्ब्राह्मणोयद्युपस्पृशेत् । अकृतंतस्यतत्सर्वंभवत्याचमनंतथा । याज्ञव ल्क्यः—अद्भिस्तुप्रकृतिस्थाभिर्हीनाभिःफेनबुद्बुदैः । हृत्कंठतालुगाभिस्तुयथासंख्यंद्विजातयः । शुद्ध्येरन्स्त्रीचशूद्रश्चसकृत्स्पृष्टाभिरंततः । प्र कृतिस्थाभिरफेनाभिः । अंततस्तालुनेतिविज्ञानेश्वरः । तत्समीपवर्तिनादंतेनेतिहेमाद्रिः । ओष्ठप्रांतेनेत्याचारादर्शः । मापमज्जनमात्रा हृदयंगमाभवंतीत्युशनःस्मरणादेकैकपादहान्याकंठतालुतदंतर्गतत्वमितिहेमाद्रिः । द्विजपदादनुपनीतानामपितेषामुपनीतवदाचमनमित्या चारचंद्रोदयः । तन्न । नह्यस्मिन्युज्यतेकर्मकिंचिदामौंजिबंधनात् । शूद्रेणहिसमस्तावद्यावद्वेदेनयुज्यतइतिमनूक्तेः । उपनयनात्पूर्वंशूद्र समत्वोक्तेःशूद्रवदाचमनमितियुक्तम् । बौधायनस्तुशूद्राणामार्केछिष्ठि(?)तानामार्यवदाचमनंवैश्यवच्छौचमिति । हारीतः—विवर्णगंधव तोयंफेनिलंचविवर्जयेत् । प्रकृतिस्थाभिरित्युक्तेयत्स्वभावतएवगंधादिमत्तन्ननिषिद्धम् । माधव्यांप्रचेताः—अनुष्णाभिरफेनाभिःपूताभिर्वस्त्रच धुपा । हेमाद्रौबौधायनः—शब्दमकुर्वन्निरपोहृदयंगमाःपिबेदितिटोडरानंदेगोभिलः । हृदयस्पृशएवापउपस्पृशेदुच्छिष्टोहैवातोन्य थाभवतीति । दक्षः—प्रक्षाल्यपादौहस्तौचत्रिःपिबेदंबुवीक्षितम् । यमः—रात्रावबीक्षितेनापिशुद्धिरुक्तामनीषिभिः । उदकेनातुराणांतुयथो ष्णेनोष्णपायिनाम् । मार्कंडेयगार्ग्यडयोः—अंतर्जानुतथाचामेन्निश्चतुर्वापिबेदपः । अत्रचतुष्टस्यत्रित्वेनैच्छिकोविकल्पइतिमाधव्यांहे माद्रौच । दैवपित्र्यकर्मविपर्यत्वेनव्यवस्थेत्यन्ये । त्रित्वेनचतुष्ट्याभावेइतिमदनपारिजातः । मैथिलाश्च—त्रिरित्यर्वाङ्निषेधपरमितिम दनपारिजातः । यत्रमंत्रवदाचमनंअग्निश्चमेत्यादि तेनसहचतुष्टमन्यत्रत्रिरितिहरदत्तः । हेमाद्रौदेवलः—अथापःप्रथमात्तीर्थादक्षिणा त्रिःपिबेत्सममम् । प्रथमाद्ब्राह्मात् । सममव्यवधानेनेत्यर्थइत्युक्तं । तत्रैव भरद्वाजः—आयतंपूर्वतःकृत्वागोकर्णाकृतिवत्करम् । संहतांगुलि

नातोयंगृहीत्वापाणिनाद्विजः । मुक्तांगुष्ठकनिष्ठाभ्यांशेषेणाचमनंचरेत् । मापमञ्जनमात्रास्तुसंगृह्यत्रिःपिबेदपः । मापमञ्जनमात्रपानंब्राह्मणमात्र
परम् । क्षत्रियादेस्तुन्यूनम् । **स्मृत्यर्थसारे**—पीतावशिष्टांबुपानेवामहस्तेनपानेपराकार्धमिति । **भविष्ये**—दक्षिणंतुकरंकृत्वागोकर्णाकृति
वत्पुनः । त्रिःपिबेद्दक्षिणेनांबुद्विरास्यंपरिमार्जयेत् । पुनर्ग्रहणात्पूर्वंगोकर्णाकृतिनाहस्तेनोदकंगृहीत्वांगुष्ठकनिष्ठिकेवहिःकृत्यपुनर्गोकर्णाकृतिंकुर्या
दितिहेमाद्रिः। **बह्वृचपरिशिष्टे**—पाणिपादमुखंप्रक्षाल्यशुचौदेशेभूमिष्ठपादःकनिष्ठांगुष्ठौविश्लिष्टौवितत्यतिस्रोंतरांगुलीःसंहतोर्ध्वाःकृत्वात्रिः
पिबेत् संहतमध्यमांगुलिभिःपार्णिप्रक्षाल्यसव्यपाणिपादौशिरश्चाभ्युक्ष्येति । **आचारादर्शेभविष्ये**—समौंचचरणौकृत्वातथावद्धशिखो
नृप । घनांगुलिकरंकृत्वाएकाग्रःसुमनाद्विजः । आचामेदितिशेषः । **याज्ञवल्क्यः**—त्रिःप्राश्यापोद्विरुन्मृज्यखान्यद्भिःसमुपस्पृशेत् ।
प्रतिरसमुदकंग्राह्यम् । अंतरापाणिमाप्लाव्यवारिणेतिशिवधर्मोत्तरात् । **शौनकः**—ताम्रपात्रस्थितैर्वापितथातोयाशयस्थितैः । कुर्वन्नाच
मनंनिग्रोनित्यंखानिसमालभेत् । तदभावेतुकुर्वीतपात्रधारोदकेनच । खानि शीर्षण्यानि । खानिचोपस्पृशेच्छीर्षण्यानीतिगौतमोक्तेः । शी
र्षण्यानिततःखानिमूर्धानंचनृपालभेदितिविष्णुपुराणाच्चेतिहेमाद्रिः । नाभेरूर्ध्वानीतिमिताक्षरायाम् । चंद्रोदयेहारीतः—वाम
हस्तेल्पःकृत्वायःखानिसमुपस्पृशेत् । वृथैवाचमनंतस्यप्रायश्चित्तीयतेहिसः । **दक्षः**—संमृज्यांगुष्ठमूलेनद्विरुन्मृज्यात्ततोमुखम् । संहतांगुलि
भिःपूर्वमास्यमेतदुपस्पृशेत् । अंगुष्ठेनप्रदेशिन्याघ्राणंचसमुपस्पृशेत् । अंगुष्ठानामिकाभ्यांतुचक्षुःश्रोत्रेततःपरम् । अंगुष्ठमध्यमाभ्यांचक्षुषी । अंगु
ष्ठानामिकाभ्यांश्रोत्रे । कनिष्ठांगुष्ठाभ्यांनाभिंहृदयंतुतलेनवै । सर्वाभिश्चशिरःपश्चाद्बाहूचाग्रेणसंस्पृशेत् । अंगुलिभिस्तिसृभिर्मध्यमाभिः । मध्य
माभिर्मुखंपूर्वंतिसृभिःसमुपस्पृशेदितिचंद्रिकायांयोगयाज्ञवल्क्योक्तेः । पाठादेवक्रमेसिद्धेपश्चादितिवचनंबाह्वनंतरंशिरःस्पर्शार्थम् । शं
खस्तु—तर्जन्यंगुष्ठयोगेनस्पृशेन्नासापुटद्वयम् । अंगुष्ठसानामिकयायोगेनश्रवणेस्पृशेत् । मध्यमांगुष्ठयोगेनस्पृशेन्नेत्रद्वयंततः । कनिष्ठांगुष्ठ

योगेनस्पृशेत्स्कंधद्वयंततः । नाभिंचहृदयंतद्वत्स्पृशेत्पाणितलेनतु । संस्पृशेच्चतथाशीर्षमयमाचमनेविधिः । **चंद्रोदयेपैठीनसिः**—अग्निरंगुष्ठस्तस्मात्तेनैवसर्वाणिस्पृशेदिति । **आश्वलायनः**—पाणिनापोऽग्निमंत्रेणअवमृज्याथसंस्पृशेत् । विप्रस्यनेतराणांतुतन्मुखालंभनंस्मृतम् । सूर्यायदक्षिणेनेत्रेवामेसोमायवायवे । नसोदिग्भ्यःश्रवणयोर्वाह्नोरिंद्रायसंस्पृशेत् । पृथिव्यैपादयोर्जान्वोरंतरिक्षायगुह्यके । दिवेनाभौब्रह्मणेचविष्णवेहृदयेतथा । शिवायेतिशिरस्यंतेहस्तंप्रक्षालयेत्ततः । अंगुष्ठतर्जन्यग्राभ्यांनेत्रयोराचमंस्पृशेत् । अंगुष्ठमध्यमाभ्यांचनासाश्रवणयोस्ततः । अंगुष्ठानामिकाभ्यांचकनिष्ठाभ्यांचबाहुके । सांगुष्ठैरखिलैरेवस्थानेष्वन्येपुसंस्पृशेत् । **व्याघ्रपादः**—केशवादित्रिभिःपीत्वाचतुर्थेनमृजेत्करम् । पंचमेनचषष्ठेनद्विरोष्ठावुन्मृजेत्क्रमात् । तौसप्तमेनावमृजेदेकवारंतुमंत्रवित् । अष्टमेनतुमंत्रेणत्वभिमंत्र्यजलंशुचि । वामंसंप्रोक्षयेत्पाणिमन्यंचनवमेनच । दक्षिणंदशमेनांघ्रिंवाममेकादशेनवै । मूर्धानंद्वादशेनाथस्पृशेदूर्ध्वोष्ठपृष्ठकम् । संकर्षणायनमइत्यनेनांगुलिमूर्धनि । अंगुष्ठतर्जन्यग्राभ्यांसंस्पृष्टाभ्यांजलैःसह। नासारंध्रेवासुदेवंप्रद्युम्नाभ्यामुभेस्पृशेत्। अंगुष्ठानामिकाभ्यांचसंश्लिष्टाभ्यांजलैःसह। अनिरुद्धायनमइतिसंस्पृशेद्दक्षिणेक्षणम् । पुरुषोत्तममंत्रेणताभ्यांवामांस्पृशेद्दृशम् । तथांगुष्ठकनिष्ठाभ्यांसंश्लिष्टाभ्यांजलैःसह। अधोक्षजनृसिंहाभ्यांश्रोत्रेद्वेसंस्पृशेत्क्रमात् । नाभिमच्युतमंत्रेणताभ्यामेवस्पृशेद्बुधः । श्रीजनार्दनमंत्रेणतलेनहृदयंस्पृशेत् । उपेंद्रायेतिमूर्धानंस्पृशेत्सजलपाणिना । सर्वांगुल्यग्रभागैस्तुसमाश्लिष्टैर्जलैःसह । भुजौतुहरिकृष्णाभ्यांसंस्पृशेद्दक्षिणोत्तरौ । **प्रयोगपारिजातेभरद्वाजः**—देव्याःपादैस्त्रिभिःपीत्वाअब्लिंगैर्नवधास्पृशेत् । पुनर्व्याहृतिगायत्र्याशिरोमंत्रैर्द्विधास्पृशेत् । **स्मृत्यर्थसारे**—तदोंकारेणाचमनंयद्वाव्याहृतिभिर्भवेत् । सावित्र्याचापिकर्तव्यंयद्वाकार्यममंत्रकम् । **तैत्तिरीयश्रुतौ**—त्रिराचामेद्विःपरिमृज्यसकृदुपस्पृश्यशिरश्चक्षुषीनासिकेश्रोत्रेहृदयमालभतइति तदेतद्ब्रह्मयज्ञप्रकरणपाठात्तदंगमेवेति नपुरुषार्थाचमनेकमांगाचमनेवाप्रवर्तते । **हेमाद्रौचौधायनः**—त्रिःपरिमृजेद्विरित्येकइति । तत्रैवकण्वः—अथर्ववेदेतिहासपुराणानिध्यायन्ब्राह्मेणतीर्थेनोष्ठयोः

सलोमदेशमुन्मृज्यादिति । **हेमाद्रौदक्षः**—नाग्रांगुल्यानपृष्ठैर्वापरिमृज्यात्कथंचन । **आपस्तंबः**—दक्षिणेनपाणिनासव्यंप्रोक्ष्यपादौ शिरश्चेंद्रियाण्युपस्पृशेत् । चक्षुषीनासिकांश्रोत्रेचेत्यथापउपस्पृशेदितिव्यासः । अक्षिणीनासिकेकर्णावोष्ठौचतदनंतरम् । ततःस्पृशेन्नाभि देशंपुनरापश्चसस्पृशेत्। **बौधायनः**—खान्यद्भिःसंस्पृश्यपादौनाभिंशिरःसव्यंपाणिमंततःप्रोक्षेदिति । **पैठीनसिः**—पादौप्रोक्ष्यसव्येपाणौशे षाअपोनिनयेदिति । अत्रदेशाचारतोव्यवस्थेतिपृथ्वीचंद्रः । चंद्रिकायांतुयथाशाखंव्यवस्थेत्युक्तम् । **शूद्राधिकारेगौतमः**—आचमनार्थे पादप्रक्षालनमेवैकइति । **ब्राह्मे**—स्त्रीशूद्रयोरनित्यांभःक्षालनाच्चकरौष्ठयोः । आचमनक्रियेतिशेषइतिपृथ्वीचंद्रः ॥ ॥ **अथाचमननि मित्तानि । यमः**—उत्तीर्योदकमाचामेदवतीर्यतथैवच । **ब्रह्मांडे**—निष्ठीवितेतथाभ्यंगेभुक्त्वाचपरिधायच । उच्छिष्टानांचसंस्पर्शेत थापादावसेचने । उच्छिष्टस्यचसंभाषादशुच्यप्रयतस्यच । सदेहेपुचसर्वेषुशिखांमुक्त्वातथैवच । विनायज्ञोपवीतेननित्यंचसमुपस्पृशेत् । जि ह्वयाचैवसंस्पृश्यदंतासक्तंतथैवच । **देवलः**—भोजनेदंतलग्नानिनिर्हृत्याचमनंचरेत् । **हारीतः**—स्त्रीशूद्रोच्छिष्टाभिभाषणेमूत्रपुरीषोत्सर्गद र्शनेदेवतामभिगंतुमाचामेदिति । जपादौस्त्रीशूद्रभाषणेइत्युक्तंमाधवीयेस्मृत्यर्थसारेचप्रजापतिः—उपक्रमेविशिष्टस्यकर्मणःप्रयतोपि सन् । कृत्वाचपितृकर्माणिसकृदाचम्यशुद्ध्यति । **चंद्रिकायांहारीतः**—सुषुप्सुराचामेदिति । **आपस्तंबः**—स्वप्नेक्षवथौसिंघाणिकाल भेलोहितस्यकेशस्यवसानामग्नेर्गवांब्राह्मणस्यस्त्रियाश्चालंभेनीवीपरिधायउपस्पृशेदिति । सिंघाणिकानासामलः । केशस्यभूमिगतशिरोगतस्यचेति **प्रयोगपारिजातः** । च्युतकेशनखस्पर्शेइतिस्मृत्यर्थसारे । अन्यादिस्पर्शआचमनंनिमित्तंविनास्पर्शेइतिपृथ्वीचंद्रः । ब्राह्मणस्पर्शेआच मनमग्निगोस्पर्शवत्प्रायश्चित्तत्वेनविहितेइतिमदनरत्ने । ब्राह्मणस्योच्छिष्टस्पेतिप्रयोगपारिजातः । नीवीअधोवासोग्रंथिरितिचंद्रिका ।

---

१ चक्षुषीनासिकाश्रोत्रेचोष्ठौचेतिपाठः ।

मार्कंडेयपुराणे—देवार्चनादिकार्याणितथागुर्वभिवादनम् । कुर्वीतसम्यगाचम्यतद्वदेवभुजिक्रियाम् । **बृहस्पतिस्मृतौकर्मप्रदीपेच**—पितृमंत्रानुचरणेआत्मालंभेक्षणे तथा । अधोवायुसमुत्सर्गेआक्रंदेक्रोधसंभवे । मार्जारमूषिकास्पर्शेप्रहासेनृतभाषणे । निमित्तेष्वेषुसर्वेषुकर्मकुर्वन्नपः स्पृशेत् । आलंभेविहितेहृदयस्पर्शइतिकल्पतरुः । आत्मस्तुताविति**वर्धमानः** । स्पृशेदितिस्पर्शमात्रमिति**स्मृतिरत्नावलिः** । आचामेदिति**वर्धमानः** । मार्जारकर्तृकेस्पर्शेआचमनंस्वयंकृतेस्नानमित्या**चारचंद्रोदयः** । वनमार्जारस्पर्शेस्नानम् । अभोज्यसूतिकापंढमार्जाराखूंश्च कुक्कटान् । संस्पृश्यशुद्ध्यतिस्नानादुदक्याग्रामसूकराविति वचनादिति**शूलपाणिः** । केचित्तुमार्जारस्पर्शःपुच्छान्यदेशपरः । कर्मकालेअबुद्धिपूर्वस्पर्शविषयोवा । पुच्छेविडालकंस्पृष्ट्वास्नात्वाविप्रोविशुद्ध्यति । भोजनेकर्मकालेचविधिरेषउदाहृतइतितत्रैवबुद्धिपूर्वेस्नानविधानादन्यदाशुचिरेव । मार्जारश्चैवदर्वीचमारुतश्चसदाशुचिरितिमनूक्तेरित्याहुः । **याज्ञवल्क्यः**—रौद्रपित्र्यासुरान्मंत्रांस्तथाचैवाभिवारकान् । व्याहृत्यालभ्यचात्मानमपःस्पृष्ट्वान्यदाचरेत् । अपःस्पृष्ट्वान्यदाचरेदित्युक्तेर्यत्ररौद्रादिपाठोत्तरंकर्मनोक्तंतत्रनोदकस्पर्शः । **संग्रहे**—श्राद्धारंभेऽवसानेच चपादशौचार्चनांतयोः । विकिरेपिंडदानेचकुर्यादाचमनंकृती । तत्रप्रथममेवद्विःशेषाणितुसकृत्सकृत् । **चंद्रिकायांकौर्मे**—उच्छिष्टंपुरुषं दृष्ट्वाऽभोज्यंचापितथाविधम् । आचामेदश्रुपातेचलोहितस्यतथैवच । **शातातपः**—आचामेच्चर्वणेनित्यंमुक्त्वातांबूलचर्वणम् । ओष्ठौ विलोमकौस्पृष्ट्वावासोविपरिधायच । चर्वणेआदावंतेच । अनाचम्यभक्षणेऽष्टशतजपोभोजनेतूपवासइतिस्मृत्यर्थसारात् । **अपरार्के**—घ्राणस्यायमनंकृत्वाआचामेत्प्रयतोपिसन् । **मनुः**—वेदमध्येष्यमाणश्चाप्यन्नप्रश्नंश्चसर्वदा । आचामेदितिसंबंधः । **विष्णुः**—पंचनखास्थिनिःस्नेहंस्पृष्ट्वाचामेच्चंडालम्लेच्छसंभाषेचेति । **पाराशरे**—श्वपाकंवापिचंडालंविप्रःसंभाषतेयदि । द्विजसंभाषणंकुर्यात्सावित्रींतुसकृज्जपेत् । उच्छिष्टैःसहसंभाषेत्त्रिरात्रेणविशुद्ध्यपि । द्विजोनूचानइतिमाधवः । **चंद्रिकायांपाद्मे**—चंडालादीन्जपेहामेद्घ्राचामेद्द्विजोत्तमः ।

यत्तुस्मृत्यर्थसारे—अंत्यसंभाषणेकर्मकुर्वन्नाचामेदित्युक्तंतच्चिंत्यम् ।—तूष्णीमासीतचजपंश्चंडालपतितादिकान् । दृष्ट्वातान्वार्युपस्पृश्याभाष्यस्नात्वापिशुद्ध्यतीतिचंद्रोदयेवर्धमानपरिभाषायां योगयाज्ञवल्क्योक्तेः ।—चंडालपतितौदृष्ट्वानरःपश्येतभास्करम् । स्नातस्त्वेतौसमालोक्यसचैलंस्नानमाचरेदितिचंद्रिकायांव्यासोक्तेश्च । माधवीये—चंडालैकपथंगत्वागायत्रीस्मरणाच्छुचिः । यत्तुव्याघ्रपादः—चंडालपतितंचैवदूरतःपरिवर्जयेत् । गोवालव्यजनादर्वाक्सवासाजलमाविशेदिति । तत्संकटपरम् । अतएववृहस्पतिः—युगंचद्वियुगंचैव त्रियुगंचचतुर्युगम् । चंडालसूतिकोदक्यापतितानामधःक्रमात् । अंगिराः—श्वादीन्स्पृष्ट्वापिवाचामेत्कर्णेवादक्षिणंस्पृशेत् । नाभेरधःस्पर्शेएतत् ।—नाभेरूर्ध्वंकरौमुक्त्वाशुनायद्युपहन्यते । तत्स्नानमधस्ताच्चेत्प्रक्षाल्याचम्यशुद्ध्यतीतितेनैवोक्तेः । चंद्रिकायांशातातपः—चर्मकारंरजकाश्चैवव्याधव्यालोपजीविनौ । निर्णेजकःसौनिकश्चनटःशैलूषकस्तथा ।मुखेभगस्तथाश्वाचवनिताःसर्ववर्णगाः । चक्रीध्वजीवध्यजीवीग्राम्यकुक्कुटसूकरौ । एतेर्यदंगस्पृष्टंस्याच्छिरोवर्जंद्विजातिषु । तोयेनक्षालनंकृत्वाआचांतःप्रयतोमतः । रजकोवस्त्रादिरागकर्ता । आचारादर्शेसंवर्तः—चर्मारंरजकंवैणंधीवरंनटमेवच । एतान्स्पृष्ट्वानरोमोहादाचामेत्प्रयतोपिसन् ।इदंशिरोहीनांगस्पर्शे । शिरःस्पर्शेस्नानंवक्ष्यते । शांखायनः—क्षुतेनिष्ठीवितेचैवदतोच्छिष्टेतथानृते । पतितानांचसंभाषेदक्षिणंश्रवणंस्पृशेत् । आदित्यावसवोरुद्रावायुरग्निश्चधर्मराट् । विप्रस्यदक्षिणेकर्णेसर्वेतिष्ठंतिसर्वदा । विप्रोक्तेःक्षत्रियादीनांदक्षिणकर्णस्पर्शोन । विप्रपदमाचमनकर्तृमात्रोपलक्षणमित्याचारचंद्रोदयः । तन्न । उपलक्षणत्वेमानाभावात् । इदंचाचमनासंभवे । तथाचहरनाथीयेमार्कंडेये—कुर्यादाचमनस्पर्शंगोपृष्ठस्यार्कदर्शनम् । कुर्वीतालंभनंवापि

१ रजक्थर्मकर्धैवेतिपाठ ।

दक्षिणश्रवणस्यच । यथाविभवतोह्येतत्पूर्वाभावेपरंपरम् । **विज्ञानेश्वरादावप्येवम् । टोडरानंदेपराशरः**—गंगाचदक्षिणेश्रोत्रेऽना मिकायांहुताशनः । उभयोःस्पर्शनेचैवतत्क्षणादेवशुद्ध्यतीति । **बौधानयः**—नीवींविस्रंस्यपरिधायापउपस्पृशेदार्द्रंतृणंगोमयंभूमिंगामोपधीं वेति ॥ ॥ **अथद्विराचमननिमित्तानि । याज्ञवल्क्यः**—स्नात्वापीत्वाक्षुतेसुप्तेभुक्त्वाराध्योपसर्पणे । आचांतःपुनराचामेद्वासो विपरिधायच । वस्त्रपरिधानेसकृद्विराचमनयोर्विकल्पइतिकेचित् । पूर्ववासःपरित्यज्यान्यवासःपरिधानेद्विराचमनम् । तस्यैवान्यथापरिधानेस कृदाचमनमितिटोडरानंदः । कर्माधिकारार्थंद्विरन्यत्रसकृदित्यन्ये । **कौर्मे**—रेतोमूत्रपुरीषाणामुत्सर्गेऽशुचिभाषणे । संध्ययोरुभयोस्तद्वदा चांतोप्याचमेत्पुनः । मूत्रपुरीषयोर्द्विराचमनंकर्माधिकारार्थं । **हारीतेन**तत्रसकृदाचमनविधेर्व्यवस्थासंभवेऽष्टदोषदुष्टविकल्पयोगात् । **ब्रा ह्मे**—होमेभोजनकालेचसंध्ययोरुभयोरपि । आचांतःपुनराचामेज्जपहोमार्चनेषुच । उभयोरित्युपलक्षणम् । संध्यात्रयांवुपानेषुपूर्वंपश्चाद्विरा चमेदितिस्मृत्यर्थसारात् । संध्यात्रयेंऽबुपानेचेत्यर्थः । **सायणीयेनंदसूरिः**—भूम्युपवीतविन्यासेसस्नेहौषधभक्षणे । पैतृकेकर्मणिस्नेहभ क्षणेंताद्ययोःसकृत् । **बौधायनः**—हविर्भक्षणकालेचतद्विराचमनंस्मृतम् । **कौर्मे**—प्रक्षाल्यपाणिपादौचभुंजानोद्विरुपस्पृशेत् । ष्ठीवित्वांदा वनारंभेकासश्वासागमेतथा । चत्वरंवाश्मशानंवासमागम्यद्विजोत्तमः । **स्मृत्यर्थसारे**—रोदनेपीत्वावलीढेभुक्त्वाचाभ्यंगेद्विराचामेदिति । द्विराचमनेंऽगभूतंपाणिपादक्षालनंसकृत् । दृष्टोपकारस्यैकत्वात् । आस्यस्पर्शादित्वदृष्टभेदादावर्तते । तत्रत्रिराचम्यांगान्युपस्पृश्यपुनःसांगाच मनक्रियेत्येवं दाक्षायणयज्ञेदर्शपूर्णमासावृत्तिवदित्याचारादर्शः ॥ ॥ **अथाचमनापवादःकालतः । हेमाद्रौपैठीनसिः**—

अपेयंहिसदातोयंरात्रौमध्यमयामयोः । स्नानंचैवनकर्तव्यंतथैवाचमनक्रिया । तत्रैव**विश्वामित्रः**—महानिशातुविज्ञेयामध्यस्थंप्रहरद्वयम् । ॥ १९ ॥

---

१ विसृज्येतिपाठः । २ त्वाध्ययनारंभेऽहतिपाठः ।

तस्मात्स्नाननक्तुर्गीतकाम्यमाचमनतथा । तत्रैवपद्मत्रिंशन्मते—मूत्रोच्चारेमहारात्रौकुर्यान्नाचमनतुयः । प्रायश्चित्तीयतेविप्र प्राजापत्याधम
र्हति ॥ ॥ **महानिशाद्वेधा** । तत्राद्यामाहमार्कंडेयः—महानिशाद्वेघटिकेरात्रौमध्यमयामयोः । द्वितीयस्यांत्यातृतीयस्याद्येत्यर्थः । द्वि
तीयातुविश्वामित्रोक्ता । **द्रव्यतःस्मृत्यर्थसारे**-अस्निग्धऔषधेजग्धेस्निग्धेबुद्धेसलेपने । नाचामेद्भोजनेवृत्तेशुद्ध्यर्थंक्रमुकादिषु । अन्येषुचा
मभक्ष्येषुसंसारेषुसुगंधिषु । तांबूलेक्रमुकेहोमेभुक्तस्नेहानुलेपने । इक्षुदंडेतिलेमूलपत्रपुष्पफलेषुच । तथात्वक्तृणकाष्ठेषुनाचामेदामभक्षणे । म
धुपर्केचसोमेचप्राणाहुतिषुचाप्सुच । आस्यहोमेषुसर्वेषुनोच्छिष्टोभवतिद्विज. । क्रमुकादिष्वित्यनादिशब्दात्तांबूलादीनि । पुनरग्रेतांबूलक्रमुक
योर्ग्रहणादत्रपूर्वाचमननिषेध. । अतएवशुद्ध्यर्थमित्युक्तम् । प्राणाहुतिष्वितितासामत्रसाध्यत्वादुच्छिष्टस्यचमत्रपाठासंभवादाचमनेप्राप्तेतन्नि
षेधः । तेनघृतपयसप्तमीयम् । तेनभोजनेअमृतोपस्तरणमसीत्येतदुत्तरनाचमनम् । अतएवाप्स्वितिप्राणाहुतिसाहचर्यादमृतापिधानमसीतिपीतां
पर । अन्यथोच्छिष्टम्यमत्रपाठासंभवात् । तेनतस्मिन्नप्यानेकर्तव्येनोच्छिष्टत्वमित्युक्तश्राद्धहेमाद्रौ । नचैवपुरीषाद्युत्सर्गोत्तरमाचमनेकर्त
व्येतत्राधिकारसिद्ध्यर्थमाचमनातरापत्ति. । आरंभणीयान्यायेनोपपत्ते' । यथादर्शपूर्णमासागारंभणीयातिदेशादारंभणीयायाप्राप्तानवस्थाप्रस
गात्स्वात्मनिस्वातिदेशासंभवाच्चनतयेहापि । नचैवमाचमनेसकृज्जलपानोत्तरमाचमनापत्ति । पुनर्जलपानस्यगायत्र्यादिमत्रसाध्यत्वादुच्छिष्टस्य
तदसंभवादितियुक्तम् । अनवस्थापत्तेर्दत्तोत्तरत्वात् । हेमाद्रावेवसममव्यवधानेनेत्युक्तेश्च । **कृष्णभट्टीये**—अनाचात पिबेद्यस्तुपीत्वाना
चामयेद्यदि । गायत्र्यष्टशतजप्त्याप्राणायामेनशुद्ध्यति ॥ ॥ **आचमनापवादआचारसारे**—अपोजग्ध्वोपधजग्ध्वाकृत्वातांबूलचर्वण
म् । सौगंधिकानिसर्वाणिनाचमेतविचक्षण. । अपोजग्ध्वेत्यमृतापिधानमसीतिमत्रे । पीत्वायोच्येष्यमाणश्चआचामेत्प्रयतोपिसन्निति**मनूक्तेरिति**

---

१ समारंभेषुसुगंधिष्विनिपाठ । २ पीतात्परमितिपाठ ।

कल्पतरुः । अप्सूच्छिष्टतानिषेधात्पीत्वापइतिनैमित्तिकमाचमनमित्याचारादर्शः । **विश्वादर्शेआपस्तंबः**—संध्यार्थेभोजनार्थेवापितृदेवप्रयोजने । शूद्राहृतेननाचामेज्जपादिहवनेषुच । **संवर्तः**—शूद्राशुच्येकहस्तैश्चदत्ताभिर्नकदाचन । शूद्राहृतजलनिषेधःसर्वकर्मसुज्ञेयः । **स्मृत्यर्थसारे**—नपादप्रक्षालनशेषेणनाचमनशेषेणनाग्न्युदकशेषेणकर्माणिकुर्यात् । यदिकुर्याद्भूमौजलंस्रावयित्वातत्रांबुपात्रंस्थापयित्वोद्धृत्यकुर्यादिति । **आपस्तंबः**—नवर्षधारयाचामेन्नप्रदरोदकेनाकारणादिति । प्रदरःस्वयंभिन्नोभूभागः । **वसिष्ठः**—प्रदरादपिगोतृप्तेराचामेतेति । नेदंकलौ । गोतृप्तिशिष्टेपयसिशिष्टैराचमनक्रियेतिमाधवीयेकलिवर्ज्येषुपाठात् । **स्मृतिसारे**—एलालवंगकर्पूरगंधाद्यैर्वासितैर्जलैः । नाचामेदद्भिरुष्णाभिस्तथाशौचावशेषितैः । **चंद्रोदयेसंग्रहे**—पात्रावशिष्टंयच्छौचेपाणिपादावनेजने । भूमौतदंबुनिःस्राव्यशेषेणाचमनंचरेत् । **चंद्रिकायांविष्णुस्मृतावप्येवम् । देवजानीये**—शौचशेषंपादशेषंपीतशेषंतथैवच । अपेयंतद्विजानीयात्पर्युक्षणकृतिंविना । **स्मृत्यर्थसारे**—पादशौचशिखाकच्छबंधधौतोपवीतकम् । विनाचांतोऽशुचिर्नित्यंबद्धेकंठेशिरस्यपि । **प्रयोगपारिजातेभृगुः**—आच्छन्नदक्षिणांसस्तुनाचामेद्धिकदाचन । अकृत्वापादशौचंचतिष्ठन्मुक्तशिखोपिवा । विनायज्ञोपवीतेनआचांतोप्यशुचिर्भवेत् । तिष्ठन्नितिजलस्थेतरपरम् । जानोरूर्ध्वंजलेतिष्ठन्नाचांतःशुचितामियात् । अधस्ताच्छतकृत्वोपिसमाचांतोनशुद्ध्यतीतिविष्णूक्तेः । अधस्ताज्जान्वोः । **चंद्रिकायांविष्णुः**—नस्पृशन्नहसन्जल्पन्नश्चचांडालदर्शने । आचामेदितिशेषः । तत्रैवप्रचेताः—नासमपादआचामेदिति । **स्मृत्यर्थसारे**—उपविष्टःसमाचामेज्जानुमात्रादधोजले । तथा—सोपानत्कोधृतोष्णीषःपर्यंकासनयानगः । दुर्देशेप्रपदश्चैवनाचामन्शुद्धिमाप्नुयात् । आचांतःकर्मशुद्धःस्यात्तांबूलौषधिजग्धिकृत् । **नागदेवाह्निकेयमः**—मधुपर्केभोजनांतेसंध्यादौनित्यकर्मणि । आसनस्थोपिचाचामेदन्यत्रकुक्कुटासनः । **स्मृत्यर्थसारे**—नयज्ञोपवीतमुत्तरीयंचान्यथाकृत्वाचामेत् सम्यग्धृत्वापुनराचामेत् ॥ ॥ यज्ञोपवीतेनष्टेऽन्यत्सूत्रंवस्त्रंचोपवीयाचामेत् । **हारीतः**—नजले

शुष्कवस्त्रेणस्थलेचैवार्द्रवाससा । तर्पणाचमनंजप्यंमार्जनादिकमाचरेत् । **पैठीनसिः**—अंतरेकंवहिरेकंकृत्वापादमाचमेदिति । **व्यासः**—शिरःप्रावृत्यकंठंचमुक्तकच्छशिखोपिवा । अकृत्वापादयोःशौचमाचांतोप्यशुचिर्भवेत् । **गौतमः**—नमुख्याविप्रुषउच्छिष्टंकुर्वंतिनचेदंगेनिपतंतीति । अंगस्पर्शेआपस्तंबः—यआस्याद्विंदवःपतंतउपलभ्यंतेतेष्वाचामेत् । **गौतमः**—मंत्रब्राह्मणमुच्चारयतोविंदवःशरीरउपलभ्यंतेनतेष्वाचमनमिति । **मनुः**—स्पृशंतिविंदवःपादौयस्याचामयतःपरान् । तेपार्थिवैःसमाज्ञेयानतैरप्रयतोभवेत् । अत्रपादग्रहणाज्जंघादिस्पर्शेदोषइतिमेधातिथिः । तन्न । प्रयांत्याचमतोयाश्चशरीरेविप्रुषोनृणाम् । उच्छिष्टदोषोनास्त्यत्रभूमितुल्यास्तुतेस्मृताइतिमाधवीयेयमोक्तौशरीरग्रहणात् । अतःपादाविंदवःप्रायिकम् । तेनांगांतरस्पर्शेपिनदोषइतिसर्वज्ञनारायणः । माधवीयेप्येवं । **आपस्तंबः**—नश्मश्रुभिरुच्छिष्टोभवतियावन्नहस्तेनोपस्पृशतीति । मुखगतैरित्यर्थः । **याज्ञवल्क्यः**—मुखजाविप्रुषोमेध्यास्तथाचमनविंदवः इति । **शंखः**—दंतवद्तलग्नेपुरसवर्जमन्यत्रजिह्वाभिमर्शनादिति । **गौतमस्तुप्राक्च्युतेरेकेइत्याह** । च्युतेतुशंखः—च्युतेष्वास्यावद्विद्यान्निगिरन्नेवतच्छुचिः । मुखोदकमास्रावः । **शातातपः**—दंतलग्नेमूलफलेभुक्तस्नेहेतथैवच । तांबूलेचेक्षुदंडेचनोच्छिष्टोभवतिद्विजः । **स्मृत्यंतरे**—अलाबुताम्रपात्रस्थंकरकस्थंचयत्पयः । आचम्यस्वयमादायशुद्धोभवतिनान्यथा । स्वयंगृहीत्वाचामेन्नपरःप्रयच्छेदित्यर्थः । अलब्वादिपात्रंयतिपरम् । यतिपात्राणिमृद्वेणुदार्वलाबुमयानिचेति**याज्ञवल्क्योक्तेः** । अतैजसानिपात्राणितस्यस्युर्निर्व्रणानिचेति**मनूक्तेश्च** । अलाबुदारुजंवापिवैणवंमृन्मयंतथा । एतानियतिपात्राणिगृहस्थोनसमाचरेदितिपंचायतनसारेव्यासोक्तेश्च । तत्रैव**संवर्तः**—सौवर्णराजतंताम्रंगुरुयंपात्रंत्रकीर्तितम् । तदभावेस्मृतंपात्रंस्रवतेयन्नधारितम् । **कृष्णभट्टीयेमरीचिः**—कांस्येनायसपात्रेणत्रपुसीसकपित्तलैः । आचांतःशनकल्पोपिनकदाचनशक्ष्यति । **यत्तुस्मृत्यर्थसारे**—सौवर्णरौप्यपात्रैश्चवेणुबिल्वाश्मचर्मभिः । अलाबुदारुपात्रैश्चनारिकेलैःकपित्थकैः । तृ

णैःकाष्ठैर्जलाधारैरन्यांतरितमृन्मयैः । वामेनोद्धृत्यवाचामेदन्यदातुरसंभवेइति । तन्मृन्मयमात्रपरम् । तस्यैवसंनिहितत्वात् । तत्राप्यन्यदातुर संभवेवामेनसंदंशादिनोद्धृतैर्मृन्मयैरित्यर्थः । अतएवाग्नेस्मृत्यर्थसारे—तत्रमृन्मयपात्रस्थंजलंनैवोपहन्यतइत्युक्तमितिकेचित् । अन्येतुवामे नपात्रमुद्धृत्यनषिवेद्दक्षिणेनत्वित्युपक्रम्य सौवर्णैरौप्यपात्रैश्चेत्याद्युक्तैर्यदिस्वहस्तेनाचामेत्तदैतैरेवेतिपरिगणनबलान्नियमेननान्यैरित्यर्थात्पित्तलकां स्यादिभिर्वामोद्धृतैर्नाचामेदित्याहुः । प्रयोगपारिजातेसंग्रहे—करकालाबुपात्रेणताम्रचर्मपुटेनच । गृहीत्वास्वयमाचामेद्भूमिलग्नेननान्यथा । अत्रभूमिलग्नत्वेमूलंचिंत्यम् । वामेनोद्धृत्येतिस्मृत्यर्थसारविरोधात् । माधवीयेस्मृत्यंतरे—करपत्रेपुयत्तोयंयत्तोयंताम्रभाजने । सौवर्णेराजतेचैवनैवाशुद्धंतुतत्स्मृतम् । अपरार्केस्मृत्यंतरे—ताम्राश्मनालिकेराब्जवेणुकालाबुचर्मभिः । स्वहस्तेनापिचाचामेत्सर्वदाशुचि रेवसः । नकेवलमन्यदत्तेनेतितत्रैव ॥ इतिश्रीमन्नारायण०लक्ष्मणभट्टकृतावाचाररत्नेआचमनम् ॥

अथदंतधावनम् ॥ अत्रिः—मुखेवर्युषितेनित्यंभवत्यप्रयतोनरः । अथार्द्रकाष्ठंशुष्कंवाभक्षयेद्दंतधावनम् । तस्याद्यंतयोराचामेत् । **आग्नेये**—शौचंकृत्वामृदाचम्यभक्षयेद्दंतधावनमित्युक्तेः । प्रक्षाल्यभक्त्वातुशुचौदेशेत्यक्त्वातदाचमेदितिगारुडाच्च । **आचारादर्शे विष्णुः**—प्रातर्भुक्त्वाचयतवाग्भक्षयेद्दंतधावनम् । भुक्त्वेतियतिपरमितिहलायुधः । **विष्णुः**—कंटकिक्षीरिवृक्षोत्थंद्वादशांगुलमव्रणम् । कनिष्ठांगुलिवत्स्थूलंपर्वार्धकृतकूर्चकम् । दंतधावनमुद्दिष्टंजिह्वोल्लेखनिकातथा । द्वादशांगुलकंविप्रेकाष्ठमाहुर्मनीषिणः । क्षत्रविट्शूद्रजातीनां नवपद्चतुरंगुलम् । **स्मृत्यर्थसारेतु**—तिक्तकषायकटुसुगंधिकंटकिक्षीर्यव्रणमृजुकीटाद्यदूषितंद्वादशांगुलंविप्रे क्षत्रादिष्वंगुलिह्रासइत्युक्तम् । **शंखः**—कुमाराणांचनारीणांकर्तव्यंचतुरंगुलम् । **अथतत्काष्ठानि मदीयाःश्लोकाः**—आम्राम्रातकसर्जवेणुवृहतीश्रीपर्णिपुन्नागकान् चंपावैकदरंशिरीषखदिरापामार्गनिंबार्जुनान् । नारिंगंवदरीप्रियंगुकुटजान्पात्रीतमालंतथाकंकोलंत्वरिमर्दलोध्रमधुकान्राजादनंपर्णकम् । जात्याट

रूपावतिमुक्तजंबूप्लक्षान्कपायंकटुकटकंच । गृह्णीतशुद्धयेदंतानामन्यांस्तत्रविवर्जयेत् । आम्रातकआंवाडाइतिप्रसिद्धः । सजारोलइतिसिद्धः । राजादनंचारोली । कदरःश्वेतसारःखदिरः । खदिरोरक्तसारः । अतिमुक्तजंमोगरावेलीइतिमध्यदेशे । मधूकोज्येष्ठीमधुः । **संग्रहे**—अपामार्गेधृतिर्मेधाप्रज्ञाशक्तिर्वपुःशुचिः । **अंगिराः**—प्रक्षाल्यभक्त्वातजघ्याच्छुचौदेशेसमाहितः । **जातूकर्ण्यः**—ईशान्यभिमुखःकुर्याद्वाग्यतोदतधावनम् । **कृत्यरत्नेगर्गः**—प्राङ्मुखस्यधृतिःसौख्यंशरीरारोग्यमेवच । दक्षिणेनतथाकार्यपश्चिमेनपराजयः । उत्तरेणगवांनाशःस्त्रीणांप्रेष्यजनस्यच ॥ ॥ **अथनिषिद्धानि । मदीयाःश्लोकाः**—श्लेष्मातकःपिप्पलितिंदुकौपारिजातरिष्टाक्रमुकेंगुदीच । कार्पासभव्यौशणपारिभद्रौकुशेष्टकेवैवकुलश्चशुष्कम् । शाल्मल्यक्षौशिग्रुमोचानखानिकाशोलोष्ठसैंधवंचांगुलिश्च । मुक्त्वांगुष्ठानामिकेशिंशपायामृत्खापर्णांगारपाषाणतार्णम् । कुंभोविभीतकधवौसिकताश्वमल्योनिर्गुंडिगुग्गुलपटौकनकश्वकन्छूः । नंदास्वष्टमिरंध्रयोर्व्रतदिनेदर्शेरवौभूमिजेश्राद्धेजन्मदिनेचतुर्दशियुगेक्रांतौव्यतीपातके । द्वादश्यांनिजजन्मभेपरतरेतत्पूर्वभेपौर्णमास्यांमांगल्यदिनोपवासदिनयोश्छायासुतेवाभृगौ । प्रतीचीमुखोदक्षिणाशामुखोवाद्विजानांविशुद्धिंनकुर्यादमीभिः । अत्रमूलपृथ्वीचंद्रादिपुस्पष्टम् । पारिभद्रोनिंबवतरुरित्यमरः । रक्तमदारइतिहिमाद्रिः । **यत्तुश्राद्धकाशिकायांस्मृतिः**—शणशाकंमृतंमांसंकरेणमथितंदधि । अंगुल्यादंतसंघर्षस्तुल्यंगोमांसभक्षणैरिति तदंगुष्ठानामिकान्यपरम् । इष्टकालोष्ठपाषाणैरितरांगुलिभिस्तथा । मुक्त्वात्वनामिकांगुष्ठौनकुर्याद्दंतधावनमितिचंद्रिकायांवृद्धयाज्ञवल्क्योक्तेः । **धारा**हे—अज्ञातपूर्वाणिनदंतकाष्ठान्यद्यान्नपत्रैश्चसमन्वितानि । नयुग्मपत्राणिनपाटितानिनचार्द्रशुष्काणिविनात्वचाच । आ**श्वलायनः**—दीक्षितोब्रह्मचारीचयतिश्चविधवांगना । नित्यमद्यादंतकाष्ठममायांतुविवर्जयेत् ॥ ॥ **ब्रह्मचारिणंप्रकृत्यकौर्मे**—नादशैचैववीक्षेतनाचरेद्दंतधावनम् । अतोब्रह्मचारिणोविकल्पइतिकेचित् । वस्तुतस्तुपूर्ववाक्येब्रह्मचारिपदनैष्ठिकपरं यतिसाहचर्यादितियुक्तम् ।

स्मृतिमंजर्यां—रजस्वलाचतुर्थेह्निसूतिकादशमेहनि । स्नानात्पूर्वंबंधमोक्षेनिंद्येष्वपिचरेदिति । बंधोनिगडः ॥ ॥ **अथविहितनिषिद्धानि**—खर्जूरपीलुवटबिल्वकदंबबंधूकाश्वत्थकिंशुकमधूकशमीचजातिम् । अर्कंकरंजकुटजावथतिंतिणींचनिर्गुंड्युदुंबरविशोकककोविदारान् । विद्वानेतान्सदात्यजेत्प्रतिषिद्धविधित्सितान् । अत्रदंतधावनकरणत्वेनसामान्यप्राप्तौविशेषविधिनाशेषनिषेधेसतिपुनर्निषेधःप्रतिनिधित्वेनग्रहणं नेत्यर्थकोमापनिषेधवदित्याचारचंद्रोदयः । विहितनिषिद्धेषुविकल्पइतिकश्चित् । तन्न । व्यवस्थासंभवेविकल्पायोगात् । वयंतुविहितग्रहणेन तदन्यनिषेधेसिद्धेपुनस्तद्ग्रहणंविहितालाभेनिषिद्धान्यग्रहार्थंविहितनिषिद्धान्यालाभेविहितनिषिद्धग्रहार्थंतद्ग्रहणमितिब्रूमः । **नारदः**—आसनेशयनेयानेपादुकादंतधावने । पलाशाश्वत्थकौवर्ज्यौसर्वंकुत्सितकर्मसु । **धर्मसारे**—स्त्रीसंगंखादनंपानंस्वाध्यायंक्षुरकर्मच । नकुर्यादंतसंधर्षंतैलेशिरसिसंस्थिते । **यमः**—चतुर्दश्यष्टमीदर्शपूर्णिमासंक्रमेरवौ । एषुस्त्रीतैलमांसानिदंतकाष्ठंचवर्जयेत् । **भविष्ये**—दशम्यांदंतकाष्ठेनजिह्वांलेखयतेयदा । एकादशीविधानायनिराशःस्याद्यमस्तदा । **वृद्धमनुः**—गतेदेशांतरेपत्यौगंधमाल्यांजनादिच । दंतकाष्ठंचतांबूलंवर्जयेद्वनितासती । **प्रयोगपारिजातेदक्षः**—अंजनाभ्यंजनेस्नानंप्रवासंदंतधावनम् । नकुर्यात्सार्तवानारीग्रहाणामीक्षणंतथा । **संवर्तः**—रवौविवाहआशौचेवर्जयेद्दंतधावनम्। **मरीचिः**—नाद्यादजीर्णवमथुश्वासकासज्वरार्दितः । **गोभिलः**—श्राद्धेयज्ञेथनियमेनभक्ष्यंप्रोदितेरवौ । **यमः**—मध्याह्नस्नानवेलायांयोभक्षेद्दंतधावनम् । निराशास्तस्यगच्छंतिदेवताःपितरस्तथा । अत्रप्रोदितेइतिमध्याह्नेपितन्निषेधेसिद्धेमध्याह्ननिषेधोदोषाधिक्यार्थइतिकेचित् । वस्तुतस्तुमध्याह्नेतन्निषेधस्तत्पूर्वंप्रोदितेपितत्प्रास्त्यर्थः । अन्यथानिषेधवैयर्थ्यादितियुक्तम् । श्राद्धेदंतधावननिषेधस्तुकर्तुरेव । श्राद्धभुक्प्रातरुत्थायप्रकुर्यादंतधावनम्। श्राद्धकर्तानकुर्वीतदंतानांधावनंबुधइतिप्रचेतोवचनात् । अविभक्तानांज्येष्ठस्यकर्तृत्वेपिफलभाक्त्वात्फलिसंस्काराद्दंतधावनवर्जनादयःसर्वेषाम्। एवंप्रतिनिधेरपि।—श्राद्धंशिष्येणपुत्रेणतदन्येनापिकारयेत् । नियमानाचरेत्सो

पिनियतांश्चवसुंधरेइतिहेमाद्रौवाराहाच । विष्णुरहस्ये—उपवासेतथाश्राद्धेखादित्वादंतधावनम् । गायत्र्याशतसंपूतमंबुप्राश्यविशुद्ध्यति । काशीखंडे—अलाभेदंतकाष्ठानांनिषिद्धेवाथवासरे । गंडूषाद्वादशग्राह्यामुखस्यपरिशुद्धये । स्कांदेप्रभासखंडे—वर्जितेदिवसेदेविगंडूषांश्चैवषोडश । तत्तत्पत्रैःसुगंधैर्वाकारयेद्दंतधावनम् । यत्तु—उपवासेपिनोदुष्येदंतधावनमंजनम् । एकादश्यांतृणैःपर्णैर्नकुर्यादंतधावनमितिकृष्णभट्टीयेस्कांदं तत्सभर्तृकोपवासपरम् । अंजनसाहचर्यात् । हेमाद्रावप्येवम् । दंतधावननिषेधेऽपिजिह्वोल्लेखोभवति—प्रतिपत्पर्वषष्ठीपुनवम्यांदंतधावनम् । पर्णैरन्यत्रकाष्ठैस्तुजिह्वोल्लेखःसदैवहीतिव्यासोक्तेः । स्कांदे—दंतधावनकाष्ठेननजिह्वांपरिमार्जयेत् । आयुर्बलंयशोवर्चःप्रजापशुवसूनिच । ब्रह्मप्रज्ञांचमेधांचत्वंनोधेहिवनस्पते । मंत्रेणानेनमतिमान्भक्षयेद्दंतधावनमितिकाशीखंडान्मंत्रोभक्षणे इतिपृथ्वीचंद्रमदनपारिजातौ । छंदोगपरिशिष्टेप्येवम् । अभिमंत्र्याहृताशाखामंत्रेणानेनवैद्विजाः । ततऊर्ध्वंक्रमेणैवधावयेच्छाखया तयेत्यंगिरःस्मृतेः । शाखाभिमंत्रणइतिस्मृतिरत्नावली । वचनद्वयादुभयत्रेतितुयुक्तम् । सएव—पतितांत्यजपाखंडिदेवाजीवरजस्वलाः । भिषक्पातकिचंडालानप्रेक्ष्यादंतधावने । शुनकंविड्वराहंचगर्दभंताम्रचूडकम् । अन्यान्नैवेदृशान्पश्येद्विजशुद्धौविचक्षणः । देवाजीवोदेवलकः । यच्चुकल्पतरौ—ऊर्ध्वंनिपतितेसिद्धिस्तथाचाभिमुखेस्थिते । अतोन्यथानिपतितेआनीयपुनरुत्सृजेदिति तत्सिद्धार्थकादिसप्तमीव्रतप्रकरणान भिज्ञत्वाद्यार्किंचिदेव ॥ ॥ उषःपानम् । बृहदात्रेयसंहितायाम्—पिबतिपर्युषितंजलमन्वहंतिमिरवांश्चरमग्रहरेनिशः । यदितदा लभतेसतुगारुडींदृशमपास्तसमस्तगदोनरः । आयुर्वेदेभोजोपि—अंभसःप्रसृतीरष्टौरात्रावनुदितेपिबेत् । नवनागबलंप्राप्यजीवेद्वर्षशतंनरः । शौनकः—पश्चाद्द्वादशगंडूषैःशुद्धिंकृत्वाद्विराचमेत् । ललाटेहृदिवाह्नोश्चऊर्ध्वपुंड्राणिधारयेत् । चतुर्भिःसंकर्षणादिनामभिश्चंदनादिभिः । विष्णुपुराणे—स्वाचांतस्तुपुनःकुर्यात्पुमान्केशप्रसाधनम् । आदर्शांजनमांगल्यदूर्वाद्यालंभनानिच । मार्कंडेयपुराणे—दक्षिणाभिमुखो

यस्तुविदिक्संमुखएवच । केशान्संस्कुरुतेमर्त्योधननाशंसविंदति ॥ इतिश्रीमन्नारायण०लक्ष्मणभट्टकृताचाररत्नेदंतधावनम् ॥

अथाज्यावलोकनम् ॥ मदनपारिजातेब्राह्मविष्णुपुराणयोः—स्वमात्मानंघृतेपश्येद्यदीच्छेच्चिरजीवितम् । **स्कांदे**—आदौविप्रस्यवरणंकुर्याद्घृतानुलेपनैः । ततःप्रतिष्ठयेत्पात्रंस्वैर्मंत्रैश्चप्रपूजयेत् । पश्माद्विप्रायदातव्यंस्वर्णैकेनसमन्वितम् । प्रातराज्यपात्रदानमंत्रो **हेमाद्रौगोपथब्राह्मणे**—आज्यंतेजःसमुद्भूतमाज्यंपापहरंपरम् । आज्येनदेवास्तृप्यंतिआज्येलोकाःप्रतिष्ठिताः । भौमांतरिक्षदिव्यादियन्मेकल्मषमागतम् । सर्वंतदाज्यसंस्पर्शात्प्रणाशमुपगच्छतु । **अन्यच**—याऽलक्ष्मीर्यच्चदौस्थ्यंमेसर्वगात्रेष्ववस्थितम् । तत्सर्वंशमयाज्यत्वंलक्ष्मींपुष्टिंचवर्धय । इति ॥ ॥ **अथकुशाः । चंद्रोदयेऽत्रिः**—उभयानामिकाभ्यांतुधार्येदर्भपवित्रके । **पवित्रमाहमार्कंडेयः**—चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्यपवित्रकम् । एकैकन्यूनमुद्दिष्टंवर्णेवर्णेयथाक्रमम् । **यत्तुकात्यायनः**—अनंतर्गर्भिणंसाग्रंकौशंद्विदलमेवच । प्रादेशमात्रंविज्ञेयंपवित्रंयत्रकुत्रचिदितितद्वैश्यपरंपूर्ववचनादितिपृथ्वीचंद्रः । **स्मृत्यर्थसारेतु**—सर्वेषांवाभवेद्बाभ्यांपवित्रंयत्रकुत्रचिदित्युक्तम् । **चंद्रिकायांतु**—सप्तभिर्दर्भपिंजूलैःकुर्याद्ब्राह्मपवित्रकम् । पंचभिःक्षत्रियस्यैवचतुर्भिश्चतथाविशः । द्वाभ्यांशूद्रस्यविहितमितरेषांतथैवचेति । तथाऽनंतर्गर्भिणमित्यादितुस्थालीपाकपरमित्युक्तम् ॥ ॥ **रत्नावल्याम्**—प्रथमंलंघयेत्पर्वद्वितीयंतुनलंघयेत् । अग्रपर्वस्थितोदर्भस्तपोवृद्धिकरोहि सः । मध्येचैवप्रजाकामोमूलेसर्वार्थसाधकः । **चंद्रिकायाम्**—अंगुलीमूलदेशेतुपवित्रंधारयेद्द्विजः । राज्ञांद्विपर्वकेचैवविशामग्रेकरस्यतु । **रत्नावल्याम्**—यज्ञोपवीतेमौंज्यांचतथाकुशपवित्रके । ब्रह्मग्रंथिंविजानीयादन्यथातुयथारुचि । **पवित्रप्रकारस्तत्रैव**—अंगुष्ठंघर्षयेद्विद्वान्तर्जन्यापिपुनःपुनः । ज्ञानमुद्रामधःकुर्यात्पूर्ववद्ग्रंथिबंधनम् । **आश्वलायनः**—तारेणकुर्याद्ग्रंथितुपवित्रस्यद्विजोत्तमः । ग्रंथिरेकांगुलस्तद्वत्तद्दूर्ध्वमंगुलंमतम् । तारः प्रणवः । **भरद्वाजः**—अग्रोक्तसंख्यापिंजूलानेकीकृत्यसमंयथा । मूलानिदक्षिणेहस्तेधृत्वाग्राण्यन्यपाणिना । दक्ष

हस्तेनतद्वाममनुवर्त्यप्रदक्षिणम् । तथैवाग्रेणचावेष्ट्यकुर्याद्ग्रंथियथादृढाम् । **वृत्तग्रंथिलक्षणंहेमाद्रौगारुडे**—अर्धप्रदक्षिणीकृत्यशिखांपा
शंप्रवेशयेत् । वैष्णवेनैवमार्गेणवृत्तग्रंथौपवित्रके । वैष्णवोमार्गः पश्चाद्भागः । **ब्रह्मग्रंथिरयितत्रैव**—संत्यज्यवैष्णवंमार्गंब्राह्ममार्गंविमिश्रि
तम् । सकृत्प्रदक्षिणीकृत्यब्रह्मग्रंथिःसउच्यते । कर्तुरभिमुखप्रदेशोब्रह्ममार्गः । **क्षेमप्रकाशेशंखःप्रकारांतरमाह**—त्रिगुणीकृतरज्जुस्तु
त्रिवृत्यासंनियोजयेत् । ब्रह्मग्रंथिःसविज्ञेयःसदामौंजादिषुद्विजैः । **चंद्रोदयेव्यासः**—करेकंठेशिखायांचकर्णयोरुभयोरपि । पवित्रधारकोय
श्चनसपापेनलिप्यते । **कात्यायनः**—सपवित्रःसदर्भोवाकर्मांगेपितृकर्मणि । अशून्यंतुकरंकृत्वासर्वत्राचमनंचरेत् । नोत्सृज्यंतत्पवित्रंतुभु
क्त्वोच्छिष्टंतुवर्जयेत् । **ब्राह्मे**—मंत्रंविनाधृतंयत्तत्पवित्रमफलंभवेत् । तस्मात्पवित्रेमंत्राभ्यांधारयेदभिमंत्र्यच । पवित्रंतेतुइत्यादिमंत्रद्वितयम
स्यतु । प्रणवस्तस्यमंत्रःस्यात्समस्ताव्याहृतिस्तुवा । **पृथ्वीचंद्रोदये**—धृतपवित्रंकर्मांतेग्रंथिंमुक्त्वातुतत्त्यजेत् । विस्मृत्ययदिपात्रेपुपवित्रंवि
सृजेत्तथा । प्राजापत्यंचरेत्कृच्छ्रंतत्किल्विषविशुद्धये । **आश्वलायनः**—तस्मिन्क्षीणेक्षिपेत्तोयेवह्नौवायज्ञसूत्रवत् । भूमिंज्ञात्वातथाशुद्धांमृ
द्विस्तारेणपूरयेत् । **भरद्वाजः**—कर्मांतेपुनरादायपवित्रद्वितयंद्विजः । शुचौदेशेविनिक्षिप्यदध्यादेतत्पुनःपुनः । यद्युच्छिष्टाद्युपहतंपवित्रंवि
हतंभवेत् । तदैवग्रंथिमुत्सृज्यत्यजेदितरथानहि । **मदनपारिजातेकौशिकः**—पवित्रस्यतुनाशौचमाचातेतुकदाचन । पितृणांतर्पणेत्या
ज्यमुच्चारेपूजनेतथा । **दर्भेपुतुहेमाद्रौस्कांदे**—अनामिकाधृतादर्भाद्येकानामिकयापिवा । द्वाभ्यामनामिकाभ्यांतुधार्येदर्भपवित्रके । आ
श्वलायनः—अथवानामिकाभ्यांतुग्रंथिहीनंकुशादिकम् । हेमादीन्वाथविभृयात्सर्वकर्मस्वपिद्विजः । **गौडास्तु**—मध्यमानामिकाभ्यांतुधा
रयेद्विदलंकुशम् । संध्यादिकर्मजाप्येपुस्वाध्यायेपितृतर्पणे । केवलानामिकायांतुअज्ञानाद्धारयेत्कुशम् । श्वानमूत्रसमंतोयंपीत्वाचांद्रायणंचरे

---

१ मनुनातु—मेखलामजिनदंडमुपवीतकमंडलुम् । अप्सुप्राप्यविनष्टानिगृहीतान्यानियत्रवत् । (मनु अ २ श्लो. ६४) इत्युक्तेरत्रत्योवह्निनिक्षेपोविचारणीय ।

दितिहारीतोक्तेः कुशधारणंमध्यमानामिकयोरित्याहुः । तन्न । वचनस्यमहानिबंधेपुकाप्यनुपलंभात् । सर्ववचनेपुकुशहेमरूप्यपवित्राणाम विशेषोक्तेश्च । कुशानूर्ध्वाग्रान्विभृयात् । वज्रंयथासुरेंद्रस्यशूलंहस्तेहरस्यच । चक्रायुधंयथाविष्णोरेवं विप्रकरेकुशइतिचंद्रिकायांगोभिलोक्तौ संदिग्धेपुवाक्यशेषादितिन्यायेनशूलसाम्योक्त्यानिर्णयाच्छूलदृष्टान्तएवमुख्यः । अतएवतत्रैवहस्तग्रहणंत्रिशाखत्वादिनात्रिशूलसाम्याच्च । **दर्भसंख्यामाह**—समूलाग्रौविगर्भौतुकुशौद्वौदक्षिणेकरे । सव्येचैवतथात्रीन्वैविभृयात्सर्वकर्मसु । **छंदोगपरिशिष्टे**—द्वौदर्भौदक्षिणेहस्तेसव्येत्रीनासनेसकृत् । उपवीतेशिखायांचपादमूलेसकृत्सकृत् । अत्रचत्वारःपक्षाः । हस्तद्वयेदर्भधारणम् हस्तद्वयेपवित्रधारणम् दक्षिणेपवित्रंवामेकुशाः दक्षिणएवोभयमिति । तृतीयःकात्यायनपरः—सव्यःसोपग्रहःकार्योदक्षिणःसपवित्रकइतिकात्यायनोक्तेः । **लघुहारीतः**—जपेहोमेतथादानेस्वाध्यायेपितृतर्पणे । अशून्यंतुकरंकुर्यात्सुवर्णरजतैःकुशैः । सुवर्णरजतैरितिबहुत्वमेकसुवर्णाद्यवयवविधारणेपियुक्तम् । सुवर्णत्वादेरवयवावयविवृत्तित्वात्सुवर्णादीनांसमुच्चयः । अनामिकायांतद्धेमधारयेद्दक्षिणेकरेइतिदेवीपुराणे—अनामिकायांहेमधारणोक्तेस्तत्समभिव्याहृतंरजतमपितत्रैवधार्यम् । तर्जन्यांरजतंधार्यमितिवचनंतुनिर्मूलम् । **कल्पतर्वादिभिरनादरादितिवर्धमानः** । तन्न । अनामिकाधृतं हेमतर्जन्यांरूप्यमेवच । कनिष्ठिकाधृतंखड्गंतेनपूतोभवेन्नरइतिश्राद्धहेमाद्रौचंद्रिकायांचयोगयाज्ञवल्क्यविरोधात् तर्जन्यांरूप्यंजीवत्पित्रन्यपरम्—उत्तरीयंयोगपट्टंतर्जन्यांरजतंतथा । नजीवत्पितृकैर्धार्यंज्येष्ठोवाविद्यतेयदीतिचंद्रोदयेसंग्रहात् । **आश्वलायनः**—अन्यैर्धृतंनगृह्णीयात्पवित्रंतृणसंभवम् । हेमादयस्तुसंग्राह्याःसम्यङ्निष्टप्यवह्निना । **सएव**—पवित्रेपतितेज्ञातेतथाजपगणेभुवि । प्राणायामत्रयंकुर्यात्स्नात्वाविप्रोऽघमर्षणम् । जपगणो माला—हेमैवसर्वदासर्वेकुर्यादेवाविचारयन् । रौप्यंदक्षप्रदेशिन्यांबिभृयादीक्षितोद्विजः । अग्रंथिकंचहेमंच तथालोहत्रयोद्भवम् । गायत्र्यक्षरवर्गेणगृह्णीयात्ताम्रमुत्तमम् । अनुष्टुभस्तथारूप्यंत्रिष्टुभःकनकोत्तमम् । गायत्रीचतुर्विंशत्यक्षरा तावदंशंताम्रम् ।

एवमग्रेपि । द्वात्रिंशदक्षरानुष्टुप् । चतुश्चत्वारिंशदक्षरात्रिष्टुप्–शलाकाःकारयित्वातोऽभिमृजेदंगुलीयकम् । शुद्धौधार्यदिवारात्रंत्रयंसममथापिवा । **आगमे**त्वन्यथोक्तम्—सोमसूर्याग्निरूपाःस्युर्वर्णालोहत्रयंतथा । रौप्यमिंदुःस्मृतोहेमसूर्यस्ताम्रंहुताशनः । लोहभागाःसगुद्दिष्टाःस्वराद्यक्षरसंख्य या । तैर्लोहैःकारयेन्मुद्रामसंकलितसंगताम् । अकारादयःषोडश १६ स्वरास्तावंतोभागारौप्यस्य । काद्यामांताःपंचविंशतिः २५हेम्नः । यादयःक्षांता दश १० ताम्रस्य । साग्रंसहस्रसंजप्यस्पृष्ट्वातांजुहुयात्ततः । तस्यांसंपातयेन्मंत्रीसर्पिषापूर्वसंख्यया । जपःपूर्वोक्तमातृकामंत्रस्य कं खं गं इत्यादिः । निक्षिप्यकुंभेतांमुद्रामभिषेकोक्तवर्त्मना । आवाह्यपूजयेद्देवीमुपचारैःसमाहितः । अभिषिच्यविनीतायदद्यात्तांमुद्रिकांगुरुः । इयंरक्षाक्षुद्ररोग विषज्वरविनाशिनी । **शारदातिलके तु**—तारताम्रसुवर्णानामर्कषोडशखेंदुभिरित्युक्तम् । खेंदवोदश । **चोपदेवः**—हिंशुमुंचंप्रमंगोरानीश वेंकेपुगुंवुगो । प्राच्याद्रत्नानिखेटाश्चमध्येमाणिक्यमुष्णगोः । उष्णगुः सूर्यः । हिंशुमित्याद्यक्षरद्वंद्वानिहीरकशुक्रादिग्रहबोधकानि । **मंत्र शास्त्रे**—अर्केंदुरक्तज्ञगुरुभृगुमंदाहिकेतवः । माणिक्यंमौक्तिकंचारुविद्रुमंगारुडंपुनः । पुष्परागंलसद्वज्रंनीलंगोमेदकंशुभम् । वैडूर्यंनवरत्ना निमुद्रांतैःकल्पयेच्छुभाम् । जपहोमादिकंसर्वकुर्यात्पूर्वोक्तवर्त्मना । योमुद्रांधारयेदेनांतस्यस्युर्वशगाग्रहाः । विन्यासेविशेषोज्योतिषे— माणिक्यमंतस्तरणेर्निधेयवज्रंसुमुक्ताविलसत्प्रवालम् । गोमेदकंनिर्मलमिंद्रनीलवैडूर्यकंपुष्पमतस्तुपाचिः । पूर्वादितःशुक्रशशांकभौमराह्वर्किके त्विज्यशशांकजानाम् । रत्नानियत्नेनचमुद्रिकायांन्यस्यानिखेटेपुनिजोच्चगेषु ॥ इतिलक्ष्मणभट्टकृताचाररत्नेंगुलीयकप्रकरणम् ॥

अथकुशग्रहणम् । कुशाःकतिविधाःकदाकथंकैर्ग्राह्याःकेऽधिकारिणोगृहीतानामहर्मर्यादांचाह **स्मृतिचिंतामणौ**—अहन्यहनि कर्मार्थंकुशोद्धारःप्रशस्यते । तत्रैव—मासिमास्युद्धृतादर्भामासिमास्येवचोदिताः । उत्तरोत्तरमासेषुधर्मविद्भिरसंमताः । **षट्त्रिंशन्मते**— मासेनस्यादमावास्यादर्भाग्राह्योनवःस्मृतः । **मदनरत्नेशंखमरीची**—मासेनभस्यमावास्यातस्यांदर्भोच्चयोमतः । अयातयामास्तेदर्भानियो

ज्याश्चपुनःपुनः । आर्द्रांछुनीयाद्रात्रौनछुनीयाद्वापिसंध्ययोः । मासःशुक्लादिरितिवर्धमानः । हेमाद्रौहारीतः—मासेनभस्यमावास्यातस्यां दर्भाश्चयोमतः । यत्तुशंखः—अमायांचैवनच्छिद्यात्कुशांश्चसमिधस्तथेति तत्तत्कालकर्मपर्याप्तव्यतिरिक्तविषयम् । कुशाःकाशाश्चदूर्वाद्याग वार्थंचतृणादिकम् । निपिद्धेवापिगृह्णीयादमावास्याहनिद्विजइतिजाबाल्युक्तेरितिपृथ्वीचंद्रः । वनस्पतिगतसोममुहूर्तपरोनिषेधः । त्रिमु हूर्तंवसेदर्केत्रिमुहूर्तंजलेवसेत् । त्रिमुहूर्तंवसेद्रोपुत्रिमुहूर्तंवनस्पतौ । वनस्पतिगतेसोमेयस्तुहिंस्याद्वनस्पतीन् । घोरायांभ्रूणहत्यायांपच्यतेनात्र संशयइतिसौपर्णोक्तेरितिमदनपारिजातः । रागप्राप्तस्यायंनिषेधः वैधतन्निषेधेविकल्पापत्तेरितिचंद्रिका । तत्रैवयमः—समूलस्तुभ वेद्दर्भःपितृणांश्राद्धकर्मणि । श्राद्धमेकोद्दिष्टम् । एकोद्दिष्टेकुशाःकार्याःसमूलायज्ञकर्मणि । वहिर्लूनाःसकृल्लूनाःसर्वत्रपितृकर्मस्वितितेनैवोक्तेः । वहिर्लूनाःउपमूलंलूनाः । तेचैकोद्दिष्टेतरश्राद्धपराइतिचंद्रिका । तत्रैवपुराणे—पित्र्यंमूलेनमध्येननारंदानंचयत्नतः । दैवंकर्मकुशाग्रेणक-र्तव्यंभूतिमिच्छता । तत्रैवसंग्रहे—होमेतर्पणकालेचविवाहेयज्ञकर्मणि । अगर्भिणस्तुयेदर्भाःपुत्रदारधनप्रदाः । तत्रैवहारीतः—पितृदे वद्विजार्थेपुसमूलानाहरेद्विजः । स्मृतिचिंतामणौ—सप्तरात्रंशुभादर्भास्तिलक्षेत्रसमुद्भवाः । भरद्वाजः—पलाशाश्वत्थखदिरवटप्लक्षस मीपगाः । विल्वैकंकतांतस्थास्तच्छायास्थाःकुशाःशुभाः । गृह्यपरिशिष्टे—दर्भाःकृष्णाजिनंमंत्राब्राह्मणाहविरग्नयः । अयातयामान्येतानि नियोज्यानिपुनःपुनः । इदंनभस्यदर्शेच्छिन्नदर्भविषयमितिवर्धमानः । एतदपवादस्तत्रैव—येचपिंडाश्रितादर्भायैःकृतंपितृतर्पणम् । अमेध्या ऽशुचिलिप्तायेतेपांत्यागोविधीयते । हारीतः—पथिदर्भाश्चितौदर्भायेदर्भायज्ञभूमिषु । स्तरणासनपिंडेषुपट्कुशान्परिवर्जयेत् । अत्रपदत्व मविवक्षितम् । ब्रह्मयज्ञेचयेदर्भायेदर्भाःपितृतर्पणे । हतामूत्रपुरीषाभ्यांतेपांत्यागोविधीयते । मूत्रोच्छिष्टधृतायेचेतिवर्धमानधृतःपाठः । येचान्तर्गर्भितादर्भायेचच्छिन्नानखैस्तथा । कथिताश्चाग्निनादर्भास्तान्दर्भान्परिवर्जयेदितिवृद्धहारीतोक्तेः । शंखः—नीवीमध्येस्थिताद

र्भाब्रह्मसूत्रेचयेधृताः । पवित्रांस्तान्विजानीयाद्येतुकर्णेचदक्षिणे । नीवीपरिधानंवस्त्रग्रंथिरितिकल्पतरुः । **चंद्रोदयेसंग्रहे**—अग्निकार्ये चयागेचसमूलान्परिवर्जयेत् । **संग्रहे**—आचांतःप्राकुशांस्त्यक्त्वापाणावन्यांश्चधारयेत् । श्राद्धारंभेतुयेदर्भाःपादशौचेविसर्जयेत् । अर्च-नादौतुयेदर्भाउच्छिष्टांतेविसर्जयेत् । पार्वणादौतुयेदर्भाआघ्राणांतेविसर्जयेत् । मार्जनादौतुयेदर्भाःपिंडोत्थानेविसर्जयेत् । उत्तानादौतुयेदर्भा दक्षिणांतेविसर्जयेत् । प्रार्थनादौतुयेदर्भानमस्कारेविसर्जयेत् । विकिरेपिंडदानेचतर्पणेस्नानकर्मणि । आचांतश्चप्रकुर्वीतदर्भसंत्यजनंबुधः । **काल्यायनः**—समूलाःपितृदैवत्याःकल्मापावैश्वदेविकाः । ह्रस्वाःप्रवरणीयाःस्युःकुशादीर्घास्तुबर्हिषः । प्रवरणीयाः स्नानाद्यर्हाः । **दर्भ ग्रहणमंत्रमाहशंखः**—विरिंचिनासहोत्पन्नपरमेष्ठिनिसर्गज । नुदसर्वाणिपापानिदर्भस्वस्तिकरोभव[1] । **स्मृत्यर्थसारे**—हुंफट्कारेणमं त्रेणसकृच्छित्त्वासमुद्धरेत् । **हेमाद्रौकाष्ण्याजिनिः**—पूर्वतुशिथिलीकृत्यखनित्रेणविचक्षणः । आदद्यात्पितृतीर्थेनहुंफट्हुंफट्सकृत्सकृत् । **भरद्वाजः**—शुनाशुद्धवराहेणमार्जारेणैकचक्षुषा । खरेणकुक्कुटेनैवस्पृष्टःकर्मरिपुःकुशः । कपिनाकृकलासेनपतितेनांत्यजातिना । भिषजा रोगिणास्पृष्टःकुशःकर्मस्वशोभनः । देवलेनचषंढेनव्रात्येनाज्ञातजन्मना । वर्ज्यःसूतकिनास्पृष्टःकुशोऽनुष्ठेयकर्मसु । रक्तश्लेष्माश्रुभिःस्पृष्टःकि यायुक्तःपुराधृतः । उच्छिष्टजनसंस्पृष्टःकुशःकर्मविनाशकः । सूतिकात्रेयिकावेश्याज्ञातपूर्वाभिसारिकाः । अन्याःसदोषायास्ताभिःकुशःस्पृष्टः क्रियारिपुः । आत्रेयिका गर्भिणी । **अपरार्के**—कुशाःकाशयवादूर्वागोधूमाश्चाथकुंदुराः । उशीराव्रीहयोमुंजादशदर्भाःसवल्वजाः । वल्व जादक्षिणदेशेमोळइतिप्रसिद्धाइतिहेमाद्रिः । दर्भत्वोक्तिःकाशादिस्तुत्यर्था । दर्भाभावेद्विजःकर्मकाशैःकुर्वीतसंयतइतिशंखोक्तेः । **नागदे वाह्निकेसुमंतुः**—कुशःकाशःशरोगुंद्रोयवादूर्वाश्चवल्वजाः । गोकेशकंदौमुंजश्चपूर्वाभावेपरःपरः । **वृद्धपराशरः**—दर्भैर्लोहितदर्भैश्चका

---

१ ममस्वस्तिकरोभवइतिपाठ । २ कुशाभावेइतिपाठ ।

शर्वारणवल्वजैः । शूकधान्यतृणैर्वापिदर्भैकार्यंचरेद्द्विजः । सएव—काशहस्तस्तुनाचामेन्नदूर्वाभिःकदाचन । **बौधायनः**—हस्तयोरुभयो र्द्वौद्वावासनेपितथैवच । लेखनेचतथाद्वौद्वौस्तरणेपोडशस्मृताः । **कौशिकः**—गवांवालपवित्रेणसंध्योपास्तिंकरोतियः । सवैद्वादशवर्षाणिकृत संध्योभवेन्नरः । **भरद्वाजः**—रोम्णांपवित्रकरणेनियमोनकुशेष्विव । **पाद्मे**—नदर्भानुद्धरेच्छूद्रोनपिबेत्कापिलंपयः । नोच्चरेत्प्रणवंमंत्रंपुरो डाशंनभक्षयेत् ॥ इतिश्रीमन्नारायणभट्टात्मज०लक्ष्मणभट्टकृतावाचाररत्नेकुशप्रकरणम् ॥

अथप्रातःस्नानम् । शंखलिखितौ—अनश्नन्स्नायादिति । अनश्नन्तांबूलाद्यभक्षयन्निति**कल्पतरुः । हेमाद्रौकौर्मे**—नित्यमभ्यु दयात्पूर्वस्नातव्यंशुद्धिमिच्छता । एषसाधारणोधर्मश्चतुर्वर्णस्यनित्यशः । स्त्रीभिःशूद्रैश्चकर्तव्यंमंत्रवर्ज्यंविगाहनम् ॥ ॥ **भारते**—ब्रह्मक्ष त्रविशांचैवमंत्रवत्स्नानमिष्यते । तूष्णीमेवतुशूद्रस्यसनमस्कारकंस्मृतम् । तूष्णीमितिश्रौतस्मार्तमंत्रनिषेधप्राप्तेनमइतिनमस्कारमंत्रोविधीयते । सएवमृद्गोमयस्नानेपिविज्ञेयः । तेनाश्वक्रांतेइत्यादिमंत्रोनेति**मदनपालः । श्रीदत्ताह्निकेतु** तूष्णीमितिवैदिकमंत्रनिषेधोनपौराणानामित्यु क्तम् । **टोडरानंदेप्येवम् । कल्पतरुस्तु**—कर्मागमंत्रपाठःशूद्रस्येत्याह । वस्तुतस्तुपौराणोऽपित्राह्मणैरेवपठनीयः । शूद्रोनमइत्येवोच्चार येदिति । **शूद्रशिरोमणावप्येवम् ॥** ॥ सभर्तृकाणांस्त्रीणांनित्यस्नानमशिरस्कम् । सचैलस्नाननिमित्तेप्यशिरस्कत्वविधानात् । व्रतांगे सशिरस्कताविधानाच्च । **जाबालिः**—अततंप्रातरुत्थायदंतधावनपूर्वकम् । आचरेदुषसिस्नानंतर्पयेद्देवमानुषान् । **आद्धचंद्रिकायां पुराणे**—चतस्रोघटिकाःप्रातररुणोदयउच्यते । यतीनांस्नानकालस्तुगंगांभःसदृशःस्मृतः । यतयो नियताः । अरुणोदयःसंध्यापूर्वकालः । संध्यायांनिषेधादितिहरिहरः । तन्न । संध्यापूर्वकालेऽपिरात्रित्वेननिषेधादित्याचारादर्शः । तदपिन । वक्ष्यमाण**पराशरवाक्येनापर** रात्रेस्नानोक्तेः । **वृद्धपराशरः**—उपस्पृशेत्सियत्स्नानंक्रियतेऽनुदितेरवौ । प्राजापत्येनतुल्यंमहापातकनाशनम् । उषःकालस्तुलोहितदिगु

पलक्षितकालात्प्राक्कालइतिकल्पतरुः । **नागदेवाह्निकेक्षेमप्रकाशेचविष्णुः**—नाडिकाषट्पंचाशत्प्रातस्त्वेकाधिकोरुणः । उषःकालोऽष्टपंचाशच्छेषःसूर्योदयःस्मृतः। **यच्चुमार्कंडेयः**—सूर्योदयंविनानैवस्नानदानादिकःक्रमः। अग्नेर्विहरणंचैवक्रत्वभावश्चलक्ष्यते । इतितदुषःकालासंभवेइतिकेचित् । उदयपदेनोषःकालोलक्ष्यतइतिवर्धमानःपृथ्वीचंद्रश्च । तेनरात्रौनकुर्यादित्यर्थः । अविहितविशेषविषयमिति **टोडरानंदः** । इदं नित्यंकाम्यंच । सप्ताहंप्रातरस्नायीद्विजःशूद्रत्वमाप्नुयादितिवसिष्ठोक्तेः । उपस्युपसीतिवीप्साश्रुतेश्च । प्रातःस्नानंहरेत्पापमलक्ष्मीम्लानिमेवच । अशुचित्वंचदुःस्वप्नंतुष्टिंपुष्टिंचयच्छतीतिकाशीखंडाच्च । प्रातःस्नायीभवेन्नित्यंमध्यस्नायीसदाभवेदितिव्यासोक्तेर्मध्याह्नस्नानमपिनित्यमितिहेमाद्र्यादयः । नित्यमेवतुमध्याह्नेप्रातश्चकचकस्यचिदितिस्मृत्यर्थसारान्मध्याह्नेएवनित्यमित्याचारादर्शः । कामधेनावप्येवम् । दक्षस्मृतिगारुडयोः—प्रातर्मध्याह्नयोःस्नानंवानप्रस्थगृहस्थयोः । यतेस्त्रिषवणंस्नानंसकृच्च ब्रह्मचारिणः । सकृदित्यशक्तपरम् । स्नायात्प्रातश्चमध्याह्नेब्रह्मचारीगृहीतधेतिचंद्रोदयेसंग्रहोक्तेः । **यह्वृचपरिशिष्टे**—स्नानंप्रकृत्य तत्प्रातर्मध्याह्नेचगृहस्थःकुर्यादेकतरत्रवेति । **कात्यायनः**—यथाहनितथाप्रातर्नित्यंस्नायादनातुरः । दंतान्प्रक्षाल्यनद्यादौगेहेचतदमंत्रवत् । अह्नि मध्याह्ने । आतुरस्यमंत्रस्नानादिवेतिपृथ्वीचंद्रः । अमंत्रवदल्पमंत्रम् । गृहेपिहिद्विजातीनांमंत्रवत्स्नानमिष्यतेइतिहेमाद्रौजैमिनिस्मृतेः । साग्नेर्नद्यादावप्येवम् । अल्पत्वाद्धोमकालस्यबहुत्वात्स्नानकर्मणः । प्रातःसंक्षेपतःस्नानंहोमलोपोविगर्हितइतिकात्यायनोक्तेः । **चतुर्विंशतिमते**—*प्रातर्मध्याह्नयोःस्नानंगृहस्थस्यविधीयते । शक्तश्चेदुभयंकुर्यादशक्तस्त्वापराह्णिकम् । तत्सशिरस्कम् । **जाबालिः**—अशिरस्कंभवेत्स्नानंस्नानाशक्तौतुकर्मिणाम् । **स्मृत्यर्थसारे**—चक्षूरोगीकर्णरोगीशिरोरोगीकफाधिकः । कंठस्नानंप्रकुर्वीतशिरःस्नानसमंहितत् । मुखवक्त्वापादकोरोगः । **आयुर्वेदेपि**—स्नानमर्दितनेत्रास्यकर्णरोगातिसारिषु । आध्मानपीनसाजीर्ण

भुक्तवत्सुचगर्हितम् । **हेमाद्रौवाराहे**—त्रिभिःसारस्वतंतोयंपंचाहेनतुयामुनम् । सद्यःपुनातिगांगेयंदर्शनादेवनार्मदम् । समुद्रगानां सरितामन्यासामपियत्पयः । पावनंस्नानदानेपुप्राजापत्यसमंस्मृतम् । **रूपनारायणीयेब्राह्मे**—नद्यांप्रत्येकशःस्नानेभवेद्गोदानजंफलम् । गोप्रदानैश्चदशभिःस्नानेपुण्यंतुसंगमे । **अग्निपुराणे**—भूमिष्ठमुद्धृतात्पुण्यंततःप्रस्रवणोदकम् । ततोपिसारसंपुण्यंतस्मान्नादेयमुच्यते । तीर्थतोयंततःपुण्यंगांगंपुण्यंतुसर्वतः । **चंद्रिकायांयोगयाज्ञवल्क्यः**—त्रिरात्रफलदानद्योयाःकाश्चिदसमुद्रगाः । समुद्रगास्तुपक्ष स्यमासस्यसरितांपतिः । त्रिरात्रफलदाः नदीभिन्नजलाधिकरणकत्रिरात्रस्नानफलदाः । पक्षादावप्येवमितिरूपनारायणः । त्रिरात्रोपवासफल दाइतिहेमाद्रिः । **वृद्धयाज्ञवल्क्यः**—नदीस्नानानिपुण्यानितडागेमध्यमानिच । वापीकूपेजघन्यानिगृहेष्वल्पवराणिच । **गारुडे**— नित्यंनैमित्तिकंकाम्यंक्रियांगंमलकर्षणम् । तीर्थाभावेतुकर्तव्यमुष्णोदकपरोदकैः । **माधवीयेगार्ग्यः**—कुर्यान्नैमित्तिकंस्नानंशीताद्भिःकाम्य मेवच । नित्यंयादृच्छिकंचैवयथारुचिसमाचरेत् । **हेमाद्रावप्येवम्** । असमुद्रगताश्चापियाःकाश्चिद्विपुलोदकाः । अशोष्याग्रीष्मकालेऽपि तासुस्नानंसमाचरेत् । शुष्यंतियाःकुसरितोग्रीष्मेसूर्यांशुतापिताः । तासुस्नानंनकर्तव्यंदृष्टतोयास्वपिक्वचित् । इदंकाम्यपरम् । **रूपनाराय णीयेभविष्ये**—शिवलिंगसमीपस्थंयत्तोयंपुरतःस्थितम् । शिवगंगेतितज्ज्ञेयंतत्रस्नानाद्दिवंव्रजेत् । **तत्रैव**—देवार्चादृष्टिपूतेतुस्नानंकृत्वाज लाशये । सर्वपापविनिर्मुक्तःक्षणाद्भवतिनिर्मलः । **चंद्रोदयेवृद्धपराशरः**—कूपेपूद्धृततोयेनस्नानंकुर्वीतवाभुवि । **योगयाज्ञवल्क्यः**— अलाभेदेवखातानांसरितांसरसांतथा । उद्धृत्यचतुरःपिंडान्पारक्येस्नानमाचरेत् । सरउत्सृष्टम् । **पराशरः**—कदाचिद्विदुषामत्यानस्नात व्यंपरांभसा । पंचवासप्तवापिंडान्स्नायादुद्धृत्यतत्रतु । **शौनकः**—उद्धृत्यमृत्तिकापिंडान्दशपंचतथाक्षिपेत् । **पैठीनसिः**—त्रीन्पिंडा नुद्धृत्यस्नायादिति । **धौधायनः** । निरुद्धासुतुमृत्पिंडान्कूपाच्चत्रीन्घटांस्तथा । अत्राप्रतिष्ठितमात्रेपिंडोद्धारइतिप्राचः । तन्न । अप्रतिष्ठित

जलत्वेनतत्स्नानाभावात्परस्योपयोगेचौर्यापत्तेश्चेतिहरिहरादयः । अतःपिंडत्रयोद्धारःसेतुपरः । पंचपिंडोद्धारस्तदन्यपरः । सप्तादिपिंडोद्धार स्तर्पणाद्यर्थमितिपृथ्वीचंद्रः । यथासामर्थ्यंव्यवस्थेतिचंद्रिका । सर्वमेतदनुत्सृष्टविषयम् । अनुत्सृष्टेपुनस्नायात्तथैवासंस्कृतेपुचेतिमरी च्युक्तेः । **पराशरः**—नतीर्थेस्याकुलेस्नायान्नासज्जनसमावृते । दर्भहीनोऽन्यचित्तश्चननग्नोनशिरोविना । **बौधायनः**—शाल्म लीतिंतिणीचैवकरंजश्चहरीतकी । कोविदारकबिल्वार्कावदरीचविभीतकः । शेलुश्चखादकश्चैपांछायास्नानविवर्जयेत् । **माधवीयेआप स्तंबः**—अंत्यजैःखानिताःकूपास्तडागोवाप्यएवच । एषुस्नात्वाचपीत्वाचप्राजापत्येनशुद्ध्यति । खानितग्रहणादखानितेनदोषः । तत्रै वविष्णुः—जलाशयेष्वथाल्पेषुस्थावरेषुमहीतले । कूपवत्कथिताशुद्धिर्महत्सुनतुदूषणम् । **चंद्रिकायांबौधायनः**—अधोवर्णोदकेस्ना नवर्ज्यंनद्यांद्विजातिभिः । तस्यांरजकतीर्थंतुदशहस्तेनवर्जयेत् । तत्रैवपुराणे—स्नवन्नदीपुनस्नायात्प्रविश्यांतःस्थितोद्विजः । **मरीचिः**— नद्यायश्चपरिभ्रष्टंनद्यायश्चविवर्जितम् । गतप्रत्यागतंयच्चतत्तोयपरिवर्जयेत् । स्नानादाविति शेषः । परिभ्रष्टं विच्छिन्नम् । विवर्जितं नदीतोनिःसृ तम् । गतप्रत्यागतमविच्छिन्नमावर्ततइतिचंद्रिका । **व्याघ्रपादः**—सिंहकर्कटयोर्मध्येसर्वानद्योरजस्वलाः । तासुस्नानंनकुर्वीतवर्जयित्वास मुद्रगाः । स्नानंतर्पणादेरुपलक्षणम् । नस्नानादीनिकर्माणितासुकुर्वीतमानवइत्यत्रिस्मृतेः तीरवासिनांननिषेधः । नतुतत्तीरवासिनामिति त्रिस्थलीसेतौनिगमात् । समुद्रगानांतुहेमाद्रौदेवीपुराणे—समुद्रगामिनीनांतुपड्भागंरजइष्यते ॥ ॥ **नदीराहकात्यायनः**— धनुःसहस्राण्यष्टौतुगतिर्यासांनविद्यते । नतानदीशब्दवहागर्तास्तेपरिकीर्तिताः । धनुश्चतुर्हस्तमितिचाचस्पतिः । **भविष्योत्तरे**—आदौ कर्कटकेदेविमहानद्योरजस्वलाः । त्रिदिनंतुचतुर्थेह्निशुद्धाःस्युर्जाह्नवीयथा ॥ ॥ **महानद्यश्चोक्ताब्राह्मे**—गोदावरीभीमरथीतुंगभद्रा

---

१ नदीपनेऽतिपाठ ।

चवेणिका । तापीपयोष्णीविंध्यस्यदक्षिणेतुप्रकीर्तिताः । भागीरथीनर्मदाचयमुनाचसरस्वती । विशोकाचवितस्ताचविंध्यस्योत्तरतःस्थिताः । चंद्रिकायांवामनपुराणे—गोदावरीभीमरथीकृष्णावेणीसरस्वती । तुंगभद्रासुप्रयोगासत्याकावेरिरेवच । दुग्धोदानलिनीरेवावारिसीता कलस्वना । एताअपिमहानद्यःसह्यमूलाद्विनिर्गताः । अपरार्केमरीचिः—तपनस्यसुतागंगागौतमीचसरस्वती । रजसानाभिभूयंतेवेणाचन दसंज्ञिताः । देवलः—शोणसिंधुहिरण्याख्याःकोकलोहितघर्घराः । शतद्रूश्चनदाःसप्तपावनाःपरिकीर्तिताः । हेमाद्रौवामनपुराणे—सर स्वतीनदीपुण्यातथावैतरणीनदी । आपगानर्मदाचैवगंगामंदाकिनीनदी । मधुस्रवाअंशुमतीकौशिकीयमुनातथा । दृषद्वतीमहापुण्यातथाहैरण्व तीनदी । रजस्वलात्वमेतासांविद्यतेनकदाचन । इदंत्रिदिनाधिकरजोनिषेधपरम् । पूर्वोक्तभविष्यविरोधादितिहेमाद्रिः । प्रथमंकर्कटेदेवित्र्य हंगंगारजस्वलेत्यंतर्गतरजोविषयम् । गंगाधर्मद्रवःपुण्योयमुनाचसरस्वती । अंतर्गतरजोदोषाःसर्वावस्थासुचामलाइतिनिगमादितिभट्टाः ॥ ॥ रजोयुक्तनदीस्नानेप्रायश्चित्तमुक्तंत्रिस्थलीसेतौसंग्रहे—कालेनभस्यशुद्धंस्यात्त्रिरात्रंतुनवोदकम् । अकालेतुदशाहंस्यात्स्नात्वानाद्यादहर्निशम् । कात्यायनः—उपाकर्मणिचोत्सर्गेप्रेतस्नानेतथैवच । चंद्रसूर्यग्रहेचैवरजोदोषोनविद्यते । प्रेतपदेप्रातःपदमित्याचारादर्शेटोडरा नंदेचपाठः । वृद्धयाज्ञवल्क्यः—प्रभूतेविद्यमानेपिउदकेसुमनोहरे । नाल्पोदकेद्विजःस्नायान्नदींचोत्सृज्यकृत्रिमे । वृद्धपराशरः— नस्नायाच्छिद्रहस्तेननैकहस्तेनवातथा । उद्धृताभिरपिस्नायादाहृताभिर्द्विजातिभिः । आपस्तंबः—सशिरोमज्जनमप्सुवर्जयेदस्तमितेचस्नान मिति । अशिरोमज्जनमितिपाठेमज्जनयोग्यजलेगात्रक्षालनंनकार्यमित्यर्थइतिहरिहरः । व्यासः—नद्यांचास्तमितेसूर्येवर्जनीयंसदाबुधैः । न स्नानमाचरेद्भुक्त्वानातुरोनमहानिशि । नवासोभिःसहाजस्रंनाविज्ञातेजलाशये । अत्रास्तमितशब्देनाद्ययामोनिषिद्धोमहानिशाशब्देनमध्य यामः । आचारादर्शेतुअस्तमितपदेनसर्वरात्रिनिषेधः । महानिशानिषेधोदोषाधिक्यार्थइत्युक्तम् । नैमित्तिकंतुस्नानंरात्र्यादावपिकार्यम् ।

नैमित्तिकंतुकर्तव्यंस्नानंदानंचरात्रिष्वितिवचनात् । **हेमाद्रौभविष्ये**—नस्नायादुत्सवेऽतीतेमंगलंविनिवर्त्यच । अनुव्रज्यसुहृद्बंधूनर्चयित्वे
ष्टदेवताः । अत्रशीतलजलस्नानमेवनिषिद्धमितिशिष्टाः । स्नानमात्रमितितुयुक्तम् । **तत्रैव**—मंगलेष्विष्यतेस्नानंवृद्धौपर्वोत्सवेपुच । स्नेह
मंत्रसमायुक्तंमध्याह्नात्प्राग्विशेषतः । अयंपूर्वोक्तप्रतिप्रसवइतिहेमाद्रिः । अपूर्वस्नानविधिरेवेतियुक्तंप्रतीमः । **योगयाज्ञवल्क्यः**—दर्शे
स्नानंनकुर्वीतमातापित्रोस्तुजीवतोः । स्नानंकुर्वन्निराचष्टेपित्रोरुन्नतिजीविते । मातापित्रोरितिसाहित्यंविवक्षितमितिपृथ्वीचंद्रः । दर्शेरागप्राप्त
स्नानपरमितिपारिजातः । दर्शप्रयुक्तस्नानपरमितिटोडरानंदः । **यत्तुगर्गः**—त्रयोदश्यांतृतीयायांदशम्यांचैवसर्वदा । शूद्रविट्क्षत्रियाः
स्नानंनाचरेयुःकथंचनेति तन्नित्यनैमित्तिकान्यपरम् । यादच्छिकंतुयत्स्नानंभोगार्थंक्रियतेद्विजैः । तन्निषिद्धंदशम्यादौनित्यनैमित्तिकेनत्वित्या
पस्तंबोक्तेरितिमदनपारिजातः—अंभोवगाहनंस्नानंविहितंसार्ववर्णिकमितिवचनोक्तस्याननिषेधइतिकल्पतरुः । रागप्राप्तस्याननिषेधो
वैधनिषेधेविकल्पाद्यापत्तेरितिटोडरानंदः । **गर्गपैठीनसिवसिष्ठाः**—पुत्रजन्मनिसंक्रांतौश्राद्धेजन्मदिनेतथा । नित्यस्नानेचकर्तव्येतिथि
दोषोनविद्यते । **अपरार्केव्राह्मे**—स्नानंसंक्रमणंस्वप्नंदिग्वासानसमाचरेत् । **व्यासः**—नादशाकेनवस्त्रेणस्नायात्कौपीनकादृते । नान्यदी
येननार्द्रेणनसूच्याग्रथितेनच । अत्रेतरकर्मवद्वस्त्रद्वयधारणंनियमितमितिकल्पतरुः । **मेधातिथिस्तु**—एकेनवाससास्नायाद्वाभ्यामनियमः
स्मृतः । बहुभिःप्रतिषेधस्तुस्नानेफलमभीप्सितमित्याह । **अपरार्कस्तु**—अस्पृश्यस्पर्शनेचैववार्तायांपुत्रजन्मनि । [1]तीर्थेद्विवाससास्नानमन्यत्रै
केनवाससेत्याह । वार्ता मरणवार्ता । सदोपवीतिनाभाव्यंसदाबद्धशिखेनचेतिवाक्येनबद्धशिखित्वयज्ञोपवीतित्वयोःसर्वदाप्राप्तौपुनःस्नानप्रकर
णेबद्धशिखियज्ञोपवीतीतिकात्यायनोक्तिःशिखाभिन्नकेशबंधोत्तरीयनिवृत्त्यर्थेतिहरिहरः । तन्न । अनेनैवसिद्धावेकवस्त्राःप्राचीनावीतिन

१ एतद्विवाससाइतिपाठः ।

इतिकात्यायनोक्तिर्वैयर्थ्यापत्तेः । यत्त्वेतन्नैमित्तिकस्नानांतरेद्विवस्त्राज्ञापकमितिनैतज्ज्ञापकायत्तंकिंतुवाचनिकं वांतरादनादावपितथापत्तेः । मुक्तकेशैर्नकर्तव्यंप्रेतस्नानंविनाकचिदितिवृद्धवसिष्ठोक्तेश्च । अतएवाचारादर्शेऽस्नानुवादत्वान्नोत्तरीयादिनिवृत्तिरित्युक्तम् । ब्रह्मदत्ताचार्योऽपिसवस्त्रोऽहरहराप्लुत्येतिशांखायनसूत्रेसवस्त्रग्रहणंद्वितीयवस्त्रप्राप्त्यर्थमित्याह । हेमाद्रौशौनकः—तथाभ्युक्षणमाहर्तुपाग्रमौदुंबरंदृढम् । जपार्थमक्षमालांचरुद्राक्षादिविनिर्मिताम् । एवंसंभृतसंभारःस्नानकर्मसमाचरेत् । अभ्युक्षणं जलम् । औदुंबरं ताम्रमयम् । याज्ञवल्क्यः—मृद्गोमयतिलान्दर्भान्पुष्पाणिसुरभीणिच । आहरेत्स्नानकालेतुस्नानार्थंप्रयतःशुचिः । इदंकातीयानांप्रातर्मध्याह्नयोः । आश्वलायनानांतुबह्वृचपरिशिष्टे—प्रातर्गोमयेनकुर्यान्मृदामध्यंदिनेशुद्धाभिरद्भिःसायमिति । स्मृतिसारे—जलांतेतिलदर्भास्तुयोऽनुष्ठानायथाचते । नानुष्ठानफलंतस्यदातुरेवहितत्फलम् । वामने—निषिच्यतीरेकुशपिंजुलानिपूर्वोत्तराग्राणिमृदंन्यसेच्च । प्रक्षाल्यपादौचमुखंचकंठेंयज्ञोपवीतंचजलंपिवेन्निः । यज्ञोपवीतंकंठेकृत्वात्रिःप्रक्षाल्येत्यन्वयः । पादप्रक्षालनमलस्नानबहिःकार्यं । जलंदेवगृहंचैवशयनंचद्विजालयम् । निर्णिक्तपादःप्रविशेन्नानिर्णिक्तःकथंचनेतिव्यासोक्तेः ।—मलस्नानंबहिःकृत्वाआचम्यप्राङ्मुखःस्थितः । प्राणायामांस्ततःकुर्यात्ततोध्यात्वादिवाकरमितिचंद्रिकायांयमोक्तेश्च । वामने—कराभ्यांधारयेद्दर्भान्शिखाबंधंविधायच । प्राणायामंतथाकुर्यादितिव्यासः । स्मृत्वोंकारंतुगायत्र्यानिवध्नीयाच्छिखांततः । षट्त्रिंशन्मते—शिखाबंधस्तुगायत्र्यानैर्ऋत्याग्रहरंभतः । विष्णुः—संकल्पपूर्वकंस्नानंकुर्याद्विप्रःसमाहितः । मनुः—तिथिवारादिकंज्ञात्वासुसंकल्प्ययथाविधि । स्नायादितिशेषः । व्यासः—स्रोतसोऽभिमुखःस्नायान्मार्जनंचाघमर्षणम् । अन्यत्रार्कमुखोरात्रौप्राङ्मुखोऽग्निमुखोऽपिवा । संध्यामुखस्तुसंध्यायांतथाचाद्यंतयामयोः । स्रोतोभिमुखत्वंबह्वृचपरम् । स्रोतसोभिमुखःसरिस्नुस्नायादन्यत्रादित्याभिमुखइतिबह्वृचपरिशिष्टात् । कातीयतैत्तिरीयादीनांसर्वत्रार्काभिमुखंस्नानम् । आचारदर्पणेप्येवम् । तेषामपि

रात्रौप्रवाहाभिमुखंस्नानंनयादानित्युपक्रम्य सूर्याभिमुखोमज्जेदितिसामान्येनकात्यायनोक्तेरितिहरिहरः । अघमर्षणादिसर्वेपांस्रोतोभिमुख म् । ततोंगुष्ठांगुलीभिस्तुश्रोत्रद्वंनासिकामुखम् । पिधायांतःप्रतिस्रोतस्त्रिर्जपेदघमर्षणमितिव्यासस्मृतेः । आश्वलायनः—गृहेगृहमुखं पिथादन्यत्रापिमुखंयेः । एतद्बह्वृचपरम् । अन्येपांतुवृद्धयाज्ञवल्क्यः—स्थांवरेषुगृहेचैवसूर्यसंमुखमाप्लवेत् । जीवत्पितृकनिर्णये—ना भिमात्रजलेगत्वाकृत्वाकेशान्द्विधाद्विजः । जीवत्पितानकुर्वीतदक्षिणेकेशसंचयम् । वृद्धपराशरः—निरुध्यकर्णौनासांचत्रिःकृत्वोन्मज्जनंत तः । कृष्णभट्टीयेविश्वामित्रः—नाभिमात्रेजलेतिष्ठन्सप्तद्वादशपंचवा । त्रिवारंवापिचाप्लुत्यस्नानमेवंविधीयते । हेमाद्रौसंग्रहे—गं गांगयांकुरुक्षेत्रंप्रयागोदधिसंगमम् । तीर्थान्येतानिसंस्मृत्यततोमज्जेज्जलाशये । तत्रैवव्यासः—कुरुक्षेत्रंगयांगंगांप्रभासंनैमिषंतथा । तीर्थान्ये तानिसर्वाणिस्नानकालेभवंतुमे । तत्रैवगंगावाक्यम्—नंदिनीनलिनीसीतामालतीचमलापहा । विष्णुपादाब्जसंभूतागंगात्रिपथगामिनी । भागीरथीभोगवतीजाह्नवीत्रिदशेश्वरी । द्वादशैतानिनामानियत्रयत्रजलाशये । स्नानोद्यतःस्मरेन्नित्यंतस्यतत्रभवाम्यहम् । तीर्थस्मृति.कृत्रिमे । ननदीपुनदींवृयात्पर्वतेपुनपर्वतम् । नान्यांप्रशंसेत्तत्रस्थस्तीर्थेष्वायतनेपुचेतिचंद्रोदयेदेवलोक्तेः । गंगादिपुण्यतीर्थानिकृत्रिमादिपुसंस्मरेदि तिपराशरोक्तेश्च गयादिस्मृतिःसंनिहिततीर्थाभावे । गंगायास्तुसर्वत्र । यत्रस्थानेतुयत्तीर्थंनदीपुण्यतमाचया । तांध्यायन्मनसास्नायादन्यत्रे ष्टचिंतनमितिहेमाद्रौभृगूक्तेः । अन्यत्रउद्धृतजलेइतिटोडरानंदः । स्नानकालेन्यतीर्थेपुजप्यतेजाह्नवीजनैः । विनाविष्णुपदींकान्यत्स मर्षाघशोधनइतिनिर्णयामृतेस्कांदाच । प्रतापमार्तंडेप्येवम् ॥ ॥

अथपरिशिष्टोक्तःस्नानविधिः । गोमयंलंतरिक्षस्थंसंगृह्य भूमिष्ठंचोपर्यधश्चसंत्यज्य धौतपादपाणिमुखआचम्य संध्योक्तवदात्मान्यु

---

१ स्थावरेषुतडागादिषु । २ स्नानयुक्त स्मरेन्नित्यंतत्रतत्रवसेद्दिसाहतिपाठः ।

क्षणादिकृत्वा द्विराचम्यसंयतप्राणःकर्मसंकल्प्य गोमयंवीक्षितमादाय सव्येपाणौकृत्वा व्याहृतिभिस्त्रिधाविभज्य दक्षिणंभागंप्रणवेनदिक्षुविक्षिप्योत्तरंतीर्थेक्षिप्त्वा मध्यमंमानस्तोकइत्यृचाभिमंत्र्य गंधद्वारामित्यृचामूर्धादिसर्वांगमालिप्यप्रांजलिर्वरुणमवतेहेळइतिद्वाभ्यां प्रसंमाजेवृहदर्चेतिसूक्तेन हिरण्यशृंगंवरुणंप्रपद्येतीर्थमेदेहियाचतः । यन्मयाभुक्तमसाधूनांपापेभ्यश्चप्रतिग्रहः । यन्मेमनसावाचाकर्मणावादुष्कृतंकृतम् । तन्नइंद्रोवरुणोवृहस्पतिःसविताचपुनंतुपुनःपुनरितिद्वाभ्यांचप्रार्थ्य । याःप्रवतइतितीर्थमभिमृश्यावगाह्यस्नातोद्विराचम्य मार्जयेदंवयोयंत्यध्वभिरित्यष्टाभिरापोहिष्ठेतिनवभिरथतीर्थमंगुष्ठेनेमंमेगंगइतित्रिःप्रदक्षिणमालोड्यप्रकाशपृष्ठमग्नोऽघमर्षणंत्रिरावर्त्यनिमज्योन्मज्यादित्यमालोक्य द्वादशकृत्वआप्लुत्यशंखमुद्रयायोनिमुद्रयोदकमादाय मूर्धिमुखेबाह्वोरुरसिचात्मानंगायत्र्याभिषिच्य त्वंनोअग्नेवरुणस्येतिद्वाभ्यां तरत्समंदीधावतीतिसूक्तेन पुनःस्नायान्मूर्धिचाभिषिंचेत्तद्विष्णोरक्षाणोअग्नेयत्किंचेदमित्येताजपेत् ।साक्षताभिरद्भिःप्राङ्मुखउपवीतीदेवतीर्थेनव्याहृतिभिर्व्यस्तसमस्ताभिर्ब्रह्मादिदेवान्सकृत्सकृत्तर्पयित्वोदङ्मुखोनिवीतीसयवाभिरद्भिःप्राजापत्येनतीर्थेनऋषीन्व्याहृतिभिर्द्विर्द्विस्तर्पयित्वा दक्षिणामुखःप्राचीनावीतीपितृतीर्थेनसतिलाभिरद्भिर्व्याहृतिभिर्भूरित्यादित्रिस्त्रिस्तर्पयेदथतीरमेत्यदक्षिणामुखःप्राचीनावीतीयेकेचास्मदितिवस्त्रंनिष्पीड्योपवीत्यपउपस्पृश्य परिधानीयमभ्युक्ष्यपरिधाय द्वितीयंप्रोक्षितंप्रावृत्याचामेदथसंध्यामुपासीतेति ॥ ॥ **शंखमुद्रालक्षणमागमे**—वामांगुष्ठंतुसंगृह्यदक्षिणेनतुमुष्टिना । कृत्वोत्तानंततोमुष्टिमंगुष्ठंतुप्रसारयेत् । वामांगुल्यस्तथाश्लिष्टाःसंयुक्ताःसुप्रसारिताः । दक्षिणांगुष्ठसंस्पृष्टाःशंखमुद्रेयमीरिता । **योनिमुद्रापितत्रैव**—मिथःकनिष्ठिकेवध्वातर्जनीभ्यामनामिके । अनामिकोर्ध्वसंश्लिष्टेदीर्घमध्यमयोरधः । अंगुष्ठाग्रद्वयंन्यस्येद्योनिमुद्रेयमीरिता । अयंप्रातःस्नानविधिर्वह्वृचानाम् । कातीयानांतुमध्याह्नस्नानविधिरेव ॥ ॥ प्रातःस्नानेयोगयाज्ञवल्क्यः—यएपविस्तरेणोक्तःस्नानस्यविधिरुत्तमः । असामर्थ्यान्नकुर्याच्चेत्तत्रायंविधिरुच्यते । स्नानमंतर्जलेचैवमार्जनाचमनेतथा । जलाभिमंत्रणंचैवतीर्थस्यपरिकल्पनम् ।

अघमर्षणसूक्तेनत्रिरावृत्तेननित्यशः । स्नानाचरणमित्येतदुपदिष्टंमहात्मभिः । अन्यांश्चवारुणान्मंत्रान्कामतःसंप्रयोजयेत् । अयंचांगसंकोचोमध्याह्नस्नानेपि । **मार्कंडेये**—मातरंपितरंजायांभ्रातरंसुहृदंगुरुम् । यमुद्दिश्यनिमज्जेतअष्टमांशंलभेतसः । **चंद्रिकायांबृहद्वसिष्ठो क्तौतु**—निमज्ज्येत्तुयमुद्दिश्यद्वादशांशंलभेतसइत्युक्तम् । **पैठीनसिः**—प्रतिकृतिंकुशमयींतीर्थवारिणिमज्जयेत् । कुशोसिकुशपुत्रोसिब्रह्मणा निर्मितःपुरा । त्वयिस्नातेपिसस्नातोयस्येदंग्रंथिबंधनम् । अत्रपूर्ववाक्येनिमज्जेतेतिश्रुतेर्मज्जनरूपंस्नानंजीवत्प्रतिनिधित्वेनस्नाने । प्रतिकृतिमज्ज नंतुमृतप्रतिनिधित्वेनस्नानेइतिप्रयोगपारिजातः । स्नानोत्तरंतदंगतर्पणंकुर्यात् । स्नानादनंतरंतावत्तर्पयेत्पितृदेवताः । उत्तीर्यपीडयेद्वस्त्रंसं ध्याकर्मततःपरमितिचतुर्विंशतिमतात् । स्नानेपुचैवसर्वेषुतर्पयेत्पितृदेवताः । काम्येनित्येविशेषेणतत्प्रकुर्यात्प्रयत्नतइतिचंद्रिकायांव्या घोक्तेश्च । चंद्रोदयेब्रह्मांडे—नित्यंनैमित्तिकंकाम्यंत्रिविधंस्नानमुच्यते । तर्पणंतुभवेत्तस्यतदंगत्वेनकीर्तितम् । **अस्पृश्यस्पर्शादिनि मित्तस्नानेतु**—अस्पृश्यस्पर्शनेवांतेअश्रुपातेक्षुरेभगे । स्नानंनैमित्तिकंज्ञेयंदैवपित्र्यविवर्जितमितिपराशरोक्तेर्नतर्पणमित्युक्तं **गयादा सनिबंधेआचारचिंतामणौचवाचस्पतिमिश्रैः** । स्नानांगतर्पणंविद्वान्कदाचिन्नैवहापयेदितिहेमाद्रौब्रह्मवैवर्ताच्च आशौचेपितद्भव ति । **स्मृत्यर्थसारेप्येवम् । माधवीयेयमः**—द्वौहस्तौयुग्मतःकृत्वापूरयेदुदकांजलिम् । गोशृंगमात्रमुद्धृत्यजलमध्येजलंक्षिपेत् । **चंद्रो दयेदक्षः**—प्रादेशमात्रमुद्धृत्यसलिलंप्राङ्मुखःसुरान् । उदङ्मनुष्यांस्तर्पेतपितॄन्दक्षिणतस्तथा । **बौधायनः**—अनुत्तीर्यमपउपसिंचतीत्यनु त्तीर्यैवेदम् । तत्प्रकारःपृथ्वीचंद्रोदये—भूर्देवांस्तर्पयामि । भुवर्देवांस्तर्पयामि । स्वर्देवांस्तर्पयामि । भूर्भुवःस्वर्देवांस्तर्पयामि । एवंऋ

---

१ आश्वलायनानासूत्रेस्यस्तुल्यभावादंजलिनैवदानं । सूत्रोक्तब्रह्मयज्ञागंस्वपितृतर्पणंतद्दक्षिणेनैवकार्यं । सूत्रेअंजलिचोदनाभावात् । अनादेशेदक्षिणंप्रतीयादितिसूत्रका रोक्तेरितिकमलाकरीये ।

प्यादीन्। अथवाभूर्देवगणंतर्पयामि। भुवर्ऋषिगणंतर्पयामि। स्वर्मनुष्यगणंतर्पयामि। भूर्भुवःस्वःपितृगणंतर्पयामि। **कृष्णभट्टीये**—उपवीती ब्रह्मादयोयेदेवास्तान्देवांस्तर्पयामि। भूर्देवानित्यादि। निवीतीकृष्णद्वैपायनादयोयऋषयस्तानृषींस्तर्पयामि भूर्ऋषीनित्यादि। प्राचीनावीतीसोमः पितृमान्यमोंगिरस्वानग्निष्वात्ताःकव्यवाहनादयोयेपितरस्तान्पितॄंस्तर्पयामि भूःपितॄनित्यादि। सनकादयोयेमनुष्यास्तान्मनुष्यांस्तर्पयामिभूर्मनुष्यानित्युक्तंजयंतवृत्तौ। **स्मृत्यर्थसारे**चैवम्। अत्रदेवपितॄणामेवेज्यत्वात्सांगस्यचानुष्ठेयत्वाज्जीवत्पितृकस्याप्यधिकारः। प्राचीनावीतित्यात्प्रकोष्ठादित्युक्तंजीवत्पितृकनिर्णयेगुरुभिः॥ ॥ **संक्षेपातिशयमाहशंखः**—आब्रह्मस्तंबपर्यंतंजगत्तृप्यत्वितिक्रमात्। जलांजलित्रयंदद्यादेतत्संक्षेपतर्पणम्। **आचारदर्पणेस्मृतिः**—प्रातःस्नानेनकर्तव्यंकदाचित्तिलतर्पणम्। इदंचनैमित्तिकविषयमितितत्रैवोक्तम्। अन्येतुप्रातःस्नानांगभूतेतर्पणेसर्वदातिलनिषेधः। प्रातःस्नानेविशेषोयंतद्विनैवतिलैर्युतम्। नैमित्तिकंचनित्यंचतिलैरेवविधीयते इतिस्मृतिरत्नावल्यां **कौशिकोक्तेरित्याहुः**॥ ॥ अत्रविशेषोद्देमाद्रौपाद्मे—प्राचीनावीतसंयुक्तःकुशपाणिस्तिलैःसह। असंस्कृतप्रमीतानांस्थलेदद्याज्जलांजलिम्। प्रेक्षमाणोदिशंयाम्यांमंत्रेणानेनयत्नतः। असंस्कृतप्रमीतायेगोत्रजादुर्गतिंगताः। तेषांहिदत्तमक्षय्यमिदमस्तुतिलोदकम्। **तत्रैवव्यासः**—अनग्निदग्धायेजीवायेप्यदग्धाःकुलेमम। भूमौदत्तेनतोयेनतृप्तायांतुपरांगतिमिति। इदंजलस्थेनैवकार्यम्। जलार्द्रवासाःस्थलगोयःप्रदद्याज्जलांजलिम्। वस्त्रनिश्चोतनंप्रेताअपवार्यपिबंतितेइति**सुमंतूक्तेः**। अपवार्यांजलिंत्यक्त्वेतिहेमाद्रिः। **शौनकः**—स्नानांगंतर्पणंकृत्वा यक्ष्मणेजलमाहरेत्। अन्यथाकुरुतेयस्तुस्नानंतस्याफलंभवेत्। **तत्रमंत्रः**—यन्मयादूषितंतोयंशारीरमलसंभवैः। तद्दोषपरिहारार्थंयक्ष्माणंतर्पयाम्यहम्। **आश्वलायनः**—येकेचास्मत्कुलइतिवस्त्रनिष्पीडनंस्थले। **वृद्धमनुः**—निष्पीड्यस्नानवस्त्रंतुपश्चात्संध्यांसमाचरेत्। अन्यथाकुरु

१ मलं शारीरसंभवैःइतिपाठः।

तेयस्तुस्नानंतस्याफलंभवेत्। **सायणीये**—मनुष्यतर्पणेचैवस्नानवस्त्रनिपीडने। निवीतीतुभवेद्विप्रस्तथामूत्रपुरीषयोः। **आशार्केतु**—वस्त्रान
प्पीडनंचैवकुशानांचैविसर्जनम्। अपसव्येनकर्तव्यंहस्तप्रक्षालनंतथेत्युक्तम्। अतोविकल्पः। वह्वृचानांतुप्राचीनावीती। **बह्वृचपरिशिष्टे**—
प्राचीनावीतीवस्त्रंनिष्पीडयेदित्युक्तेः। इदंचजीवत्पितृकोनकुर्यात्। नजीवत्पितृकःकुर्याद्वस्त्रनिष्पीडनंबुधइतिजीवत्पितृकनिर्णयेपुरा
णात्। **यत्तुपराशरः**—निराशाःपितरोयांतिवस्त्रनिष्पीडनेकृते। तस्मान्नपीडयेद्वस्त्रमकृत्वापितृतर्पणमिति तद्रागप्राप्तवस्त्रनिष्पीडनपरम्।
अतएवमध्याह्नस्नानेहेमाद्रौब्रह्मांडे—ततःस्नात्वाविधानेनसंतर्प्यपितृदेवताः। जलाशयाद्विनिर्गत्यद्विराचामेत्समाहितः। स्नानवस्त्रमनिष्पी
ड्यस्थाप्यमास्थलतर्पणात्। स्थलेपितर्पणंकृत्वाततोवस्त्रंनिपीडयेत्। एवंवस्त्रंनिष्पीड्यैकंपादंजलेऽन्यंस्थलेकृत्वाआचामेत्। उदकेचोदकस्थस्तु
स्थलस्थस्तुस्थलेशुचिः। स्नात्वाचामेत्तदाविप्रःपादौकृत्वास्थलेजलेइतिदक्षोक्तेः॥ ॥ **तर्पणोत्तरंदर्भत्यागउक्तःस्मृतिरत्नावल्याम्**—
विकिरेपिंडदानेचतर्पणेश्राद्धकर्मणि। आचांतस्तुप्रकुर्वीतदर्भसंत्यजनंबुधः। दर्भत्यागेप्राचीनावीतित्वमुक्तंप्राक् ॥ ॥ **नदीस्नानेतत्प्रार्थनो**
क्ताकौर्मे—ज्ञानतोज्ञानतोवापियन्मेदुश्चरितंकृतम्। तत्क्षमस्वाखिलंदेविजगन्मातर्नमोस्तुते। स्नानाकरणेप्रायश्चित्तमुक्तंऋग्विधाने—
त्रिष्व(श्व)प्रसुवसूक्तंचस्नानलोपोभवेद्यदि। **स्मृतिरत्नावल्यांतु**—स्नानलोपेगायत्र्यष्टसहस्रजपउक्तः। स्नानमकृत्वाभोजनेउपवासंत्रिरात्रं
कुर्यादितिस्मृत्यर्थसारे ॥ इतिश्रीमन्नारायणभट्टा०लक्ष्मणभट्टकृतावाचाररत्नेप्रातःस्नानम् ॥ ॥

अथस्नानोत्तरकृत्यम्। हारीतः—स्नात्वागात्रमवमृज्यान्नशिरोविधुनुयान्नोत्तरीयविपर्यासंकुर्यादिति। **त्रिकांडमंडनः**—दीपं
शूर्पंतथाशय्यांपादत्राणंचमार्जनीम्। स्नानांतेसंस्पृशेद्यस्तुपुनःस्नानेनशुद्ध्यति। **विष्णुः**—नतैलवसेस्पृशेन्नपूर्वधृतमक्षालितंवासोबिभृयत्

---

१ परिवर्जनंइतिपाठ।

स्यातएवसोष्णीषेपौतवाससीविभृयात् म्लेच्छांत्यजपतितैर्नसंभाषेतइति । उष्णीषंकेशजलापकर्षणार्थंवस्त्रमितिपृथ्वीचंद्रः । अतएव हारीतोक्तीगात्रग्रहणम् । केचित्तुसोष्णीषवासोधारणानुवादेनधौतत्वविधानात्कर्मकालंविनास्नानोत्तरमपिधौतप्रसिद्धोष्णीषधारणम् । वृद्ध पराशरेण—यद्यश्मश्रुपुकेशेषुयज्जलंदेहलोमसु । हस्ताभ्यांतन्नवस्त्रेणजलंविद्वान्विमार्जयेदिति शिरोमार्जनवस्त्रनिषेधादित्याहुः । वस्तुतस्तु-मार्जयेद्गात्रमंगेषेणनोत्तरीयेणचाशिरइतिव्यासवचनैकवाक्यतयास्नानवस्त्रद्वयस्यैवनिषेधः । अतएवस्नातोनांगानिमृज्याच्चस्नानशाट्यानपाणिने तिविष्णुपुराणात् । मार्जननिषेधएतत्परइतिपारिजातस्मृत्यर्थसाराचारादर्शाः । नांगेभ्यस्तोयमुद्धरेदितिवस्त्रनिषेधेसिद्धेस्नानशा टीनिषेधोदोषाधिक्यार्थइतिहेमाद्रिः । समर्थस्यमार्जनाभावोऽसमर्थस्यपाणिशाटीमार्जनाभावइतिहरिहरः । चंद्रोदयेसंग्रहे—स्नात्वादूरंतटेतिष्ठेत्प्राचीनावितिनाद्विजः । यावत्स्रवतिदेहांवुतूष्णींभूतादितूष्णये । सुरार्विंदुसमाज्ञेयाःपृष्ठतःकेशविंदवः । तएवपुरतोज्ञेयाः सर्वतीर्थोपमाबुधैः । तिस्रःकोट्योर्धकोटीचयानिरोमाणिमानवे । स्रवंतिसर्वतीर्थानितस्मान्नपरिमार्जयेत् । देवलः—देवाःपिबंतिशिरसोमुख स्राप्सरसस्तथा । यक्षगोपिचगंधर्वाअधस्तात्सर्वजंतवः । अंगानिशक्तौवस्त्रेणपाणिनाचनमार्जयेत् । धौतांवरेणवाप्रोंच्छ्यविभृयाच्छुष्कवाससी । अमार्जनपक्षेगोदोहनकालपर्यंततत्रैवतिष्ठेदित्याचारदर्पणः । हेमाद्रौभरद्वाजः—वस्त्रोदकमपेक्षंतेयेमृतादासवर्गिणः । कंचित्कालंस्थित स्तस्माज्जलंभूमौनिपातयेत् । तदुत्तरमपिमार्जनंकार्यंशक्तेन । आर्द्रएवतुवासांसिस्नात्वासेवेतमानवइतिविष्णूक्तेः । कृष्णभट्टीयेस्कांदे—ततस्त्राचमनंकृत्वाप्रोक्षितंवस्त्रमावहेत् । योगयाज्ञवल्क्यः—स्नात्वैवंवाससीधौतेअक्लिन्नेपरिधायच । प्रक्षाल्योरूमृदाद्भिश्चहस्तौप्रक्षाल येत्ततः । जाबालिः—स्नात्वानिवस्त्रवसनंजंघेशोध्येमृदंभसा । अपवित्रीकृतेतेहिकौपीनस्नानचारिणा । कौपीनपदोपादानाद्यतिपरमिदमि तिकेचित् । प्रयोगपारिजातेभरद्वाजः—शुचौवोह्यामरुतइत्युक्त्वाशुद्धमंबरम् । संप्रोक्ष्यदेवस्यत्वेतिव्याहृत्यादायभास्करम् । उदु

त्यंजातवेदसमित्युक्त्वालोकयेत्ततः । आवहंतीत्युदाहृत्यपरिधायद्विराचमेत् । भृगुः—ब्राह्मणस्यसितंवस्त्रंनृपस्यरक्तमुल्बणम् । पीतंवैश्यस्य शूद्रस्यनीलंमलवदिष्यते । उल्बणंरक्तम् । मलवत्कृष्णमितिपृथ्वीचंद्रः । यत्तुनारसिंहे—नरक्तमुल्बणंवासोननीलंचप्रशस्यते । मलाक्तं चदशाहीनंवर्जयेदंबरंबुधइतिरक्तनीलवस्त्रयोर्निषेधःसपूर्ववाक्यात्क्षत्रियशूद्रभिन्नविषयः । व्यासः—नाग्निदीप्तेननार्द्रेणनसूच्याग्रथितेनच । कौपीनंशठितंभिन्नंमलिनंकेशदूषितम् । छिन्नाग्रंचोपवस्त्रंचकुत्सितंधर्मतोविदुः । भारते—वस्त्रं नान्यावृतंग्राह्यंनचातिविकृतंतथा । योग याज्ञवल्क्यः—दग्धंजीर्णंचमलिनंमूषकोपहतंतथा । खादितंगोमहिष्याद्यैस्तत्त्याज्यंसर्वथाद्विजैः । प्रयोगपारिजातेसंग्रहे—स्नानं कृत्वार्द्रवस्त्रंतुऊर्ध्वमुत्तारयेद्बुधः । आर्द्रवस्त्रमधस्ताच्चेत्पुनःस्नानेनशुद्ध्यति । तत्रैवोशना—स्नात्वाऽनुपहतंवस्त्रंपरिदध्याद्यथाविधि । अभावे पूर्ववस्त्रंवासंप्रोक्ष्यप्रणवेनतु । अनुपहतंअपरिहितम् । जाबालिः—नार्द्रमेकंचवसनंपरिदध्यात्कथंचन । स्मृतिरत्नावल्यांअंगिराः—आर्द्रवासास्तुयत्कुर्याज्जपहोमव्रतादिकम् । सर्वंतद्राक्षसंविद्याद्बहिर्जानुचयत्कृतम् । सप्तवाताहतंवस्त्रंशुष्कवत्प्रतिपादितम् । आर्द्रवापिद्विजा तीनामाहतंगौतमादिभिः । कृष्णभट्टीये—ईषद्धौतंस्त्रियाधौतंशूद्रधौतंतथैवच । अधौतंतद्विजेयंशुष्कंदक्षिणपल्लवैः । देवलः—स्वयंधौ तेनकर्तव्याःक्रियाधर्म्याविपश्चिता । नतुनेजकधौतेननाहतेनाचकुत्रचित् । नाहतेनेत्येकंपदम् । स्वयंग्रहणादन्येनेजकनिकृत्तेस्त्रियेवोऽन्येनापि ब्राह्मणादिनाधौतेनक्रियाकार्येत्येतदर्थम् । अहतलक्षणमाहपुलस्त्यः—ईषद्धौतंनवंश्वेतंसदशंयन्नधारितम् । अहतंतद्विजानीयात्सर्वकर्म सुपावनम् । ब्राह्मे—अच्छिन्नाग्रंचयद्वस्त्रंमृदाप्रक्षालितंचयत् । अहतंधातुरक्तंवातत्पवित्रमितिस्थितिः । माधवीयेप्रजापतिः—क्षौमं

---

१ स्नानंकृत्वाचार्द्रवस्त्रंत्यजेन्नद्यामधोद्विज. । गृहेस्नानमथोकृत्वाविशुद्धेचतदूर्ध्वत । सत्कार्यंपरिधायार्द्रवस्त्रंनद्यादावथ क्षिपेत् । गृहेतूर्ध्वमाकर्षेदितिकृष्णभट्टीयेकर्म लाकरीयेच ।

वासःप्रशंसंतितर्पणेसदशंतथा । कापायंधातुरक्तंवानोल्वणंतत्तुकर्हिचित् । **भृगुः**—दिवाकीर्तिकृतंवासःसर्वदापरिवर्जयेत् । **काशीखंडे**—नीलीरक्तंतुयद्वस्त्रंदूरतस्तद्विवर्जयेत् । स्त्रीणांक्रीडार्थसंयोगेशयनीयेनदुष्यति । **अंगिराः**—मृतेभर्तरियानारीनीलीवस्त्रंप्रधारयेत् । भर्तातुनरकंयातिसानारीतदनंतरम् । **चंद्रोदयेस्कांदे**—स्नानंदानंजपोहोमःस्वाध्यायःपितृतर्पणम् । वृथातस्यमहायज्ञानीलीवासोविभर्तियः । **डोडरानंदेभविष्ये**—नीलीरक्तंयदावस्त्रंविप्रस्त्वंगेपुधारयेत् । अहोरात्रोपितोभूत्वापंचगव्येनशुद्ध्यति । **मिताक्षरायांमार्कंडेयः**—रोमकूपैर्यदागच्छेद्रजोनील्यास्तुकस्यचित् । त्रिवर्णेपुचसामान्यात्तप्तकृच्छ्रंविशोधनम् । नीलीदोषःकार्पासेएव । ऊर्णायांपट्टवस्त्रेवानीलीरागोनदुष्यतीतित्रैवोक्तेः । **नारायणदासनिबंधेभृगुः**—स्त्रीधृताशयनेनीलीब्राह्मणस्यनदुष्यति । नृपस्यवृद्धौवैश्यस्यपर्वण्येवविधारणमिति । **शातातपः**—प्रागग्रमुदगग्रंवाधौतंवस्त्रंप्रसारयेत् । पश्चिमाग्रंदक्षिणायंपुनःप्रक्षालनाच्छुचि । **योगयाज्ञवल्क्यः**—अभावेधौतवस्त्रस्यशाणक्षौमाजिनानिच । कुतपंयोगपट्टंवाद्विवासायेनवाभवेत् । क्षौममतसीसूत्रकृतम् । कुतपोनेपालकंबलः । धौतेतिविशेषणपदाच्छाणादीनिप्रक्षालितान्यपिगृह्णीयात् । द्विवासेतिपदोपादानाच्चोत्तरीयत्वेनैवशाणादीनांग्रहणं नतुपरिधानीयत्वेनेत्युक्तमपरार्के । **अन्येतु**—परिधेयंसदावासःकार्पासंसदशंसितम् । क्षौमंवाकुतपंवापिनकौशेयंकदाचनेतिजातूकर्ण्योक्तेःक्षौमाजिनयोःपरिधानीयत्वमप्याहुः । **यत्तुश्राद्धहेमाद्रौवौधायनः**—क्षौमाणिवासांसितेपामलाभेकार्पासिकान्यौर्णकानिभवंतीति तच्छ्राद्धेदेयवस्त्रपरम् । **स्मृत्यर्थसारे**—केशनिर्मितवस्त्रधरणेउपवासइति । **व्यासः**—नोत्तरीयमधःकुर्यान्नोर्ध्वनाधस्तनांवरम् । नांतर्वासोविधायान्यद्वसीतवसनंबुधः ॥ ॥ **उत्तरीयमाहजातू कर्ण्यः**—सग्रंथिपरिमंडलमुत्तरीयंकुर्याद्वस्त्रोत्तरीयात्वेकांगुलंद्व्यंगुलंत्र्यंगुलंचतुरंगुलंवासूत्रैरेवकृतंपरिमंडलमुत्तरीयंकुर्यादिति । **अंतर्वासउक्तंप्रयोगपारिजातेसंग्रहे**—षोडशद्वादशाष्टाभिरंगुलैर्विस्तृतंचयत् । आयतंव्याममात्रंचतदंतर्वासईरितम् । उत्तरीयांतर्वाससोरभेदइति

केचित् । भेदइत्यन्ये । उत्तरीयार्थंयज्ञोपवीतंवेत्युक्तम् । परिहितवस्त्रस्यचोर्ध्वभागमुत्तरीयंकुर्यात् । एकंचेत्तस्योत्तरवर्गेणप्रच्छादयीतेतिपार
स्करोक्तेः । उत्तरीयंचपुरोदेशावस्थितदर्शनधारयेत् । प्रागग्रंचोत्तरीयंतुकर्मकालेनधारयेदितिपृथ्वीचंद्रोक्तेः । उत्तरीयस्थानीयंतृतीयो
पवीतंजीवत्पितृकोनधारयेत् ।—उत्तरीयंयोगपट्टंतर्जन्यांरजतंतथा । नजीवत्पितृकैर्धार्यंज्येष्ठोवाविद्यतेयदीतिचंद्रोदयेसंग्रहात् । उत्तरीयं
चनोपरिवासोमात्रं किंतुसग्रंथिपरिमंडलमित्यादिजातूकर्ण्योक्तं । उक्तपरिवासस्तुतस्यापिभवत्येव ।—एकवस्त्रोनभुंजीयान्नकुर्याद्देवतार्च
नम् । नचार्चयेद्द्विजान्नान्यत्कुर्यादेवंविधोनरइतिगोभिलेननिषेधात् । नन्वेकवस्त्रइत्यस्यसामान्यरूपत्वाज्जीवत्पितृकस्यसर्वोत्तरीयबाधइति
चेत् । न । उत्तरीयशब्दस्ययौगिकत्वेपिजातूकर्ण्योक्तोत्तरीयेरूढेरितिपितृचरणाः । वर्धमानपरिभाषायांशातातपः—सव्यादं
सात्परिभ्रष्टंकटिदेशधृतांवरम् । एकवस्त्रंविजानीयाद्दैवेपित्र्येचकर्मणि । यौधायनः—अकच्छःपुच्छकच्छोवाविकच्छःकटिवेष्टितः । यावदास्ते
द्विजस्तावच्छूद्रएवनसंशयः । पुच्छकच्छःपुच्छाकारकच्छः । सचाग्रद्वयस्यमेलनेनैकस्यैवाग्रस्यकच्छत्वेनभवतीतिद्वयमपिनिषिद्धम् । अत्रद्विज
स्योद्देश्यत्वावच्छेदकत्वेसर्वस्यापितत्त्वापत्तेः । अकच्छत्वादिविशिष्टस्यतत्त्वेवैपरीत्येवागारवैम् । अतोऽकच्छत्वादेवोद्देश्यत्वात्स्त्रीशूद्रादेरपिक
च्छआवश्यकः । नचद्विजपदश्रुतेःशूद्रस्यशूद्रतुल्यत्वानुपपत्तेःकच्छइतियुक्तम् । द्विजत्वस्याविवक्षितत्वात् । तद्ग्रहणंतुकैमुतिकन्यायार्थम् । अत
एवशूद्रपदं अकच्छस्यनग्नत्वोक्तिश्च । श्राद्धहेमाद्रौ—नग्नःस्यान्मलवद्वासानग्नःकौशेयकेवलः । नग्नोद्विगुणवस्त्रःस्यान्नग्नोदग्धपटस्तथा ।
नग्नश्चस्यूतवासाःस्यान्नग्नःकौपीनकेवलः । नग्नःकापायवस्त्रःस्यान्नग्नश्चार्धपटावृतः । विकच्छोऽनुत्तरीयश्चद्विकच्छोऽवस्त्रएवच । अधौतवस्त्रो
मलवद्वस्त्रःरजकादिधौतवस्त्रोवा । एकस्यपटस्यार्धंप्रावृण्वानोऽर्धपटावृतः खंडपटंवसानोवा । परिहितवस्त्रोपरितदुत्तरार्धेनवस्त्रांतरेणवाकटिबंधनं

१ उपवीतंवायुरूमितिपाठः २ वासस्यापिभवत्येवेतिपाठः । ३ विकच्छोविपरीतकच्छः ।

द्वितीयकच्छः । अत्रमलवन्निषेधःसमर्थपरः । नजीर्णमलवद्वासाभवेच्चविभवेसतीतियाज्ञवल्क्योक्तेः । वस्तुतस्तुनग्नःस्यान्मलवद्वासाइत्यादौ निषेधश्रुतेः ननग्नःकर्मकुर्वीतेत्यनेनैकवाक्यत्वाच्चानग्नेनग्नत्वोक्तेःकर्मकालपरत्वादस्यपुरुषार्थत्वाद्भिन्नवाक्यमेवयुक्तमितिहेमाद्रिः । कौशेय केवलस्यनग्नत्वोक्तेः वासःसहितकौशेयत्वेननग्नत्वम् । भृगुः—नग्नोमलिनवस्त्रःस्यान्नग्नश्चार्द्रपटावृतः । नग्नोरक्तपटस्तथेतिचंद्रिकायांद्वितीयपादेपाठः । सर्वकर्मस्वासुरकच्छानिषेधमाहयाज्ञवल्क्यः—जपेहोमेतथादानेदैवेपित्र्येचकर्मणि । वधीयान्नासुरीकच्छांशेषेकर्मणिवेच्छया । तल्लक्षणमाहसएव—परिधानाद्बहिःकच्छानिबद्धाद्यासुरीमता । बहिःकच्छातुसंवृतपरिधानवस्त्रांतइतिवर्धमानः । स्मृत्यंतरे—संयोजित दशंवापिह्यर्धच्छिन्नदशंतथा । नित्येनैमित्तिकेवापिप्रयत्नेनविवर्जयेत् । अकृत्रिमदशंवस्त्रंप्रशस्तंसर्वकर्मसु । कृष्णभट्टीयेयोगयाज्ञवल्क्यः—जानुमूलंतुवस्त्रंसात्रिकच्छंधारयेद्बुधः । मनुः—नाभौचवामकुक्षौचपृष्टेचैवयथाक्रमम् । वस्त्रप्रावरणंयत्स्यात्तत्त्रिकच्छमुदाहृतम् । भारते—अन्यदेवभवेद्वासःशयनीयेनराधिप । अन्यद्रथ्यासुदेवानामर्चायामन्यदेवहि । अन्यच्चलोकयात्रायामन्यदीश्वरदर्शने । सुमंतुः—अन्यत्स्नानेतथापानेभोजनेचान्यदेवहि । इतिश्रीमन्नारायणभट्टा०लक्ष्मणभट्टकृतावाचाररत्नेस्नानोत्तरकृत्यम् ॥

अथतिलकविचारः । विष्णुस्मृतौबृहन्नारदीयेच—यागोदानंजपोहोमःस्वाध्यायःपितृतर्पणम् । भस्मीभवतितत्सर्वमूर्ध्वपुंड्रं विनाकृतम् । पाद्मेकार्तिकमाहात्म्येप्येवम् । इदंयागादिसर्वकर्मोपलक्षणार्थंनपरिसंख्यार्थम् । उत्तरार्धेसर्वपदश्रुतेः । अपवित्रेणयज्ञसमस्तेनचयद्धुतम् । यच्चशून्यललाटेनतदत्यल्पफलंभवेदित्याश्वलायनोक्तेः । यद्यपिसत्यंशौचमित्यादित्रिपुंड्रेपिवाक्यंतथापितत्क्षत्रियादिपरम् । ऊर्ध्वपुंड्रंद्विजःकुर्यात्क्षत्रियस्तुत्रिपुंड्रकमितिमाधवीयेविष्णुधर्मोत्तरात् । माधवचंद्रिकास्मृत्यर्थसारादिभिस्त्रिपुंड्रालिख

१ तथापात्रेइतिपाठः ।

नाच्च । **काशीखंडेसप्तर्षिवर्णने**ऊर्ध्वपुंड्रांकितालिकाइत्युक्तेश्च । नचकालाग्निरुद्रोपनिषद्युक्तत्वाद्बलत्रिपुंड्रत्वम् । श्रुतौहिभस्मधारणमात्रमाम्नातंनतुपुंड्रत्वेनकर्मांगत्वेनवा । तच्चस्नानत्वेनाप्युपपन्नम् । यद्यपिकर्मांगंतथापिशैवकर्मपरम् ।—विनाभस्मत्रिपुंड्रेणविनारुद्राक्षमालया । पूजितोपिमहादेवोनस्यात्तस्यफलप्रदइतितिथितत्वेलैंगात् । सितेनभस्मनातिर्यक्त्रिपुंड्रस्यतुधारणम् । शैवागमेषु निष्ठानांतत्तन्मंत्रेण शस्यतेइतिस्मृतिरत्नावल्यांवचनाच्च । साग्निकपरंवातत् ।—स्नात्वापुंड्रंमृदाकुर्याद्धुत्वाचैवतुभस्मनेत्याश्वलायनोक्तेः । तयोरप्यूर्ध्वपुंड्रोपर्येवकुर्यात् । तयोराहितानाहितानाम्योः । ऊर्ध्वपुंड्रंविनामोहाद्यदिकुर्यात्त्रिपुंड्रकम् । नतस्यफलमाप्नोतिदानस्याश्रोत्रियेयथेतिस्मृतिरत्नावल्यांवचनात् । **यत्तुपाद्मेकार्तिकमाहात्म्ये**—ऊर्ध्वपुंड्रेत्रिपुंड्रंयःकरोतिसनराधमः । मुक्त्वाविष्णुगृहंपुण्यंसयातिनरकंध्रुवमितितद्भस्मान्यपरम् । तद्धारणविधिवैयर्थ्यापत्तेः । यद्वाशुद्धतांत्रिकपरम् । नचश्राद्धेत्रिपुंड्रनिषेधानुपपत्तेस्तत्प्राप्तिः । तदधिकारिणिक्षत्रियेतन्निषेधचारितार्थ्यात् । रागप्राप्तनिषेधोपपत्तेश्च । **माधवीयेब्राह्मे**—पर्वताग्रेनदीतीरेममक्षेत्रेत्रिशेपतः । सिंधुतीरेचवल्मीकेतुलसीमूलसंस्थिताः । मृदएतास्तुसंग्राह्यावर्जयेदन्यमृत्तिकाः । **चंद्रोदयेगोभिलः**—गोरोचनंपंचगव्यंपंचांगंविल्ववृक्षतः । कालीयकंचंदनंचपद्मकंरक्तचंदनम् । गोमयंहोलिकाभस्मश्वेतापीतारुणाचमृत् । पुण्यक्षेत्रोद्भवाग्राह्यानदनद्योस्तुशर्कराः । पंचांगंमूलत्वक्पत्रपुष्पफलानि । कालीयकंपीतचंदनम् । **व्यासः**—जाह्नवीतीरसंभूतांमृदंमूर्ध्नाविभर्तियः । विभर्तिरूपंसोऽर्कस्यतमोनाशायकेवलम् । **सत्यतपाः**—गोमतीतीरसंभूतांगोपीचापीसमुद्भवाम् । मृदंमूर्ध्नावहेद्यस्तुसर्वपापैःप्रमुच्यते । **माधवीये**—द्वारवत्युद्भवाद्गोपीचंदनादूर्ध्वपुंड्रकम् । धारयेन्नित्यमेवंहिपापंहंतिदिनेदिने । **पाद्मे**—मृत्तिकाचंदनंभस्मतोयंचैवचतुर्थकम् । एभिर्द्रव्यैर्यथाकालमूर्ध्वपुंड्रंभवेत्सदा । **चंद्रोदयेब्रह्मांडे**—जलेनतिलकंकुर्याज्जलांतःकर्मसिद्धये । तोयेनतिलकंस्नानोत्तरमावस्त्रपरिधानादितिपंचायतनसारः । वस्त्रपरिधानोत्तरमपिद्रव्यांतराभावइतिचंद्रोदयः । आश्वला

यनः—स्नात्वापुंड्रंमृदाकुर्याद्धुत्वाचैवतुभस्मना । देवानभ्यर्च्यगंधेनसर्वपापापनुत्तये । तत्रविशेषमाह व्यासः—ऊर्ध्वपुंड्रंमृदाकुर्यात्त्रिपुंड्रं भस्मनातथा । चंदनेनोभयंकुर्यान्नतिर्यग्गोपिचंदनम् । **चतुर्विंशतिमते**—येपुदेशेषुयेविप्रादेवास्तीर्थानिमृत्तिकाः । तत्रतान्नावमन्येतध र्माचाराश्चतत्रये । **तिलककरणेविशेषोब्रह्मांडे**—अंगुष्ठःपुष्टिदःप्रोक्तोमध्यमायुष्करीभवेत् । अनामिकान्नदानित्यंमुक्तिदाचप्रदेशिनी । एतैरंगुलिभेदैस्तुकारयन्नखैःस्पृशेत् । **तिलकप्रमाणंब्रह्मांडेसत्यव्रतस्मृतौच**—दशांगुलप्रमाणंतुउत्तमोत्तममुच्यते । नवांगुलंमध्य मंस्यादष्टांगुलमतःपरम् । सप्तषट्पंचभिःपुंड्रंमध्यमंत्रिविधंस्मृतम् । चतुस्त्रिद्व्यंगुलैःपुंड्रंकनिष्ठंत्रिविधंभवेत् । **तिलकाकृतिविशेषोपित त्रैव**—वर्तिदीपाकृतिंवापिवेणुपत्राकृतिंतथा । पद्मस्यमुकुलाकारंतथैवकुमुदस्यच । मत्स्यकूर्माकृतिंवापिशंखाकारंमथापिवा । **प्रयोगपारि जाते**—निटिलेचैवबाह्वोश्चदंडवत्कर्णपल्लवे । हृदयेकमलाकारमुदरेदीपवल्लिखेत् । वेणुपत्रसमाकारंबाह्वोर्मध्येलिखेत्सुधीः । अधःपृष्ठेस्कंधदे शेलिखेज्जंबूपलाशवत् । निटिलेललाटे । **यत्तुपंचायतनसारेपाद्मे**—नासामूलंसमारभ्यललाटांतंलिखेन्मृदा । मध्येछिद्रंप्रकर्तव्यंतच्छिद्रं हरिमंदिरमिति । तत्रमूलंमृग्यम् । अत्रकश्चित्—वीक्ष्यादर्शेजलेवापियोविदध्यात्प्रयत्नतः । ऊर्ध्वपुंड्रंमहाभागसयातिपरमांगतिमिति **ब्रह्मां डोक्तेर्जलेप्रतिबिंबंदृष्ट्वोर्ध्वपुंड्रंकुर्यादित्याह** । तन्मंदम् । नपादुकास्थोनादर्शेनजलेत्वबलोकयन्निति**कृष्णभट्टीये**–तिलकप्रकरणेस्मृत्यंत रात् । मयितेजइतिच्छायास्वांदृष्ट्वांवुगतांजपेदिति**याज्ञवल्क्येन**जलेस्वप्रतिबिंबदर्शनेप्रायश्चित्तोक्तेश्च वाक्यस्यचंद्रिकायलिखितत्वेननिर्मू लत्वाच । **स्मृतिरत्नावल्यांपृथ्वीचंद्रेचब्राह्मे**—सदर्भेणतुहस्तेनयःकुर्यात्तिलकंबुधः । आचम्यसविशुद्ध्येतदर्भत्यागेनचैवहि । **ब्र ह्मांडे**—नामान्युच्चार्यविधिनाधारयेदूर्ध्वपुंड्रकम् । ललाटेकेशवंविद्यान्नारायणमथोदरे । माधवंहृदयेन्यस्येद्गोविंदंकंठकूपके । विष्णुंदक्षिण

१ मतःपरमितिपाठः ।

कुक्षौतुतद्भुजेमधुसूदनम् । त्रिविक्रमंकर्णमूलेवामकुक्षौतुवामनम् । श्रीधरंचहृषीकेशंवामयोर्बाहुकर्णयोः । पद्मनाभंपृष्ठदेशेककुद्दामोदरंस्मरेत् । वासुदेवंस्मरेन्मूर्ध्नितिलकंधारयेत्क्रमात् । केशवादिमंत्राश्चतुर्थीनमोंताद्रष्टव्याः । तिलकलापनक्रमोप्ययमितिप्रयोगपारिजातः । **आश्वलायनः**—मूर्ध्निललाटेनाभौचहृदयेकंठकूपके । पार्श्वेबाह्वोःपरगलेदक्षसव्येचपश्चिमे । स्तनयोर्मूर्तिमंत्रैश्चस्थानेष्वेष्विद्रादिद्भुखः । **तत्रैव**—संकर्षणादिभिःकृष्णेशुक्लेचेत्केशवादिभिः । **कृष्णभट्टीयेप्येवम् । पंचायतनसारेपाद्मे**—एवंद्वादशपुंड्राणिब्राह्मणःसततंचरेत् । चत्वारिभूभृतांप्रोक्तंपुंड्राणिद्वेविशांस्मृते । एकंपुंड्रंचनारीणांशूद्राणांचविधीयते । ललाटेहृदिवाबाह्वोश्चतुःपुंड्राणिधारयेत् । ललाटेहृदयेद्वेतुभालेत्वेकंविधीयते । **मदनपारिजातेब्रह्मांडे**—श्यामंशांतिकरंप्रोक्तंरक्तंवश्यकरंतथा । श्रीकरंपीतमित्याहुःश्वेतंमोक्षप्रदायकम् । श्यामंमृगमदादेः । रक्तंसिंदूरादेः । पीतंगोरोचनादेः । **हारीतः**—अभ्यंगेसूतकेचैवविवाहेपुत्रजन्मनि । मांगल्येपुचसर्वेषुनधार्यंगोपिचंदनम् । **श्राद्धदीपकलिकायांविष्णुः**—ऊर्ध्वपुंड्रंद्विजातीनामग्निहोत्रसमोविधिः । श्राद्धकालेतुसंप्राप्तेकर्तांभोक्ताचवर्जयेत् । **तत्रैवनारायणः**—ऊर्ध्वपुंड्रंत्रिपुंड्रंवाचंद्राकारमथापिवा । श्राद्धकर्तानकुर्वीतयावत्पिंडान्ननिर्वपेत् । **विश्वादर्शेप्येवम्** । श्राद्धदिनेतिलकनिषेधः प्रातःसंध्यावंदनादावपीतिश्राद्धकाशिका । तन्न । वर्जयेत्तिलकंभालेश्राद्धकालेकदाचनेतिसत्यव्रतोक्तेः । **यत्तुपराशरः**—ऊर्ध्वंचतिलकंकुर्याद्दैवेपित्र्येचकर्मणीति तत्तर्पणादिपरम् । **यत्तु**—ऊर्ध्वंचतिलकंकुर्यान्नकुर्याच्चत्रिपुंड्रकम् । निराशाःपितरोयांतिदृष्ट्वाचैवत्रिपुंड्रकमितिवृद्धपराशरेणश्राद्धेऊर्ध्वपुंड्रंभवतीत्युक्तम् तद्भोक्तृपरं नकर्तृपरमितिपृथ्वीचंद्रः । निष्कर्षस्तुशिष्टाचाराव्यवस्था । ऊर्ध्वपुंड्रंचतुलसींश्राद्धेनेच्छंतिकेचन । वृद्धाचारःपरिग्राह्यस्तस्माच्छ्रेयोर्थिभिर्नरैरितिवृहन्नारदीयात् । **आचारतिलके**—नचोर्ध्वंधारयेद्भस्ममृदंतिर्यङ्नधारयेत् । चंदनागरुकस्तूरीकुंकुमानियथेच्छया । **स्मृतिरत्नावल्यां**—ब्राह्मणानांनृपाणांचभस्ममिश्रंचचंदनम् । नेत्रयुग्मप्रमाणंतुत्रिपुंड्रंधारयेद्द्विजः । मध्यमा

नामिकांगुष्ठैर्ललाटेत्रिपुंड्रकम् । तत्त्रिपुंड्रंभवेच्छस्तंमहापातकनाशनम् । **केदारखंडे**—ललाटेंगुष्ठरेखाचआदौभाव्याप्रयत्नतः । मध्यमांव
जैयित्वातुअंगुलीद्वयकेनच । एवंत्रिरेखासंयुक्तंललाटेयस्यदृश्यते । सशैवःशिववज्ज्ञेयोदर्शनात्पापनाशनः । **पुरुषार्थप्रबोधे**—श्रौतंभस्मद्वि
जामुख्यंस्मार्तंगौणंप्रकीर्तितम् । श्रौतंभस्मतथास्मार्तंद्विजानामेवकीर्तितम् । औपासनसमुत्पन्नंगृहस्थानांविशेषतः । समिदग्निसमुत्पन्नंधार्यंवै
ब्रह्मचारिणा । शूद्राणांश्रोत्रियागारेपचनाग्निसमुद्भवम् । अन्येषामपिसर्वेषांधार्यंदावानलोद्भवम् । अपक्वमतिपक्वंचसंत्यज्यभसितंसितम् ।
आदायवाससालोड्यभस्माधारेविनिक्षिपेत् । **चंद्रोदयेशैवे**—तर्जन्यनामिकामध्यैस्त्रिपुंड्रंतुसमाचरेत् । पंचांगुलैर्न्यसेन्मूर्ध्निप्रणवेनतुमं
त्रतः । अंगुलैर्विन्यसेद्भालेशिरोमंत्रेणदेशिकः । सव्येनदक्षिणेकर्णेवामदेवेनवामतः । अघोरेणतुकंठेचमध्यांगुल्यास्पृशेद्बुधः । हृदयंहृदयेनैव
त्रिभिरंगुलिभिःस्पृशेत् । विन्यसेद्दक्षिणेबाहौशिखामंत्रेणदेशिकः । वामेबाहौन्यसेद्धीमान्कवचेनत्रियंगुलैः । मध्येनसंस्पृशेन्नाभ्यामीशानाभिध
मंत्रतः । **तत्रैवक्रियासारे**—भस्मनावैत्रिपुंड्रंचगृहिणांजलसंयुतम् । धार्यंत्रिपुंड्रंस्त्रीणांचयतीनांजलवर्जितम् । वनस्थव्रतिकन्यानांदीक्षा
हीननृणांतथा । षडंगुलायतंमानमपिवाधिकमानकम् । नेत्रयुग्मप्रमाणेनभालेदीप्तंत्रिपुंड्रकम् । अग्निरित्यादिभिर्मंत्रैःपञ्चिरार्थर्वणैस्तथा । त्र्या
युषेणचमंत्रेणमेधावीत्यादिनाथवा[1] । त्रैयंबकेणमंत्रेणसतारेणशिवेनच । पंचाक्षरेणमंत्रेणप्रणवेनयुतेनच । चंदनाद्युपरिप्राज्ञोधारयेद्भस्मवैदि
कम् । लौकिकंचंदनाद्यंतुभस्मोपरिनधारयेत् । **सूतसंहितायाम्**—ऊर्ध्वपुंड्रत्रयंनित्यंधारयेद्भस्मनामृदा । ललाटेऽर्हागमेनिष्ठश्चंदनेनाथवा
नरः । अर्हागमेनिष्ठस्तांत्रिकः । **धारणप्रकारेचंद्रोदयेचवाराहे**—दक्षिणेतुभुजेविप्रोविभृयाद्वैसुदर्शनम् । सव्येतुशंखंविभृयादितिवेद
विदोविदुः । **क्षत्रादेस्तुब्रह्मांडे**—चक्रंचदक्षिणेबाहौशंखंवामेपिदक्षिणे । गदांवामेगदाधस्तात्पुनश्चक्रंचधारयेत् । शंखोपरितथापद्मंपुनः

[1] माधवीत्यादिनेतिपाठः ।

पद्मंचदक्षिणे । हलायुधे—वामेबाहौगदांपद्मंशंखंचक्रंचदक्षिणे । उपर्यधःक्रमोक्तेनधृत्वापापक्षयोभवेत् । हृदयेवाललाटेवाविलिखेन्मत्स्य
कच्छपौ । मंत्रमष्टाक्षरंवापिप्रीयतेतत्रकेशवः । रामार्चनचंद्रिकायां—ललाटेतुगदाधार्यामूर्ध्निचापःशरस्तथा । नंदकश्चैवहृन्मध्येशंखच
क्रेभुजद्वये । प्रयोगपारिजातेसायणीयेचशंखः—चक्रांकितःसदातिष्ठेन्मद्भक्तःसर्वदाशुचिः । अनयोर्व्यवस्थासूतसंहितायाम्—
वेदमार्गेकनिष्ठानांवेदोक्तेनैववर्त्मना । ललाटेभस्मनातिर्यक्त्रिपुंड्रंधार्यमेवहि । विष्ण्वागमादितंत्रेपुदीक्षितानांविधीयते । शंखचक्रगदापूर्वैरं
कनंनान्यदेहिनाम् । वेदमार्गेकनिष्ठस्तुमोहेनाप्यंकितोयदि । पतत्येवनसंदेहस्तथापुंड्रांतरादपि । अत्रैपाव्यवस्था—शुद्धवैदिकेनशिवभ
क्तेनविभूतिरेवधार्या । शुद्धवैदिकेनविष्णुभक्तेनगणपत्यादिभक्तेनचतिलकोधार्यः । तांत्रिकवैदिकवैष्णवेनत्वच्छिद्रतिलकश्चक्रादिचधार्यम् ।
तांत्रिकवैदिकेनशैवेनविभूतिस्तिलकश्चविभूतिमात्रंवाधार्यम् । शुद्धतांत्रिकेणविष्णुभक्तेनसच्छिद्रतिलकश्चक्रादिचधार्यमिति । यत्तुविष्णुः—
शंखचक्राद्यंकनंचगीतनृत्यादिकंतथा । एकजातेरयंधर्मोनजातुस्याद्द्विजन्मनः । शंखंचक्रंमृदायस्तुकुर्यात्तप्तायसेनवा । सशूद्रवद्बहिष्कार्यःसर्व-
स्माद्द्विजकर्मणइति । यच्चाश्वलायनः—यथा श्मशानजंकाष्ठमनर्हंसर्वकर्मसु । तथाचक्रांकितोविप्रःसर्वकर्मसुगर्हितइति । यच्च—यस्तुसं
तप्तशंखादिलिंगचिह्नतनुर्नरः । ससर्वयातनाभोगीचांडालोजन्मकोटिषु । द्विजंतुतप्तशंखादिलिंगांकिततनुंनरः । संभाष्यरौरवंयातियावदिंद्राश्च
तुर्दशेतिवृद्धहारदीयंतच्छुद्धवैदिकपरम् । सूतसंहितावाक्येनवैदिकस्यचक्रादिधारणनिषेधादनेनतांत्रिकस्यापितन्निषेधेशंखचक्रादिविध्या
नर्थक्यापत्तेः । नचतस्यशूद्रविषयत्वेनसावकाशत्वम् ।—शंखंवाशंखचक्रेवातथापंचायुधानिवा । धारयित्वाथविप्रोवैब्रह्मकर्मसमारभेदिति
नृसिंहप्रसादेपाद्मेन, ब्राह्मणःक्षत्रियोवैश्यःशूद्रोवायदिचेन्नरः । शंखचक्रांकिततनुःशिरसामंजरीधरः । गोपीचंदनलिप्तांगोदृष्टश्चेत्तदघंकुत
इतिकाशीखंडेन,दक्षिणेचभुजेविप्रोबिभृयाद्वैसुदर्शनमितिचंद्रोदयेधारणप्रकाशेचवाराहेणब्राह्मणादेरपितद्विधानात् । यत्त्वत्रविप्रा

दिपदं गावोवाएतत्सत्रमासतेत्यादिवत्स्तुत्यर्थनविप्रादीन्प्रतिविध्यर्थमितिस्मृतिरत्नावली। तन्न। विधिश्रुतेः। तत्रतदभावात्तथेति। एतेषां वाक्यानांपतितब्राह्मणविषयत्वोक्तिरज्ञधीदंध्रणायैव। अत्रयच्चशून्यललाटेनेतिभालेतिलकाभावेऽल्पफलश्रुतेरूर्ध्वपुंड्रंत्रिपुंड्रंतिलकमित्येकवचनात्तदविवक्षायांमानाभावाच्चललाटेएकपुंड्रंनित्यं द्वादशपुंड्राणितुकाम्यानीतिकेचित्। तन्न। कामयोगाभावात्। नचात्रविश्वजिन्न्यायः। स्वर्गकल्पनानुपपत्तेःफलान्तरेविनिगमकाभावात्। अतएकंपुंड्रमदीक्षितपरं, द्वादशपुंड्राणितुमंत्रसाध्यत्वादीक्षितपराणीतियुक्तंप्रतीमः। द्वादशपुंड्राणिवैष्णवपराणीत्याचारचंद्रोदयः। इतिश्रीमन्नारायणभट्ट०लक्ष्मणभट्टकृतावाचाररत्नेतिलकप्रकरणम्॥ ॥

संध्यानि.

अथसंध्यानिर्णयः। स्कांदे—उदयात्प्राक्तनीसंध्याघटिकात्रयमुच्यते। सायंसंध्यात्रिघटिकाअस्तादुपरिभास्वतः। दक्षः—रात्र्यंतया मनाङ्मौहूर्तेसंध्यादिःकालइष्यते। दर्शनाद्रविरेखायास्तंदस्तोमुनिभिःस्मृतः। सुधानिधौ—उत्तमातारकोपेतामध्यमालुप्ततारका। अधमा सूर्यसहिताप्रातःसंध्यात्रिधामता। उत्तमासूर्यसहितामध्यमालुप्तभास्करा। कनिष्ठातारकोपेतासायंसंध्यात्रिधामता। संवर्तः—प्रातःसंध्यां सनक्षत्रामुपासीतयथाविधि। सादित्यांपश्चिमांसंध्यामर्धास्तमितभास्कराम्। संध्यायामुपस्थानमेवप्रधानं मार्जनादित्वंगम्। तेतथैवमहाराज दंशितारणमूर्धनि। संध्यागतंसहस्रांशुमादित्यमुपतस्थिरे। इतिभारतादितिचंद्रिका। अर्घ्यदानस्यश्रौतत्वादाशौचेतदेवानुष्ठेयमितिचंद्रिकोक्तेर्गायत्रीजपोपस्थानयोराशौचेपाक्षिकत्वस्यवक्ष्यमाणत्वात्। उभयोःसंध्ययोःकालेरजसावार्घ्यमुत्क्षिपेदितिवाक्याच्चार्घ्यदानंप्रधानमिति वयम्। भट्टदिनकरस्तुसंध्यामुपासीतेतिमन्वादिस्मृतावुपपूर्वस्यासतेरुपस्थानमेववाच्यम्। नोपतिष्ठंतियेसंध्यांस्वस्थावस्थासुवैद्विजाइत्यत्रि स्मृतेरुपस्थानमेवप्रधानमित्याह। उपपूर्वस्यासतेर्ध्यानंवाच्यमितिमाधवःकृष्णभट्टश्च। स्मृतिरत्नावल्यांशंखः—प्रातःसंध्यांसनक्षत्रां

॥ ३७ ॥

१ तदंतोमुनिभिरिति पाठः।

मध्यमांस्नानकर्मणि । स्नानकर्मणीतिमध्याह्नस्नानोत्तरमितितत्रैवोक्तम् । संध्यायाअकरणेप्रत्यवायो **मनुः**—नानुतिष्ठतियःपूर्वांनोपास्तेयस्तुपश्चिमाम् । सशूद्रवद्बहिःकार्यःसर्वस्माद्द्विजकर्मणः । **याज्ञवल्क्यः**—सर्वावस्थोपियोविप्रःसंध्योपासनतत्परः । ब्राह्मण्याच्चनहीयेतह्यन्यजन्मगतोपिसः । **याज्ञवल्क्यः**—अनार्तश्चोत्सृजेद्यस्तुसविप्रःशूद्रसंमितः । **भारते**—येनपूर्वामुपासंतेद्विजाःसंध्यांनपश्चिमाम् । सर्वांस्तान्धार्मिकोराजाशूद्रकर्माणिकारयेत् । **स्कांदकौर्मयोः**—संध्याहीनोऽशुचिर्नित्यमनर्हःसर्वकर्मसु । यदिंकचित्कुरुतेकर्मनतस्यफलमाप्नुयात् । **विष्णुपुराणे**—सर्वकालमुपस्थानंसंध्ययोःपार्थिवेष्यते । अन्यत्रसूतकाशौचविभ्रमातुरभीतितः । विभ्रमःअभ्रादिनासंध्याकालाज्ञानं पैशाच्यंवा । संध्याविधिपुद्विजपदोक्तेर्नशूद्रस्यसंध्या आगमदीक्षायुक्तस्यतुतदुक्तास्त्येवेतिपंचायतनसारेस्मृतिकौमुद्यांच । ब्राह्मणाद्ब्राह्मण्यामुत्पन्नयोःकुंडगोलकयोरपिसंध्या—कुंडोवागोलकोविप्रःसंध्योपासनमात्रविदितिस्मृतिकौमुद्यांस्मृतेः । **शातातपः**—अनृतंमद्यगंधंचदिवामैथुनमेवच । पुनातिवृषलस्यान्नंबहिःसंध्याह्युपासिता । गृहेषुप्राकृतीसंध्यागोष्ठेदशगुणास्मृता । नदीषुशतसाहस्राअनंताशिवसंनिधौ । अनंताविष्णुसंनिधाविति[1]चंद्रिकायांचसिष्ठपाठः । प्राकृतीएकगुणा । **व्यासः**—बहिःसंध्यादशगुणागर्तप्रस्रवणादिषु । ख्याततीर्थेशतगुणासाहस्रीजाह्नवीजले । **माधवीयेऽत्रिः**—उभेसंध्येतुकर्तव्येब्राह्मणैश्चगृहेष्वपि ॥ ॥ **अथप्रयोगः । बृहत्पराशरः**—पूर्वासंध्यातुगायत्री ब्राह्मणीहंसवाहना । रक्तपद्मारुणादेवीरक्तपद्मासनस्थिता । रक्ताभरणभारांगीरक्तमाल्यांबरातथा । अक्षमालाजलाधारवरहस्तामरार्चिता । विश्वमात'सुराभ्यर्च्यपुण्येगायत्रिवैधसि । आवाहयाम्युपास्त्यर्थमंहोनिघ्नन्पुनीहिमाम् । संध्यामाध्याह्निकीश्वेतासावित्रीरुद्रदेवता । वृषेंद्रवाहनादेवीज्वलत्त्रिशिखधारिणी । श्वेतांवरधराश्वेतनागाभरणभूषिता । श्वेतस्रगक्षमालापिकृतानुरक्तशंकरा । जलाधारजटाधात्रीधरेंद्रप्रभवा

---

१ रुद्रवादिनीइतिपाठ ।

तथा । मातर्भवानिविश्वेशिविश्वेविश्वजनार्चिते । शुभेवरेवरेण्येत्वमाहूतैहिपुनीहिमाम् । संध्यासायंतनीकृष्णाविष्णुदेवीसरस्वती । खगगाकृष्णव
स्त्रातुशंखचक्रगदाधरा । कृष्णस्रग्भूषणैर्युक्तासर्वज्ञानमयीवरा । वीणाक्षमालिकाचापहस्तास्मितवरानना । मातर्वाग्देवतेदेविवरेण्येचधन
प्रदे । सर्वामरगणस्तुत्येआहूतैहिपुनीहिमाम् । त्रिशिखंत्रिशूलम् । खगोगरुडः । **मदनरत्ने**—वृद्धांसरस्वतींकृष्णांपीतवस्त्रांचतुर्भुजाम् ।
शंखचक्रगदापद्महस्तांगरुडवाहनाम् । चदर्याश्रमवासांतामायांतींसूर्यमंडलात् । सामवेदकृतोत्संगांवनमालाविभूषिताम् । वैष्णवीमक्षरांशां
तांदेवीमावाहयाम्यहम् । **आचारादर्शे**—रक्ताभवतिगायत्रीसावित्रीशुक्लवर्णिकेतिपाठः । **संवर्तः**—अथाचम्यकुशैर्युक्तआसनेसमुप
स्थितः । करसंपुटकंकृत्वासंध्यांनित्यंसमारभेत् ॥ ॥ **आसनम् । स्मृतिसारे**—कौशेयंकेवलंवापिअजिनंपटमेवच । दारुजंतालपर्णंवा
आसनंपरिकल्पयेत् । श्रीपर्ण्यादिदारुविहितं । **चंद्रिकायांकौशिकः**—कुशासनंसदापूतंयतीनांतुविशेषतः । **योगयाज्ञवल्क्यः**—कौशे
यंवाथवाचर्मचैलंमूलमथापिवा । **मार्कंडेये**—चित्रासनंयोगपट्टंतथैवमृगचर्मच । कृष्णाजिनंतथातातवर्जयेत्पुत्रवान्गृही । **स्मृतिसमु
च्चये**—वंशासनेतुदारिद्र्यंपापाणेव्याधिसंभवः । धरण्यांदुःखसंभूतिर्दौर्भाग्यंभिन्नदारुजे । तृणासनेयशोहानिःपल्लवेचित्तविभ्रमः । कृष्णाजि-
नेज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि । वस्त्रासनेव्याधिनाशःकेवलेदुःखमोचनम् । अभिचारेनीलवर्णोरक्तोवश्यादिकर्मणि । शांतिकेधवलःप्रोक्तः
सर्वार्थेश्चित्रकंबलः । **मार्कंडेये**—तद्वन्नोपविशेत्प्राज्ञःपादेनाक्रम्यचासनम् । **बृहस्पतिः**—बध्वासनेनियम्यासून्स्मृत्वाचर्ष्यादिकंततः ।
सन्निमीलितदृङ्नौनीप्राणायामंसमभ्यसेत् । **आसनंतुवायुपुराणे**—पद्ममर्धासनंवापितथास्वस्तिकमासनम् । **शांतिहेमाद्रौकौर्मे**—
ऊर्वोरुपरिविन्यस्तंद्रकृत्वापादतलेउभे । समासीनात्मनःपद्ममेतदासनमुत्तमम् । एकंपादमथैकस्मिन्विन्यस्योरुणिसत्तम । आसीनोर्धासनमिदं

१ विष्णुदेवाइतिपाठः ।

योगसाधनमुत्तमम् । उभेकृत्वापादतलेजानूर्वोरंतरेणहि । समासीनात्मनःप्रोक्तमासनंस्वस्तिकंपरम् । **छंदोगपरिशिष्टे**—रक्षयेद्धारणात्मानंपरिक्षिप्यसमंततः । रक्षा शिखावंधइतिकेचित् । तन्न । शिखाबंधस्यतत्रानुक्तेः । साप्राणायामात्पूर्वमित्याचारादर्शः । प्राणायामोत्तरमितिकामधेनुः ॥ ॥

प्राणायामनिर्वचनंतुकौर्मे—प्राणाःस्वदेहजोवायुरायामस्तुनिरोधनम् । **तद्वैविध्यंकौर्मे**—सएवद्विविधःप्रोक्तःसगर्भोऽगर्भएवच । सगर्भमाहुःसजपमगर्भमजपंबुधाः । अगर्भोयोगाभ्यासोपयोगी । **व्यासशौनकौ**—प्रणवव्याहृतियुतांगायत्रीशिरसासह । त्रिःपठेदायत प्राणःप्राणायामःसउच्यते । प्रणवव्याहृतीतिद्वंद्वेव्याहृतीनांप्रणवयोगोनस्यात् । मध्यमपदलोपिसमासेगायत्र्यास्तद्योगोनस्यात् । मास्त्वितिचेत् सव्याहृतिंसप्रणवामितियोगयाज्ञवल्क्यविरोधः । अतोगायत्रींशिरसासार्धंजपेद्व्याहृतिपूर्विकाम् । प्रतिप्रणवसंयुक्तांत्रिरयंप्राणसंयमइतियाज्ञवल्क्याव्यवस्था । गायत्र्याएवप्रणवयोगेप्रतीतिव्यर्थस्यात् । नचव्याहृतिगायत्रीशिरसांप्रत्येकंतद्योगात्त्रिःप्रणवत्वेनप्रतीतिसार्थकम् । सप्तव्याहृतिभिःसार्धंससोंकारसमन्विताम् । शिरसासहितांदेवींप्राणायामेनियोजयेदितिचंद्रोदयेयोगयाज्ञवल्क्यविरोधात् । यत्त्वतएव व्याहृतीनामेवादौप्रणवइतिविज्ञानेश्वरस्तच्चिंत्यम् । गायत्रीविशेषणत्वादुभयोःपरस्परमन्वयायोगात् । गायत्रीविशेषणस्यतयाऽसंबद्धार्थस्यव्याहृत्यन्वयायोगाच्च । नचवाजपेयन्यायः । तत्रप्रधानेन्वयायोगाद्युक्तोंगेष्वन्वयः । पशुचाःसंबंधसामान्येउपपत्तेश्च । नचात्रतथा । अतोयथाजपेतिसृणामेकेनप्रणवपूर्वत्वंतथात्रापिशंकानिरासार्थंविज्ञानेश्वरोक्तिःसमाधेया । प्रतीत्युक्तेरेवशिरसापिप्रणवान्वयः । अतोनवप्रणवाइतिचंद्रिका । तदपिन । **व्यासस्मृतौ** प्रणवांतशिरोभिधानात् । प्रतिप्रतीकंप्रणवमुच्चारयेदंतेचशिरसइतिच्छंदोगपरिशिष्टाच्च । अतोदशप्रणवाइतिपृथ्वीचंद्रः । शिष्टाचारोप्येवम् । युक्तंचैतदेव—एतामेताःसहानेनतथैभिर्दशभिःसह । त्रिःपठेदायतप्राणःप्राणायामःसउच्यतेइ

तिच्छंदोगपरिशिष्टाच । एताव्याहृतयःसप्त एतांगायत्रीं अनेनशिरसा एभिःप्रणवैः दशभिरितियथाप्राप्तानुवादः प्रतिप्रतीकमित्युक्तः नतुसंततमोंकारदशकं । व्याहृतयःसप्त । भूर्भुवःस्वर्महर्जनस्तपःसत्यंतथैवच । इतिसप्तव्याहृतयःप्राणायामेपुनित्यशइतिचंद्रिकायांयोगयाज्ञवल्क्योक्तेः । व्यासः—आदानंरोधमुत्सर्गंवायोस्त्रिस्त्रिःसमभ्यसेत् । शांतिहेमाद्रौयोगयाज्ञवल्क्यः—नासिकाकृष्टउच्छ्वासो धृतःपूरकउच्यते । कुंभकोनिश्चलश्वासोरिच्यमानस्तुरेचकः । नीलोत्पलदलश्यामंनाभिदेशेव्यवस्थितम् । चतुर्भुजंमहात्मानंपूरकेणविचिंतये त् । कुंभकेनहृदिस्थानेध्यायीतकमलासनम् । ब्रह्माणंगौरवर्णंचचतुर्वक्त्रंपितामहम् । रेचकेनेश्वरंविद्याल्ललाटस्थंमहेश्वरम् । शुद्धस्फटिकसंकाशं निर्मलंपापनाशनम् । पूरकेणेत्यादितृतीयासप्तम्यर्थे । गौरंरक्तम् । रक्तंप्रजापतिंध्यायेदितिव्यासोक्तेः । पूरकादीनांमिलितानांप्राणायाम त्वम् । पूरककुंभकरेचैःप्राणायामस्त्रिलक्षणोज्ञेयइतियोगयाज्ञवल्क्योक्तेः । प्रत्येकंत्रिर्मंत्रपाठेप्रत्येकंप्राणायामत्वमित्याचारादर्शः । शौनकः—नासिकामंगुलीभिश्चतर्जनीमध्यमाद्यते । दक्षिणेनसमाकृष्यसव्येनतुविसर्जयेत् । देवजानीयेस्मृत्यंतरे—दक्षिणेश्वासमाहृ त्यवामेचैवविसर्जयेत् । शांतिहेमाद्रावीश्वरगीतासु—रेचकंदक्षिणेप्रोक्तंपूरकंवामतश्चरेत् । जपारंभेतुविज्ञेयोविपरीतश्चसंस्थितौ । सं स्थितिःसमाप्तिः । विपरीतोदक्षिणेनपूरकोवामेनरेचकइत्यर्थः । बह्वृचपरिशिष्टे—दर्भपाणिःप्रथममंत्रकंपंचदशमात्रिकंप्राणायामत्रयंकृ त्वासमंत्रकंसकृत्कुर्यादिति ॥ ॥ मात्रास्वरूपमुक्तंसंग्रहे—यावत्कालंत्रिरावेष्टयजानुहस्तेनदक्षिणम् । छोटिकाकरणंयत्सामात्रेतिपरि पठ्यते । मात्राभिःपंचदशभिःप्राणायामोऽधमःस्मृतः । मध्यमोद्विगुणःश्रेष्ठस्त्रिगुणोधारणास्मृता । विज्ञानेश्वरोप्येवम् । गायत्रीरह स्येस्मृतिसारे—पंचांगुलीभिर्नासाग्रपीडनंप्रणवाभिधा । मुद्रेयंसर्वपापघ्नीवानप्रस्थगृहस्थयोः । कनिष्ठानामिकांगुष्ठैर्नासाग्रस्यचपीडनम् ।

१ वनस्थस्ययतेस्तथाइतिपाठः ।

ओंकारमुद्रासाग्रोक्तायतेश्चब्रह्मचारिणः । **चंद्रोदयेसंग्रहे**—अंगुष्ठतर्जनीभ्यांतुऋग्वेदीसामगायनः । अंगुष्ठानामिकाभ्यांचग्राह्यंसर्वैरथर्वभिः । **व्यासः**—अंगुष्ठेनपुटंधार्यनासायादक्षिणंपुनः । कनिष्ठानामिकाभ्यांतुवामंप्राणस्यसंग्रहे । **मनुः**—प्राणायामत्रयंकार्यसंध्यासुचतिसृष्व पि ॥ ॥ **प्रणवस्वरमाह चंद्रोदयेवृद्धपराशरः**—ऋग्वेदेस्वरितोदात्तउदात्तश्चयजुःश्रुतौ । सामवेदेसविज्ञेयोदीर्घःसप्लुतएवच । **योग याज्ञवल्क्यः**—आथर्वणेसमुद्दिष्टउदात्तोनात्रसंशयः । **शांतिहेमाद्रौ**—अनुदात्तोदात्तऋग्वेदेपणमात्रःस्वरउच्यते । सर्वोदात्तोयजुःसा म्नांप्लुतातीतःश्रुतस्तथा । पूर्वास्तिस्रोनुदात्तास्तिस्रउदात्ताः । तत्रैव**शौनकः**—वाष्कलेनैकमात्रोयमोंकारःसमुदाहृतः । शाकलायनआचार्यो द्विमात्रमभिवांछति । सार्धद्विमात्रंतंग्राहमुद्गलोमुनिपुंगवः । सार्धत्रिमात्रमोंकारंवसिष्ठोमुनिरब्रवीत् । पराशरश्चतुर्मात्रंग्राहत्वध्यात्मतत्त्ववित् । मात्राश्चार्धचतस्रोऽस्यविज्ञेयाःपरमार्थतः । **अथर्वणश्रुतौ**—यद्येकमात्रमभिध्यायीतेत्येकमात्रउक्तः ॥ ॥ ऋष्यादिस्मरणंकार्यमित्युक्तंतत्रचं **द्रोदयेव्यासः**—प्रणवस्यऋषिर्ब्रह्मागायत्रीछंदएवच । देवोऽग्निःसर्वकर्मादौविनियोगःप्रकीर्तितः । देवोग्निरितिजपपरम् । ध्यानकालेपरंब्रह्मज पकालेग्निरिष्यतइतियोगयाज्ञवल्क्योक्तेः ॥ ॥ **व्याहृतीनामृषीनाह भरद्वाजः**—भरद्वाजःकश्यपश्चगौतमोऽत्रिस्तथैवच । वि श्वामित्रोजमदग्निर्वसिष्ठश्चर्षयःक्रमात् । **चंद्रिकायाम्**—विश्वामित्रोजमदग्निर्भरद्वाजोथगौतमः । ऋषिरत्रिर्वसिष्ठश्चकश्यपश्चयथाक्रमम् । **आग्नेये**—गायत्र्युष्णिगनुष्टुप्चबृहतीपंक्तिरेवच । त्रिष्टुप्चजगतीचेतिछंदांस्येतान्यनुक्रमात् । अग्निर्वायुस्तथासूर्योबृहस्पत्यपएवच । इंद्रश्च विश्वेदेवाश्चदेवताःसमुदाहृताः । सूर्यस्थाने आदित्यः अपांस्थानेवरुणःचंद्रिकायांपठितः । **तत्रैव**—व्याहृतीनांचसर्वासामृषिरुक्तःप्रजाप तिः । **गायत्र्याऋष्याद्याहयोगयाज्ञवल्क्यः**—सवितादेवतायस्यामुखमग्निस्त्रिपात्स्थिता । विश्वामित्रऋषिश्छंदोगायत्रीसाविशिष्यते ।

---

१ आद्यंनासायाइतिपाठः । २ परिकीर्तिताः ।

शूद्राचारशिरोमणौशातातपः—तत्सवितुर्वरेण्यमितिसावित्रीब्राह्मणस्य देवसवितरितिराजन्यस्य विश्वारूपाणीतिवैश्यस्येति । **योग याज्ञवल्क्यः**—आपोज्योतिरित्येषमंत्रोयस्तुप्रकीर्त्यते । तस्यप्रजापतिश्चर्षिर्यजुश्छंदोपिवर्णितम् । ब्रह्माग्निवायुसूर्याश्चदेवताःसमुदाहृताः ॥ ॥

न्यासाः चंद्रिकायाम्—पादयोश्चतथाजान्वोर्जघयोर्जठरेपिच । कंठेमुखेतथामूर्ध्निक्रमेणव्याहृतीर्न्यसेत् । भूरंगुष्ठद्वयेन्यस्यभुवस्तर्जनिकाद्वये । ज्येष्ठांगुलिद्वयेधीमान्स्वःपदंविनियोजयेत् । करन्यासविधिंकृत्वाअंगन्यासंसमारभेत् । भूःपदंहृदिविन्यस्यभुवःशिरसिविन्यसेत् । शिखायांस्वःपदंन्यस्यकवचेतत्पदंन्यसेत् । अक्ष्णोर्भर्गपदंन्यस्यदिग्विदिक्षुधियःपदम् । तदित्यादिपादपरम् । ततःशिरसासर्वांगन्यासः ।—शिरस्तस्यास्तुसर्वांगेप्राणायामेपरंन्यसेदितिव्यासोक्तेः । **न्यासांतरमाहचंद्रोदयेव्यासः**—आपोगुह्येन्यसेज्ज्योतिश्चक्षुष्यथरसोमुखे । अमृतंजानुनोर्[1]ब्रह्महृदयेभूःपदंन्यसेत् । भुवर्नाभौललाटेस्वरोंकारंमूर्ध्निविन्यसेत् । **शौनकः**—प्राणानायम्यविधिवद्वाग्यतःसंयतेंद्रियः । अथ संध्यामुपासिष्यइतिसंकल्प्यमार्जयेत् ॥ ॥ **चंद्रिकायांवृहन्मनुस्मृतौब्रह्मांडेच**—नद्यांतीर्थेहृदेवापिभाजनेमृन्मयेथवा । औदुंबरेच सौवर्णेराजतेदारवेजलम् । कृत्वाथवामहस्तेवासंध्योपास्तिंसमारभेत् । औदुंबरे ताम्रपात्रे । **यत्तुव्यासः**—वामहस्तेजलंकृत्वायेतुसंध्यामुपासते । सासंध्यावृषलीज्ञेयाह्यसुरास्तैस्तुतर्पिताइति । तत्पात्रांतरसत्वेइतिचंद्रिकादयः । नद्यादिपरमितिवयम् । गंगायांवापिकायांवातडागेपितथैवच । वामहस्तेजलंगृह्यनकुर्यान्मार्जनंकचिदितिगायत्रीरहस्येआपस्तंबोक्तेः । **वह्वृचपरिशिष्टे**—स्थिरेतूदकाशयेयावतिकर्मकुर्वीतितावदुदकस्यविभागंकल्पयित्वातीर्थानितत्रावाह्येत्युक्तम् । **वृहस्पतिः**—धाराच्युतेनतोयेनसंध्योपास्तिर्विगर्हिता इति ॥ ॥

मार्जनं योगयाज्ञवल्क्यः—आपोहिष्ठेतितिसृभिर्ऋग्भिस्तुप्रयतःशुचिः । नवप्रणवयुक्ताभिर्जलंशिरसिमार्जयेत् । नवप्रणवाःप्रतिपादम् ।

[1] जानुनोर्ध्वहृदये ।

बह्वृचपरिशिष्टे—सदर्भपाणिनादायोत्तानंशिरसिमार्जयेत्। **छंदोगपरिशिष्टे**—शिरसोमार्जनंकुर्यात्कुशैःसोदकबिंदुभिः। ऋगंतेमार्जनं कुर्यात्पादांतेवासमाहितः। प्रणवोभूर्भुवःस्वर्द्यौगायत्रीचतृतीयकम्। अब्दैवतंतृचंचैवचतुर्थमितिमार्जनम्। **योगीश्वरनारायणौ**—तृच स्यांतेथवाकुर्यादृपीणांमतमीदृशम्। एवंचत्रयःपक्षाः—ऋगंतेमार्जनमित्येकः। नवभिःपादैःप्रणवोपेतैर्नवमार्जनानीतिद्वितीयः। तृचांतेमा र्जनमितितृतीयः। **व्यासः**—यस्यक्षयायेतिजलंसकुशंप्रक्षिपेदधः। **हारीतः**—मार्जनंचकुशाभावेदेवतीर्थेन यद्वाकुशसहितेनदेवतीर्थेन। **यत्तुस्मृत्यर्थसारे**—पच्छोर्धर्चशऋक्शश्चमार्जनेतन्मयेतृचे। ब्रह्महत्याच्युतंतोयंस्वयंशिरसिधारयेदिति तन्मंत्रस्नानपरम्। मंत्रस्नानोपक्रमात्। **प्रकारांतरमुक्तं काशीखंडे**—आपोहिष्ठेतितिसृभिर्मार्जनंतुततश्चरेत्। भूमौशिरसिचाकाशेआकाशेभुविमस्तके। मस्तकेचतथाकाशेभूमौ चनवधाक्षिपेत्। भूमिशब्देनचरणावाकाशंहृदयंस्मृतम्॥ ॥ आपोहिष्ठेत्यस्यऋष्याद्याहयोगयाज्ञवल्क्यः—सिंधुद्वीपोभवेदापैगायत्रंछं दएवच। आपश्चदेवतंप्रोक्तंविनियोगश्चमार्जने। **भृगुः**—आपोहिष्ठानवस्यृक्षुसिंधुद्वीपऋषिःस्मृतः। अब्दैवत्यास्तुसप्तर्चोगायत्र्योद्वेत्वनुष्टुभौ। **मैत्रायणीयपरिशिष्टे**—प्रातःसूर्यश्चमेत्युक्त्वासायमग्निश्चमेतिच। आपःपुनंतुमध्याह्नेकुर्यादाचमनंततः। प्राणायामोत्तरंसूर्यश्चमेत्या चम्यमार्जयेदितिक्रमःकात्यायनादीनाम्। अन्येषांप्राणायामोत्तरमाचम्यमार्जयित्वासूर्यश्चेतिसकृदाचमनद्वयमितिपृथ्वीचंद्रदेवयाज्ञि कौ।—ह्रोत्वामंत्रवदाचम्यपुनराचमनंचरेदितिटोडरानंदेनारसिंहात्सकृदाचमनमेव। **पितामहः**—सूर्यश्चेत्यनुवाकस्यछंदोगायत्रमु च्यते। सवितादेवतातस्यऋषिरत्रिरितिस्मृतः। **चंद्रोदयेसंग्रहे**—आपःपुनंतुमंत्रस्यऋषिःपूतइतिस्मृतः। छंदोनुष्टुब्भवेद्वापिपृथिवीतस्यदे

---

१ मार्जनेचत्वारःपक्षाः—आदौप्रणवेनसमस्तव्याहृतिभि गायत्र्यामार्जनंकृत्वासमस्ततृचेनैकंमार्जनंकुर्यादित्येकः। प्रणवोपेतैर्नवभि·पादैर्नवमार्जनानीतिद्वितीयः। ऋगंतेमार्जनमितितृतीयः। तृचांतेमार्जनमितिचतुर्थइत्यप्यन्यत्र।

वता । तत्रैव—अग्निश्चेतिपिवेत्तोयंत्वसूर्यमृषिंविदुः । देवताग्निर्भवेच्छंदोगायत्रंप्रोक्षणेविधिः । सूर्यस्येत्यस्याग्निर्ऋषिःप्रकृतिश्छंदःसूर्यमन्यु मन्युपतिरात्रयोदेवताइतिचंद्रिकामदनपारिजातौ । नारायणऋषिःसूर्योदेवतागायत्र्युपरिष्टाद्बृहतीछंदइतिहरिहरः । ब्रह्माऋषिःप्रकृति श्छंदःआपोदेवतेति पृथ्वीचंद्रः । अग्निश्चेत्यस्यसूर्यऋषिः प्रकृतिश्छंदः अग्निमन्युमन्युपत्याहानिदेवताइतिचंद्रिका । आपःपुनंत्वित्यस्यमारी चःकश्यपोविष्णुर्वाऋषिः आपोदेवताअनुष्टुप्छंदइतिसएव । नारायणऋषिरितिदेवजानीये ॥ ॥ छंदोगानामाचमनेमंत्रमाहगौतमः— अहश्चमादित्यश्चपुनात्वितिप्रातः । रात्रिश्चमावरुणश्चपुनात्वितिसायमिति । अनयोःप्रजापतिर्ऋषिर्लिंगोक्तादेवतेतिचंद्रिका । विष्णुः— जानुभ्यामुपरिष्टात्तुशुष्कवासाःस्थितोजले । सांध्यमाचमनंकुर्वन्शुचिःस्यादशुचिस्त्वधः । पुनर्मार्जनमुक्तं बह्वृचपरिशिष्टे—अथपुनराच म्यमार्जयेत्प्रणवव्याहृतिसावित्रीभिरापोहिष्ठेतिसूक्तेनेति । शौनकीयेऽप्येवम् । गायत्रीकल्पेतु—आपोहिष्ठेतित्रिभिःपादान्ते शंनोदे वीरितिचतुर्भिरर्धर्चांते इदमापइतित्रिभिर्ऋगंते । मार्जनोत्तरमघमर्षणंयोगयाज्ञवल्क्यः । जलपूर्णंतुचुलुकंनासिकाग्रेविधृत्यच । प्राणा न्निरुंधन्द्रुपदांपठित्वातज्जलंक्षिपेत् । कात्यायनः—जपेदनायतासुर्वात्रिःसकृंत्वाघमर्षणम् । कौर्मे—आपःपाण्योःसमादायघ्राणमासज्यत त्रच । बह्वृचपरिशिष्टे—अथगोकर्णवत्कृतेनहस्तेनोदकमादायनासिकाग्रेधारयन्कृष्णघोरपुरुषाकृतिमौत्मानमंतर्व्याप्यस्थितंविचिंत्य संयतप्रा णोऽघमर्षणसूक्तंद्रुपदामृचंवावर्तयेत्तंपाणिस्थेउदकेपतितंध्यात्वावामतोभुवितीत्रपातेनक्षिपेदित्येवमेकेनकुर्वतीति । संध्याकल्पे—स्वहस्तवा रिनासाग्रेपठित्वाद्रुपदांक्षिपेत् । अर्धभूमौशिरस्यर्धंसर्वंभुव्यघमर्षणम् । अत्रकरपाण्योरैच्छिकोविकल्पः । योगयाज्ञवल्क्यः—अघमर्षण सूक्तस्यऋषिश्चैवाघमर्षणः । आनुष्टुभंभवेच्छंदोभाववृत्तंचदैवतम् । अश्वमेधावभृथकेविनियोगोस्यकल्पितः । अघमर्षणोत्तरमाचमनमाहचंद्रि

१ सकृद्वाइतिपाठः । २ पाप्मानमितिपाठः । ३ भावदृत्तिश्चेतिपाठः ।

कादौशंखः—उपस्पृशेत्ततःपश्चान्मंत्रेणानेनमंत्रवित्। अंतश्चरसिभूतेषुगुहायांविश्वतोमुखः । त्वंयज्ञस्त्वंवषट्कारआपोज्योतीरसोमृतम् ॥ ॥

अथसूर्यार्घः । कौर्मे—ॐकारव्याहृतियुतांगायत्रींवेदमातरम् । जप्त्वाजलांजलिंदद्याद्भास्करंप्रतितन्मनाः । अंजलयस्त्रयः । कराभ्यां तोयमादायगायत्र्याचाभिमंत्रितम् । आदित्याभिमुखस्तिष्ठंस्त्रिरूर्ध्वंसंध्ययोःक्षिपेदितिव्यासोक्तेः । अतएवकेवलगायत्र्यार्घ्यत्रयंनव्याहृतियुतया । तदुहवाएतेब्रह्मवादिनःपूर्वाभिमुखाःसंध्यायांगायत्र्याभिमंत्रिताअपऊर्ध्वंविक्षिपंत्युद्यंतमस्तंयंतमादित्यमितितैत्तिरीयारण्यकात् । अतएवचतुर्थार्घंतुगायत्र्यादद्याद्व्याहृतिसंयुतमितिप्रायश्चित्तार्घ्येविशेषः। **कौर्मेतु**कात्यायनपरमिदमित्युक्तम् । उत्थायार्कंप्रतिप्रोह्येत्रिकेणांजलिमं भसाइतिकात्यायनस्मृतेः । त्रिकं प्रणवव्याहृतित्रयगायत्र्यः । **संध्याकल्पेआश्वलायनः**—सकृन्मंत्रेणद्विस्तूष्णीमर्घ्यंदद्याद्विचक्षणः । **मनुः**—परंनम्रःप्रभातेस्यान्मध्याह्नेतुऋजुःस्थितः । द्विजोऽर्घंप्रक्षिपेदेव्यासायंचोपविशन्भुवि । प्रातर्मध्याह्निकींसंध्यांतिष्ठन्नेवसमर्पयेत् । उप विश्यतुसायाह्नेजलेत्वर्घ्यंननिक्षिपेत् । **यत्तुवसिष्ठः**—उपविश्यचयच्चार्घ्यंसर्वंतन्निष्फलंभवेदिति तत्सायंसंध्याभिन्नपरम् । **कश्यपः**— त्रिंशत्कोट्योमहावीर्यामंदेहानामराक्षसाः । कृष्णातिदारुणाघोराःसूर्यमिच्छंतिखादितुम् । ततोदेवगणाःसर्वेऋषयश्चतपोधनाः । उपासतेत दासंध्यांप्रक्षिपंत्युदकांजलिम् । दह्यंतेतेनतेदैत्यावज्रीभूतेनवारिणा । **अर्घ्यकालः काशीखंडे**—अर्घोदयास्तसमयेतस्मादर्घोदकंक्षिपेत् । **कौर्ममार्कंडेययोस्तु**—जप्त्वाजलांजलिंदद्याद्भास्करंप्रतितन्मनाः । सावित्रींप्रजपेद्विद्वान्प्राङ्मुखःप्रयतःशुचिः । अथोपतिष्ठेदादित्यमुदयंतं समाहितइत्युक्तम् । देवजानीयेप्येवम् । **चंद्रिकायामपि** गायत्रीजपोत्तरमुपस्थानमुक्तम् । नचआदित्याभिमुखस्तिष्ठंस्त्रिरूर्ध्वंसंध्ययोः क्षिपेदितिव्यासोक्तेःसूर्योदयोत्तरमर्घ्यदानमितिवाच्यम् । तस्याआदित्यदिगभिमुखत्वार्थत्वात् । यत्तूपस्थानोत्तरं जपउक्तः सशाखांतरपरः । **शौनकः**—असावादित्यमंत्रेणप्रदक्षिणमतःपरं । अपःस्पृष्ट्वादक्षिणेतुपश्चाद्देवान्विसर्जयेत् । प्रदक्षिणोत्तरंजलंस्पृशेत् । सायंमंत्रवदाचम्यप्रोक्ष्य

सूर्यस्यचांजलिम्। दत्त्वाप्रदक्षिणंकृत्वाजलंस्पृष्ट्वाविशुध्यतीतिचंद्रोदयेनारसिंहात् ॥ ॥ अर्घ्यदानोत्तरंसंध्यातर्पणमुक्तंप्रयोगपारिजाते—अस्यकश्यपऋषिः ब्रह्मादेवता गायत्रीछंदः तर्पणेविनियोगः। भूःपुरुषंतर्पयापि ऋग्वेदंतर्पयामि। मंडलं आत्मानं ब्रह्मरूपिणीं गायत्रीं वेदमातरं सांकृतिं संध्यां बालां ब्रह्माणीं उपसं निमुचं सर्वसिद्धिकरीं सर्वमंत्राधिपां। सायंतु विष्णुर्देवता अनुष्टुप्छंदः स्वःपुरुषंतर्पयामि सामवेदंतर्पयामि विष्णुरूपिणीं परमात्मानं सरस्वतीं वृद्धां वैष्णवीं। एवंपंचदशकृत्वस्तर्पयित्वाद्विराचामेदिति। संध्याकल्पेप्रयोगपारिजातेचस्मृत्यंतरे—ततस्त्वाचम्यविधिवत्प्राणायामान्नवाचरेत् ॥ ॥

गायत्री.

गायत्रीस्वरूपध्यानन्यासादि। चंद्रोदयेवृद्धपराशरः—जपेतुत्रिपदाज्ञेयाअर्चनेतुचतुष्पदा। न्यासेजपेतथाध्यानेअग्निकार्ये तथार्चने। सर्वत्रत्रिपदाज्ञेयाब्राह्मणैस्तत्वचिंतकैः। पदशब्दःपादपरः। गायत्र्याश्चतुर्थपादउक्तोगारुडे—परोरजसेसावदोंचतुर्थपदमीरितम्। षट्त्रिंशन्मते—मानस्तोकेतिमंत्रेणशिखावंधंतुकारयेत्। जपंहिंसंतिरक्षांसिरक्षाकर्मविवर्जितम्। कात्यायनः—भूर्भुवसुवरित्यापोऽभिमंत्र्यचपरिक्षिपेत्। रक्षयेद्वारिणात्मानंपरिक्षिप्यसमंततः। प्रणवाद्याव्याहृतीस्तुसावित्रींचजपेत्ततः। शांतिहेमाद्रौब्राह्मे—छंदोगायत्रीगायत्र्याःसवितात्रैवदेवता। शुक्लोवर्णोमुखंचाग्निर्विश्वामित्रऋषिस्तथा। त्रयीशिरःशिखारुद्रोविष्णुर्हृदयमेवच। उपासनेविनियोगःसांख्यायनसगोत्रजा। त्रैलोक्यंचरणंज्ञेयंपृथिवीकुक्षिरेवच। एवंध्यात्वातुगायत्रींजपेद्वादशलक्षणाम्। न्यासाकरणेदोषउक्तः शांतिहेमाद्रौ—कर्मणोन्यासहीनस्यगृह्णंत्यर्धंहिराक्षसाः। अस्त्रेणकरशुद्धिंकृत्वान्यासंकुर्यादित्युक्तंचंद्रिकायाम्। प्रणवन्यासमाहयोगयाज्ञवल्क्यः—अकारंनाभिदेशेतुउकारंहृदिविन्यसेत्। मकारंमूर्ध्निविन्यस्येदेषन्यासोविमुक्तिदः। व्याहृतिन्यासमाहपराशरः—भूर्लोकंपादयोर्न्यस्यभुवर्लोकंतुजानुनोः। स्वर्लोकंगुह्यदेशेतुनाभिदेशेमहस्तथा। जनलोकंतुहृदयेकंठदेशेतपस्तथा। भ्रुवोर्ललाटसंधौतुसत्यलोकःप्रतिष्ठितः। मध्य

देशंभुवरिति । **पारिजातेगायत्रीरहस्ये**—तत्सवितुर्ब्रह्मात्मनेसावित्रीशक्तिरंगुष्ठाभ्यांनमः । वरेण्यंविष्ण्वात्मनेलक्ष्मीशक्तिस्तर्जनीभ्यां नमः । भर्गोदेवस्यशिवात्मनेगौरीशक्तिर्मध्यमाभ्यांनमः । धीमहिपरमात्मनेज्ञानशक्तिरनामिकाभ्यांनमः । धियोयोनःनिरंजनात्मनेईप्पणाश क्तिःकनिष्ठिकाभ्यांनमः । प्रचोदयान्निरासात्मनेमायाशक्तिःकरतलकरपृष्ठाभ्यांनमः । तत्सवितुर्ब्रह्मात्मनेसावित्रीशक्तिर्हृदयायनमः । वरेण्यं विष्ण्वात्मनेलक्ष्मीशक्तिःशिरसेस्वाहा । भर्गोदेवस्यरुद्रात्मनेगौरीशक्तिःशिखायैवषट् । धीमहिपरमात्मनेज्ञानशक्तिःकवचायहुम् । धियोयोनः निरंजनात्मनेईप्पणाशक्तिर्नेत्रत्रयायवौषट् । प्रचोदयान्निरासात्मनेमायाशक्तिरस्त्रायफट् इतिषडंगः । **चंद्रिकायांब्रह्मकल्पेऽक्षरन्यास उक्तः**—तकारंविन्यसेत्स्वांगेपादांगुष्ठद्वयेद्विजः । सकारंगुल्फदेशेतुविकारंजंघयोर्न्यसेत् । जान्वोस्तुकारंविन्यस्यवकारंचोरुदेशके । रेकारंवि न्यसेद्गुह्यणकारंवृषणेन्यसेत् । कटिदेशेयकारंतुभकारंनाभिमंडले । गोकारंजठरेयोगीदेकारंस्तनयोर्न्यसेत् । वकारंहृदिविन्यस्यस्यकारंकंठए- वतु । धीकारमास्येविन्यस्यमकारंतालुकेन्यसेत् । हिकारंनासिकाग्रेतुधिकारंनयनद्वये । भ्रुवोर्मध्येतुयोकारंललाटेतुद्वितीयकम् । पूर्वाननेतुनः कारंप्रकारंदक्षिणानने । उत्तरास्येतुचोकारंदकारंपश्चिमानने । विन्यसेन्मूर्ध्नियाकारंसर्वव्यापिनमीश्वरम् । **अथपदन्यासः**—तत्पादांगुष्ठाभ्यां नमः । सवितुर्जंघाभ्यां । वरेण्यंकटिभ्यां । भर्गोनाभ्यै । देवस्यहृदयाय । धीमहिकंठाय । धियोमुखाय । योचक्षुर्भ्यां । नःललाटाय । प्रचोदयात्मूर्ध्ने । **अथपादन्यासः**—प्रथमपादस्यऋग्वेदऋषिःत्रिष्टुप्छंदःब्रह्मादेवताभूस्तत्सवितुर्वरेण्यंपादयोर्ब्रह्मणेनमः । द्वितीयपादस्य यजुर्वेदऋषिःअनुष्टुप्छंदःरुद्रोदेवताभुवोभर्गोदेवस्यधीमहिहृदयेरुद्रायनमः । तृतीयपादस्यसामवेदऋषिः जगतीछंदःविष्णुर्देवतास्वर्धियोयो नःप्रचोदयात्ललाटेविष्णवेनमः । तुरीयपादस्यविमलऋषिः परमात्मादेवतागायत्रीछंदःपरोरजसेसावदोंब्रह्मरंध्रेपरमात्मनेनमः । **अक्षरदे वताब्राह्मे**—आग्नेयंप्रथमंवायव्यंद्वितीयंतृतीयंसौर्यंचतुर्थंवैद्युतंपंचमंवारुणंषष्ठंसप्तमंबार्हस्पत्यमष्टमंपार्जन्यंनवममैंद्रंदशमंगांधर्वंपौष्णमेकादशं

शैवंद्वादशंत्वाष्ट्रंत्रयोदशंवामवंचतुर्दशंमारुतंपंचदशंसौम्यंषोडशमांगिरिसंसप्तदशंवैष्णवमष्टादशमाश्विनमेकोनविंशंप्राजापत्यंविंशंसर्वदेवमेकविंशं रौद्रंद्वाविंशंत्वाब्धंत्रयोविंशंवैष्णवंचतुर्विंशमिति । **चंद्रिकायाम्**—अथतत्त्वानिवक्ष्यामिअक्षराणांविशेषतः । पृथिवीह्युदकंतेजोवायुरंबरमेव च । गंधोरसोथरूपंचस्पर्शःशब्दोयवागिति । हस्तावुपस्थंपायुश्चपच्छ्रोत्रेत्वक्चचक्षुषी । जिह्वाघ्राणंमनस्तत्त्वमहंकारोमहांस्तथा । गुणत्रयंच गततंकमशस्तत्त्वनिश्चयः । **तत्रैव**—सहानिलाविश्वहृदयाविलासिनीप्रभावतीलीलाशांताशांतिर्दुर्गासरस्वतीविश्वरूपाविशालाआप्यायनीवि मलातमोमयीहिरण्यरूपासूक्ष्माविश्वायोनिर्जयावहापद्मालयावराशोभनागदारूपेतिशक्तयइति । अक्षरदेवतातत्त्वशक्तीनामुक्तिरक्षरन्यासोत्तरं देवतादिन्यासार्थं । यद्वामुकदेवताकामुकशक्तिकामुकतत्त्वकामुकाक्षरायनमइत्यक्षरन्यासार्थं । अक्षरविन्यासकालेतत्तद्देवतादिध्येयमित्येवमर्थं वा । **चंद्रिकायामंगन्यासमाह कृग्राम**—हृदितत्सवितुर्न्यस्यन्यसेत्कंठेवरेणियम् । भर्गोदेवस्येतिखंडंशिखायांतुततोन्यसेत् । धीमहीति न्यसेद्बाहुकेधियोयोनश्चनेत्रयोः । प्रचोदयादितिपदमस्त्रार्थेविनियोजयेत् । ॐभूरंगुष्ठयोर्न्यस्यॐभुवस्तर्जनीद्वये । ॐस्वश्चैवतथान्यस्यमध्यमा भ्यांयतेंद्रियः । अनामिकाद्वयेधीमान्न्यसेत्तत्पदमग्रतः । कनिष्ठिकाद्वयेभर्गःपाण्योर्मध्येधियःपदम् । अत्रसर्वेमंत्राःसप्रणवानमोंताश्च । ॐकार मादाउच्चार्यमंत्रबीजमतःपरम् । नामग्राह्यंनमोंतंचजपन्यासःप्रकीर्तितइति**चंद्रिकायांशांतिहेमाद्रौचभृगूक्तेः** ॥ ॥ **अथगायत्री कवचम्** । **चंद्रिकायां** ॐमितिहृदि । भूरितिमुखे । भुवइतिशिरसि । स्वरितिसर्वांगे । **तत्रैवन्यासः**—विन्यस्यैवंजपेद्यस्तुगायत्रीं वेदमातरम् । ब्रह्मलोकमवाप्नोतिव्यासस्यवचनंयथा ।

मुद्राप्रकारः—चंद्रिकायांब्रह्मकल्पेच—अथातोदर्शयेन्मुद्राःसंमुखंसंपुटंतथा । ततोविततविस्तीर्णेद्विमुखत्रिमुखेततः । चतु र्मुखंचमुखंपञ्चमुखाधोमुखेततः । व्यापकांजलिकाख्यंचशकटंतदनंतरम् । यमपाशंचग्रथितंततःस्यात्संमुखोन्मुखम् । प्रलंबंमुष्टिकोमीनः

कूर्मोवाराहएवच । सिंहाक्रांतंमहाक्रांततोमुद्गरपल्लवाविति । **तल्लक्षणंतत्रैव**—संमुखंसंधितौहस्तावुत्तानौकुंचितांगुली । कुंचितावक्राः । संपुटंपद्मकोशाभौकरावन्योन्यसंहतौ । विततंसंहतौहस्तावुत्तानावायतांगुली । विस्तीर्णसंहतौपाणीमिथोमुक्तांगुलिद्वयौ । अंगुल्यौकनिष्ठे । संमुखासक्तयोःपाण्योःकनिष्ठाद्वययोगतः । शेषांगुलीनांवैकल्येद्विमुखत्रिमुखादयः । कनिष्ठयोर्योगेंगुष्ठयोर्योगेचशेषांगुलीनांवैकल्येद्विमुखम् । तर्जन्योर्योगेत्रिमुखम् । मध्यमयोर्योगेचतुर्मुखम् । अनामिकयोर्योगेपंचमुखम् । शेषांगुलीनांसंयोगेकनिष्ठायोगनाशने । तिर्यक्संयुज्यमानाग्रौसंयुक्तांगुलिमंडलौ । हस्तौपण्मुखमित्युक्तामुद्रामुद्राविशारदैः । आकुंचिताग्रौसंयुक्तौन्युब्जौहस्तावधोमुखम् । उत्तानौताद्दशावेवव्यापकांजलिकंकरौ । अधोमुखौवद्धमुष्टीमुक्ताग्रांगुष्ठकौकरौ । शकटंनामकथितंयमपाशमतःपरम् । वद्धमुष्टिकयोःपाण्योरुत्तानावामतर्जनी । कुंचिताग्र्यान्ययायुक्तातर्जन्यान्युब्जवक्रया । उत्तानसंधिसंलीनवद्धांगुलिदलौकरौ । संमुखौघटितौदीर्घागुष्ठौग्रथितमुच्यते । संचितोर्ध्वांगुलिर्वामस्ताद्दशादक्षिणेनतु । अधोमुखेनसंयुक्तःसंमुखोन्मुखमुच्यते । संचितासंवद्धा । उत्तानोन्नतकोटीचप्रलंबःकथितौकरौ । उत्तानानामिकाकनिष्ठिकावित्यर्थः । मुष्टीचान्योन्यसंवद्धावुत्तानौमुष्टिकोभवेत् । मत्स्यस्तुसंमुखीभूतौयुक्तानामकनिष्ठिकौ । ऊर्ध्वसंयुक्तवक्राग्रौशेषांगुलिदलौकरौ । अधोमुखःकरोवामस्ताद्दशादक्षिणेनतु । पृष्ठदेशेसमाक्रांतःकूर्मोनामाभिधीयते । ऊर्ध्वमध्येवामभुजःपक्षाभ्यामाश्रयेत्करम् । वराहःकथ्यतेकक्षसमीपाश्रयकेकरे । सिंहाक्रांतसमाख्यातंकर्णार्पितकरावुभौ । किंचिदाकुंचिताग्रौचमहाक्रांततःपरम् । ऊर्ध्वंकिंचिद्गतौपाणीमुद्गरोवामतर्जनी । ग्रस्तादक्षिणहस्तेनपल्लवोदक्षिणःकरः । मूर्ध्निअधोमुखःस्थितोदक्षिणःकरःपल्लवइत्यर्थः । **चंद्रिकायांमहासंहितायाम्**—नजातुदर्शयेन्मुद्रामहाजनसमागमे । **शौनकस्तुयोनिमुद्रामेवाह**—षडंगमंत्रैर्विन्यस्ययोनिमुद्रांप्रदर्शयेत् । गायत्रींसंस्मरेद्धीमान्हृदिवासूर्यमं

---

१ लक्ष्यसमीपेतिपाठः ।

डले । **कृष्णभट्टीयेव्यासः**—हस्ताभ्यांमुकुलीकृत्वानामिकामूलपर्वणः । अंगुष्ठौतुक्षिपेदुक्तामुद्रैषावाहनीबुधैः । अधोमुखीत्वियंचेत्सा त्स्थापनीमुद्रिकास्मृता । संनिधायोच्छ्रितांगुष्ठौमुष्ट्यासंयोजनीभवेत् । अंतःप्रवेशितांगुष्ठासैवसंरोधिनीमता । नमस्काराभिधामुद्राज्ञेयापाणी तुसंहतौ । प्रसार्यदक्षिणंहस्तंवामस्योपरिचक्रमात् । कनिष्ठाद्यंगुलीनांचसंकोचेनसमानयेत् । अंगुष्ठान्मूलपर्यंतंसंहाराख्येयमीरिता । हस्त योरुभयोःसम्यगुच्छ्रितामंगुलीषुच । मध्यमातर्जनीयोगात्कनिष्ठोपकनिष्ठयोः । संश्लेषाद्धेनुमुद्रेयंगोस्तनीचेश्वरप्रिया ॥ ॥ **गायत्र्याः स्वरूपमाहयोगयाज्ञवल्क्यः**—श्वेतवर्णांसमुद्दिष्टाकौशेयवसनातथा । श्वेतैर्विलेपनैःपुष्पैरलंकारैश्चभूषिता । आदित्यमंडलांतस्थाब्रह्मलो कगतातथा । अक्षसूत्रधरादेवीपद्मासनगताशुभा । **बह्वृचपरिशिष्टे**—अथमंत्रदेवतांध्यात्वाआगच्छवरदेदेविजपेमेसंनिधौभव । गायं तंत्रायसेयस्माद्गायत्रीत्वंततःस्मृतेत्यावाह्यपूजयेदिति । **चंद्रिकायांगोभिलः**—आयाहिवरदेदेवित्र्यक्षरेब्रह्मवादिनि । गायत्रिछंदसांमा तर्ब्रह्मयोनेनमोस्तुते । **व्यासः**—तेजोसीतिचमंत्रेणगायत्रीमावहेद्द्विजः । उपस्थायतुरीयेणनमस्कृत्यजपेच्चताम् । तुरीयेणेतिनमस्तेतुरीयाये त्यादिसावदोमित्यंतेन । आवाहनमंत्राणांयथाशाखंव्यवस्था ।

गायत्रीजपप्रकारमाहयोगीश्वरः—प्रणवःपूर्वमुच्चार्योभूर्भुवःस्वस्ततःपरम् । गायत्रीप्रणवश्चांतेजप्येष्वेवमुदाहृतम् । **बौ धायनः**—उभयतःसप्रणवांसव्याहृतिकांजपेदिति । **वृद्धपराशरः**—प्रणवोभूर्भुवःस्वश्चपुनःप्रणवसंयुताम् । अंत्योंकारसमायुक्तांम न्यंतेकवयःपरे । प्रणवोंतेतथाचादौआहुरन्येजपक्रमम् । आदावेवकारोव्याहृत्याचादितस्ततः । तदाद्यांचतदंतांचकुर्यात्प्रणवसंपुटाम् ।

१ संवर्तः—गायत्रीत्र्यक्षरांबालांसाक्षसूत्रकमंडलुम् । रक्तवस्त्रांचतुर्वक्त्रांहंसवाहनसंस्थिताम् । ब्रह्माणींब्रह्मदैवत्यांब्रह्मलोकनिवासिनीम् । आवाहयाम्यहंदेवींगायत्रीं सूर्यमंडलात् । इति । २ आवहेदावाहयेत् ।

देवजानीयेवृद्धमनुः—षडोंकारांजपेद्विप्रोगायत्रींमनसाशुचिः । तिस्रोव्याहृतयःपूर्वंप्रथमोंकारसंयुताः । पुनःसंहृत्यचोंकारंमंत्रस्याद्यंतयो स्तथा । तत्रैवहारीतः—प्रणवोव्याहृतयःसावित्रीचेति । अत्रयथासंप्रदायंव्यवस्थेतिपृथ्वीचंद्रः । स्मृतिरत्नावल्यांतु—तत्रैकप्रण वाग्राह्यागृहस्थैर्जपकर्मणि । गृहस्थवच्चजघन्यासाच्चवैब्रह्मचारिभिः । संपुटाचषडोंकाराभवेत्सातूर्ध्वरेतसामितिव्यवस्थेत्युक्तम् । ऊर्ध्वरेतसोनै ष्ठिकाब्रह्मचारिणश्च । वनस्थायतयः । मोक्षार्थिनंप्रत्याहवृद्धपराशरः—योनवांछतिसंतानंमोक्षमिच्छतिकेवलम् । अंत्योंकारमसौकुर्व न्नक्षरंपदमाप्नुयात् । योगयाज्ञवल्क्यस्तु—प्रणवव्याहृतीसार्धंस्वाहांतोहोमकर्मणि । प्रतिलोमाप्रकर्तव्याफट्कारांताभिचारकेइत्याह ॥ ॥ अथजपस्थानानि । याज्ञवल्क्यः—अभ्यगारेजलांतेवाजपेद्देवालयेपिवा । पुण्यतीर्थेगवांगोष्ठेसिद्धक्षेत्रेथवागृहे । शंखः—गृहेत्वे कगुणंजप्यंनद्यादौद्विगुणंमतम् । गवांगोष्ठेशतगुणमभ्यगारेशताधिकम् । सिद्धक्षेत्रेपुतीर्थेषुदेवतायाश्चसंनिधौ । सहस्रशतकोटीनामनंतंवि ष्णुसंनिधौ । कौर्मे—गुह्यकाराक्षसाःसिद्धाहरंतिप्रसभंयतः । एकांतेतुशुभेदेशेतस्माज्जप्यंसदाचरेत् । पारिजातेसंध्याकल्पे—प्रात र्नाभीकरौकृत्वामध्याह्नेहृदिसंस्थितौ । सायंजपस्तुनासाग्रेत्रिसंध्यजपलक्षणम् । योगयाज्ञवल्क्यः—तिष्ठन्यदाजपंकुर्याद्धस्तोहृदयसं मितः । आसीनजपएवस्याज्जानुमात्रेणसंमितः । विशेषांतरमाहसएव—जपस्येहविधिंवक्ष्येयथाशक्तिसमासतः । नचक्रमन्नविहसन्न पार्श्वमवलोकयन् । नापाश्रितोनजल्पंश्चनप्रावृतशिरास्तथा । पादेनपादमाक्रम्यनचैवहितथाकरौ । नैवंविधंजपंकुर्यान्नचसंश्रावयेज्जपम् । उष्णीषीकंचुकीनग्नोमुक्तकेशोगलावृतः । अपवित्रकरोऽशुद्धःप्रलपन्नजपेत्क्वचित् । क्रोधोमदःक्षुधातंद्रानिष्ठिवनविजृंभणे । श्वनीचदर्शनं निद्राप्रलापश्चजपद्विषः । एतेषांसंभवेवापिकुर्यात्सूर्यादिदर्शनम् । आचम्यवाजपेच्छेषंकृत्वावाप्राणसंयमम् । चंद्रोदयेसांबपुराणे— जपंकुर्वन्यदिष्ठीवेत्क्षुवतेजृंभतेपिवा । आचामेद्भुविन्यस्ताक्षःस्पृशेदम्भोथगोमयम् । योगयाज्ञवल्क्यः—प्रसार्यपादौनजपेत्कुक्कुटासनए

उपपातकनाशिनी । लक्षजाप्येनचतथामहापातकनाशिनी । कोटिजाप्येनराजेंद्रयदिच्छतितदाप्नुयात् । **मनुः**—सहस्रकृत्वस्त्वभ्यस्यबहिरेतत्त्रिकंद्विजः । महतोप्येनसोमासात्त्वचेवाहिर्विमुच्यते । त्रिकं प्रणवोव्याहृतित्रयंगायत्रीच । **व्यासः**—अष्टोत्तरशतंनित्यमष्टाविंशतिमेववा । विधिनादशकंवापित्रिकालेपुजपेद्बुधः । **यमस्मृतौनारसिंहेच**—सहस्रपरमांदेवींशतमध्यांदशावराम् । गायत्रींतुजपेन्नित्यंसर्वपापप्रणाशिनीम् । **याज्ञवल्क्यः**—जपन्नासीतसावित्रींप्रत्यगातारकोदयात् । संध्याप्राक्प्रातरेवंहितिष्ठेदासूर्यदर्शनात् । प्रत्यक्प्रत्यङ्मुखः । प्राक्प्राङ्मुखः । अत्रोदयोत्तरंकालांतरेसायंसंध्यावंदनेपिउत्तरावधौविधेयेनासनप्रत्यङ्मुखत्वयोर्बाधः एवंप्रातरपि । अबाधेनगतौसंभवत्यांबाधायोग्यत्वात् । **मनुः**—पूर्वांसंध्यांजपंस्तिष्ठेत्सावित्रीमार्कदर्शनात् । पश्चिमांतुसमासीनःसम्यगृक्षविभावनात् । दशेत्यापत्परमितिचंद्रिका । संभवापेक्षयाविकल्पइतिदेवजानीये । सूर्योदयनक्षत्रावधिर्जपःकाम्यः । कामनाभावेविहितदशादिसंख्याग्रहइत्याचारादर्शः । तन्न कामाश्रुतेः । आपद्यष्टसंख्येतिस्मृत्यर्थसारे । **आपस्तंबः**—सावित्रीसहस्रकृत्वआवर्तयेच्छतकृत्वअपरिमितकृत्वोवेति । अपरिमितेत्यनेनगणनानिराक्रियते ।—असंख्यातंतुयज्ञसंतज्ञसंनिष्फलंभवेदितिशंखोक्तेः । किंतु सहस्रादिभ्योऽधिकसंख्याग्रहणंपाष्ठन्यायादितिकेचित् । युक्तंत्वत्राष्टाविंशत्यादिन्यूनग्रहणमेव । सहस्रकृत्वइत्युक्त्वाशतकृत्वइतिन्यूनप्रक्रमात् । पाष्ठेतुएकादेयातिस्तोदेयाइत्यधिकोपक्रमाद्वैलक्षण्यमिति । चंद्रिकायांयोगयाज्ञवल्क्यः—ब्रह्मचार्याहिताग्निश्चशतमष्टोत्तरंजपेत् । वानप्रस्थोयतिश्चैवसहस्रादधिकंजपेत् । शतमित्यनुदितहोमिपरमितिचंद्रिका ॥

जपमालाविचारः । **माधवीयेशंखः**—कुशवृक्षांसमासीनःकुशोत्तरीयोवाकुशपवित्रपाणिःसूर्याभिमुखोवाक्षमालामादायदेवतांध्यायन्जपंकुर्यादिति । **स्कांदे**—सौवर्णराजतंताम्रंस्फाटिकंरत्नजंतथा । अरिष्टंपुत्रजीवं(?)चशंखंपद्मंतथामणिम् । कुशग्रंथिंचरुद्राक्षमुत्तमंचो

त्तरोत्तरम् । **सांबपुराणे**—प्रवालहेममुक्ताभिर्मणिरुद्राक्षपुष्करैः । दर्भारिष्टकवीजैश्चशंखैर्वाजीवकैर्जपेत् । **रामार्चनचंद्रिकायाम्**—तुलसीकाष्ठघटितैर्मणिभिर्जपमालिका । सर्वकर्मसुसर्वेषामीप्सितार्थफलप्रदा । **हारीतः**—स्फटिकेंद्राक्षकैर्मालातथैवांगुलिपर्वभिः । शंख रूप्यमयीमालाकांचनीनिंद्यजोत्पलैः । पद्माक्षकैश्चरुद्राक्षैर्विद्रुमैर्मणिमौक्तिकैः । **गौतमः**—अंगुल्याजपसंख्यानमेकमेकमुदाहृतम् । रेख याष्टगुणंपुत्रजीवै(?)र्दशगुणाधिकम् । शतंस्याच्छंखमणिभिःप्रवालैश्चसहस्रकम् । स्फटिकैर्दशसाहस्रंमौक्तिकैर्लक्षमुच्यते । पद्माक्षैर्दशलक्षंतुसौ वर्णैःकोटिरुच्यते । रुद्राक्षमधिकृत्योमासंवादेब्राह्मे । —लक्षकोटिसहस्राणिलक्षकोटिशतानिच । जपेतुलभतेपुण्यंनात्रकार्याविचारणा । शिवकार्तिकेयसंवादेलैंगे—सर्वमंत्रजपंकुर्याद्विजोरुद्राक्षमालया । **ब्राह्मे**—सशब्दाचंचलायाचत्रुटिताग्रंथिनाविना । भिन्नसूत्रेणग्रथिता पाखंडस्यपुरातनी । मालादुःखप्रदायिन्योग्रथितानिंद्यतंतुभिः । **वाराहे**—उत्तमाष्टाधिकशतंचतुःपंचाशन्मध्यमा । कनीयसीतदर्धंच परिमाणेनसुंदरि । नोच्छिष्टःसंस्पृशेत्तांतुस्त्रीणांहस्तेनधारयेत् । आकाशेस्थापनंकुर्यान्नचवामेनसंस्पृशेत् । नदर्शयेच्चकस्यापिचिंतयित्वाचगो पयेत्॥ ॥ **मालासंस्कारविधिः । मंत्रदेवप्रकाशिकायाम्**—समासेनाक्षसूत्रस्यविधानमिहकथ्यते । पंचविंशतिभिर्मोक्षस्त्रिंशद्भिर्ध नसिद्धयः । सर्वेऽर्थाःसप्तविंशत्यापंचदश्याभिचारकम् । पंचाशद्भिःकाम्यकर्मसिद्धिःस्याच्चतुरुत्तरैः । अष्टोत्तरशतैःसर्वसिद्धिरक्षैःकृतस्रजः । अन्योन्यसमरूपाणिनातिस्थूलाकृतीनिच । जंतुभिर्नविशीर्णानिनजीर्णानिनवानिच । गव्यैस्तुपंचभिस्तानिसंप्रक्षाल्यपृथक्पृथक् । ततोद्विजें द्रपुण्यस्त्रीनिर्मितंग्रंथिवर्जितम् । त्रिगुणंत्रिगुणीकृत्यसूत्रंप्रक्षाल्यपूर्ववत् । अश्वत्थपत्रैर्नवभिःपद्माकारंप्रकल्पयेत् । सूत्रमणींश्चगंधाद्भिःक्षालि तांस्तत्रनिक्षिपेत् । तारंशक्तिंमातृकांचसूत्रेचैवमणिष्वथ । विन्यस्यपूजयेदाज्यैर्जुहुयाद्भक्तिसंयुतः । मणिमेकैकमादायसूत्रेतत्रतुयोजयेत् । मुखेमुखंतुसंयोज्यंपृष्ठेपृष्ठंचयोजयेत् । प्रोक्तसंख्यान्यमेकाक्षंमेरुत्वेनाग्रतोन्यसेत् । एकैकमणिमध्येतुग्रंथिबंधंप्रकल्पयेत् । स्वयंग्रथितमालातुश

क्षयापिश्रियंहरेत् । एवंकृताक्षमालायांज्येष्ठेनावर्तयेत्क्रमात् । मुक्तिमुक्तिप्रदःसोयंमालिकागणनक्रमः । अंगुष्ठेनाक्षमालांचचालयेन्मध्य माग्रतः । तर्जन्यानस्पृशेत्सोयमुक्तिदोगणनक्रमः । अंगुष्ठमध्यमाभ्यांतुजपेदुत्तमकर्मणि । अंगुष्ठानामिकाभ्यांतुजपेदाकृष्टकर्मणि । तर्जन्यं गुष्ठयोगात्तुद्विपदुच्चाटनेजपः । कनिष्ठांगुष्ठकाभ्यांतुजपेन्मारणकर्मणि। जपान्यकालेतांमालांपूजयित्वातुगोपयेत् । जीर्णेसूत्रेपुनःसूत्रंग्रंथयित्वाशतं जपेत् । प्रमादात्पतितेहस्ताच्छतमष्टोत्तरजपेत् । जपेन्निपिद्धसंस्पर्शेक्षालयित्वायथोचितम् । अक्षसूत्रंतुनिपतेद्भूमौचेत्कुर्वतोजपम् । उद्धारं तस्यकुर्वीतजापकोहृदयेनतु । हृदयमघोरायनमइतिमत्रः । **योगयाज्ञवल्क्यः**—अंगुष्ठस्यतुमध्यस्थंपरिवर्तंसमाचरेत् । परिवर्तोभ्रमणम् । अगुष्ठाग्रेणयज्जप्तंयज्जप्तंमेरुलंघितम् । असंख्यातंतुयज्जप्तंतज्जप्तंनिष्फलंभवेत् । **स्मृतिरत्नावल्याम्**—पर्वभिस्तुजपःकार्योनांगुलीनांनिपा तनैः । तन्निपातैस्तुयज्जप्तंसर्वविद्यात्तदासुरम् । अंगुलीनामंगुष्ठनिपातेगुलिनिपेधोनेत्युक्तम् । **मंत्रदेवप्रकाशिकायाम्**—तत्रांगुलिजपं कुर्वन्सांगुष्ठागुलिभिर्जपेत् । अंगुष्ठेनविनाकर्मकृतंतदफलंभवेत् । **गौतमोपि**—अंगुष्ठेनजपेज्ञाप्यमन्यैरंगुलिभिःसह । **अगस्त्यसं हितायाम्**—मध्यमाद्यद्वयंपर्वजपकालेतुवर्जयेत् । एतंमेरुंविजानीयाद्रूपितंब्रह्मणापुरा । अस्मिन्पक्षेऽनामिकाद्वितीयपर्वप्रभृतिगणना तर्ज न्यादिपर्वणिसमाप्तिः ।' पर्वशब्दोरेखावचनइतिकेचित् । अस्मिन्पक्षेऽनामामध्यरेखामादिंकृत्वातदधःक्रमेणप्रादक्षिण्येनतर्जन्यादिरेखायां समाप्तिः । **विधानांतरंमंत्रदेवप्रकाशिकायाम्**—अंगुलीपर्वभिर्मत्रजपंनित्यंप्रकल्पयेत् । मध्यमानामिकामध्यपर्वद्वितयकल्पितम् । मेरुप्रदक्षिणीकुर्वन्ननामामूलपर्वसु । आरभ्यमध्यमामूलंपर्वांतंगणयेत्क्रमात् । अंगुलीर्नवियुंजीतकिंचिदाकुंचितेतले । अंगुलीनांवियोगेतु छिद्रेपुस्रवतेजपः । मालादेरनावश्यकतोक्ताबृद्धपराशरेण—यथाकथंचिद्गणयेत्ससंख्यंतद्भवेद्यथा । **चंद्रोदयेसंग्रहे**—प्रात.संध्यांग भूतेनगायत्र्याजपितेनच । यथासंख्येनजाप्येनब्रह्मामेप्रीयतांरविः । मध्याह्नेसायंचब्रह्मपदेक्रमाद्रुद्रविष्णुपदे प्रातःपदेमध्याह्नसायंपदेचोह्य ।

॥ ॥ **अथगायत्रीतर्पणम् । नागदेवाह्निकेप्रयोगपारिजातेच**—आचम्यप्राणानायम्यगायत्रीतर्पणंकरिष्यइतिसंकल्प्य तत्स गायत्रीपु-
वितुरितिसवितारमावाह्य गायत्रींषडंगेपुविन्यसभूःपुरुषमृग्वेदायनमस्तर्पयामि । भुवःपुरुषंयजुर्वेदायनमस्तर्पयामि । स्वःपुरुषंसामवेदायन
मस्तर्पयामि । महःपुरुषमथर्ववेदायनमस्तर्पयामि । जनःपुरुषमितिहासपुराणेभ्योनमस्तर्पयामि । तपःपुरुषंसर्वागमायनमस्तर्पयामि । सत्यं
सर्वलोकायनमस्तर्पयामि । भुर्भुवःस्वःपुरुषंमंडलांतर्गतंसवितारंतर्पयामि । सवित्रेइतिकेचित् । भूःएकपदांगायत्रींतर्पयामि । भुवःद्विपदांगा
यत्रींतर्पयामि । स्वःत्रिपदांगायत्रींतर्पयामि । भूर्भुवःस्वःचतुष्पदांगायत्रींतर्पयामि । उपसेनमस्तर्पयामि । गायत्रींनमस्तर्पयामि । सावित्रीं
नमस्तर्पयामि । सरस्वतींनमस्तर्पयामि । वेदमातरंनमस्तर्पयामि । सत्कृतिंनमस्तर्पयामि । सांकृतिमित्यपरे । पृथिवींनमस्तर्पयामि । कौ
शिकींनमस्तर्पयामि । जयांनमस्तर्पयामि । अपराजितांनमस्तर्पयामि । सहस्रमूर्तिंनमस्तर्पयामि । अनंतमूर्तिंनमस्तर्पयामीति । **कृष्णभट्टीये**
प्येवम् । श्रीशक्त्यैनमस्तर्पयामीतिकृष्णभट्टः । तन्न । मंत्रैरेभिस्तुयोनित्यंचतुर्विंशतिसंमितैः । गायत्रींतर्पयेत्तेनतर्पितंस्याच्चराचरमिति
गायत्रीकल्पविरोधात् । तत्रैव—अनेनविधिनाकुर्यात्प्रातःकालेचतर्पणम् । मध्याह्नेचैवसायंचमंत्रैरेतैश्चतर्पणम् ।

अथगायत्रीपुरश्चरणम् । तत्रकाम्येजपेभक्ष्यमुक्तमाचारादर्शे—शाकयावकभैक्ष्याणिपयोमूलफलानिच । दधिसर्पिस्तथाद्यापः
प्रशस्तंह्युत्तरोत्तरम् । चरमोह्युपवासश्चभक्ष्यंतत्क्रमयाचितम् । विशशृंगाटशालूकहविष्यान्नानियानितु । एतान्यनुव्रतान्याहुःशस्तानिजपक
र्मणि । शाकादिविकल्पेपिभक्ष्यविशेषेणजपारंभेएकादश्युपवासोपिनेतिहरिहरः । तन्न । अस्यरागप्राप्तभक्ष्यनियामकत्वेनोपवासाबाधक
त्वात् । **शारदातिलके**—व्याहृतित्रयसंयुक्तांगायत्रींदीक्षितोजपेत् । तत्वलक्षविधानेनभिक्षाशीविजितेंद्रियः । तत्त्वानिचतुर्विंशतिः ।
क्षीरौदनतिलादूर्वाःक्षीरद्रुमसमिद्वराः । पृथक्सहस्रत्रितयंजुहुयान्मंत्रसिद्धये । तर्पणादितताःकृत्वागुरुंसंतोष्ययद्व्रतः । प्रयोगानाचरेद्विद्वांस्त

॥ ४७ ॥

दनुज्ञापुरःसरम् । तर्पणादीत्यादिपदेमार्जनविप्रभोजनयोर्ग्रहः ॥ ॥ **अथप्रयोगः** ॥ योगपिठन्यासांतेशिरसिब्रह्मणेऋषयेनमः । मुखेदेवी गायत्रीछंदसेनमः । हृदयेश्रीपरमात्मनेदेवतायैनमः । पुनःशिरसिजमदग्निभरद्वाजभृगुगौतमकश्यपविश्वामित्रवसिष्ठेभ्योऋषिभ्योनमः । मुखे गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगतीभ्यश्छंदोभ्योनमः । हृदयेअग्निवायुसूर्यगुरुवरुणवृषविश्वेभ्योदेवोभ्योनमः । ततोमहाव्याहृतिभिः प्राणायामत्रयंकृत्वा शिरसिविश्वामित्रायऋषयेनमः । मुखेगायत्रीछंदसेनमः । हृदिसवित्रेदेवतायैनमः ॐब्रह्मणेहृदयायनमः । विष्णवेशिः रसेस्वाहा । रुद्रायशिखायैवषट् । ईश्वरायकवचायहुम् । सदाशिवायनेत्रत्रयायवौषट् । सर्वात्मनेऽस्त्रायफट् इतिषडंगंविधाय हृदिॐभूर्नम मुखे । एवं सर्वत्र । भुवःदक्षिणांसे । स्वःवामांसे । महःदक्षोरौ । जनःवामे । तपः जठरे । सत्यं पादांगुलिमूलयोः । तत् गुल्फयोः । सः जानुनोः । विंऊरुमूले । तुःलिंगे । वं नाभौ । वेंहृदि । णिंकंठे । यं करांगुलिमूलयोः । भंमणिबंधयोः । गोंकूर्परयोः । देंभुजमूलयोः । वं मुखे । स्यंनासिकयोः । धींकपोलयोः । मंनेत्रयोः । हिंकर्णयोः । धिंभ्रुवोः । योंशिरसि । योंचूडाधः । नःवामकर्णे । (प्रं) दक्षिणकर्णे । चों मुखे । दं शिरसि । यात्नमःशिरसि ॥ तत् भ्रूमध्ये । सवितुःनेत्रयोः । वरेण्यंमुखे । भर्गःकंठे । देवस्यहृदि । धीमहिनाभौ । धियःगुह्ये । यःजानुनोः । नःपादयोः । प्रचोदयात् पुनःशिरसि । ॐआपोज्योतीरसोमृतंब्रह्मभूर्भुवःस्वरोंनमइतिविन्यसध्यायेत् । **गायत्रीरहस्ये**— पंचवक्त्रांचतुर्बाहुंप्रतिवक्त्रंत्रिलोचनाम् । जटाकिरीटांपद्मकुक्षिंत्रिपदांस्फटिकप्रभाम् । साक्षसूत्राभयांकुशौदधतींदक्षहस्तयोः । सवारिजपत्रवं रदांलगुडंवामहस्तयोः । आत्मपूजांतेसौरपीठमभ्यर्च्य तत्रमंत्रमूर्तिंगायत्र्याःपरिकल्प्य तस्यांदेवीमावाह्य पुष्पांतैरुपचारैःसंपूज्य त्रिकोण स्याग्नेयकोणादिप्रादक्षिण्येनकोणत्रयेॐब्राह्मैनमः । माहेश्वर्यैनमः । वैष्णव्यैनमः इतिसंपूज्य कर्णिकायामेवत्रिकोणाद्बहिरैंद्यादिचतुर्दिक्षु

---

१ अत्र विश्वामित्रजमदग्निभरद्वाजगौतमात्रिवसिष्ठकश्यपाइतिक्रमोयुक्तइतिभाति ।

ॐआदित्यायनमः । रवयेनमः । भानवेनमः । भास्करायनमः । आग्नेयादिचतुष्कोणेपुउंउमायैनमः। प्रंप्रज्ञायैनमः । प्रंप्रभायैनमः । संसंध्यायैनवः । अष्टदलकेसरेपुअंगानिसंपूज्य दलेपु ब्रह्मादिन्यैनमः । प्रभायैनमः नित्यायैनमः विश्वंभरायै० विशालिन्यै० प्रभावत्यै० जयायै० शांत्यै० दलाग्रेपुकांत्यै० दुर्गायै० सरस्वत्यै० विश्वरूपायै० विशालायै० ईशायै० व्यापिन्यै० विमलायै० । द्वितीयाष्टदलमूलेपुतमोपहारिण्यै० । सूक्ष्मायै० विश्वयोन्यै० जयावहायै० पद्मालयायै० परायै० शोभायै० पद्मरूपायै० । दलमध्येपुब्राह्मयाद्याःनारसिंहीचाष्टमी ब्राह्मयै० माहेश्वर्यै० कौमार्यै० वैष्णव्यै० वाराह्यै० इंद्राण्यै० चामुंडायै० नारसिंह्यै० इति । दलाग्रेपुसोमाद्यष्टग्रहान्(सोमाय० भौमाय० बुधाय०बृहस्पतये०शुक्राय शनैश्चराय० राहवे० केतवे० इति सर्वान्संपूज्य चतुरस्रवीथीद्वयेइंद्रादीन्वज्रादींश्चइंद्राय० अग्नये० यमाय० निर्ऋतये० वरुणाय०वायवे० सोमाय० ईश्वराय० इति । वज्राय० शक्तये० दंडाय० खड्गाय० पाशाय० अंकुशाय० गदायै० त्रिशूलाय० इति संपूज्यधूपादिपूजांसमाप्यजपंकृत्वा जपदशांशेनप्रत्यहंसर्वजपांतेवाहोमंकुर्यात् । अत्रमूलंगायत्रीरहस्येज्ञेयम् । इतिगायत्रीपुरश्चरणविधिः ॥

उपस्थानम् । गायत्रीजपोत्तरंकर्तव्यमुक्तंकौर्मेगारुडयोः—सावित्रींप्रजपेद्विद्वान्प्राङ्मुखःप्रयतःशुचिः । अथोपतिष्ठेदादित्यमुदयंतंसमाहितः । **वसिष्ठः**—शास्त्रैस्तुविविधैःसौरैर्ऋग्यजुःसामसंभवैः । उपस्थानंस्वकैर्मंत्रैरादित्यस्यतुकारयेत् । **बह्वृचपरिशिष्टे**—जातवेदसेतच्छंयोरितिनमोब्रह्मणइत्येताभिःप्रदक्षिणंदिशःसाधिपान्नत्वाथसंध्यायैसाविज्यैगायत्र्यैसरस्वत्यैसर्वाभ्योदेवताभ्यश्चनमस्कृत्य । उत्तमेशिखरेदेविभूम्यांपर्वतमूर्धनि । ब्राह्मणैरभ्यनुज्ञातागच्छदेवियथासुखमितिसंध्यांविसृज्य भद्रंनोअपिवातयमनइत्युक्त्वाशार्तिचत्रिरुच्चार्यप्रदक्षिणंपरिक्रमन् । आसत्यलोकादापातालादालोकालोकपर्वतात् । येसंतिब्राह्मणादेवास्तेभ्योनित्यंनमोनमःइतिनमस्कृत्य भूमिमुपसंगृह्य

गुरून्वृद्धांश्चोपगृह्णीयादेवंसायमिति । पर्वतवासिनि । ब्रह्मणासमनुज्ञातेतिदेवजानीयेपाठः । **आश्वलायनः**—जस्वोदितेसमुत्तिष्ठन्नुपति
ष्ठेद्दिवाकरम् । ऋग्भिश्चतसृभिर्मैत्रैर्गायत्रैरेववह्वृचः । उपस्थायेतरस्त्रीयैर्मैत्रैःकुर्यात्प्रदक्षिणम् । चतुःप्रदक्षिणंकुर्याज्जपदोषापनुत्तये । तस्माद्ब्रू
रिदमित्युक्त्वाकुर्यात्पूर्वंप्रदक्षिणम् । भुवःस्वर्भूर्भुवःस्वेतिचतुर्वारंपृथक्पृथक् । ततःशक्रादिकान्नत्वापूर्ववाथप्रदक्षिणात् । तत्तन्मंत्रैरुपस्थाय
स्पृष्ट्वाभूमिंनमेद्ध्रुवम् । ततोऽभिवादयेद्भ्रौपित्रादिभ्यःसुसंयतः । कीर्तितेभ्योयथान्यायंस्वकीयंनामकीर्तयन् । **शौनकः**—सायंप्रातरुप
स्थायजातवेदसइत्यृचा । तच्छयोर्नमोब्रह्मणइत्युच्चार्यदिशोनमेत् । इममेवरुणतत्त्वेतिसायंकालेविशेषतः । मित्रस्यचर्षणीद्वाभ्यांप्रातःकालेपि
संजपेत् । पिशंगभृष्टिमित्यृचामुखंस्पृश्यप्रदक्षिणम् । भद्रंकर्णेतिमंत्रेणकर्णस्पृष्ट्वाप्रदक्षिणम् । केश्यग्निमित्यृचैकयाशिखांस्पृष्ट्वाप्रदक्षिणम् । सं
ध्यांगायत्रींसावित्रींसर्वान्देवान्प्रणम्यच । **स्मृत्यर्थसारे**—यद्वोभयत्रजातवेदसेनवैष्णवैरौद्रैर्वोपतिष्ठेतेति **नारायणः** । वारुणीभिस्तथादि
त्यमुपस्थायप्रदक्षिणम् । कुर्वन्दिशोनमस्कुर्याद्दिगीशांश्चपृथक्पृथक् । प्रदक्षिणाभिवादौचआत्मानंचाभिवादयेत् । आत्मपादौतथाभूमिंसंध्या
कालेभिवादयेत् । वारुण्यःसायंसंध्यापराइतिचंद्रिका । **तत्रैववौधायनः** सायंजपांतेरात्र्युपस्थानमाह—वारुणीभ्यांरात्रिमुपतिष्ठेत इ
ममेवरुणतत्त्वायामीतिद्वाभ्यां । दिगभिवादनेप्राच्यैदिशेइंद्रायनमः दक्षिणायैदिशेयमायनमइत्यादिप्रयोगइतिकेचित् । अन्येतु प्राच्यैदिशेयाश्च
देवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमइत्यादि**तैत्तिरीयारण्यक**मंत्रैरित्याहुः ॥

अभिवादनम् । **यमः**—ज्यायानपिकनीयांससंध्याकालेऽभिवादयेत् । विनाशिष्यंचपुत्रंचदौहित्रंदुहितुःपतिम् । **सुदर्शनभाष्ये**—
रोरेमकृज्येचिपुवृद्धिरादौठात्पेचवांत्यश्चवशाश्चयुक्षु । शेषेपुनाम्वोःकपरःस्वरोंत्यःस्वाप्वोरदीर्घःसविसर्गइष्टः । **अस्यार्थः**—रोहिणीरेवतीमघाभृ
गज्येष्ठाचित्रासुरौहिणोरैवतइतिआदिवृद्धिर्वा । नक्षत्रेभ्योबहुलमितिनक्षत्राणांवालुगुक्तेः । ठात्पेप्रोष्ठपदशब्देठकारात्परेपकारेवृद्धिः । उत्तरपदा

धिकारे जेप्रोष्ठपदानामित्युक्तेः । अंत्यमपभरणी शब्देश्रुतौतथोक्तेः । श्रवणशतभिषक्अश्वयुक्षुवाआदिवृद्धिः । अपभरणः आपभरणः श्रवणः श्रावणः शतभिषक् शातभिषजः अश्वयुक् आश्वयुजः । भरणीशब्देपिवा । नक्षत्रेभ्योबहुलम् वत्सशालेतिचवालुगुक्तेः । शेषेपुन वृद्धिर्नेत्यर्थः । कृत्तिकः तिष्यः आश्लेषः फल्गुनः हस्तः विशाखः अनूराधः अषाढः श्रविष्ठः । श्रविष्ठेत्यादिनानित्यंलुगुक्तेः । आर्म्वोरार्द्रामूलयोरंत्यःस्वरः कपरः । आर्द्रकः मूलकः पूर्वाह्णापराह्णेत्यादिनाबुन् । स्वाप्वोःस्वातीपुनर्वस्वोरंत्यःस्वरोदीर्घःसविसर्गश्च । स्वातिः पुनर्वसुः । एषांनाम्नांसंध्याभिवादने प्रथमयानिर्देशइतिसुदर्शनाचार्यः । अभिजित् आभिजितः कृत्तिकः कार्तिक इतितुयुक्तम् । धनिष्ठेत्यत्रापिवादिवृद्धिः श्राविष्ठीयःआषाढीयइत्यपिबहुलोक्तेः । तत्तन्नक्षत्रचरणाक्षरघटितंनामपठंतिशिष्टाः । **नागदेवाह्निके**—भोःशब्दंकीर्तयेदंतेस्वस्वनाम्नोभिवादने । आयुष्मान्भवसौम्येतिवाच्योविप्रोऽभिवादने । अकारश्चास्वनाम्नोंऽतेवाच्यःपूर्वोत्तरःप्लुतः । तदुत्तरकृत्यमाहवृद्धपराशरः—यदक्षरपदभ्रष्टंमात्राहीनंचयद्भवेत् । तत्सर्वंक्षम्यतांदेविकाश्यपप्रियवादिनि । **पुष्पसारसुधानिधौ**—प्रातःसंध्यावसानेतुनित्यंसूर्यंसमर्चयेत् । संध्याकालातिक्रमेप्रायश्चित्तंकर्मप्रदीपे—प्रातःसंध्यांसनक्षत्रांनोपास्तेयःप्रमादतः । गायत्र्यष्टशतंतस्यप्रायश्चित्तंविशुद्धये । प्रातःकालांतरोपलक्षणमितिपृथ्वीचंद्रः । **दक्षः**—संध्यामकुर्वतःकालेउदयेस्तमयेपिवा । गायत्र्यष्टशतंजाप्यंप्रायश्चित्तंभवेत्तदा । चतुर्ध्यंतुगायत्र्यादद्याद्याद्धतिसंयुतम् । कालातीतविशुद्ध्यर्थंततःसंध्यांसमाचरेत् । **स्कांदे**—उदयास्तमयादूर्ध्वंयावत्स्याद्घटिकात्रयम् । तावत्संध्यामुपासीतप्रायश्चित्तमतःपरम् । **संध्याकल्पेस्मृत्यंतरे**—प्राणायामत्रयंप्रातर्द्विगुणंसंगवेस्मृतम् । मध्याह्नेत्रिगुणंप्रोक्तमपराह्णेतुपञ्चगुणम् । सायाह्नेद्वादशगुणंसूर्यहत्यांततोव्रजेत् । प्रातरादिष्वकरणइत्यर्थः । **शातातपः**—निश्यर्धयामेवातीतेअर्धयामेपिवासरे । अतिकालमतिक्रांतेसंध्यालोपंनकारयेत् । संध्याकाले

१ शन्दश्रुतौ लगधज्योतिषे अग्निःप्रजापतिरित्यारभ्यअश्विनौयमएवचेतिक्रमेणांत्यमपभरणी ।

व्यतिक्रांतेजपंकृत्वापुनर्मनः । ऋचंब्रूचंतूचंवापिपुनःसंध्यामुपासयेत् । पुनस्त्वर्थे । इदंचरात्रिप्रथमयामावधि दिवोदितानीत्याद्युक्तवचनात् । तदूर्ध्वंप्रायश्चित्तमात्रम् । यदाप्रातर्मध्याह्नसायंसंध्यानामेककालेप्राप्तिस्तदाप्रातःसंध्यांपूर्वंकुर्यात् । संध्याहीनोऽशुचिर्नित्यमनर्हःसर्वकर्मसु । यदन्यत्कुरुतेकर्मनतस्यफलभाग्भवेदितिकाशीखंडे प्रातःसंध्याप्रकरणेपाठात्प्रातःसंध्यांविनाकर्मांतरेऽनधिकारात् । विज्ञानेश्वरस्तुसंध्यापदंसर्वसंध्यापरमित्याह । मध्याह्नसायंसंध्ययोःसंपातेपूर्वसायंसंध्या मध्याह्नंसंध्यायाःसायंसंध्याधिकारसंपादकत्वाभावात् । प्राप्तकालबाधेमानाभावात् एकस्यगौणकालत्वेसंभवत्युभयोर्गौणकालत्वस्यान्याय्यत्वाच्च पांचमिकसांतपनीयांतःपात्यग्निहोत्रन्यायाच्च सहालंभेसवनीयोपाकरणन्यायाच्च । यत्तुस्मृत्यंतरे—दिवोदितानिकर्माणिप्रमादादकृतानिवै । शर्वर्याःप्रथमेयामेतानिकुर्याद्यथाक्रममिति तत्सायंसंध्यामुख्यकालातिक्रमेज्ञेयम् । अतएवसायंसंध्यामुख्यकालातिक्रमेतिसूत्रणामपिगौणेकालेक्रमेणैवानुष्ठानम् । सायंसंध्यागौणकालस्तुरात्रौसार्धप्रहरावधिः । रात्रिभोजनस्यसार्धप्रहरकालोक्त्यासंध्याभावेभोजनासंभवात् प्रदोषावसानेसायंसायंसंध्यायागौणकालइतिमाधवीयेदेवजानीयेच । संध्याप्रकरणेप्रायश्चित्तंपरिभाषायामुक्तंतत्प्रतिनिधिनापिकार्यमित्युक्तम् । इतिश्रीमद्रामेश्वरभट्टसूनु० लक्ष्मणभट्टकृतावाचाररत्नेसंध्याप्रकरणम् ॥

अथौपासनहोमः । हेमाद्रौ शाट्यायनिः—ततःसूर्यमुपस्थायसम्यगाचम्यचस्वयम् । अभ्युक्षणंसमादायसंयतात्मागृहंव्रजेत् । **तत्रैवगार्ग्यः**—त्रिसंध्यांवाग्यतोवारिगुप्तमाहृत्यशोधयेत् । होमोपहारभूगेहद्रव्यात्मपरिचारकान् । **चंद्रिकायांप्रचेताः**—अभ्युक्षणोदपात्रंतुनतावत्स्थाप्यतेक्वचित् । यावन्नाचमनंदत्तंप्रोक्षितानगलंतिका । असमर्थंप्रत्याह **शांखायनिः**—नद्यादौसम्यगाचांतःसंयतोगृहमागतः । उद्धृत्यमणिकात्तोयंतेनप्रोक्षणमाचरेत् । गृहेवासमुपस्पृश्यकृत्वास्वर्णकुशोदकम् । कृत्वाचमनमाचांतःपुनःप्रोक्षणमाचरेत् । **चंद्रिकायांगोभिलसूत्रे**—पुराप्रादुष्करणवेलायाःसायंप्रातरपआहरेदनुगुप्तादपिवाकुंभाद्वामणिकाद्वागृह्णीयादिति । **तत्रैवशाट्यायनिः**—अब्जंहिरण्म

यंरौप्यंदारवंमृण्मयंदृढम् । ताम्रंपत्रपुटंपुण्यंपात्रमभ्युक्षणायवै । अभ्युक्षणकरणव्युत्पत्त्याजलं । पत्रपुटमन्यालाभपरम् । सर्वालाभेतुपात्राणांपर्णपा त्रंविधीयतइत्यापस्तंबोक्तेः । **आपस्तंबः**—शैवालवालुकादूर्वातृणपर्णायसैरपि । नालिकाभिन्नपात्रेणकांस्यपात्रेणचैवहि । प्राण्यंगफलजे नापिकुर्यान्नाभ्युक्षणंद्विजः । **शाट्यायनिः**—नाहरेदेकपात्रस्तुनाव्रतोनचकन्यका । एकपात्रःपिधानरहितपात्रः । **तत्रोग्निप्रादुष्करणंका ल्यायनः**—सूर्येस्तशैलमप्राप्तेषड्विंशद्भिःसदांगुलैः । प्रादुष्करणमग्नीनांप्रातर्भासांचदर्शनात् ॥

अथहोमः । तत्रशक्तेनार्धाधानंकृत्वाश्रौतःस्मार्तश्चहोमःकार्यः । श्रौतंस्मार्तंचयत्किंचिद्विधानंसर्वमादरात् । गृहेनिवसताकार्यमन्यदादो पसृच्छतीतिमनूक्तेः । तत्राशक्तःसर्वाधानंकृत्वाश्रौतमेवयावज्जीवंजुहुयात् यावज्जीवश्रुतेः । [एतेनैकादश्यांतमकुर्वतःपरास्ताः । अकरणे प्रत्यवायश्रुतेः अहरहरितिवक्ष्यमाणापस्तंबोक्तेश्च, होमकालातिक्रमेहोमलोपेचप्रायश्चित्तोक्तेश्च, कर्मस्मार्तविवाहाग्नौकुर्वीतप्रत्यहंगृहीति याज्ञवल्क्योक्तेश्च, अग्निहोत्रंचजुहुयादाद्यंतेद्युनिशोःसदेतिमनूक्तेः, अथतत्रैववसतिहोमकालव्यतिक्रमः । लौकिकोऽग्निर्विधीयेतका ठकश्रुतिदर्शनादितिचंद्रिकायांशौनकोक्तेः, पक्षहोमैश्चतुर्दशचतुर्गृहीतानुपपत्तेश्च, सप्तशतानिविंशतिश्चसंवत्सरेसायमाहुतयोहूयंतेससश तानिविंशतिश्चप्रातरित्यादिश्रुत्यनुपपत्तेश्च यत्किंचिदेतत्] । त्रीणिवर्षाणिविप्राइतिभारतात् यावज्जीवाशक्तौवर्षत्रयंवाजुहुयात् । येचा ग्निहोत्रंजुह्वतिश्रद्दधानायथाम्नायमितिस्मृतेः । तत्राप्यशक्तःस्मार्तमेवजुहुयान्नत्वादध्यात् तत्राप्यशक्तःसदाचारमात्रंकुर्यान्नस्मार्तमपि । श्रौतं कर्मनचेच्छक्तःकर्तुंस्मार्तंसमाचरेत् । तत्राप्यशक्तःकरणेसदाचारंलभेद्बुधइतिचंद्रिकायांव्यासोक्तेः । **कौर्मे**—अथागम्यगृहंविप्रः समा चम्ययथाविधि । प्रज्वाल्यवह्निंविधिवज्जुहुयाज्जातवेदसम् । तत्रश्रौतंस्मार्तंवाहोमंयजमानएवस्वयंकुर्यात् । अहरहर्यजमानःस्वयमग्निहोत्रंजु हुयात्पर्वणिवेत्यापस्तंबोक्तेः । अत्रपर्वणिस्वयमेवेतिनियमोनतुपर्वण्येवस्वयमिति । पाणिग्रहणादिगृह्यंपरिचरेत्स्वयंपत्न्यपिवापुत्रःकुमार्यंतेवा

सीवेत्याश्वलायनोक्तेः । स्वस्याशक्तौमाधवीयेचंद्रिकायांचशातातपः—आतयत्स्वात्स्वपुत्रान् ..... ॥ ॥
तमप्यन्यःकुर्यादाचारमंततः । **चंद्रोदयेगारुडे**—ऋत्विक्पुत्रोगुरुर्भ्राताभागिनेयोऽथविट्पतिः । एतैरेवहुतंयत्स्यात्तद्धुतंस्वयमेवतु । विट्पतिर्जामाता । **तत्रैवकौर्मे**—ऋत्विक्पुत्रोथवापत्नीशिष्योवापिसहोदरः । पत्नीस्मार्तएव । कामंगृह्येप्यौजुहुयात्सायंप्रातर्होमाविति**गोभिलोक्तेः** । **स्मृत्यर्थसारे**—पत्नीकन्याचजुहुयाद्विनापर्युक्षणक्रियाम् । अत्रऋत्विक्त्रिधा—प्रतिकर्मवृतः, परंपरागतः, एकस्यसर्वकर्मार्थंसकृद्वृतश्च । आद्ययोरेवहोमकर्तृत्वमितिवृत्तिकृत् ॥ ॥ **अन्यकर्तृकहोमेविशेषः । स्मृत्यर्थसारे**—असमक्षंतुदंपत्योर्होतव्यंनर्त्विगादिना । द्वयोरप्यसमक्षंचेद्व्रजेद्धुतमनर्थकम् । **कात्यायनः**—प्रक्षिप्याग्निंखदारेषुपरिकल्प्यर्त्विजंतथा । प्रवसेत्कार्यवान्विप्रोवृथैवनचिरंवसेत् । **स्मृत्यर्थसारे**—संनिधौयजमानःस्यादुद्देशत्यागकारकः । असंनिधौतुपत्नीस्यादुद्देशत्यागकारिका । असंनिधौतुपत्न्याःस्यादध्वर्युस्तदनुज्ञया । उन्मादेप्रसवेचतौकुर्वीतानुज्ञयासदा । सर्वदायजमानोवात्यजेत्तद्विमुखःशुचिः । **मनुः**—उदितेऽनुदितेचैवसमयाध्युषितेतथा । सर्वथावर्ततेयज्ञइतीयंवैदिकीश्रुतिः ॥ ॥ **अनुदितादिलक्षणमाह कात्यायनः**—रात्रेःस्तुपोऽशेभागेग्रहनक्षत्रभूषिते । कालंत्वनुदितंज्ञात्वाहोमंकुर्याद्विचक्षणः । तथाप्रभातसमयेनष्टेनक्षत्रमंडले । रविर्यावन्नदृश्येतसमयाध्युषितंचतत् । रेखामात्रंचदृश्येतरश्मिभिश्चसमन्वितः । उदितंतंविजानीयात्तत्रहोमंप्रकल्पयेत् । अनुदितहोमःकार्तीयछंदोगपरः । उदितहोमोबह्वृचपरइति**मदनपारिजातः** । अनुदितहोमिभिरर्घ्यंदत्वासूर्योदयात्पूर्वंहुत्वागायत्रीजप्या । उदितहोमिभिस्तुजप्त्वाहोतव्यमिति**पृथ्वीचंद्रः** । उभयोःसंध्यांसमाप्यहोमइति**कल्पतरुः** ॥ ॥ **अनुदितहोमिनोगौणकालमाह कात्यायनः**—हस्तादूर्ध्वंरविर्यावद्गिरिंहित्वानगच्छति । तावद्धोमविधिःपुण्योनान्योऽनुदितहोमिनाम् । यावत्सम्यङ्नभाव्यंतेनभस्पृक्षाणिसर्वतः । नचलोहितिमापैतितावत्सायंचहूयते । रजोनीहारधूमाभ्रवृक्षाग्रांतरितेरवौ । संध्यामुद्दिश्यजुहुयाद्र

तमस्यनलुप्यते । सायंत्वर्धास्तमितेसूर्येनुदितहोमिनोहोमकालः । अस्तमितेतूदितहोमिनः । **तथाचोशनाः**—अर्धमंडलसंप्राप्तेभानावनुदितेहुतम् । तस्मिन्नस्तमितेहोमोभवेदुदितएवतु ॥ ॥ मुख्यगौणकालावाह**आपस्तंबः**—तस्मात्संधौहोतव्यंनक्षत्रंदृष्ट्वाप्रदोषेनिशायांवासायमिति । संधिरर्धास्तोदयौनक्षत्रमेकं सर्वोदयःप्रदोषः द्वितीययामोनिशेति**माधवः** । सायंप्रातश्चसंधिर्मुख्यकालः नक्षत्रदर्शनादयस्त्रयःसायं गौणाइति**माधवपृथ्वीचंद्रौ** । **धूर्तस्वामिभाष्येरामांडारेच**चत्वारोमुख्यकालाइत्युक्तम् । प्रातर्होमकालश्चतुर्धा**आपस्तंबेन**ोक्तः । उपस्युपोदयं–समयाध्युषितं–उदितं–प्रातरिति**आश्वलायनः** । प्रदोषांतोहोमकालःसंगवांतःप्रातस्तमतिनीयचतुर्गृहीतमाज्यंजुहुयादिति प्रदोषातिक्रमेप्रायश्चित्तविधानात्तदंतोमुख्यःकालइतिकश्चित् । तन्न । संधौतदुत्तरंचहोमेफलतुल्यतापत्तेः । अतःसंधिरेवमुख्यः । कालातिपत्तिर्नवनाडिकोर्ध्वमितिचंद्रिका । प्रातर्द्वादशनाडिकोर्ध्वंकालचतुष्टयातिपत्तिः । **स्मृत्यर्थसारे**—प्रातर्होमःसंगवांतःकालस्त्वनुदितस्तथा । सायमस्तमितेहोमकालस्तुनवनाडिकाः । संगवःपंचधाभक्तदिनद्वितीयांशः । **रामांडारोप्येवम्** । कालातिक्रमेप्रायश्चित्तोर्ध्वमपिहोमःकार्यः । यदिगृह्येग्नौसायंप्रातर्होमयोर्हव्यंहोतारंनाधिगच्छेत्कथंकुर्यादित्यासायमाहुतेःप्रातराहुतिर्निर्वेत्याप्रातराहुतेःसायमाहुतिरिति**गोभिलोक्तेः** । गृह्यइतिश्रौतस्याप्युपलक्षणम् । अनौचित्यापत्तेः । आसायमितिनकालग्रहणम् । आहुतिपदवैयर्थ्यादितिकेचित् । तन्न । सायंहोमोनलब्धश्चेत्तस्यांरात्रावभोजनम् । प्रातर्होमोनलब्धश्चेत्तदहर्भोजनंत्यजेत् । तावताहोमसिद्धिःस्यात्तत्प्रायश्चित्तमिष्यतइति**त्रिकांडमंडन**विरोधात् । अत एवचंद्रिकायामासायमित्यनेनकालग्रहणं उत्तरस्मिन्कालआगतेहोमश्चेदनिवृत्तः पूर्वस्सेयंकालातिपत्तिः तस्यांप्रायश्चित्तंमनोज्योतिरित्यादशरात्रमिति**भरद्वाजोक्तेरित्युक्तम्** । वह्वृचानांत्वतीतवहुहोमानुष्ठानम् ।—अतीतहोमान्कृत्वादौकालहोमंततश्चरेदिति**शौनकोक्तेः** । **वृत्ति**कृताप्येवमुक्तमितिप्रयोगपारिजातः । **आश्वलायनवृत्तावपि**—विहृतेष्वग्निष्वहुतेपुहोमांतरकालप्राप्तावुपक्रांतमेवहोमंकालातिपत्ति

प्रायश्चित्तसहितंकृत्वावर्तमानकालमनुद्धृतप्रायश्चित्तसहितंकुर्यात् । अविहृतेपुकालांतरप्राप्तौमनस्तीहोममतिपन्नस्यप्रतिहोमंचकृत्वाअनुद्धृतप्रायश्चित्तादीनि । इदमनापत्परम् । आपदितुनकिंचित्प्रायश्चित्तंकिंतुहोममात्रंकुर्यात् । आपदितुहोममित्येवप्रतीयादितिबौधायनोक्तेः । **छंदोगपरिशिष्टे**—स्वगृह्योक्तेनविधिनाहोमंकुर्याद्यथाविधि ॥ ॥ **अर्धाधानिनोहोमक्रममाह चंद्रोदयेभरद्वाजः**—होमंवैतानिकेकृत्वास्मार्तेकुर्याद्विचक्षणः । स्मृतीनांवेदमूलत्वात्स्मार्तकेचित्पुराविदुः । **विष्णुः**—बहुशुष्कैंधनेचाग्नौसुसमिद्धेहुताशने । विधूमेलेलिहानेच होतव्यंकर्मसिद्धये । योनार्चिषुजुहोत्यग्नौव्यंगारेचैवमानवः । मंदाग्निरामयावीचदरिद्रश्चोपजायते । पात्रादावुद्धृतेह्यग्नौनहोमादिसमाचरेत् । **दामोदरीयेसांबपुराणे**—क्षुत्तृट्क्रोधत्वरायुक्तोहीनमंत्रैर्जुहोतियः । अप्रबुद्धेसधूमेवामोघःस्यादन्यजन्मनि । क्षुत्तृपौग्रमादादेरुपलक्षणमितिरत्नाकरः । स्वल्पेरूक्षेसस्फुलिंगेवामावर्तेभयानके । आर्द्रकाष्ठैःसुसंपूर्णेफूत्करोतिचपावके । कृष्णार्चिषिसुदुर्गंधेतथालिंपतिमेदिनीम् । आहुतीर्जुहुयाद्यस्तुतस्यनाशोभवेद्ध्रुवम् । **मदनपारिजातेकात्यायनः**—जुहुयुश्चहुतेचैवपाणिशूर्पास्यदारुभिः । नकुर्यादग्निधमनंनकुर्याद्व्यजनादिना । **व्रतहेमाद्रौ**—मुखेनैवधमेदग्निंमुखादेपोह्यजायत । नाग्निंमुखेनेतितुयल्लौकिकेयोजयंतितत् । **काल्यायनः**—हविष्येपुयवामुख्यास्तदनुव्रीहयःस्मृताः । अभावेव्रीहियवयोर्दध्नावापयसापिवा । तदभावेयवाग्वावाजुहुयादुदकेनवा । **स्मृत्यर्थसारे**—पयोदधियवागूश्चसर्पिरोदनतंडुलाः । सोमोमांसंतैलमापोदशैतान्यग्निहोत्रके । स्यादग्निहोत्रवद्दर्व्येसंस्कारोमंत्रवर्जितः । शालिश्यामाकनीवाराव्रीहिगोधूमयावकाः । एतेपांतंडुलाहोम्यायावनालाःप्रियंगवः । प्रियंगवःशालयश्चगोधूमाव्रीहयोयवाः । सारूप्येणापिहौम्याःस्युःस्वरूपेणैववैतिलाः । अव्रीहिपदंपाष्टिकपरम् । **छंदोगपरिशिष्टे**—मापकोद्रवगौरादि(?)सर्वालाभेपिवर्जयेत् । **शौनकः**—दध्यादीनामपक्वानांनाधिश्रयणमुच्यते । उल्मुकेनावज्वलयेदपक्वंपक्वमेवच । सायंहोमेद्रव्यंचप्रातरपिग्राह्यंकर्मैक्यात् । यदिसायंगृहीतंद्रव्यंप्रातर्नलभ्यतेतदाप्रतिनिधिभूतंद्रव्यांतरंग्राह्यं

नतुवैकल्पिकंद्रव्यांतरम् । बृहस्पतिः—प्रस्थधान्यंचतुःषष्टिराहुतिःपरिकीर्तिता । तिलानांतुतदर्धंस्यात्तदर्धंस्याद्भृतस्यतु । बौधायनः—व्रीहीणांवायवानांवाशतमाहुतिरिष्यते । कात्यायनः—पाण्याहुतिर्द्वादशपर्वपूरिकारसादिनाचेत्स्रुवमात्रपूरिका । दैवेनतीर्थेनचहूयतेहविःस्रंगारिणिस्रर्चिपितचपावके । द्वादशपर्वपूरिकाद्रव्यासंभवे टोडरानंदेशंखः—आर्द्रामलकमात्रावैग्राह्याइंदुव्रतेस्मृताः । तथैवाहुतयोग्नौचशौचार्थेयाचमृत्तिका । बहृचपरिशिष्टे—शतंचतुःषष्टिर्वाहुतिर्व्रीहितुल्यानांतदर्धंतिलानांतदर्धंसर्पिस्तैलयोरिति । गोभिलसूत्रे कृतंचेत्प्रक्षाल्यजुहुयादिति । चंद्रिकायांशातातपः—तीर्थायतनसंसृष्टंप्रातरुत्तानपाणिना । व्यंगुलंसमिधोतीत्यसर्वत्रजुहुयाद्बुधः । चंद्रोदयेसंग्रहे—द्रवंस्रुवेणहोतव्यंपाणिनाकठिनंहविः । याज्ञवल्क्यः—हुत्वाग्नीन्सूर्यदेवत्यान्जपेन्मंत्रान्समाहितः । आपत्तौ मरीचिः—प्रवसन्नग्निहोत्रीयस्त्रिपंचाश्वाहरादितः । दातव्योहोमएकाहेसायंप्रातःपृथक्पृथक् । तथान्यास्वपिचापत्सुपक्षहोमोविधीयते । तत्प्रकारोमैत्रायणीयपरिशिष्टे—पर्वणोतेसायंचतुर्दशचतुर्गृहीतानिसकृदुन्नयनमेकासमित्सकृद्धोमः सकृत्पाणिमार्जनंसकृदुपस्थानमित्येवंप्रातरिति । स्मृत्यर्थसारे—पक्षहोमानशेषान्वाशेषहोमानथापिवा । समस्तजुहुयात्तत्रप्रयोगोयंनिरूप्यते । प्रतिपद्युन्नयेत्सायमापद्यन्यत्रवादिने । यावंत्यौपवसथ्याहात्प्राग्दिनानिभवंतिहि । तावंतिपरिगृह्णीयाच्चतुरुन्नयनानितु । एवमेवोत्तरत्रापिप्रातर्होमान्समस्यतु । जुहोत्यौपवसथ्याहात्प्रातर्होमावधीन्सकृत् । एवमेकत्रपक्षेयेहोमास्तेषामशेषतः । न्यूनानांवासमासःस्यान्नपक्षांतरवर्तिनाम् । सर्वथौपवसथ्याहेसायंहोमःपृथग्भवेत् । तथैवयजनीयाहेप्रातर्होमोभवेत्पृथक् । तत्रैव—तृतीयेऽनंतरेपक्षेसमासंनसमाचरेत् । आपद्येदनुवर्तेतदीर्घकालंकथंचन । यावज्जीवमविच्छिन्नंपक्षहोमंसमाचरेत् । यत्तुचंद्रिकायाम्—यदिपक्षहोमेनपक्षत्रयमतीयात्पुनराधेयमिति तदनापत्तिपरम् । पक्षहोमेकृतेतत्पक्षमध्येआपन्निवृत्तावाह मरीचिः—पक्षहोमानथोकृत्वागत्वाऽकस्मान्निवर्तितः । होमंपुनःप्रकुर्याच्चुनचासौदोषभाग्भवेत् । पक्षहोमानित्युपलक्षणम् । अतःशेषहोमा

दावप्येवम् । चंद्रिकायांवैजवापः—एकेभ्युदितहोमाःस्युरन्येनुदितहोमिनः । अन्येभोजनहोमाश्चपक्षहोमास्तथापरे । शौनकः—अग्नावनुगतेयत्रहोमकालद्वयंव्रजेत् । उभयोर्विप्रवासेवालौकिकोऽग्निर्विधीयते । स्मार्तपरमिदम् । सर्वांश्चेदनुगतानादित्योभ्युदियाद्वाभ्यस्तमियाद्वाग्न्याधेयंपुनराधेयंवासमारूढेपुचारणीनाशेइत्याश्वलायनोक्तेः । यस्यचोभावनुगतावभिनिम्लोचेदभ्युदियाद्वापुनराधेयंतस्यप्रायश्चित्तमित्यापस्तंबाच्च । कात्यायनः—विहायाग्निंसभार्यश्चेत्सीमामुल्लंघ्यगच्छति । होमकालात्ययेतस्यपुनराधानमिष्यते । शौनकः—अथतत्रैववसतिं होमकालव्यतिक्रमः । लौकिकोग्निर्विधीयेतकाठकश्रुतिदर्शनात् । प्रोषितेतुयदापत्नीपत्यौग्रामांतरंव्रजेत् । होमकालेयदिप्राप्तानसादोषेणयुज्यते । त्रिकांडमंडनः—अग्निहोत्रेणरहितःपंथानंशतयोजनम् । आहिताग्निःप्रयायाच्चेदग्निहोत्रंविनश्यति । विनाग्निभिर्यदापत्नीनदीमंबुधिगामिनीम् । अतिक्रामेत्तदाग्नीनांविनाशःस्यादितिश्रुतिः । अब्दंस्वयमजुह्वन्योहावयेद्ऋत्विगादिना । तस्यस्यात्पुनराधानंपवित्रेष्टिरथापिवा । होमातिक्रमेप्रायश्चित्तमुक्तंकारिकायाम्—नित्यहोमेत्वतिक्रांतेसंस्कृत्याज्यंचपूर्ववत् । चतुःकृत्वागृहीत्वाज्यंमनस्त्वाजुहोत्यथ । आद्वादशदिनादेवंमूर्ध्वं विच्छिद्यतेऽनलः[1] । प्रायश्चित्तंतुयत्रोक्तमग्नित्यागेपपातके । मनुनातत्प्रकुर्वीततत्तत्कालानुसारतः । प्रायश्चित्तंकृत्वाहोमंकुर्यात् । कालातीतेपुहोमेपुउत्तरेष्वागतेपुच । कालातीतानिहुत्वैवउत्तराणिसमाचरेत् । यस्त्वतीतान्यनुक्रम्यउत्तराणिसमारभेत् । नदैवान्नैवचमुनीन्हविस्तदुपतिष्ठत इतिस्मृतिरत्नावल्यांवचनात् । पुलस्त्यः—अकालेचेत्कृतंकर्मकालंप्राप्यपुनःक्रिया । कालातीतंतुतत्कुर्यादकृतंतद्विनिर्दिशेदिति तद्वादशाहोत्तरंज्ञेयम् । द्वादशेतिवद्बृचपरम् । आपस्तंबानांतुचतूरात्रमहूयमानोग्निर्लौकिकइत्यापस्तंबोक्तेः । औपासनविच्छेदेप्रायश्चित्तमाह चंद्रोदयेभरद्वाजः—एकाग्निर्द्वादशाहविच्छिन्नःपुनराधेयोदीर्घकालविच्छेदेऽतिकृच्छ्रमिति । विच्छिन्नोऽहुतः । यत्तुशौनकः—

---

[1] देवंपूर्वंविच्छिद्यतेइतिपाठः ।

होमद्वयात्पयेदर्शपूर्णमासात्पयेतथा । पुनरेवाग्निमादध्यादितिभार्गवशासनमिति तच्छ्रौताग्निपरम् । दर्शपूर्णमाससाहचार्यात् । **आपस्तंबः**—नासतियजमानेग्राममर्यादामग्नीनतिहरेयुर्लौकिकाःसंपद्येरन्निति । **ग्रामसीमोक्तादेवीपुराणे**—नगराद्योजनंखेटःखेटाद्ग्रामोऽर्धयोजनम् । द्विक्रोशंपरमासीमाक्षेत्रसीमाचतुर्धनुः । **चंद्रिकायाम्**—यावंत्योग्राममर्यादानद्यश्चस्युस्ताअतिक्रामंतावन्वारभेयातामाद्यंतयोर्वायदिन लौकिकाःसंपद्येरन्निति । **जातूकर्ण्यः**—विनाग्निभिर्यदापन्नीनदीमंबुधिगामिनीम् । अतिक्रामेत्तदाग्नीनांविनाशःस्यादितिश्रुतिः । **चंद्रिकायांवृद्धांगिराः**—मासत्रयपण्मासादिविच्छेदेऽर्धकृच्छ्रकृच्छ्रातिकृच्छ्रंप्रायश्चित्तम् । **भरद्वाजगृह्येपि**—यावत्कालमहोमीस्यात्तावद्द्रव्यमशेषतः । तद्देयंचैवविप्रेभ्योयथाहोमस्तथैवतत् ॥ ॥ ब्रह्मचारिणःसंध्योत्तरंकर्मोक्तं **मदनरत्नेकौर्मे**—सायंप्रातर्द्विजःसंध्यामुपासीतसमाहितः । अग्निकार्यंततःकुर्यात्संध्ययोरुभयोरपि । देवताभ्यर्चनंकुर्यात्पुष्पैःपत्रेणवांबुना । **तत्रैवलौगाक्षिः**—सायमेवाग्निमिंधेतेत्येकइति । **याज्ञवल्क्यः**—भैक्षाग्निकार्येत्यक्त्वातुसप्तरात्रमनातुरः । कामावकीर्णइत्याभ्यांजुहुयादाहुतिद्वयम् । उपस्थानंततःकुर्यात्संमार्सिंचत्वनेनतु । कामावकीर्णोस्म्यवकीर्णोस्मिकामकामायस्वाहा । कामावपन्नोस्म्यवपन्नोस्मिकामायस्वाहेति । एतद्गुरुकार्यव्यग्रतयाअकरणेज्ञेयम् । अन्यथातु **मनुः**—अकृत्वाभैक्षचरणमसमिध्यचपावकम् । अनातुरःसप्तरात्रमवकीर्णिव्रतंचरेत् । **विज्ञानेश्वरोप्येवम्** । सकृल्लोपेतुऋग्विधाने—मानस्तोकेजपेन्मंत्रंशतसंख्यंशिवालये । अग्निकार्यविनाभुङ्क्तेनपापंब्रह्मचारिणः ॥ ॥ **अथव्रत्याहनियमाः । चंद्रिकायांपुलस्त्यः**—सकृत्पर्वणिसर्पिष्मद्धविष्यंलघुभोजनम् । नसायंनोपवासःस्यात्तैलामिषविवर्जनम् । **आपस्तंबः**—अतृप्तिश्चान्नस्यचैतयोःप्रियंस्यात्तदस्मिन्नहनिभुंजीयातामधश्शयीयातामिति । **भरद्वाजः**—वर्जयेत्पर्वकालेतुस्त्रीतैलामिषवृक्षजम् । **सांख्यायनः**—कलहंक्रीतविक्रीतंप्रहासंबहुभाषणम् । तौर्यत्रिकंवृथाशय्यांयक्ष्यमाणोविवर्जयेत् । **जाबालिः**—कोविदारान्कुलित्थांश्चवर्जयेत्कोद्रवांस्तथा । दंतशौचंचपूर्वेद्युर्यागस्यैता

निवर्जयेत् । मसूरालँवणाक्षारांश्चणकान्कोरदूषकान् । मापान्मधुपरान्नंचवर्जयेत्पर्वणिद्विजः । **गृह्यपरिशिष्टे**—शाकंमांसंमसूरांश्चअणवः कोरदूषकाः । वर्ज्याइतिशेषः । **आपस्तंबसूत्रे** आधानप्रकरणे ऋवीसमन्नंनाश्नीयादिति । ऋवीसमन्तरुष्म । **बौधायनः**—सर्वमेवैतद हःकोशामुद्गमापादिधान्यंवर्जयेदन्यत्रतिलेभ्यइति । **स्मृत्यर्थसारेदिवोदासीये**—लवणंमधुमांसंचक्षारानश्नन्नहूयते (?)। उपवासेनभुंजीतउरात्रौचकिंचन । **मिताक्षरायां स्मृत्यर्थसारेच**—यआहिताग्नेर्धर्मःस्यात्स्मार्तोपासनिकस्यच । इतिश्रीमद्रामेश्वरभट्टसूनुश्रीमन्नरायण०लक्ष्मणभट्टकृतावाचाररत्नेहोमप्रकरणम् ॥

अथहोमोत्तरंकर्म । मदनरत्नेमरीचिः—विधायदेवतापूजांप्रातर्होमादनंतरम् । **शौनकः**—प्रातर्मध्यंदिनेसायंविष्णुपूजांसमाचरेत् । अशक्तौविस्तरेणैवप्रातःसंपूज्यकेशवम् । मध्याह्नेचैवसायंचपुष्पांजलिमपिक्षिपेत् । **हलायुधः**—प्रातःकालेसदाकुर्यान्निर्माल्योद्वासनंबुधः । **प्रयोगपारिजातेक्रियासारे**—मध्यमानामिकामध्येपुष्पंसंगृह्यपूजकः । अंगुष्ठतर्जन्यग्राभ्यांनिर्माल्यमपनोदयेत् । अपनीतंच निर्माल्यंचडेशायनिवेदयेत् । मध्यमानामिकाभ्यांदेवोपरिपुष्पंधृत्वानिर्माल्यमपनोदयेदित्यर्थः । **वाराहे**—निर्माल्यंशिरसोत्तार्यधार्यंशिरसिचालनः । **लिंगेविशेषस्तत्रैव**—अशून्यंमस्तकंलिंगेसदाकुर्वीतपूजकः । **विष्णुधर्मोत्तरे**—उशीरकूर्चकंदत्वासर्वपापैःप्रमुच्यते । दत्वा गोवालजंकूर्चंसर्वपापंव्यपोहति ॥ ॥ **अथनित्यदानम् । भारते**—एकेनांशेनधर्मस्तुकर्तव्योभूतिमिच्छता । एकेनांशेनकामस्तुएकमंशं विवर्धयेत् । **स्मृतिरत्नावल्यां याज्ञवल्क्यः**—दातव्यंप्रत्यहंपात्रेनिमित्तेपुविशेषतः । निमित्तंग्रहणादि । अत्रकेचित्प्रत्यहश्रवणादहनियदाकदाचिन्नित्यदानमाहुः । **भट्टदिनकरस्तु**—उपोयेतेप्रयामेपुयुंजतेमनोदानायसूरयइतिमंत्रालिंगाद्धोमात्पूर्वंनित्यदानमाह । **चंद्रोदये वामनपुराणे**—होमंचकृत्वालभनंशुभानांततोगृहान्निर्गमनंप्रशस्तम् । दूर्वांचसर्पिर्दधिचोदकुंभंधेनुंसवत्सामृषभंसुवर्णम् । मृद्गोमयंस्वस्ति

कमक्षताश्चतैलंमधुब्राह्मणकन्यकाश्च । श्वेतानिपुष्पाणितथाशमींचहुताशनंचंदनमर्कबिल्वम् । अश्वत्थवृक्षंचसमालभेततत्तश्चकुर्यान्निजजातिधर्मान् । नित्यदानांतंकर्माष्टधाविभक्तदिनाद्यभागेकार्यम् । तदुक्तंनारसिंहे—दिवसस्याद्यभागेतुसर्वमेतत्समाचरेत् ॥ ॥ **दिनद्वितीयभागकृत्यं दक्षः**—द्वितीयेचतथाभागेवेदाभ्यासोविधीयते । चतुर्धाभक्ताहर्द्वितीयइतिस्मृतिरत्नावल्यां । **कौर्मे**—जपेदध्यापयेच्छिष्यान्धारयेद्वैविचारयेत् । समित्पुष्पकुशादीनांसकालःसमुदाहृतः ॥ ॥ **दिनतृतीयभागकृत्यं दक्षः**—तृतीयेचतथाभागेकुर्यादर्थस्यसंग्रहम् । **याज्ञवल्क्यः**—उपेयादीश्वरंचैवयोगक्षेमार्थसिद्धये । इदंचशक्तस्यनित्यंध्यार्थत्वात् । **मनुः**—देवतान्यधिगच्छेत्तुधार्मिकांश्चद्विजोत्तमान् । ईश्वरं चैवरक्षार्थंगुरूनेवचपर्वसु । **छागलेयः**—यतीनांदर्शनंचैवस्पर्शनंभाषणंतथा । कुर्वाणःपूयतेनित्यंतस्मात्पश्येत्तुनित्यशः । अग्निचित्कपिलासत्रीराजाभिक्षुर्महोदधिः । दृष्टमात्राःपुनंत्येतेतस्मात्पश्येत्तुनित्यशः । **विष्णुपुराणे**—ततःस्वधर्मेणवृत्त्यर्थंचधनार्जनम् । धनार्जनेप्रवासकालनियममाह **चंद्रिकायांपैठीनसिः**—मासद्वयंप्रवासोस्तिपरतोनाहिताग्निवत् । आहिताग्निवदनाहिताग्नेरपिमासद्वयमेवप्रवासः ।

अथदिनचतुर्थभागेमध्याह्नस्नानम् । तच्चदिवसचतुर्भागे । तथाचदक्षः—चतुर्थेतुतथाभागेस्नानार्थंमृदमाहरेत् । अरुक्कदिवाचरेत्स्नानंमध्याह्नात्प्राग्विशेषतः । **यत्तुस्मृतिरत्नावल्याम्**—दिनतृतीयेभागेमध्याह्नस्नानमुक्तंतत्पंचधाभागपरम् । **दक्षः**—प्रयतोमृदमादायदूर्वामार्द्रंचगोमयम् । **भविष्ये**—नात्यर्थंदेहजीर्णायावंध्यायाश्चविशेषतः । रोगार्तनवसूतायानगोर्गोमयमाहरेत् । गृहीत्वागोमयंस्वच्छंस्थानेचपतितंशुभे । उपर्यधश्चसंत्यज्यप्रत्यग्रंजंतुवर्जितम् । **चंद्रिकायाम्**—मृत्तिकातुसमुद्दिष्टाआर्द्रामलकमात्रिका । गोमयस्यप्रमाणंतत्त्रेधांगंलेपयेत्ततः । त्रेधात्रिवारम् । **प्रयोगपारिजातेदेवजानीयेच**—नंदायांभार्गवदिनेकृत्तिकासुमघासुच । भरण्यांभानुवारेचगजच्छायाद्वयेतथा । अयनद्वितयेचैवमन्वादिषुयुगादिषु । मृदास्नानंपिंडदानंनकुर्यात्तिलतर्पणम् । विवाहव्रतचूडासुवर्षमर्धंतदर्धकम् । मृदास्नानंन

कुर्वीतनिशिसंध्यागृहेषुच । नैमित्तिकेपिचस्नानेतथाभौमार्कवारयोः । त्रयोदश्यांचसप्तम्यांभरण्यांकृत्तिकासुच । **वसिष्ठेनमृत्तिकास्नाने** प्रकारांतरमुक्तम्—मृदैकयाशिरःक्षाल्यंद्वाभ्यांनाभेस्तथोपरि । पुनश्चतिसृभिःकार्यंपङ्भिःपादौतथैवच । **स्मृतिप्रदीपिकायाम्**—कटिःसक्थी ऊरुजंघेचरणौचत्रिभिस्त्रिभिः । तथैवहस्तावाचम्यनमस्कुर्याज्जलंतुतत् । ततो**गोमयस्नानमाह यमः**—आचम्यगोमयेनापिमानस्तोक्येति समालभेत् । अग्रमग्रमितिस्मृत्वामानस्तोकेनवापुनः । मार्जयेद्गोमयंप्राज्ञःसोदकंभानुदर्शितम् । मार्जयेल्लेपयेत् ।

अथबौधायनोक्तःस्नानविधिः—अथहस्तौप्रक्षाल्यकमंडलुंमृत्पिंडंचपरिगृह्यतीर्थंगत्वात्रिःपादौक्षालयेत्त्रिरात्मानमथापोभिग्रपद्यतेहिरण्यशृंगंवरुणमित्यथांजलिनाउपहंतिसुमित्रियानआपओषधयःसंत्वितितांदिशंनिरीक्षतियस्यामस्द्वेष्योभवति दुर्मित्रियास्तस्मैस्युरित्यपउपस्पृश्य त्रिःप्रदक्षिणमुदकमावर्तयतियदपांक्रूरंयदमेध्यंयदशांतंतदपगच्छतादित्यप्सुनिमज्योन्मज्यचांतःपुनराचामेत् आपोवाइदꣳसर्वंविश्वाभूतान्यापः प्राणावाआपःपुनंतुपृथिवीमितिपवित्रेकृत्वाद्विर्मार्जयत्यापोहिष्ठेतितिसृभिर्हिरण्यवर्णाइतिचतसृभिःपवमानःसुवर्जनइत्यनुवाकेनचांतर्जलगतोघमर्षणेनत्रीन्प्राणायामान्कृत्वोत्तीर्यवासोनिष्पीड्यक्षालितोरुरहतानिवासांसिपरिधायेति । उपहंति गृह्णंति ॥

अथकात्यायनोक्तः—अथातोनित्यस्नानंनद्यादौमृद्गोमयकुशतिलसुमनसआहृत्योदकांतंगत्वाशुचौदेशेस्थाप्यप्रक्षाल्यपाणिपादौकुशोपग्रहोवद्धशिखोयज्ञोपवीत्याचम्योरुंहीतितोयमामंत्र्यावर्तयेद्घेतेशतमितिसुमित्रियानइत्यपोंजलिनादायदुर्मित्रियाइतिद्वेष्यंप्रतिनिपिंचेत्कटिवस्त्यूरुजंघेचरणौकरौमृदात्रिस्त्रिःप्रक्षाल्याचम्यनमस्योदकमालभेदंगानिमृदेदंविष्णुरितिसूर्याभिमुखोनिमज्जेदापोअस्मानितिस्नात्वोदिदाभ्यइत्युन्मज्यनिमज्योन्मज्याचम्यगोमयेनविलिंपेन्मानस्तोकइतिततोभिपिंचेदिमंमेवरुणेतिचतसृभिरिदमापउदुत्तमंमुंचंत्ववभृथेत्यंतेचैतन्निमज्योन्मज्याचम्यदर्भैः पावयेदापोहिष्ठेतितिसृभिरिद्मापोहविष्मतीर्देवीरापइतिद्वाभ्यामापोदेवीर्द्युपदादिवशंनोदेवीरपांरसमपोदेवीःपुनंतुमेतिनवभिः चित्पतिर्मेत्योंका

रेणव्याहृतिभिर्गायत्र्यावादावंतेचांतर्जलेघमर्षणंत्रिरावर्तयेत् द्रुपदांवायंगौरितिवातृचंप्राणायामंवासशिरसमोमितिविष्णोर्वास्मरणमिति । सुमनसामभावेतुलसादि । अग्र्याहितत्वात्पाणिशब्दस्यपूर्वनिपातः । तेनपूर्वदक्षिणोपक्रमंचरणौप्रक्षाल्यपाणीक्षालयेदित्यर्थः । कुशानामुपग्रहोधारणंयस्येतिधृतकुशइत्यर्थः । अंतेचैतदिति इमंमेवरुणइत्याद्यष्टभिर्मंत्रैरभिषेकोवक्ष्यमाणमंत्राभिषेकोत्तरमपिकार्यइत्यर्थः । आदावंतेचेति आपोहिष्ठेत्यादौचित्यतिर्मापुनात्वित्यस्यांतेच प्रणवव्याहृतिगायत्रीभिरभिषिंचेदित्यर्थः । नित्यंमध्याह्नस्नानंतेनास्यविधेर्नैमित्तिकस्नानादावप्राप्तिः प्रकृतिविकृतिभावस्यचनित्यपदेननिरासात् । अन्यथाप्रातःस्नानमित्येवावक्ष्यत् । प्रातःस्नानेतुयथाहनीत्यतिदेशाद्दक्षेणनित्यत्वोक्तेश्चतत्प्राप्तिरितिनिर्णयचिंतामणिः । तन्न । ग्रहणादिस्नानेधर्माभावप्रसक्तेश्च । एषस्नानविधिरित्यस्यातिदेशार्थत्वाच्च ॥

अथाश्वलायनपरिशिष्टोक्तम्—मध्यंदिनेतीर्थमेत्यधौतपादपाणिमुखोद्विराचम्यायतप्राणःस्नानंसंकल्प्यसदर्भपाणिः शुचौदेशेखनित्रेणभुवंगायत्र्याखात्वोपरिमृदंचतुरंगुलमुद्वास्याधस्तान्मृदंतथाखात्वागायत्र्यादायगर्भमुद्वासितयाप्रतिपूर्यमृदमुपात्तांशुचौतीरेनिधायगायत्र्याप्रोक्ष्यतच्छिरसात्रेधाविभज्यदक्षिणंभागमस्त्रेणदिक्षुदशसुविक्षिप्योत्तरंतीर्थेक्षिप्त्वातृतीयंगायत्र्यभिमंत्रितमादित्यायदर्शयित्वातेनमूर्ध्नआपादात् गायत्र्याप्रणवेनवासवांगमनुलिप्य सुमित्र्यानआपओषधयःसंत्वितिसकृदद्भिरात्मानमभिषिच्यदुर्मित्रियास्तस्मैभूयासुर्योस्मान्द्वेष्टियंचवयंद्विष्मइतिमृदमद्भिःप्रक्षालयेदथवरुणप्रार्थनादिनातर्पणांतोक्तेनविधिनास्नायान्नास्मिन्प्राग्ब्रह्मयज्ञांगतर्पणाद्वस्त्रंनिष्पीडयेदपुत्रादयोह्यंतेतर्प्याभौमादिषुगृहेचनमृदास्नायादिति । वरुणप्रार्थनादिप्रातःस्नानउक्तम् ॥

अथपाद्मभविष्योत्तरोक्तः—अनुद्धृतैरुद्धृतैर्वाजलैःस्नानंसमाचरेत् । तीर्थंप्रकल्पयेद्विद्वान्मूलमंत्रेणमंत्रवित् । नमोनारायणायेतिमूलमंत्रउदाहृतः । दर्भपाणिस्तुविधिनास्त्राचांतःपयतःसुधीः । चतुर्हस्तसमायुक्तंचतुरस्रंसमंततः । प्रकल्प्यावाहयेद्गंगामेभिर्मंत्रैर्विचक्षणः ।

विष्णुपादप्रसूतासिवैष्णवीविष्णुदेवता । त्राहिनस्त्वेनसस्तस्मादाजन्ममरणांतिकात् । तिस्रःकोट्योर्धकोटीचतीर्थानांवायुरब्रवीत् । दिविभुव्यंतरिक्षेचतानितेसंतिजाह्नवि । नंदिनीत्येवतेनामदेवेषुनलिनीतिच । क्षमापृथ्वीचविहगाविश्वकायाशिवासिता । विभावरीसुप्रसन्नातथालोकप्रसादिनी । एतानिपुण्यनामानिस्नानकालेप्रकीर्तयेत् । भवेत्संनिहितातत्रगंगात्रिपथगामिनी । सप्तवाराभिजप्तेनकरसंपुट्योजितम् । मूर्ध्निक्षित्वाजलंभूयस्त्रिचतुःपंचसप्तवा । स्नानंकुर्यान्मृदातद्वदामंत्र्यचविधानतः । अश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंधरे । मृत्तिकेहरतत्सर्वंयन्मया दुष्कृतंकृतम् । उद्धृतासिवराहेणकृष्णेनशतबाहुना । नमस्तेसर्वभूतानांप्रभवारणिसुव्रते । एवंस्नात्वाततःपश्चादाचम्यंचविधानतः । उत्थायवाससीधौतेअक्लिन्नेपरिधायच । अयंविधिःस्त्रीशूद्रादेरपीत्याचारादर्शः ॥

अथस्नानभेदाः । शंखः—स्नानंतुद्विविधंप्रोक्तंगौणमुख्यप्रभेदतः । तयोस्तुवारुणंमुख्यंतत्पुनःषड्विधंभवेत् । नित्यंनैमित्तिकंकाम्यं क्रियांगंमलकर्षणम् । क्रियास्नानंततःषष्ठंस्नानंतत्रमताक्रिया । तल्लक्षणानिसएवाह—अस्नातस्तुपुमान्यावद्धोंनित्याग्निहवनादिषु । प्रातःस्नानं तदर्थंतुनित्यंस्नानंप्रकीर्तितम् । चंडालश्वपचपादिस्पृष्ट्वास्नातोरजस्वलाम् । स्नानार्हस्तुयदास्नातिस्नानंनैमित्तिकंतुतत् । पुण्यस्नानादिकंयत्तुदैवज्ञविधिचोदितम् । तद्धिकाम्यंसमुद्दिष्टंनाकामस्तत्करोतिवै । जप्तुकामःपवित्राणिअर्चिष्यन्देवताःपितॄन् । स्नानंसमाचरेद्यस्तुक्रियांगंतत्प्रकीर्तितम् । मलापकर्षणंनामस्नानमभ्यंगपूर्वकम् । सरःसुदेवखातेषुतीर्थेषुचनदीषुच । क्रियास्नानंसमुद्दिष्टंस्नानंतत्रमताक्रिया । मध्यंदिनीयमपि नित्यमुक्तं **माधवीयेविष्णुः**—स्नानार्होयोनिमित्तेनकृत्वातोयावगाहनम् । आचम्यप्रयतःपश्चात्स्नानंविधिवदाचरेत् । **योगयाज्ञवल्क्यः**—तूष्णीमेवावगाहेतयदास्नादशुचिःपुमान् । विधिवदितिनित्यस्नानधर्मातिदेशः । अतएवदैवपित्र्यविवर्जितमित्युक्तम् । क्रियांगे

पिनित्यधर्माइतिमाधवीये । ग्रहणनिमित्तस्नानेपि—गंगास्नानंप्रकुर्वीतग्रहणेचंद्रसूर्ययोः । महानदीपुचान्यासुस्नानंकुर्याद्यथाविधीतिभारतात् धर्मप्राप्तिः । अनेकेषांस्नानानामेककालपातेनित्यनैमित्तिककाम्यानामुत्तरोत्तरेणपूर्वपूर्वस्यप्रसंगसिद्धिरन्येषांतंत्रता ॥

अथस्माननिमित्तानि ॥ मदीयाःश्लोकाः—शैवान्पाशुपतांस्तथाचितिखरांश्चर्मारलोकयतान्कैवर्तांजरकान्नटोष्ट्रबुरुडान्मिल्लानुदक्याशुनः । यूपंधीवरसूतिगृध्रपतितान्शूद्रान्वृकान्नास्तिकानस्थार्द्रशवकाकसूकरशिवागोमायुमद्यैडकान् । व्यंगवानरविडालदीपिकादीपतैलचितिधूमनीलिकाः । अश्वकुक्कुरवराहदेवलान्साविकाशुचिमदिष्णुदाहकान् । स्पृष्ट्वादुःस्वप्नवांतेपुविरक्तक्षुरमैथुने । श्मशानाक्रांत्यजीर्णेपुस्नायादभ्युदयास्तगे । शैवपाशुपतयोरनधिकारिणोःस्नानमितिमदनपारिजातः । श्रोत्रियादीनांसाक्षिनिषेधवद्दोषाभावेपिवाचनिकंस्नानमित्यपि सएव । लोकायतो बौद्धः । उदक्या रजस्वला । विकर्मस्थशूद्रस्पर्शेस्नानंनशूद्रमात्रस्य । विकर्मस्थान्द्विजान्शूद्रान्सवासाजलमाविशेदिति हारीतोक्तेश्च । शूद्रोच्छिष्टंद्विजःस्पृष्ट्वाउच्छिष्टंशूद्रमेववा । शुचिमप्यवगुह्यैनंसवासाजलमाविशेदितिचंद्रिकायांव्यासोक्तेश्च । एतच्चकर्मकाले । अस्वर्ग्याह्याहुतिःसास्याच्छूद्रसंस्पर्शदूषितेतिवचनात्—द्वावप्यंत्यांत्यजौस्पृष्ट्वासवासाजलमाविशेत् । अन्येष्वाचमनंप्रोक्तंक्रियायांस्नानमाचरेदिति पराशरोक्तेश्च । मदनपारिजाते—अंसजाम्लेच्छशवरादयइतिकुल्लूकभट्टः । अंत्यजांश्चाहविज्ञानेश्वरीयेंगिराः—चंडालश्वपचक्षत्तासूतोवैदेहकस्तथा । मागधायोगवौचैवसप्तैतेंत्यावसायिनः । पराशरस्त्वन्यानाह—रजकश्चर्मकारश्चनटोबुरुडएवच । कैवर्तमेदमिल्लाश्चसप्तैतेत्वंत्यजाःस्मृताः । यत्तु रजकादिस्पर्शेआचमनमुक्तंतच्छिरोभिन्नांगस्पर्शे । शिरःस्पर्शेस्नानमिति प्रायश्चित्तशूलपाणिः । शिरःपदंनाभेरूर्ध्वांगोपलक्षणमिति चंद्रिका । अस्थिनरस्यैव । नारंस्पृष्ट्वास्थिसस्नेहमितिमनूक्तेः । इदंद्विजास्थिविषयम् । अन्यस्मिंस्तु स्निग्धेत्रिरात्रमस्निग्धेत्वहोरात्रमितिविज्ञानेश्वरादयः । अमानुषेत्वस्थनि विष्णुः—भक्ष्यवर्ज्यपंचनखंशवंतदस्थिचस्पृष्ट्वापूर्ववद्वस्त्रंस्वयं

क्षालितंविभृयादितिचंद्रिकायामंगिराः । साध्वाचारानतावत्स्यात्स्नातापिस्त्रीरजस्वला । यावत्प्रवर्तमानंचरजोनविनिवर्तते । स्नायाद्रजसि निर्वृत्तेशौचार्थंतुततःपुनः । रोगेणरजःप्रवृत्तौनाशुचित्वमित्युक्तं चंद्रिकायांयाज्ञवल्क्यः—उदक्याशुचिभिःस्नायात्संस्पृष्टस्तैरुपस्पृशेत् । तैःस्पृष्टैः । इदंचाचेतनस्पृष्टस्पर्शे । चेतनस्पर्शेतुस्नानम् । दिवाकीर्तिमुदक्यांचपतितंसूतिकांतथा । शवंतत्स्पृष्टिनंचैवस्पृष्ट्वास्नानेनशुद्ध्यतीति मनूक्तेः । तृतीयस्यत्वाचमनम् । तत्स्पृष्टिनंस्पृशेद्यस्तुस्नानंतस्यविधीयते । ऊर्ध्वमाचमनंप्रोक्तंद्रव्याणांप्रोक्षणंतथेतिसंवर्तोक्तेः । इदंचाकामविषयम् । कामतस्तृतीयस्यापिस्नानम् । पतितचंडालसूतिकोदक्याशवस्पृष्टितत्स्पृष्ट्युपस्पर्शेसचैलम् । उदकोपस्पर्शनाच्छुद्ध्येदितिगौतमोक्तेः । तत्स्पृष्टिपदेनपतितस्पृष्टिग्रहणमित्याचारादर्शेः । यत्तुकौर्मे—तत्स्पृष्टस्पृष्टिनंस्पृष्ट्वाबुद्धिपूर्वंद्विजोत्तमः । आचामेत्तस्यशुद्ध्यर्थंग्राहदेवःपितामहइति तदशक्तविषयम् । चतुर्थस्यत्वाचमनम् । संग्रहे—अबुद्धिपूर्वसंस्पर्शेद्वयोःस्नानंविधीयते । त्रयाणांबुद्धिपूर्वेतुतत्स्पृष्टिन्याय कल्पनेतिमाधवीयेसंग्रहोक्तेः । उपस्पृशेच्चतुर्थस्तुतदूर्ध्वंप्रोक्षणंस्मृतमितित्रैवस्मृतेश्च । विज्ञानेश्वरीयेप्येवं । चंद्रोदये—कटधूमस्पृशंवांतंविरक्तंक्षुरकर्मिणम् । मैथुनाचरितारंचस्पृष्ट्वास्नानंनविद्यते । भोजनोर्ध्वंमुहूर्तोर्ध्ववांतेस्नानमिति स्मृत्यर्थसारेकृष्णभट्टीयेच । प्रायश्चित्तशूलपाणिस्तु स्नानंमापमसूराद्यन्नपरम् । मसूरमापमांसानिभुक्त्वायोवमतिद्विजः । त्रिरात्रमुपवासोस्यप्रायश्चित्तंविधीयते । प्राणायामैस्त्रिभिःस्नात्वाघृतंप्राश्यविशुद्ध्यतीतियमोक्तेः । पर्युषितवांतेस्नानम् । भोजनदिनेत्वाचमनमिति श्राद्धहेमाद्रौचंद्रिकायामाचारादर्शेच । मिताक्षरायांतु—अश्नन्भुक्त्वार्द्रपाणिर्वाचांतोनस्नानमाचरेत् । अन्यदावमनेस्नायात्तथाशोकाश्रुपातनइतियोगयाज्ञवल्क्योक्तेर्वमनेपिस्नानमुक्तम् । वस्त्रान्तरितस्पर्शेप्रचेताः—वस्त्रान्तरितसंस्पर्शःसाक्षात्स्पर्शेभिधीयते । साक्षात्स्पर्शेतुयत्प्रोक्तंतद्वस्त्रांतरितेपिच । शूलपाणावापस्तंबः—एकशाखांसमारूढश्चांडालादिर्यदाभवेत् । ब्राह्मणस्तत्रनिवसन्स्नानेनशुचितामियात् । आदिशब्दा

दुदक्यादीनि । शाखाग्रहणमेकावयव्युपलक्षणम् । तेनैकपापाणादेरपिग्रहणमितिशूलपाणिः । शाखास्पिकाष्ठादिपुचंडालेनसहावस्थितः स्नायान्नसचैलमितिसएव । एतदपवादमाहशूलपाणौपराशरः—रथ्याकर्दमतोयानिनावःपंथास्तृणानिच । स्पर्शनान्नप्रदुष्यंतिपकेष्टकचितानिच । तृणानीतिवहुवचनादेकतृणस्पर्शेस्नानमितिशूलपाणिः । माधवीयेशातातपः—येनकेनचिदभ्यक्तश्चंडालंसंस्पृशेद्यदि । अहोरात्रोषितःस्नात्वापंचगव्येनशुद्ध्यति । उच्छिष्टःसंस्पृशेद्विप्रोमद्यशूद्रशुनोऽशुचीन् । अहोरात्रोषितःस्नात्वापंचगव्येनशुद्ध्यति । हेमाद्रौ कौर्मे—उच्छिष्टोऽद्भिरनाचांतश्चंडालान्स्पृशतिद्विजः । प्रमादाद्वैजपेत्स्नात्वागायत्र्यष्टसहस्रकम् । मनुः—यस्तुच्छायांश्वपाकस्यनाह्मणोवाधिगच्छति । तत्रस्नानंतुतस्यैवघृतंप्राश्यविशुध्यति । शूलपाणौवृद्धशातातपः—अशुचिसंस्पृशेद्यस्तुएकएवसदुष्यति । तंस्पृष्ट्वान्योनदुष्येतसर्वद्रव्येष्वयंविधिः । चंद्रिकायां श्मश्रुकर्मण्यपिस्नानमुक्तम् ॥ ॥ स्पृष्टास्पृष्टौहेमाद्रौशातातपः—ग्रामेतुयत्रसंस्पृष्टिर्यात्रायांकलहेपुच । ग्रामसंदूषणेचैवस्पृष्टिदोषोनविद्यते । संग्रामेराजमार्गादौयज्ञेपुप्रकृतेपुच । उत्सवेपुचसर्वेपुस्पृष्टास्पृष्टिर्नदुष्यति । बृहस्पतिः—तीर्थविवाहेयात्रायांसंग्रामेदेशविप्लवे । नगरग्रामदाहेचस्पृष्टास्पृष्टिर्नदुष्यति । दानेविवाहेयज्ञेचमहोत्पातेरुजागमे । आपद्यपिचकष्टायांसद्यःशौचं विधीयते इतियाज्ञवल्क्योक्तेः । एतद्यत्राहमनेनस्पृष्टइतिनज्ञातंतद्विषयमितिहेमाद्रिः । मदनपारिजातेप्येवम् । उच्छिष्टाशुचिस्पर्शपरमितिचंद्रिकायां । शातातपः—काकविष्ठोपघातेसचैलंस्नानंव्याहृतिहोमंचकुर्यादिति । वालस्यास्पृश्यस्पर्शे आपस्तंवः—अन्नप्राशनात्प्रयताभवंत्यासंवत्सरादित्येकेयावतावादिशोनप्रज्ञायंतइति । स्मृतिप्रदीपिकायाम्—शिशोरभ्युक्षणंप्रोक्तंवालस्याचमनंस्मृतम् । रजस्वलादिसंस्पर्शेस्नानमेवकुमारके । तल्लक्षणंतु—प्राक्चूडाकरणाद्वालःप्रागन्नप्राशनाच्छिशुः । कुमारकस्तुविज्ञेयोयावन्मौंजीनि बंधनम् । आशार्के—सर्वत्रास्पृश्यसंस्पर्शेवारुणंस्नानमुच्यते ॥ ॥ रात्रिस्नानेविशेषमाह चंद्रिकायांयमः—विप्रःस्पृष्टो

॥ ५७ ॥

निशायांतुउदक्यापतितादिना । दिवानीतेनतोयेनसस्नायादग्निसंनिधौ । **माधवीयेमरीचिः**—दिवाहृतंतुयत्तोयंगृह्येदिनविद्यते । प्रज्वाल्याग्निंततःस्नायान्नदीपुष्करिणीषुच । **पराशरः**—यदिगेहेनतोयंस्यात्तदाशुद्धिःकथंभवेत् । धान्नोधान्नेतिमंत्रेणगृह्णीयादग्निसंनिधौ । **आतुरादिविषये** सएव—आतुरेस्नानउत्पन्नेदशकृत्वोह्यनातुरः । स्नात्वास्नात्वास्पृशेदेनंततःशुद्ध्येत्सआतुरः । स्नानेनैमित्तिकेप्राप्तेनारीयदि रजस्वला । पात्रांतरिततोयेनस्नानंकृत्वाव्रतंचरेत् । सिक्तगात्रामवेदद्भिःसांगोपांगाकथंचन । नवस्त्रपीडनंकुर्यान्नान्यद्वासश्चधारयेत् । **चंद्रिकायामुशनाः**—ज्वराभिभूतायानारीजरसाचपरिप्लुता । कथंतस्याभवेच्छौचंशुद्धिःस्यात्केनकर्मणा । चतुर्थेहनिसंप्राप्तेस्पृशेदन्यातुतांस्त्रियम् । सासचैलावगाह्यापःस्नात्वास्नात्वापुनःस्पृशेत् । दशद्वादशकृत्वोवाआचमेच्चपुनःपुनः । अंतेचवाससांत्यागस्ततःशुद्धाभवेत्तुसा । दद्याच्छक्त्याततोदानंपुण्याहेनविशुध्यति । **शंखः**—रथ्याकर्दमतोयेनष्ठीवनाद्येनवापुनः । नाभेरूर्ध्वंनरःस्पृष्टःसद्यःस्नानेनशुद्ध्यति । **स्मृत्यर्थसारे**—यत्रपुंसःसचैलंस्यात्स्नानंतत्रसुवासिनी । कुर्वीतैवाशिरःस्नानंशिरोरोगीजटीतथा ।

अथामलकस्नानम् । चंद्रिकायांक्रतुः—षष्ठींचसप्तमींचैवनवमींचत्रयोदशीम् । संक्रांतौरविवारेचस्नानमामलकैस्त्यजेत् । **योगयाज्ञवल्क्यः**—धात्रीफलैरमावास्यासप्तमीनवमीषुच । यःस्नायात्तस्यहीयंतेतेजआयुर्धनंसुताः । **व्यासः**—श्रीकामःसर्वदास्नानंकुर्वीतामलकैर्नरः । **सायणीयेबृहस्पतिः**—सर्वकालंतिलस्नानंपुण्यंव्यासोब्रवीन्मुनिः । **षट्त्रिंशन्मते**—तथासप्तम्यमावास्यासंक्रांतिग्रहसूतिषु । धनपुत्रकलत्रार्थीतिलपिंडंनसंस्पृशेत् । **प्रयोगपारिजातेबृहद्वसिष्ठः**—आसीनःप्राङ्मुखोभूत्वातैलाभ्यंगंसमाचरेत् । **व्रतहेमाद्रौमात्स्ये**—तस्मात्कृतोपवासेनस्नानमभ्यंगपूर्वकम् । वर्जनीयंप्रयत्नेनरूपघ्नंतत्परंनृप । **पाद्मेमाघमाहात्म्ये**—उपोष्यैकादशींशुक्लांतैलाभ्यंगः कृतस्तथा । द्वादश्यांप्राग्भवेद्देहेतेनव्याघ्रमुखोऽभवत् । अत्र **मदीयःश्लोकः**—दिग्विष्टिव्यतिपातवैधृतियुगादिष्वेवमन्वादिपुश्राद्धेजन्मदिने

व्रतेवमदिनेनंदासुरिक्तासुच । ऋष्यश्यर्कतिथौवसावहिदिनेकामोत्तराफल्गुनीज्येष्ठार्द्राहरिभेपुशुक्रगुरुभौमार्केपुजन्मत्रये । तैलाभ्यंगंनकुर्वीतम तिमानेपुसर्वदा । दिग्दशमी । अमवदिनंदिनक्षयः । नंदाः प्रतिपत्षष्ठ्येकादश्यः । रिक्ताश्चतुर्थीनवमीचतुर्दश्यः । ऋषिःसप्तमी । अग्नि स्तृतीया । अर्कःद्वादशी । तिथिःपूर्णिमामावास्ये । वसुरष्टमी । अहिःपंचमी । कामस्त्रयोदशी । हरिभंश्रवणः । अत्रमूलंचंद्रोदयादिपु स्पष्टम् । **आयुर्वेदसंहितायाम्**—नाभ्यंगस्त्रवालानांवृद्धानांतुनदोषदः । तत्रपूर्वोक्तेषु । **चंद्रिकायांसंग्रहे**—स्त्रीणांतुबुधवारेणतैला भ्यंगंविवर्जयेत् । **कृष्णभट्टीये**—सोमवारेतथाभ्यंगंपुत्रवान्वर्जयेत्सदा । **मार्कंडेयः**—अपुष्टिःकांतिरल्पायुर्घनंनिर्धनतांतथा । अनारो ग्यंसर्वकाममभ्यंगाद्धास्करादिषु । अन्यद्रव्ययुतंतैलंनदुष्यतिकदाचन । **चंद्रिकायांयमः**—घृतंचसार्षपंतैलंयत्तैलंपुष्पवासितम् । नदोषः पक्वतैलेपुस्नानाभ्यंगेषुनित्यशः । **आयुर्वेदसंहितायाम्**—निषिद्धतिथिवारर्क्षग्रहणेष्वपिरात्रिषु । किंचिद्दोघृतसंयुक्तंविप्रपादरजोन्वितम् । **तिथ्यालोके**—रवौपुष्पंगुरौदूर्वाभूमिंभूमिजवासरे । भार्गवेगोमयंदद्यात्तैलदोषोपशांतये । **षट्त्रिंशन्मते**—सूर्यशुक्रादिवारेपुनिषिद्धा सुतिथिष्वपि । स्नानेवायदिवास्नानेपक्वतैलंनदुष्यति । अत्रतिलतैलमेवनिषिद्धं । तिलानामिदंतैलमितिविकारतद्धितात् । सार्षपादौतुतैलशब्दो गौणः । अयंचतिथिनिषेधोभ्यंगएवननित्यस्नानादौ ।—पुत्रजन्मनिसंक्रांतौश्राद्धेजन्मदिनेतथा । नित्यस्नानेचकर्तव्येतिथिदोषोनविद्यतइतिगा ग्र्योक्तेः । यद्यच्छिकंतुयत्स्नानंभोगार्थंक्रियतेद्विजैः । तन्निषिद्धंदशम्यादौनित्यनैमित्तिकेविनेति**चंद्रिकोक्तेः** । **मनुः**—शिरःस्नातस्तुतैले ननांगंकिंचिदुपस्पृशेत् । तैलेनशिरसोभ्यंगोत्तरमन्येनापितैलेननांगाभ्यंगः । सार्षपादिनातुतदभ्यंगेउभयाभ्यंगेवानदोषः । यद्वाशिरोभ्यंगशेष स्यैवनिषेधः । शिरोभ्यक्तावशिष्टेनतैलेनांगंनलेपयेदिति **देवलोक्तेरितिकुल्लूकभट्टः** । **अमांप्रकृत्यचंद्रिकायांप्रचेताः**—तैलंचन स्पृशेदाम्रवृक्षादींश्चनकर्तयेत् । तत्रैव**बौधायनः**—अष्टम्यांचचतुर्दश्यांनवम्यांचविशेषतः । शिरोभ्यंगंवर्जयेत्तुपर्वसंधौतथैवच । तत्रैव**गर्गः**—

॥ ५८ ॥

पंचदश्यांचतुर्दश्यामष्टम्यांरविसंक्रमे । द्वादश्यांसप्तमीषष्ठ्योस्तैलस्पर्शंविवर्जयेत् । तत्रैवहारीतः—पंचमींदशमीचैवपौर्णमासीत्रयोदशीम् । तथैवैकादशींचैवयस्तैलमुपसेवते । अभ्यंगात्स्पर्शनाद्वापिभक्षणाच्चतथैवच । उत्तीर्णातस्यवृद्धिःस्याद्धनापत्यबलायुषाम् ॥

अथोष्णोदकस्नानम् । तत्रमदीयःश्लोकः—रवौसप्तमीश्राद्धषष्ठीव्रतेपुत्रजन्माहसंक्रांतिजन्मन्यनिंदौ । ग्रहेस्पृश्यसंस्पर्शनेपौर्णमास्यां मृतौवर्जयेत्स्नानमुष्णोदकेन । अत्रमूलंहेमाद्र्यादौस्पष्टम् । मैथुनेक्षौरेचोष्णोदकंनेतिकृष्णभट्टः । अस्पृश्यस्पर्शेउष्णोदकनिषेधोदिवसे । अस्पृश्यस्पर्शनेस्नानंनिश्युष्णेनजलेनचेति **स्मृत्यर्थसारात्** । यत्तुपराशरः—वृथाह्युष्णोदकस्नानंवृथाजाप्यमवैदिकम् । यच्चयाज्ञवल्क्यः—अशुचिस्पर्शदुष्टाभिरुद्धृताभिस्तुमानवः । स्नानंसमाचरेद्यस्तुनसशुद्ध्यतिकर्हिचिदिति तद्गंगोदकभिन्नपरम् । बृहन्मनुः—स्नातस्य वह्नितप्तेनतथैवपरवारिणा । शरीरशुद्धिर्विज्ञेयानतुस्नानफलंलभेदिति तदनातुरस्य । तीर्थसत्वेतु—भूमिष्ठमुद्धृतंवापिशीतमुष्णमथापिवा । गांगंपयःपुनात्याशुपापमामरणांतिकमितिहेमाद्रौमरीच्युक्तेः । चिरंपर्युषितंवापिशूद्रस्पृष्टमथापिवा । जाह्नव्याःस्नानदानादौपुनात्येवसदापयइति तत्रैवादित्यपुराणाच्च । यत्तुपट्त्रिंशन्मते—आपःस्वभावतोमेध्याःकिंपुनर्वह्निसंयुताः । तस्मात्संतःप्रशंसंतिस्नानमुष्णेनवारिणेति तदातुरपरम् । आदित्यकिरणैःपूतंपुनःपूतंतुवह्निना । आम्नातमातुरेस्नानंप्रशस्तंचोष्णवारियदितिचंद्रिकायांयमोक्तेः । अनातुरस्यापितीर्थाभावे—नित्यंनैमित्तिकंकाम्यक्रियांगंमलकर्षणम् । तीर्थाभावेतुकर्तव्यमुष्णोदकपरोदकैरितियमोक्तेः । मरणादिषुतुतीर्थाभावेपिनोष्णोदकस्नानंकिंतुपरोदकैरुद्धृतैर्वेतिचंद्रिका । तत्रेतिकर्तव्यतामाहव्यासः—शीतास्वप्सुनिषिच्योष्णामंत्रसंभारयोगतः । गृहेपिशस्यतेस्नानंतद्धीनमफलंभवेत् । संभारा मृदादयः । **मंत्रमहोदधौ**—तीर्थाभावेस्वसदनेस्नायादुष्णेनवारिणा । हस्तयोरपआदायकुर्यात्तत्राघमर्षणम् । **स्मृत्यर्थसारे**—उद्धृतजलस्नानेमार्जनंकार्यम् । अघमर्षणंजलतर्पणंचानित्यमित्युक्तम् **गृह्यपरिशिष्टे**—नशीतोदकेनशीतोष्णो

दकेनगृहेस्नायान्मंत्रविधिंवर्जयेत्वहिर्वाशुचौदेशेसर्वंपश्चात्कुर्यादिति । **पारिजातेआश्वलायनः**—स्नानमध्येत्वाचमनंतर्पणंवस्त्रपीडनम् । करपात्रगतंतोयंगृहएतानिवर्जयेत् । गृहस्नानेनकुर्वीततर्पणंमार्जनंतथा । नांतराचमनंकुर्यात्पश्चादाचम्यशुद्ध्यति । **चंद्रोदयेयोगयाज्ञव ल्क्यः**—यापीकूपगृहस्नानेसूतकेमृतकेतथा । मासोच्चारंनकुर्वीततज्जलंरुधिरंभवेत् ॥ ॥ **अथमंत्रस्नानंबह्वृचपरिशिष्टे**—शुचौदेशे शुचिराचांतः प्राणानायाम्यसव्येपाणावपःकृत्वातिसृभिरापोहिष्ठीयाभिस्त्रिःपच्छःप्रणवपूर्वंदर्भोदकैर्मार्जयेत् पादयोर्मूर्ध्निहृदयेमूर्ध्निहृदयेपादयो र्हृदयेपादयोर्मूर्ध्निचायार्षशोमूर्ध्निहृदयेपादयोर्हृदयेपादयोर्मूर्ध्निचायऋक्शोहृदयेपादयोर्मूर्ध्निचायतृचेनमूर्ध्निमार्जयित्वा गायत्र्यादशधाभिमंत्रि ताअपःप्रणवेनपीत्वाद्विराचामेदित्येतन्मंत्रस्नानम् । **प्रकारांतरंहेमाद्रौ**—शंनआपस्तुद्वुपदाआपोहिष्ठाघमर्षणम् । एभिश्चतुर्भिर्ऋच्यंत्रैर्मंत्र स्नानमुदीरितम् । **अन्यकर्तृकस्नानेमंत्रमाह** तत्रैवव्यासः—दाक्षायणमयैःकुंभैर्मंत्रवज्जाह्नवीजलैः । कृतमंगलपुण्याहैःस्नानमस्तुतवा नघम् । दाक्षायणं सुवर्णं । इत्युक्त्वाजाह्नवीस्थानेतीर्थान्यन्यानिकीर्तयेत् । सर्वतीर्थाभिषेकस्तेभूयादित्यंततोब्रूयात् । अत्रविशेषश्चंद्रिका याम्—आदौतावत्प्रभासेवहुगुणसलिलेमध्यमेपुष्करेचगंगाद्वारेप्रयागेकनखलसहितेकुंभकोणेगयायाम् । राहुग्रस्तेचसोमेदिनकरसहितेसंनिह त्यांविशेषाद्देवैर्विख्याततीर्थैस्त्रिभुवनसहितैःस्नानमच्छिद्रमस्तु । प्राप्यसारस्वतंस्नानंभवेन्मुदितमानसः । सर्वतीर्थाभिषेकाद्धिपवित्राविदुषांहि वाक् ॥ ॥ **अथविभूतिस्नानम्** । तदुत्पत्तिश्चंद्रोदयेशिवपुराणे—भस्मसंपादनविधिःसुलभःसमुदीरितः । पौर्णमास्याममावास्याम ष्टम्यांवाविशुद्धधीः । कपिलायाःशकृत्स्वल्पंगृह्णीत्वागग्नेपतत् । उपर्यधःपरित्यज्यगृह्णीयात्पतितंयदि । पिंडीकृत्यशिवाग्न्यादौतस्क्षिपेन्मूलमंत्र तः । धारयेन्नित्यकार्येषुविभूतिंतुप्रयत्नतः । **क्रियासारे**—पद्मपत्रेणवान्येनशुचिपत्रेणवापुनः । सद्येनगोमयंगृह्यतद्वामेनाभिमंत्रयेत् । शुद्धा भूमावघोरेणदहेत्तल्लौकिकाग्निना । सद्येन सद्योजातंप्रपद्यामीत्यनेन । वामेन वामदेवायनमोज्येष्ठायइत्यनेन । ताम्रकुंभेक्षिपेद्भस्मशुद्धेतत्पुरुषे

णतु । सिकतांगारपाषाणानीशानेनविशोधयेत् । एवंविधिकृतेनैवभस्मनास्नानमाचरेत् । त्रिपुंड्रमथवाद्ध्यात्सर्वपापक्षयोभवेत् । अन्यजातम
नाधारंयत्रकापिस्थितंचयत् । संस्काररहितंयत्तन्नहिधार्यंकथंचन । शूद्रहस्तस्थितंभस्मद्विजातिर्नैवधारयेत् । तथैवांत्यजहस्तस्थंशूद्रैर्धार्यंनजातु
चित् ॥ ॥ **स्नानप्रकारःक्रियासारे**—स्नानस्योपक्रमेपादौकरौप्रक्षाल्यवाग्यतः । आचम्योक्तासनेस्थित्वाप्राङ्मुखोवाप्युदङ्मुखः ।
पवित्रहस्तद्वितयःप्राणायामंसमाचरेत् । ततोमूलेनभसितमष्टकृत्वोभिमंत्र्यच । ईशानेनशिरोदेशंमुखंतत्पुरुषेणतु । **स्मृतिभास्करे**—त्र्यायु
षैःशिवमंत्रैश्चलिप्यादापादमस्तकम् ॥ इतिश्रीनारायणभट्ट०लक्ष्मणभट्टकृतावाचाररत्नेमध्याह्नस्नानम् ॥

अथपंचमहायज्ञाः । तत्स्वरूपमाह**मनुः**—अध्ययनंब्रह्मयज्ञःपितृयज्ञस्तुतर्पणम् । होमोदैवोबलिर्भौतोनृयज्ञोतिथिपूजनम् । पंचैतान्यो
महायज्ञान्नहापयतिशक्तितः । सगृहेपिवसन्नित्यंसूनादोषैर्नलिप्यते । **सूनाःसप्वाह**—पंचसूनागृहस्थस्यचुल्लीपेषण्युपस्करः । कंडनीचोदकुं
भश्चवध्यतेयास्तुवाहयन् । उपस्करः संमार्जनी । **हारीतः**—सूनाःपंचविधाद्भुतावगाहनतरणविक्षोभणविक्षेपणापूतग्रहणयानादिभिराद्यां
कुर्वत्यवेलाविस्पष्टद्भुतगमनाक्रमणादिभिर्द्वितीयां हननप्रहरणबंधनच्छेदनकुट्टनोत्पाटनादिभिस्तृतीयामाक्रमणघर्षणपेषणादिभिश्चतुर्थीउद्दीपन
तपनस्वेदनभर्जनपचनादिभिःपंचमीं तदेतासूनानीरयन्योनीरहरहःप्रजाःकुर्वत्यग्निगुरुशुश्रूषास्वाध्यायैरादितःसूनात्रयंब्रह्मचारिणःपावयंति पंचभि
र्यज्ञैर्गृहवनस्थाःपञ्चपावयंति पवित्रज्ञानध्यानैर्भिक्षवःसूनाद्वयंपावयंति ।

अथब्रह्मयज्ञः । तत्कालं**मरीचिराह**—सचार्वाक्तर्पणात्कार्यःपश्चाद्वाप्रातराहुतेः । वैश्वदेवावसानेवानान्यत्रतेंनिमित्तकात् । मध्याह्न
पक्षेतर्पणात्पूर्वम् । **बृहस्पतिः**—यदिस्यात्तर्पणादर्वाग्ब्रह्मयज्ञःकृतोनहि । कृत्वामनुष्ययज्ञंवैततःस्वाध्यायमारभेत् । **वृत्तौश्रुतिः**—मध्यं
दिनेप्रवलमधीयीतयएवंविद्वान्महारात्रउपस्युदितइतिच । **तैत्तिरीयश्रुतावुदितआदित्यइत्युक्तेरुदयात्प्राक्ब्रह्मयज्ञनिषेधइतिमाधवः ।

निषेधोनेतिचंद्रिका । स चावोक्तर्पणादितितर्पणस्यपृथगुक्तेर्नब्रह्मयज्ञांगतर्पणंकिंतुस्वतंत्रंप्रधानमतस्तर्पणस्यपृथक्संकल्पः । कृतब्रह्मयज्ञस्यती
र्थप्राप्तौपितृतर्पणंभवति—अकालेप्यथवाकालेतीर्थश्राद्धंतथानरैः । प्राप्तैरेवसदाकार्यंकर्तव्यंपितृतर्पणमितिश्राद्धशूलपाणौदेवीपुराणा
त् । आश्वलायनानांतुब्रह्मयज्ञांगतर्पणं तत्सूत्रेतद्धर्मैःसंदंशात् । वृहन्नारदीये—कुर्यात्प्रतिदिनंवर्णीब्रह्मयज्ञंचतर्पणम् । प्रयोगपारिजा
तेजैमिनिः—अनुपाकृतवेदस्यकर्तव्योब्रह्मयज्ञकः । वेदस्थानेतुसावित्रीगृह्यतेतत्समाहिसा । उपनयनदिनेनारंभः । आरभेद्ब्रह्मयज्ञंचमध्याह्नेतु
परेह्नीतिप्रयोगपारिजातेवचनात् । वृहन्नारदीये वनस्थंप्रक्रम्य—अधःशायीब्रह्मचारीपंचयज्ञपरायणः । शूद्रस्याधिकारमाहया
ज्ञवल्क्यः—भार्यारतःशुचिर्भृत्यभर्ताश्राद्धक्रियारतः । नमस्कारेणमंत्रेणपंचयज्ञान्नहापयेत् । सर्वत्रमहाकार्येनमस्कारविध्यर्थोमंत्रशब्दइत्या
पराकः । कौमुद्यांमाधवीयेच—स्वाहाकारेनमस्कारोमंत्रःशूद्रेविधीयते । तेनशूद्रःपाकयज्ञैर्यजेतब्रह्मवान्स्वयम् । नमस्कारमंत्रोदेव
वताभ्यःपितृभ्यइतिमिताक्षरा । त्रिरावर्तितोनमःशब्दइतिपृथ्वीचंद्रः ॥ ॥ अथविधिस्तैत्तिरीयश्रुतौ—ब्रह्मयज्ञेनयक्ष्यमाणःप्रा
च्यांदिशिग्रामादच्छदिर्दशउदीच्यांवोदितआदित्येदक्षिणतउपवीयोपविश्यहस्तावनिज्यत्रिराचामेद्द्विःपरिमृज्यसकृदुपस्पृश्यशिरश्चक्षुषीनासिके
श्रोत्रेहृदयमालभ्ययत्सव्यंपाणिंपादौप्रोक्षति दर्भाणांमहदुपस्तीर्योपस्थंकृत्वाप्राङासीनःस्वाध्यायमधीयीतदक्षिणोत्तरौपाणीपादौकृत्वासपवित्रा
वोमितिप्रतिपद्यतेत्रीनेवप्रयुक्तंभूर्भुवःस्वरित्याहाथसावित्रींगायत्रींत्रिरन्वाहपच्छोर्ध्वंचशोनवानमथोप्रज्ञातयैवप्रतिपदाछंदांसिप्रतिपद्यतइति । वाम
पादांगुष्ठोपरिदक्षिणपादांगुष्ठंनिधायपादपार्ष्णिमेलनेनोपस्थमितिचंद्रोदयः । इतरेतरपादव्यत्यासेनोपवेशनंतदिति स्मृतिमंजर्यांमदनपारि
जातेच । वामोरूपरिदक्षिणजानुनिधानंतदितिवृत्तिकृत् । कारिका—कृत्वोपस्थंकरेसव्येउत्तानेप्राग्दिगंगुलौ । पवित्रेस्थापयेदुक्तेप्राग
ग्रेदक्षिणेनतु । न्यचंप्रागंगुलंतेनसंदध्याद्दक्षिणंकरम् । शौनकः—सव्यस्यपाणेरंगुष्ठप्रदेशिन्योस्तुमध्यतः । दक्षिणस्यांगुलीर्न्यसेच्चतस्रोंगुष्ठ

वर्जिताः । तथासव्यकरांगुष्ठंदक्षिणांगुष्ठवेष्टितम् । कुर्वीतचैवंसंवद्धौपाणीदक्षिणसक्थनि । **चंद्रिकायांयोगयाज्ञवल्क्यः**—प्रदक्षिणंस मावृत्यनमस्कृत्योपविश्यच । दर्भेपुदर्भपाणिभ्यांसंहताभ्यांकृतांजलिः । **विष्णुः**—ॐकारंव्याहृतीस्तिस्रःसावित्रींचतथाऋचम् । मनस्येता ननुस्मृत्यवेदादीन्समुपक्रमेत् । **तैत्तिरीयब्राह्मणे**—यत्स्वाध्यायमधीयीतैकामप्यृचंयजुःसामवातद्ब्रह्मयज्ञःसंतिष्ठतइति । **व्यासः**—वेद मादौसमारभ्ययथोपर्युपरिक्रमात् । यदधीतेऽन्वहंशक्त्यास्वाध्यायंतंप्रचक्षते । उपर्युपरीतिप्रथमेऽह्निवेदादिंपठित्वा तदुत्तरंकंचिद्वेदभागंपठे त्तदन्यदिनेपुवेदादिंपठित्वातदुत्तरान्वेदभागान्पठेदितिचंद्रिका । प्रत्यहंवेदादिपाठोनास्तीतिपृथ्वीचंद्रः । स्वशाखाध्ययनंविप्रब्रह्मयज्ञ इतिस्मृत इति **लिंगपुराणादनेकशाखाध्यायिनः** स्वशाखामात्राध्ययनाद्ब्रह्मयज्ञसिद्धिरित्यपरार्कः । **याज्ञवल्क्यः**—वेदार्थवे पुराणानिसेतिहासानिशक्तितः । जपयज्ञप्रसिद्ध्यर्थंविद्यांचाध्यात्मिकींजपेत् । **मनुः**—सावित्रीमप्यधीयीतगत्वारण्यंसमाहितः । **तैत्तिरी यश्रुतौ**—नमोब्रह्मणइतिपरिधानीयांत्रिरन्वाहापउपस्पृश्यगृह्यानेत्ययद्ददातिसादक्षिणेति । ब्रह्मयज्ञस्याद्यंतयोर्विद्युद्दृष्टिमंत्रौपठनीयौ सर्वे पुयज्ञमनुप्विति होष्यन्नपउपस्पृशेत् विद्युदसिविद्यमेपाप्मानमिति अथहुत्वोपस्पृशेत् वृष्टिरसिवृश्चमेपाप्मानमिति यक्ष्यमाणोवेष्ट्वावेति **तैत्तिरीयश्रुतेः**। श्रुतिभाष्येमाधवोप्येवम् । इदंतैत्तिरीयमात्रपरम् । अन्यथाबह्वृचस्यवैश्वदेवादावपितदापत्तिः । होष्यन्नित्युक्तेःसहो मकृप्वेवयज्ञेष्विदमितिकेचित् । **पारिजातेसंग्रहे**—नकुर्यादासनस्थस्तुब्रह्मयज्ञंकथंचन । **योगयाज्ञवल्क्यः**—जप्त्वाथप्रणवंचापितत र्पणमाचरेत् । तत्रैवस्मृत्यंतरे—कुशानुत्तरतःक्षिप्त्वातथाचमनमाचरेत् । **तैत्तिरीयश्रुतौ**—ग्रामेमनसाऽध्यायमधीयीतेति । **मनुः**— वेदोपकरणेचैवस्वाध्यायेचैवनैत्यके । नानुरोधोस्त्यनध्यायेहोममंत्रेषुचैवहि । **आपस्तंबस्तु**—मनसाचानध्यायेविद्युतिचाभ्रवायांस्तन यित्नावग्न्यायत्तेष्वेतान्नेनीहारेचश्राद्धभोजनएवैकैकइत्याह । **अथगौतमः**—अथयदिवातोवायात्स्तनयेद्वाविद्योततेवाऽवस्फूर्जेद्वैकांवर्चमेकं

वायज्ञुरेकंवासामाभिव्याहरेद्भूर्भुवःस्वःसत्यंतपःश्रद्धायांजुहोमीतिचैतत्तैनैवचास्यैतदहःस्वाध्यायउपात्तोभवतीति । एष्वेवाल्पपाठोनान्यानध्यायेष्विति **माधवप्रयोगपारिजातौ** । अनध्यायांतरेष्वपीतिचंद्रिकामदनरत्नमदनपारिजाताः । अनध्यायेष्वल्पंपर्वण्यल्पतरंपठेदितिदेवजानीये ॥ ॥ **पंचयज्ञाकरणेप्रायश्चित्तमाहदक्षः**—अनिवर्त्यमहायज्ञान्योभुङ्क्तेप्रत्यहंगृही । अनातुरःसतिधनेस कृच्छ्रार्धेनशुध्यति । **बौधायनः**—एतेभ्यःपंचयज्ञेभ्योयद्येकोपितुहीयते । मनस्वत्याहुतिस्तत्रप्रायश्चित्तंविधीयते । द्व्यहंवापित्र्यहंवापि प्रमादादकृतेपुतु । तिस्रस्तंतुमतीर्हुत्वाचतस्रोवारुणीर्जपेत् । दशाहंद्वादशाहंवाविनिवृत्तेपुसर्वतः । चतस्रोवारुणीर्हुत्वाकार्यस्तांतुमतश्चरुः । तथा—अकृत्वापंचयज्ञांस्तुभुक्त्वाचांद्रायणंचरेत् । उज्वलायांतुभोजनोत्तरंनब्रह्मयज्ञः किंतूपवासःप्रायश्चित्तमेवकार्यमित्युक्तम् ॥ ॥ **अथतर्पणम्** । तस्यमुख्यकालोमध्याह्नएव । **कात्यायनादिसूत्रेषु**माध्याह्निकप्रकरणेपाठात् । यत्तु—अहराभ्यंतरेपुत्रःपित्रेदद्याज्जलाञ्जलीन् । द्वितीयेतुपयोज्ञेयंतृतीयेजलमेवच । चतुर्थेशोणितंज्ञेयमितिधर्मविदोविदुरिति । तत्काम्यपरम् । नित्यस्यसायंकालावधिकत्वात् । यत्तुतर्पणंप्रकृत्य—तस्मात्सदैवकर्तव्यमकुर्वन्महतैनसा । युज्यतेब्राह्मणःकुर्वन्विश्वमेतद्बिभर्तिसइति । तत्रसदेतियावज्जीवन्यायेनविहितमध्याह्नपरम् । यत्तुप्रातःस्नातेनोदयात्पूर्वकृततर्पणेनमध्याह्नेस्नानाभावेपिपुनस्तर्पणंकार्यम् । अहःकालिकतर्पणस्यावश्यकत्वात् । उदयोत्तरंप्रातस्तर्पणकरणेतेनैवनिर्वाहान्नपुनस्तर्पणम् । वैधस्नानपक्षेतुपुनःकरणमितिवाचस्पतिराचारचंद्रोदयश्च । तन्न । उदयात्पूर्वतर्पणेविध्यभावात् । स्नानप्रकरणपाठादावृत्तिरितिचेत्तृतीयस्नानेप्यावृत्त्यापत्तेः । मध्याह्नसंध्यावृत्त्यापत्तेश्च । **वसिष्ठः**—जपित्वैवंततःकुर्याद्देवर्षिपितृतर्पणम् । तर्पणस्यब्रह्मयज्ञानंतर्यप्रातर्होमोत्तरंब्रह्मयज्ञपक्षइतिचंद्रिका । **वृद्धपराशरेणतुमध्याह्नसंध्योत्तरंतर्पणमुक्तं**—उपास्यविधिवत्संध्यामुपस्थायचभास्करम् । गायत्रींशक्तितोजस्वातर्पयेद्देवताःपितॄन् ॥ ॥

॥ ६१ ॥

अत्राधिकारिणमाहमनुः—चतुर्णामपिवर्णानांतर्पणंतुभवेत्सदा । वर्णानामितिनकर्मषष्ठी । सवर्णेभ्योजलंदेयंनासवर्णेभ्यएवचेति योगयाज्ञवल्क्येन असवर्णतर्पणनिषेधात्असवर्णपदंहीनपरम् ।—ब्राह्मणस्त्वन्यवर्णानांनकुर्यात्कर्मकिंचन । कामाल्लोभाद्भयान्मोहात्कृत्वात आतितांव्रजेदितिब्राह्मेऽसवर्णतर्पणेतज्जातित्वापत्तिहेतूक्तेः । उत्तमजात्यापत्तेस्त्विष्टत्वादिति **मदनपारिजातः** । असवर्णःपितातर्प्यइति **गोविंदराजहरनाथौ** । हीनवर्णमातातर्प्येतिगोविंदराजः । **शातातपः**—तर्पणंतुशुचिःकुर्यात्प्रत्यहंस्नातकोद्विजः । **वृद्धहारीते**—कुर्यात्प्रतिदिनंवर्णान्ब्रह्मयज्ञंचतर्पणम् । इदंनित्यं । प्रत्यहमित्याद्युक्तेः ।—देवताश्चमुनींश्चैवपितॄन्वैयोनतर्पयेत् । देवादीनामृणीभूत्वान रकंमन्वजत्यधइतिहेमाद्रौ **ब्रह्मवैवर्तेअकरणेप्रत्यवायश्रुतेश्च** । जीवत्पितृकस्तुदेवर्षिमनुष्यानेवतर्पयेत् । जीवत्पितृकोप्येतानितिकात्यायनसूत्रात् । अत्रैतानेवेतिनियम्यते । जीवत्पितृकसवर्णत्वादेवप्राप्तेः । **हेमाद्रौचंद्रिकायांयोगयाज्ञवल्क्यः**—कव्यवाडनलंसोमंयममर्यमणंतथा । अग्निष्वात्तान्सोमपांश्चतथावर्हिषदःपितॄन् । यदिस्याज्जीवपितृकएतान्दिव्यान्पितॄंस्तथा । येभ्यएवपितादद्यात्तेभ्योवापिप्रदापयेत् । येभ्यइतिसंन्यस्तपतितपितृकादिपरंतीर्थपरंवेतिपृथ्वीचंद्रः । अत्र—सपितुःपितृकृत्येषुअधिकारोनविद्यते । नजीवंतमतिक्रम्यकिंचिद्दद्यादितिश्रुतिरिति । पित्र्यंजीवत्पितुर्नोक्तमित्यादिस्मृतिभिर्जीवत्पितृकस्यसर्वपित्र्यनिषेधे उद्वाहेपुत्रजननइत्यादिवत्प्रतिप्रसवाभावात् मातृमातामहतर्पणंनेतिदक्षः । प्रादेशमात्रमुद्धृत्यसलिलंप्राङ्मुखःसुरान् । उदङ्मनुष्यांस्तर्प्येतपितॄन्दक्षिणतस्तथा । उदक् उदङ्मुखः । दक्षिणतो दक्षिणामुखः । **यौधायनः**—अनुतीर्थमपउपसिंचंतीति देवानांदैवेनऋषीणामार्षेणपितॄणांपित्र्येणेत्यर्थः । समाख्यायाअनन्यार्थत्वात् । **अपरार्केविष्णुसमुच्चये**—प्राजापत्येनतीर्थेनमनुष्यांस्तर्पयेत्पृथक् । **वृद्धपराशरः**—दक्षिणजानुमूलग्नोदेवेभ्यःसेचयेज्जलम् । **पुलस्त्यः**—मनुष्यतर्पणंकुर्वन्नकंचिज्जानुपातयेत् । **पितृतर्पणंप्रकृम्यवृद्धपराशरः**—मूलग्नसव्यजानुश्चदक्षिणाग्रकुशेनच । तर्पयेदिति

संपंथः । **बौधायनः**—अथनिवीतीऋषींस्तर्पयेदिति । यत्तूपवीतीऋषींस्तर्पयेदित्याचारादर्शस्तद्वचोविरुद्धम् । **चंद्रोदयेपाद्मे**—कृतोपवीतीदेवेभ्योनिवीतीचभवेत्ततः । मनुष्यांस्तर्पयेद्भक्त्याऋषिपुत्रान्ऋषींस्तथा । अपसव्यंततःकृत्वासव्यंजानुचभूतले । पितॄंस्तर्पयेदितिसंपंथः । **वृद्धगार्ग्यः**—नकुर्वीतापसव्यंचनकुर्वीतापिमुंडनम् । अपसव्यनिषेधःप्रकोष्ठादुपरि । अपसव्यंद्विजाग्र्याणांपित्र्येसर्वत्रकीर्तितम् । आप्रकोष्ठात्प्रकर्तव्यंमातापित्रोस्तुजीवतोरितिवचनादित्युक्तंजीवत्पितृकनिर्णयेपितृचरणैः । **हेमाद्रौशंखलिखितौ**—अपसव्यंवासोयज्ञोपवीतेकृत्वेति । तत्रैवमन्वेताः—अपसव्ययज्ञोपवीतवाससइति । वासउत्तरीयम्। **बौधायनस्तु**—यज्ञोपवीतान्यपेशलानिकृत्वेति । अत्रविकल्पःशाखाविशेषपरत्वेनव्यवस्थितिरितिहेमाद्रिः । **लौगाक्षिः**—नजीवत्पितृकःकुर्यात्तिलैःकृष्णैस्तुतर्पणम् । कृष्णपदंशुक्लतिलनिवृत्त्यर्थमितिकेचित् । कृष्णत्वस्योद्देश्यविशेषणत्वेनाविवक्षितत्वात्तर्पणेतिलमात्रनिषेधइत्यन्ये । **गोभिलः**—लोमसंस्थांस्तिलान्कृत्वायस्तुतर्पयतेपितॄन्। पितरस्तार्पितास्तेनरुधिरेणमलेनच । **स्मृत्यर्थसारे**—वामहस्तेतिलान्क्षिप्त्वाजलमध्येतुतर्पयेत्। स्थलेशाट्यांतटेपात्रेरोममूलेन(?) कुत्रचित् । **कल्पतरौमरीचिः**—वामहस्तेतिलाग्राह्यामुक्त्वाहस्तंतुदक्षिणम् । तिलग्रहणंनांगुष्ठेन ।–अंगुष्ठेनतिलैःकुर्याद्देवतापितृतर्पणम् । रुधिरंतद्भवेत्तोयंप्रदाताकिल्विषीभवेदितिब्राह्मोक्तेः । **मरीचिः**—मुक्तहस्तेनदातव्यंमुद्रांतत्रनदर्शयेत् । मुद्रातर्जन्यंगुष्ठयोगः । **चंद्रिका हेमाद्र्योर्मरीचिः**—सप्तम्यांरविवारेचगृहेजन्मदिनेतथा । पक्षयोरुभयोराजन्सप्तम्यांनिशिसंध्ययोः । विधापुत्रकलत्रार्थीतिलान्पंचसुवर्जयेत् । भानौभौमेत्रयोदश्यानंदाभृगुभपासुच । पिंडदानंमृदास्नानंनकुर्यात्तिलतर्पणम् । **मदनरत्नेबौधायनः**—सप्तम्यांरविवारेचजन्मर्क्षदिवसेपुच । गृहेनिषिद्धंसतिलतर्पणंतद्बहिर्भवेत् । यद्युद्धृतंप्रसिंचेत्तुतिलान्संमिश्रयेज्जले । अतोन्यथातुसव्येनतिलाग्राह्याविचक्षणैः । यस्तुगृहेतिलनिषेधः

॥ ६२ ॥

1 शाखांतरे इति पाठः ।

सपृथक्तिलपरः । **स्मृतिरत्नावल्यांवृद्धमनुः**—सप्तम्यांभानुवारेचमातापित्रोःक्षयेऽहनि । तिलैर्यस्तर्पणंकुर्यात्सभवेत्पितृघातकः । **स्मृत्यर्थसारे**—शोभनेशोभनदिनेनकुर्यात्तिलतर्पणम् । **हेमाद्रौकालिकापुराणे**—स्वौशुक्लेत्रयोदश्यांसप्तम्यांनिशिसंध्ययोः । श्रेयोर्थीनाब्राह्मणोजातुनकुर्यात्तिलतर्पणम् । यदिकुर्यात्तत.कुर्याच्छुक्लैरेवतिलैःकृती । **प्रयोगपारिजातेदेवजानीये**—नंदायांभार्गवदिनेकृत्तिकासुमघासुच । भरण्यांभानुवारेचगजच्छायाह्ययेतथा । अयनद्वितयेचैवमन्वादिषुयुगादिषु । पिंडदानंमृदास्नानंनकुर्यात्तिलतर्पणम् । मन्वादियुगादिषुनिषेधेमूलचिंत्यम् । —मन्वाद्यासुयुगाद्यासुप्रदत्तःसतिलोंजलिः । सहस्रवार्षिकींतृप्तिंपितॄणामावहेत्सदेतिकालादर्शविरोधात् ।—आसुतोयमपिस्नात्वातिलदर्भविमिश्रितम् । पितॄनुद्दिश्ययोदद्यात्सगतिंपरमांलभेदिति **मन्वादीःप्रक्रम्यनागरखंडाच्च** ।—वैशाखमासस्यच यातृतीयानवम्यसौकार्तिकशुक्लपक्षे । नभस्यमासस्यचकृष्णपक्षेत्रयोदशीपंचदशीचमाघे । इत्युपक्रम्य—पानीयमप्यत्रतिलैर्विमिश्रंदद्यात्पितृभ्यः प्रयतोमनुष्यः । श्राद्धकृततेनसमाःसहस्रंरहस्यमेतत्पितरोवदंतीतिहेमाद्रौविष्णुपुराणात् । **बौधायनः**—विवाहेचोपनयनेचौलेसति यथाक्रमम् । वर्षमर्धंतदर्धंचनैत्यकेतिलतर्पणम् । संस्कारेप्युतथान्येषुमासंमासार्धमेवच । **स्मृतिरत्नावल्यांकात्यायनः**—वृद्धावनंतरश्चैव यावन्मांस.समाप्यते । तावत्पिंडान्नदद्यात्तुनकुर्यात्तिलतर्पणम् । अत्रमदीयःसंग्रहश्लोकः—पित्रोःक्षयेमनुयुगादिषुकामनंदाजन्माहशुक्रविभौममघासुयाम्ये । जन्मर्क्षवह्निभगृहव्ययनेनिशायांसंध्यागजेचतिलतर्पणमत्यनिष्टम् । नंदाःप्रतिपत्षष्ठ्येकादश्यः । यत्त्वेकादशीप्रकृत्यलघुनारदीये—अकृतश्राद्धनिचयाजलपिंडविनाकृताइति - तदेकादशीस्तुत्यर्थं पितृभिरेकादश्यांजलपिंडोपयोगोनकृतइति । एतेनयेचैकादश्यांश्राद्धतर्पणादिनिषेधमाहुस्तेनिरस्ता. । प्रतिगृहनिषेधेनपुत्रादीन्प्रत्यपवृत्तेः । अतएवपुत्रादिभिन्नश्राद्धादिनिषेधपरत्वमपिन । **स्मृत्यर्थसारे**—तिथिनक्षत्रसमायोगान्निषेधोयउदाहृतः । ऋषिभिस्तर्पणेनित्येनैमित्तेनतुवाध्यते । अत.संक्रांत्यादिनिमित्तेनिषिद्धदिनादावपिगृहेतिलतर्पणंकार्यं

तीर्थतर्पणवत् । तिथिवारग्रहणंनक्षत्रयोगादेरुपलक्षणम् । **कात्यायनः**—उपरागेपितुःश्राद्धेपातेमायांचसंक्रमे । निपिद्धेपिहिसर्वत्रतिलैस्तर्पण माचरेत् । संक्रमोऽयनभिन्नइतिप्रयोगपारिजातः । तत्र—उपप्लवेचंद्रमसोरवेश्चत्रिष्वष्टकास्वप्ययनद्वयेच; । पानीयमप्यत्रतिलैर्विमिश्रंदद्या त्पितृभ्यःप्रयतोमनुष्यः । श्राद्धंकृतंतेनसमाःसहस्रंरहस्यमेतत्पितरोवदंतिइति **हेमाद्रौविष्णुपुराणविरोधात्** । अत्रपानीयमितिवचनादा वश्यकतायनश्राद्धद्वयस्योच्यतइतिहेमाद्रौ । मकरंप्रकृत्यकृत्यकल्पद्रुमे—तिलैःस्नानंप्रकुर्वीततिलैरेवाशनंबुधः । देवतानांपितॄणांचतिलै स्तर्पणमाचरेत् । अतःपारिजातोक्तिश्चिंत्या । **कात्यायनोक्तिः**स्नानांगतर्पणपरा । मुख्येतिलनिषेधएवेति । **देवजानीये**गंगादौनानि षेधः—तीर्थेतिथिविशेषेचगंगायांप्रेतपक्षके । निपिद्धेपिहिसर्वत्रतिलैस्तर्पणमाचरेदितिपृथ्वीचंद्रधृतवचनात् । तीर्थपदेनैवगंगाग्रहेपुनर्गंगाग्र हःसर्वदातत्रतिलप्राप्त्यर्थः अन्यतीर्थेपुप्राप्तिदिनेएवेति । तिथितीर्थविशेषेपुकार्यप्रेतेचसर्वदेतिप्रयोगपारिजातेवौधायनोक्तेश्च । संक्रांत्या दिनिमित्तेपुस्नानांगेतर्पणेद्विजः । तिथिवारनिपिद्धेपितिलैस्तर्पणमाचरेदितियोगयाज्ञवल्क्योक्तेश्च । **हारीतः**—वसित्वावसनंशुष्कंस्थले विस्तीर्णबर्हिपि । विधिज्ञस्तर्पणंकुर्यात्पात्रेपुनकदाचन । यत्राशुचिस्थलंवासादुदकेदेवताःपितॄन् । तर्पयेच्चयथाकाममप्सुसर्वत्रतिष्ठितम् । **विष्णुः**—आर्द्रवासादेवर्षिपितृतर्पणमंभःस्थएवकुर्यात्परिवर्तितवासाश्चेत्तीर्थादुत्तीर्येति । अंभःस्थइतिकातीयान्यपरम् । तेषामुत्तीर्यतर्पणंकार्यमि त्युक्तेरित्याचारादर्शः । **हेमाद्रौपद्मविंशन्मते**—नतर्पयेत्पितॄन्दिव्यान्जलसंस्थःस्थलेक्वचित् । स्थलस्थस्तुकचित्कुर्याज्जलेप्यशुचिचे स्स्थलम् । **वौधायनः**—वस्त्रंपरिधायाद्भिरेवाप्सुयथोत्तरंदेवान्पितॄंस्तर्पयेदिति । अप्स्वेवेत्यर्थः ।

॥ ६३ ॥

उद्धृतजलेनतर्पणेविशेषमाह **हारीतः**—पात्राद्वाजलमादायशुभेपात्रेविनिक्षिपेत् । जलपूर्णेतथागर्तेनस्थलेतुविवर्हिपि । **हेमाद्रौ गोभिलः**—नोदकेपुनपात्रेपुनरुद्धोनैकपाणिना । नोपतिष्ठतितत्तोयंयन्नभूमौप्रदीयतइति तत्स्थलस्थस्यानुद्धततर्पणपरम् । **पितामहः**—

हेमरूप्यमयंपात्रंताम्रकांस्यसमुद्भवम् । पितृणांतर्पणेपात्रंमृन्मयंतुपरित्यजेत् । इदमधिकरणपात्रमितिसर्वनिबंधाः । यस्तुतर्पणेकांस्यनिषेधः समिन्नपरइतिस्मृतिरत्नावली । विकल्पस्तुयुक्तः । **शंखलिखितौ**—नेष्टकाचितेपितॄंस्तर्पयेत् वापीकूपतडागोदपानेपुसप्तपंचत्रीन्वापिंडानुद्धृत्यदेवपितॄंस्तर्पयेदिति । एतन्नद्यभावइतिहेमाद्रिः । **भारते**—यइच्छेत्सफलंजन्मजीवितंश्रुतमेववा । सपितॄंस्तर्पयेद्गंगामभिगम्यसरिद्वराम् । **पितृगाथासुयमः**—अपिनःसकुलेभूयाद्योनोदद्याज्जलांजलीन् । नदीपुबहुतोयासुशीतलासुविशेषतः । **हारीतः**—नस्रवंतींवृथातिक्रामेदिति । इदमपिस्नानंकृत्वातर्पणाकरणे—यस्तुतीर्थेनरःस्नात्वानकुर्यात्पितृतर्पणम् । पिबंतिदेहनिःस्रावंपितरोस्यजलार्थिनइतिप्रघट्टके वचनात् । इदमपिख्याततीर्थपरम् ।—गिरिपुख्याततीर्थेपुनदीपुचविशेषतः । साकांक्षाःपितरोनित्यंतिष्ठंतिसलिलार्थिनइतितत्रैवोक्तेः । केचित्तु—पितॄनतर्पयित्वातुनदीस्तरतियोनरः । तस्यासृक्पानकामास्तेभवंतिभृशदुःखिताइतिवचनान्नद्यां वारुणस्नानाभावेपितर्पणमावश्यकमित्याहुः । **घोपदेवः**—तातांनात्रितयंसपत्नजननीमातामहादित्रयंसस्त्रीस्त्रीतनयादितातजननीस्वभ्रातरस्तत्स्त्रियः । तातांवात्मभगिन्यपत्यधवयुग्जायापितासद्गुरुःशिष्यास्नाःपितरोमहालयविधौतीर्थेतथातर्पणे । अस्यार्थः—पितामह्यादिशब्दैःपितृजननीत्वाद्युच्यतेनपितामहपत्नीत्वादीतिहेमाद्रिः । युक्तंचैतत् । पितृव्यमातुलमातामहपितामहाइतिसूत्रेपितामहादिशब्दस्यडामहज्जंतत्वनिपातनात्तस्यचस्त्रियांमातरिपत्न्यांचेतिपित्वविधेःपिद्यौरादिम्यश्चेतिङीप्सिद्धेः पुंयोगेङीप्भावात् पितुर्मातापितामहीत्यमराच्च । प्रतिपादितंचैतद्भाष्यकाशिकारायमुकुटादौ । सपत्नभ्रातृभगिनीपितृष्वस्रादीनांनभ्रातृत्वादिनातर्पणम् । यत्तुपित्रादित्रयंमिलितमुद्दिश्यांजलित्रयंदेयमित्याचारादर्शस्तत्पित्रेपितामहायप्रपितामहायेत्यादिशंखादिविरोधादुपेक्ष्यम् । सस्त्रीत्युक्तेर्मातामहाःसपत्नीकाइतित्रिस्थलीसेतौवचनाच्चतर्पणेपिमातामहानांसपत्नीकत्वेनोल्लेखइतिकेचित् । तन्न । अत्रतर्प्यसंग्रहेतात्पर्येणोल्लेखेतात्पर्याभावात् । मातामहीनामंजल्येकत्वत्रित्वविचारायोगात् मातुलान्यादीनांपृथक्तर्पणविधेर

नौचित्यापत्तेश्च । अथमातामहीनांचसपत्नीनामनंतरमित्यादिवाक्यविरोधाच्च । अतस्तर्पणंपृथगेव । तर्पणीयत्वावच्छेदकसमातृजनकत्वस्यो
भयत्रतुल्यत्वेनविनिगमनाविरहेणमातुलयोरितरेतरसाहित्यस्यवक्तुमशक्यत्वात् । एवंश्वश्रूश्वशुरयोःपृथक्तर्पणं भार्याजनकत्वस्यावच्छेदकस्याभे
दात् । मातुलान्यास्तुनपृथक्तर्पणं मातुलस्यतत्संबंधघटकत्वात् । यदपि मातुलानीचदुहितेतिमातुलान्याःपृथक्श्रवणंतन्मातुलस्यसपत्नीकत्वेनै
वतर्पणेउपपन्नंनपृथक्तर्पणगमकम् । एवंपितृव्यभ्रातृपुत्रपत्नीनामपि । एवंपितृष्वसुःसभर्तृकायास्तर्पणं तस्यास्तत्संबंधघटकत्वात् । यत्तुपितृष्वसुश्च
तद्भर्तुरितिगारुडंतत्पूर्ववदेवोपपन्नम् । एवंमातृष्वसृभगिनीपुत्रीणामपि । भागिनेयदौहित्रयोर्नपृथक्तर्पणं किंतुभगिनींसापत्यां पुत्रींसापत्यामि
त्येव । पैतृष्वसेयमातृष्वसेयमातुलादीनांतुपृथक् बंधुत्वस्यावच्छेदकस्यभेदात् । भागिनेयत्वंहिभगिन्यपत्यत्वम् । बंधुत्वंतुनपैतृष्वसेयादि
समनियतं परस्परव्यभिचारात् । बंधवस्त्वात्मपितृमातृबंधवः । केचित्तुसर्वेषांपृथक्तर्पणमाहुः । भ्रातुर्ज्येष्ठस्यैवतर्पणंनकनिष्ठस्य । ज्येष्ठभ्रा
तृस्तर्पयेदितिहारीतोक्तौज्येष्ठग्रहणात् । यत्तुचंद्रोदयेयौधायनः—यदिस्नेहेनकुर्यातांसापिंडीकरणंविना । गयायांतुविशेषेणज्यायानपि
समाचरेदिति तत्सापिंडीकरणपर्युदासाद्दशाहांतकृत्यपरम् । अन्यथापुनर्गयाश्राद्धविधिवैयर्थ्यात् । अन्याभावेकुर्यादेव । एवंपुत्रस्यापि । नच
मातानचपिताकुर्यात्पुत्रस्यपैतृकमितिकात्यायनोक्तेः—अन्याभावेकुर्यादेव । एवंपत्न्याअपि । नपत्न्यैतुपतिर्दद्यादेषधर्मःसनातनइतिस्मृति
रत्नावल्यांवचनात् पत्न्यैचापिपतिर्दद्यादितिगयायातुविधानाच्च अन्याभावेकुर्यात् । पितृष्वस्रादिसत्वे नतद्भर्त्रादितर्पणंद्वारलोपात् । मातु
लादिसत्वे नतत्स्त्रीणाम् । जननीसत्वेसपत्नमातृमरणेपितस्याएवतर्पणं नमातामह्यादीनांजनन्यास्तत्रद्वारत्वात् । नचपितृपत्न्यःसर्वामातरइति
तासामपिद्वारत्वम् । उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदःपितेत्युक्तेर्जीवत्पितृजनकेब्रह्मदश्राद्धतर्पणाद्यापत्तेः । नचैवंमातृमरणे पितामहीसत्वेसप
त्नीपितामहीमरणेपिनप्रपितामहीतर्पणंस्यात् । यस्यपिताप्रेतःस्यादितिश्राद्धन्यायेनोपपत्तेः । भारते—ज्येष्ठामातृसमाचैवभगिनीभरतर्षभ ।

भ्रातुर्भार्यांचतद्वत्स्वस्रादौस्वस्रादौवाल्येस्तनंपिबेत् । स्तनपानमुभयोःशेषइतिकेचित् । एकार्धौतर्गतत्वेनभ्रातृपत्न्याएवेत्यन्ये । वयंतुनपूर्वशेषवाक्य भेदेनयोजयामः । यस्या स्तनंपिबेत्सायाकापिमातृसमातस्याअपितर्पणम् ॥ ॥ **विधवायाविशेषः काशीखंडे**—तर्पणंप्रत्यहंकुर्याद्ध र्तु.कुशतिलोदकैः । तत्पितुस्तत्पितुश्चापिनामगोत्रादिपूर्वकम् । इदंपुत्रपौत्राभावपरमिति पितामहचरणाः । **मदनपारिजातेप्येवम् । हे माद्रौ**—व्यामुष्यायणकादद्युर्द्वाभ्यांपिंडोदकेपृथक् । तर्पणंसंन्यासिनानकार्यम् । नकुर्यात्सूतकंभिक्षुःश्राद्धपिंडोदककक्रियामितित्रिस्थली सेतौवचनात् । **शंखः**—पूर्वाग्रैस्तर्पयेद्देवानुदगग्रैश्चमानवान् । तानेवद्विगुणीकृत्यतर्पयेत्प्रयतःपितॄन् । **हेमाद्रौनारदीये**—तर्पणादीनि कार्याणिपितॄणांयानिकानिचित् । तानिस्युर्द्विगुणैर्दर्भैःसमपत्रैर्विशेषतः । **दक्षः**—अग्रैस्तुतर्पयेद्देवान्मनुष्यान्कुशमध्यतः । पितॄंस्तुकुशमूलाग्रै र्विधिःकौशेययाकृमम् । **काशीखंडे**—अंगुष्ठद्वयमध्येतुकृत्वादर्भानृजून्द्विजः । कव्यवाडनलादींश्चपितॄन्दिव्यान्प्रतर्पयेत् । प्राचीनावीति कोदर्भैर्द्विगुणैस्तिलमिश्रितैः । **शंखः**—विनारूप्यसुवर्णेनविनाताम्रतिलेनच । विनादर्भैश्चमत्रैश्चपितॄणांनोपतिष्ठते । हेम्नाचसहयद्दत्तंक्षीरेण मधुनाथवा । तदप्यक्षय्यतांयातिपितॄणांतुतिलोदकम् । **रामायणे**—पादशौचंविनाभ्यंगंतिलहीनंचतर्पणम् । सर्वंतत्रिजटेतुभ्यंयच्चश्राद्धम दक्षिणम् । **सत्यव्रतः**—खड्गमौक्तिकहस्तेनकर्तव्यपितृतर्पणम् । मणिकांचनदर्भैर्वानशुद्धेनकदाचन । अत्रसंभवेसमुच्चयः ।—एषामन्य तमेनापियुक्तपाणि.समाचरेत् । द्राभ्यांवायत्रिभिर्वापिसर्वेषांतर्पणंबुधइतिहेमाद्रौमरीच्युक्तेः । तिलानामप्यलाभेतुसुवर्णरजतादिकम् । तदभावेनिर्पिचेत्तुदर्भैर्मंत्रेणवाप्यथेतिचंद्रोदयेयोगयाज्ञवल्क्योक्तेश्च । **प्रयोगपारिजातेवाराहे**—तर्जन्यांरजतंधृत्वापितृभ्योयत्प्रदी यते । अतोस्तिपरमाणूनामसांतोनैवविद्यते । **हारीतः**—कांचनेनतुपात्रेणराजतौदुंबरेणच । दत्तमक्षय्यतांयातिखड्गेनाश्मकृतेनच । **मनुः**—राजतैर्भाजनैरेषामथवारजतान्वितैः । वार्यपिश्रद्धयादन्नमक्षय्यायोपकल्पते । **भारते**—अमावास्यांतुयेमर्त्याःप्रयच्छतितिलोदकम् । पात्रमौ

दुंपरंगृह्यमधुमिश्रंतपोधनाः । कृतंभवतितैःश्राद्धंसरहस्ंययार्थवत् । खड्गपात्रादिधारणंचांजलिमध्ये । लघुपात्रंकरेकृत्वासौवर्णंखाड्गमेववा । राजतंताम्रजंवापितेनसंतर्पयेत्पितॄनितिहेमाद्रौछागलेयोक्तेः । एतेनखड्गपात्रेणतर्पणंनेतिवदन् **मदनपारिजातोऽपास्तः** ॥

अंजलिसंख्या । हेमाद्रौकौर्मे—देवतानांतुसर्वासामेकैकांजलिरिष्यते । तत्रैवब्रह्मांडे—अंजलिद्वितयंदद्याद्देवान्संतर्पयन्बुधः । तत्रैवविष्णुपुराणे—त्रिरपःप्रीणनार्थायदेवानामपवर्जयेत् । तथर्षीणांयथान्यायंसकृच्चापिप्रजापतेः । **ब्रह्मांडे**—ऋषीणांचमनुष्याणांसकृदेवप्रदीयते । **कौर्मे**—ऋषीणामेकएवस्यान्मनुष्याणांद्वयंस्मृतम् । अत्रयथाशाखंव्यवस्था । शाखायामंजलिसंख्यानुक्तौविकल्पइतिहे**माद्रिः** । **शंखः**—एकैकमंजलिंदेवाद्द्वौद्द्वौतुसनकादयः । अर्हंतिपितरस्त्रींस्त्रींस्त्रियस्त्वेकैकमंजलिम् । **हेमाद्रौकौर्मे**—त्रयस्त्रयःपितॄणांतुस्त्रीणामेकैकइष्यते । पितृपदेनदिव्यपितरोप्युच्यंतइतिपृथ्वीचंद्रः । **पैठीनसिः**—तिलोदकांजलींस्त्रींस्त्रीनुच्चैरुच्चैर्विनिक्षिपेत् । उच्चैरितिपित्र्यंजलिभ्यः पितामहांजलयःकिंचिदुच्चाः ततःप्रपितामहस्येति **हेमाद्रिः** । नच—यश्चैनमुत्पादयतेयश्चैनंत्रायतेभयात् । यश्चास्यकुरुतेवृत्तिंसर्वंतेपितरत्रयइतिभारतादेपामंजलित्रयापत्तिः । नित्यत्ववाधनेतात्पर्यात् । अन्यथासपत्नमातुरपितृत्वापत्तिः । मात्रादिभ्योप्येकैकांजलिरितिश्राद्धहेमाद्रिः । वस्तुतस्तुस्त्रीपदंमात्रादिभिन्नपरम् ।—मातृमुख्यास्तुयास्तिस्रस्तासांदद्याज्जलांजलीन् । स्त्रींस्त्रीन्दद्यादथान्यासांस्त्रीणामेकैकमंजलिमितिचंद्रोदये **शालंकायनोक्तेः** । मातुस्त्रीनंजलीन्दद्यादन्यासामेकमंजलिम् । सपत्न्याचार्यपत्नीनांद्वौद्वौदद्याज्जलांजलीनितिकाशीखंडात्सापत्नमात्राचार्यपत्नीनांत्रीन् । **हेमाद्रौब्रह्मांडे**—गुर्वाचार्यश्वशुराणांसुहृत्संबंधिनांसकृत् । मातामह्यादीनामेकस्त्रयोवा ।—मातामह्यादिसर्वासामेकैकंतुतिलांजलिम् । दद्यात्तीर्थविशेषेणधर्मंपरममास्थितइतिचंद्रिकायां **गारुडात्** । मातृमातामहांस्तद्वत्स्त्रीस्त्रीनेवत्रिभिस्त्रिभिः । मातामहीश्चयेप्यन्येगोत्रिणोदातृवर्जिताः । तानेकांजलिदानेनप्रत्येकंचपृथक्पृथगितिमदनरत्नेव्यासोक्तेश्चेति

केचित् । अन्येतुमातामह्यादीनामंजलित्रयम् । **गारुडे** मातामह्यादिपदेऽतद्गुणसंविज्ञानबहुव्रीहिणामातामह्यादिभिन्नानामेकांजलिविधाना दित्याहुः । तन्न । मातामह्याद्यादीतिपाठापत्तेः । अन्यथामातामह्याएवांजलित्रयापत्तेः । विरूपैकशेषेमानाभावात् । मातामह्यादीनामंजलि द्वयविधानेनानौचित्यापत्तेश्च । **व्यासोक्तौ**चस्वार्थे द्वितीयाप्रथमार्थे । अग्रेअपिशब्दात् मातामहानांत्वंजलित्रयम्।—पितॄणांप्रीणनार्थायत्रिरपः पृथिवीपते । पितामहेभ्यश्चतथाप्रीतयेप्रपितामहान् । मातामहायतत्पित्रेतत्पित्रेचसमाहितः । इति**विष्णुपुराणात्** । मातृमातामहांस्तद्वत्स्त्रीं स्त्रीनेवत्रिभिस्त्रिभिरितिव्यासोक्तेश्चेतिचंद्रोदयेमदनरत्नेच । द्वौद्वौमातामहानांचमातुलानांसकृत्तथेति**ब्रह्मांडाद्धा**विति**हेमाद्रौ** । विकल्पस्तु युक्तः ॥ अत्रप्रत्यंजलिमंत्रावृत्तिः । ननुमंत्रस्यतर्पणकरणत्वात्ससंख्यांजलिदानस्यैककर्मत्वादवरक्षोदिवइतिवत्सकृदेवमंत्रपाठःस्यात् । न । अवघातप्रोक्षणयोस्तएवव्रीहयःपुनरवहन्यंते सैववेदिःपुनःप्रोक्ष्यतइतिद्रव्यैकत्वान्नमंत्रावृत्तिः । इहतुसत्यप्येककर्मत्वेप्रत्यंजलिद्रव्यभेदान्निर्वाप-लवन-संध्यार्घ्यदान-वन्मंत्रावृत्तिरितिकेचित् । वस्तुतस्तुद्विस्त्रिरितिक्रियाम्यावृत्तौसुज्विधानात्संख्यायाःकर्मसामानाधिकरण्याभावेनभेदक त्वाभावान्नतर्पणभेदः । किंतुत्रिरावृत्तिर्विशिष्टमेकंतर्पणंत्रिःप्रोक्षतीतिवत्तदंगंचमंत्रोनावर्तते । तर्पणानावृत्तेः । नचांजलिभेदान्मंत्रावृत्तिः । मंत्रस्यतदनंगत्वात् । निर्वापेतुसंस्कार्यद्रव्यभेदान्मंत्रावृत्तिः । नचेहद्वितीययांजलयःसंस्कार्याः । धात्वर्थकर्मतयासकृद्वद्वितीयोपपत्तेः । तर्पणस्ययागांगत्वेनांजलिकरणकत्वात् । नचमंत्रोंऽजलिसंस्कारः । मंत्रैश्चदेयमुदकमित्यादिस्मृतौ तृतीययायाज्यावदानक्रियांगत्वादंजल्यंगत्वे मानाभावात् । कारकाणांपरस्परासंबंधाच्च । अतःपशुसोमाधिकरणन्यायेनप्रथमावगतयागैक्यानुरोधेनैकादशांगकरणकैकयागत्ववदंजलित्रय करणकमेकंतर्पणम् । **यत्तुपैठीनसिः**—उदीरतामितित्रिभिर्मंत्रैस्त्रीनंजलीन्निनयेदिति । तत्राप्येकशेषस्यद्वंद्वापवादत्वेनत्रयाणांमंत्राणामेकैक

स्मिन्निनयनेकरणत्वासंभवात्त्रीणित्रिभिर्मंत्रैःसाध्यंतइतिकोविरोधः । अर्घ्यदानेपिकराभ्यांतोयमादायगायत्र्याचाभिमंत्रितमितिव्यासोक्तौ मंत्रस्यद्रव्यसंस्कारकत्वात्तद्भेदान्मंत्रावृत्तिः । नेहतथेतिनमंत्रावृत्तिरितियुक्तमुत्पश्यामः । अत्रोदीरतामंगिरसआयंतुनऊर्जंपितृभ्योयेचेहमधु धाताइतितृचंजपन्प्रतिसिंचेदितिकात्यायनसूत्रेशतृप्रत्ययान्मंत्रपाठकालेप्रसेकः । मंत्रातैःकर्मादिरित्यादिपरिभाषा करणमंत्रपरेतिहरिहरः । श्रीदत्तास्तुनेहायंवर्तमाने । एवंहिमंत्रपाठकालेप्रसेकेगोत्राद्युच्चारणाभावप्रसंगात् । किंतुवर्तमानसामीप्ये । अतोमंत्रपाठोत्तरमेकैकांजलिदान मित्याह । अत्रविनिगमनाभावेनप्रतिमंत्रंगोत्राद्युच्चारणम् । अन्यथाप्रत्यंजलिश्रीदत्तादिलिखितत्यागानुपपत्तेः । सर्वत्रपितृशब्दश्रुतेः । यत्तुप्रसे कतर्पणयोर्भेदइतिहरिहरस्तच्चिंत्यम् मानाभावात् शब्दांतराद्भेदइतिचेन्नियनस्यापिभेदापत्तेः । त्वयैवतृप्यध्वमितिप्रसेकोक्तेश्च । समंत्रकांज लिदानंप्रसेकोंजलित्रयंतर्पणमितिभेदइतिचेत् त्वयादानार्थकत्वस्याप्यनंगीकारात् अतोयत्किंचिदेतत् ।

अंजलितर्पणनिर्णयः । सर्वत्रांजलिश्रुतेरंजलिनैवतर्पणमितिकेचित् । **अन्येतु**—अन्वारब्धेनसव्येनपाणिनादक्षिणेनतु । देवपींस्तर्प येद्विद्वानुदकांजलिभिःपितॄनितिकौर्मादेवादितर्पणेसव्यान्वारंभः । पितृतर्पणेत्वंजलिरेवेतिव्यवस्थामूचुः । अपरेतु—एकेनवाहस्तेनकुर्याद्दे वपितृतर्पणं सव्यान्वारब्धेनोभाभ्यांवेतिश्राद्धहेमाद्रौवसिष्ठोक्तेः सर्वत्रविकल्पमाहुः । अंजलिश्चनहस्तद्वययोगमात्रंकिंतुव्याकोशः । बहृचानांत्वनादेशेदक्षिणंप्रतीयादितितत्सूत्राद्धस्तेनैवतर्पणम् । **काशीखंडे**—तर्पयेच्छुचिभिस्तोयैस्तृप्यत्वितिसमुच्चरन् । **वृद्धपराशरः**— देवेभ्यश्चनमःस्वाहापितृभ्यश्चनमःस्वधा । अत्रचतुर्थीनिर्देशाद्ब्राह्मणैर्नमःस्वाहेत्यादिप्रयोगइतिपृथ्वीचंद्रः । अत्रचतुर्थ्यादेवादीनांदेवतात्वा वगमाद्द्रव्यदेवतासंयोगेनयागत्वकल्पनात्तर्पणेनममेतित्यागइत्युक्तंदेवजानीयेआचारादर्शेच ॥

तर्पणेविभक्तिविचारः हेमाद्रौसत्यतपाः—देवपितृमनुष्यादिस्वशाखाविधिचोदनात् । एकैकांजलिनातृप्तिंप्रथमांतेनवाचयेत् ।

चंद्रोदयेयोगयाज्ञवल्क्यः—तृप्यतामितिवक्तव्यंनाम्नातुप्रणवादिना । तत्रैव**गोभिलः**–गोत्रकस्तर्पणेप्रोक्तःकर्तापूर्वंनमुच्यति । शर्मन्नर्घा दिकेकार्येशर्मातर्पणकर्मणि । **हेमाद्रौभविष्ये**—चतुर्थीसर्वकार्येषुप्रथमातर्पणेस्मृता । **छंदोगपरिशिष्टेबृहत्प्रचेतःस्मृतिनागरखं डेषु**—सर्वत्रैवपितःप्रोक्तंपितातर्पणकर्मणि । **हेमाद्रौव्यासः**—प्रथमातर्पणेप्रोक्तासंबुद्धिमपरेजगुः । **छंदोगपरिशिष्टे**—नमोंतेतर्प यामीतिआदावोमितिचब्रुवन् । नमांतेइतिहेमाद्रौपाठः । **यमः**—संबंधनामगोत्रेणस्वधांतेनेनमोंततः । तर्पयामिपदेनैवतर्पयेत्पितृपूर्वकम् । तेनद्वितीयांतनामप्रयोगोपिसिद्धः । प्रयोगस्तुप्रथमापक्षेअस्मत्पितामुकशर्मामुकगोत्रस्तृप्यताम् । तृप्यत्वितिवा । द्वितीयापक्षेअस्मत्पितरममु कशर्माणममुकगोत्रंतर्पयामिनमःस्वधा । स्वधानमइतिवा । संबुद्धिपक्षेस्मत्पितरमुकशर्मन्नमुकगोत्रेदंतेजलंनमःस्वधेति । वस्तुतस्तुबहुस्मृत्यनु सारात्प्रथमांतप्रयोगमेवयुक्तंपश्यामः । बह्वृचानांगोत्रोच्चारःपूर्वं तस्यगोत्रंनामचगृहीत्वेतिबह्वृचसूत्रात् । यद्यपीदंप्रकरणांतरेउक्तंतथापिविश येग्रायदर्शनादितिन्यायेनसर्वत्राप्येवंज्ञेयम् । **हेमाद्रिस्तु**—गुरुप्रवहुवचनंकनिष्ठेषुचैकवचनं तेनसगोत्रनामग्रहणंपुरुषंप्रतीतिचंद्रिकायां **पैठीनसिस्मृतेः,** सकारेणतुवक्तव्यंगोत्रंसर्वत्रधीमतेतिमात्स्याच्चामुकसगोत्रानस्मत्पितॄनमुकशर्मणस्तर्पयामिस्वधानमइतिप्रयोगइत्याह । **आचारादर्शेकल्पतरौतु**–अमुकगोत्रःपिताअमुकशर्मातृप्यतामिदंजलंतस्मैस्वधेतिप्रयोगइत्युक्तम् । तन्न । पुनश्चतुर्थ्यंतप्रयोगेमानाभावात् । नचस्वधायोगानुपपत्तिर्मानम् । पितॄन्स्वधानमस्तर्पयामीति**बौधायनेन**वाचनिकतत्प्रयोगात्प्रथमांतेपितृप्रयोगोपपत्तेः । **योगयाज्ञव ल्क्यः**—नामतस्तुस्वधाकारैस्तर्प्याःस्युरनुपूर्वशः । अमुकदेवशर्मेतिप्रयोगइतिपृथ्वीचंद्रः । चतुर्थ्यंतनामप्रयोगोपिहेमाद्रावुक्तः । **मदनपारिजातेतु**—पितृतर्पणेवसुरूपेत्यादिकीर्तनंनेत्युक्तम् । तन्न ।—संबंधमनुकीर्त्यैवनामगोत्रेत्वनंतरम् । वस्वादिरूपंसंकीर्त्यस्वधा

कारेणतर्पयेदितिवसिष्ठस्मृतिविरोधात् । पित्रादीनांमंत्रैस्तर्पणंमात्रादीनांनाम्नेतिहेमाद्रिश्चंद्रिकाच्च । वैदिकमंत्रैर्देवानावाह्यनाम्नातर्पयेत् । पितृन्मंत्रैरावाह्यमंत्रैस्तर्पयेदितिकल्पतरुरत्नाकरवाचस्पत्यादयः । आचारचंद्रोदयेप्येवम् ॥

नामाज्ञानेबौधायनः—पृथिवीपत्पितावाच्यस्तत्पिताचांतरिक्षसत् । अभिधानापरिज्ञानेदित्रिपत्त्रपितामहः । इदंचापस्तंबादिपरम् । आश्वलायनानांतुतन्नेत्यादि । यदिनामनविद्यात्तत्पितामहप्रपितामहेतिब्रूयादितितत्सूत्रात् । **बौधायनः**—शर्मांतंब्राह्मणस्योक्तंवर्मांतंक्षत्रियस्यतु । गुप्तांतंचैववैश्यस्यदासांतंशूद्रजन्मनः । **मनुः**—वैश्यस्यधनसंयुक्तंशूद्रस्यप्रेष्यसंयुतम् । स्त्रीणांलक्ष्मीदामितिदांतंनाम । दांतंनाम स्त्रीणामिति **चंद्रोदयेगोभिलोक्तेः** । चंद्रिकायांतुदायीशब्दांतमुक्तंदेवीशब्दांतंवा । गोत्रंमातानामदेवीतृप्यत्वेवंस्वधोच्चरन्निति**वाराहा दितिदिवोदासः** । शूद्रस्यकाश्यपगोत्रं गोत्रनाशेतुकाश्यपइति**व्याघ्रपादोक्तेः**, तस्मादाहुःसर्वाःप्रजाःकाश्यप्यइतिश्रुतेश्चेति**हेमाद्रिः** । गोत्राज्ञानेप्येवम् । गोत्रस्यत्वपरिज्ञानेकाश्यपंगोत्रमुच्यतइति**चंद्रिकायांप्रयोगपारिजातेचस्मृत्यंतरात्** । **कौमुद्यांतुशूद्राणामपि** ब्राह्मणादिवत्परंपराप्रसिद्धंगोत्रंग्राह्यम् । चतुर्णामपिवर्णानांपितॄणांपितृगोत्रतइति**चंद्रिकायांहेमाद्रौबौधायनोक्तेरित्युक्तम्** । इदंचद्विजोढशूद्रोत्पन्नशूद्रपरमिति**श्राद्धहेमाद्रिः** । सएव—पितृगोत्रंकुमारीणामूढानांभर्तृगोत्रतः । **हेमाद्रौवृद्धशातातपः**—ब्राह्मादिषुविवाहेषुयातूढाकन्यकाभवेत् । भर्तृगोत्रेणकर्तव्यास्तस्याःपिंडोदककक्रियाः । आसुरादिषुचान्येषुपितृगोत्रेणधर्मवित् । ब्राह्मादिष्वपिपितृभर्तृगोत्रयोर्विकल्पेपिवंशपरंपरायाताचारेणव्यवस्था । येनास्यपितरोयाताइत्यादिवचनादितिविज्ञानेश्वरः ॥

अथतर्प्याः । हेमाद्रौमात्स्ये—देवासुरास्तथानागागंधर्वाप्सरसोऽसुराः । क्रूराःसर्पाःसुपर्णाश्चतरवोजृंभकाःखगाः । वाय्वाधाराजलाधारास्तथैवाकाशगामिनः । निराधाराश्चयेजीवाःपापकर्मरताश्चये । कृतोपवीतीकृत्वैवनिवीतीचभवेत्ततः । सनकश्चसनंदश्चतृतीयश्चसनातनः ।

कपिलश्चासुरिश्चैववोढुःपंचशिखस्तथा । सर्वेतेतृप्तिमायांतुमद्दत्तेनांबुनासदा । मरीचिमत्र्यंगिरसौपुलस्त्यंपुलहंक्रतुम् । प्राचेतसंवसिष्ठंचभृगुं नारदमेवच । देवान्ब्रह्मऋषींश्चैवतर्पयेदक्षतोदकैः । तत्रैवपैठीनसिः—गौतमोथभरद्वाजोविश्वामित्रश्चतापसः । जमदग्निर्वसिष्ठश्चकश्यपो ऽत्रिस्तथोत्तमः । स्वारोचिषोरैवतश्चमहातेजाश्चचाक्षुपः । वैवस्वतस्तथातार्क्ष्यइति । चंद्रिकायाम्—अथकांडऋषीनेतानुदकांजलिभिःशुचिः । अव्यग्रस्तर्पयेन्नित्यंमंत्रैःपर्वाष्टमीषुच । कांडानितिवेदस्य । याजुषपरमितिमाधवः । हेमाद्रौभविष्ये—अथसव्यंततःकृत्वासव्यंजानुंचभू तले । अग्निष्वात्तावर्हिषदोहविष्मंतस्तथोष्मपाः । सुकालिनस्तथाभौमाआज्यपाःसोमपास्तथा । तर्पयेद्वैपितॄन्भक्त्यासतिलोदकचंदनैः । चंद्रो दयेवृद्धपराशरः—गायत्रींशक्तितोजप्त्वातर्पयेद्देवताःपितॄन् । ब्रह्मेशकेशवात्पूर्वंप्रजापतिमथश्रुतीः । छंदोयज्ञानृषीन्सिद्धानाचार्यांस्तनया नपि । गंधर्वत्सरर्तूंश्चमासपक्षदिनानितु । देवान्देवानुगांश्चैवनागान्नागकुलानिच । सरितःसागरांस्तीर्थान्पर्वतान्कुलपर्वतान् । किन्नरान्खे चरान्यक्षान्मनुष्यानथतर्पयेत् । वनस्पतीनोपधीश्चभूतग्रामंचतुर्विधम् । ब्रह्मादयोमयाहूताःसमागत्याददंत्वपः । अनृणंमांप्रकुर्वंतुप्रसीदंतुम मोपरि । स्मृतपूर्वाग्रदर्भेपुसाग्रेपुसकुशेपुच । प्रादेशिकेपुशुद्धेपुब्रह्मादिभ्योंबुसेचयेत् । उदीरतामंगिरसआयंतुवोर्जमित्यपि । पितृभ्यश्चस्वधा यिभ्योयेचेहपितरस्तथा । अग्निष्वात्तोपहूताश्चतथावर्हिषदोपिच । येनःपूर्वेपितरश्चसोमपान्समुदीरयेत् । आवाह्यचपितॄनेतैरपसव्योपवीतिना । दक्षिणाभिमुखोद्वाभ्यांकराभ्यामंबुसेचयेत् । रुक्मरूप्यतिलैस्ताम्रदर्भमंत्रैःक्षिपेत्पयः । वसून्रुद्रांस्तथादित्यान्नमस्कारसमन्वितान् । ध्रुवोध्वरश्च सोमश्चआपश्चैवानिलोनलः । प्रत्यूषश्चप्रभासश्चवसवोष्टौप्रकीर्तिताः । अजैकपादहिर्बुध्न्योविरूपाक्षोथरैवतः । हरश्चबहुरूपश्चत्र्यंबकश्चसुरे श्वरः । सावित्रश्चजयंतश्चपिनाकीचापराजितः । इंद्रोधाताभगःपूषामित्रोथवरुणोर्यमा । अंशुर्विवस्वांस्त्वष्टाचसविताविष्णुरेवच । कव्यवाड नलःसोमोयमश्चैवतथार्यमा । अग्निष्वात्ताःसोमपाश्चतथावर्हिषदोपिच । यमश्चधर्मराजश्चमृत्युश्चैवतथांतकः । वैवस्वतश्चकालश्चसर्वभूतक्षय

स्तथा । औदुंबरश्चदध्नश्चनीलश्चपरमेष्ठिना । सहितइतिशेषः । वृकोदरश्चित्रश्चचित्रगुप्तस्तथार्यमा । तस्मात्प्राक्तर्पयित्वैतान्पित्रादींस्तर्पये
त्ततः । मातामहान्मातुलांश्चसखिसंबंधिबांधवान् । स्वजनान्ज्ञातिवर्गीयानुपाध्यायान्गुरूनपि । पितृन्भृत्यानपत्न्यांश्चयेभवंतितदाश्रिताः ।
तान्सर्वांस्तर्पयेद्विद्वानीहंतेतेयतोजलम् । अत्रध्रुवायनमइतिप्रयोगइति**चंद्रिका** । ध्रुवंतर्पयामिनमइति**हेमाद्रिः** । कव्यवाडनलएकादेवतेति
हरिहरः । कव्यवाट्अनलइतिद्वेदेवतेति**कल्पतरुः** । तन्न । कव्यवाहोनलश्चेति**गोभिलविरोधात्** । यमादितर्पणंचतुर्थ्यंतनामभिरेवेति
हेमाद्रिः । कव्यवाडनलःसोमोधर्मश्चेति**चंद्रिकायांपाठः** ॥

यमतर्पणेविशेषमाह चंद्रोदयेयमः—देवत्वाद्देवतीर्थेनपितृत्वाद्दक्षिणामुखः । देवत्वंचपितृत्वंचयमस्यास्तिद्विरूपता । **हेमाद्रौ ब्राह्मे** इदंप्रकृत्य—यज्ञोपवीतिनाकार्यंप्राचीनावीतिनातथा । **मनुः**—एकैकस्यतिलैर्मिश्रांस्त्रींस्त्रीन्दद्याज्जलांजलीन् । **स्मृत्यर्थसारे**—
दीपोत्सवचतुर्दश्यांकार्यंतुयमतर्पणम् । अंगारकचतुर्दश्यामपिकार्यंसदैववा ॥ ॥ **अथभीष्मतर्पणम्** । तन्माघशुक्लगाष्टम्यांभीष्मायतु
तिलोदकम् । अन्नंचविधिवद्दद्युःसर्ववर्णाद्विजातयइतिधवलनिबंधस्मृतेः । जीवत्पिताप्येतत्कुर्यात् । जीवत्पितापिकुर्वीततर्पणंयमभीष्मयो
रितिपाद्मादितिपितृचरणाः । इदंचनित्यम्—ब्राह्मणाद्याश्चयेवर्णादद्युर्भीष्मायनोजलम् । संवत्सरकृतंतेषांपुण्यंनश्यतिसत्तमेति**मदनरत्नो
क्तेः** । **धवलनिबंधे**—भीष्मःशांतनवोवीरःसत्यवादीजितेंद्रियः । आभिरद्भिरवाप्नोतुपुत्रपौत्रोचितांक्रियाम् । वैयाघ्रपद्यगोत्रायसांकृत्यश्र
वरायच । अपुत्रायददाम्येतज्जलंभीष्मायवर्मणे । वसूनामवतारायशंतनोरात्मजायच । अर्घ्यंददामिभीष्मायआबालब्रह्मचारिणे । इति । अयं
तर्पणमंत्रइतिकेचित् । अर्घ्यंददामीत्यग्रेतनेनैकवाक्यत्वान्नार्घ्यमंत्रइतिनाम्नातर्पणम् । यत्तु—सत्यव्रतायशुचयेगांगेयायमहात्मने । भीष्मायैतद्द
दाम्यर्घ्यमाजन्मब्रह्मचारिणे । वैयाघ्रपद्यःसव्येनानेनमंत्रेणवर्णिकमितिपाद्मंतत्रतदर्पणंगौणम् । अर्घ्योपक्रमात् । नचानयोर्नभेदः । अर्घ्येसव्य

जान्वाचनाद्यभावेनभेदावश्यकत्वादितिवयंप्रतीमः । एतेनापसव्येनेतिवदन् दिवोदासोऽपास्तः । **हेमाद्रौब्राह्मे**—प्रथमंतर्पयेद्देवान्ब्रह्मादींश्चततोऋषीन् । मरीचिप्रमुखांश्चैवरुद्रादित्यवसूंस्तथा । यक्षान्पशून्सुपर्णांश्चभूतग्रामंचतुर्विधम् । आचार्यानितरांश्चैवकालस्यावयवानपि । सनकप्रमुखांश्चैवमनुष्यांस्तदनंतरम् । कव्यवाडनलादींश्चततःपितृगणानपि । ततोमातामहानांचपितृव्याणांततःपरम् । पत्नीनांचसुतानांच पितृमातृष्वसुस्तथा । मातुलानीचदुहितास्वसाचार्यर्त्विजस्तथा । शिष्याश्चज्ञातयश्चैवसुहृत्संबंधिनस्तथा । एतेषांतर्पणंकार्ययथावदनुपूर्वशः । ज्ञाताज्ञातान्समुद्दिश्यप्रदेयश्चांजलिस्ततः । तत्रैवस्कांदे—पूर्वंमोदप्रमोदादींस्तर्पयेत्षड्विनायकान् । एतौमोदप्रमोदौसुमुखदुर्मुखाविघ्नविघ्नहर्तारइतिपद् । ततोब्रह्मादयोदेवाःसनकाद्यास्ततःपरम् । अग्निष्वात्तादिकानांतुपितृणामप्यनुक्रमात् । यमायधर्मराजायकुर्यात्संतर्पणंबुधः । पितृणामथमातृणांततोमातामहस्यच । पत्नीश्वशुरबंधूनांसुतसंबंधिनांततः । **भारते**—पूर्वस्ववंशजातानांकृत्वाद्धिस्तर्पणंबुधः । सुहृत्संबंधिवर्गाणांततोदद्याज्जलांजलीन् । सदानाविजलंतज्ज्ञाःप्रयच्छंतिसमाहिताः । **नारदीये**—अग्निप्रभृतयोदेवास्तर्प्याःस्युरनुपूर्वशः । ततःशतर्चिनाद्यास्तुमुनयःशंसितव्रताः । ततःकांडऋषीन्सर्वांस्तर्पयेच्छ्रद्धयान्वितः । पितृभ्यःप्रत्यहंदद्यात्ततोमातृभ्यएवच । ततोमातामहानांचपितृव्यस्यसुतस्यच । पित्रादितर्पणोत्तरंगारुडे—अथमातामहीनांचस्वपत्नीनामनंतरम् । तर्पणंचपितृव्याणांतत्पत्नीनांततोपिच । पितृष्वसुश्चतद्भर्तुर्मातुलस्यापिनित्यशः । मातुलान्यास्ततोमातृष्वसुस्तत्पत्युरेवच । श्वशुरस्यचकर्तव्यंश्वश्रूणामपितर्पणम् । आचार्याणांततःकुर्यादाचार्यानीभ्यएवच । बंधूनांभ्रातृपत्नीनांपुत्रंचैवस्नुषामपि । पुत्रींतस्याःपतिंचैवभगिनीतत्पतिंतथा । भागिनेयंचपौत्रंचदौहित्रंयाज्यमृत्विजम् । शिष्यंचमित्रंसंतर्प्य तत्पत्नीस्तुतथैवच । **वाराहे**—आत्मनोपिजलंदद्यादितिद्वैपायनोब्रवीत् । इदंचापुत्रपरम् । **शंखः**—आसप्तमात्पुरुषात्पितृपक्षेयावतांनामजानीयात्तावतांतर्पणंकुर्यादितिहारीतः । पित्रादीन्मात्रादीन्मातामहादीन्पितृव्यांस्तत्पुत्रान्ज्येष्ठभ्रातॄंस्तत्पत्नीर्मातुलांस्तत्पत्नीर्गुर्वाचार्योपा

ध्यायान्सुहृत्संबंधिबांधवान्द्रव्यान्नदातॄपोपकरिक्थिनस्तत्सबीश्चतर्पयेदिति । **त्रिस्थलीसेतौ**—आदौपिताततोमातासपत्नजननीतथा । मातामहाःसपत्नीकाआत्मपत्न्यस्ततःपरम् । सुतभ्रातृपितृव्याश्चमातुलाश्चसभार्यकाः । दुहिताचस्वसाप्रोक्तादौहित्रोभागिनेयकः । पितृष्वसा मातृष्वसाश्वशुरौगुरुरित्थदौ । एतेस्युःपितरस्तर्प्यास्तर्पणेचमहालये । **छंदोगपरिशिष्टे**—येचान्येमत्तउदकमर्हंतितांस्तर्पयामीत्यवसानां जलिरिति । तर्पणोत्तरंकाशीखंडे—आब्रह्मस्तंबपर्यंतंदेवर्षिपितृमानवाः । तृप्यंतुपितरःसर्वेमातृमातामहादयः । अतीतकुलकोटीनांसप्तद्वीपनिवासिनाम् । आब्रह्मभुवनाल्लोकादिदमस्तुतिलोदकम् । **हेमाद्रौकाण्वर्णाजिनिः**—देवतानांपितॄणांचजलेदद्याज्जलांजलीन् । असंस्कृतप्रमीतानामेकमेवतटेक्षिपेत् । **बौधायनः**—जलांजलित्रयंदद्याद्येचान्येसंस्कृताभुवि । असंस्कृतप्रमीतानामेकमेवतटेक्षिपेत् । **मंत्रः**—यत्रकचनसंस्थानांक्षुत्तृष्णोपहतात्मनाम् । तेषांह्रिदत्तमक्षय्यमिदमस्तुतिलोदकम् । **हेमाद्रौभविष्ये**—संतर्प्यविधिवद्भक्त्याइमंमंत्रमुदीरयेत् । येबांधवाबांधवाबायेऽन्यजन्मनिबांधवाः । तेतृप्तिमखिलायांतुयश्चास्मत्तोऽभुवांच्छति ॥

अथश्राद्धांगतर्पणम् । नचतत्रमानाभावः । परेद्युःश्राद्धकृन्मर्त्योनतर्पयतिवैपितॄन् । तस्यतेपितरःक्रुद्धाःशापंदत्त्वाव्रजंतिहीतिबृहन्नारदीयात् । यस्तर्पयतितान्विप्रःश्राद्धंकृत्वापरेहनि । पितरस्तेनतृप्यंतिनचेत्कुप्यंतिवैभृशमितिप्रयोगपारिजातेगर्गेणांगत्वोक्तेश्च । शातातपः—पूर्वंतिलोदकंदत्त्वाआमश्राद्धंतुकारयेत् । प्रत्यब्दंनभवेत्पूर्वंपरेहनितिलोदकम् । पक्षश्राद्धेहिरण्येचअनुव्रज्यतिलोदकम् । अनुव्रज्यश्राद्धंकृत्वातदह्नचेवेत्यर्थः । **बृहन्नारदीये**—पक्षश्राद्धंयदाकुर्यात्तर्पणंतुदिनेदिने । सकृन्महालयेचैवपरेहनितिलोदकम् । **हेमाद्रौवसिष्ठः**—तीरेजलाशयस्यैवनिर्वर्त्यपितृतर्पणम् । निष्पीडयेत्स्वानवस्त्रंदक्षिणाभिमुखःस्थले । तत्रमंत्रोबह्वृचपरिशिष्टे—प्राचीनावीतीयेकेचास्मत्कुलइतिवस्त्रंनिष्पीडयेदिति । **चंद्रोदयेवृद्धपराशरः**—वस्त्रनिष्पीडनेमंत्रैस्तिलदर्भयुतंत्यजेत् । येमेकुलेलुप्तपिंडाःपुत्रदारविवर्जिताः ।

तेपांतुदत्तमक्षय्यमिदमस्तुतिलोदकम् । पितृवंशेमृतायेचमातृवंशेतथैवच । येमेकुलेलुप्तपिंडाःपुत्रदारविवर्जिताः । तेषांतुदत्तमक्षय्यमिदमस्तुतिलोदकम् । पितृवंशेमृतायेचमातृवंशेतथैवच । सदातृप्तिर्भवत्वेषांतिलैस्तुसहवारिणा । अपुत्रायेमृताःकेचित्पुमांसोयोषितोपिवा । अस्मद्वंशेतुतेभ्यो वैदत्तंवस्त्रजलंमया । सएव । नपूर्वंतर्पणाद्वस्त्रंनचांभसिनपादयोः । एपुचेत्पीडयेद्वस्त्रंराक्षसंतदतिक्रमात् । **मनुः**—वस्त्रंत्रिगुणितंयस्तुनिष्पीडयतिमंदधीः । वृथास्नानंभवेत्तस्यपुनःस्नानंविशोधनम् । **जाबालिः**—नाप्सुनिष्पीडयेद्वस्त्रंसर्वथाद्विजसत्तमः । धौतंचद्विगुणीकृत्यभूमिलग्नंनपीडयेत् । वृथास्नानंभवेत्तस्यश्राधोदशमंवुनि । **मदनरत्नेपराशरः**—द्वादश्यांपंचदश्यांचसंक्रांतौश्राद्धवासरे । वस्त्रंनिष्पीडयेन्नैवनचक्षारेणयोजयेत् । पंचदश्यमा । एकादश्याममायांचमातापित्रोःक्षयेहनि । नपीडयेत्स्नानवस्त्रंनचक्षारेणयोजयेदित्याचारचंद्रोदयेभृगूक्तेः । तत्रैव—शनिभौमास्थितेश्राद्धेकुहूपष्ठीनिरंशके । वस्त्राणांक्षारसंयोगोदहत्यासप्तमंकुलम् । तत्रैव—आदित्यसौरिधरणीसुतवासरेषुप्रक्षालनायरजकायनवस्त्रदानम् । शंसंतिगर्गयमविष्णुपराशराद्याःपुंसांभवंतिविपदःसहपुत्रपौत्रैः । **चंद्रोदयेसंग्रहे**—वस्त्रंचतुर्गुणीकृत्यनिष्पीड्यसदशंतथा । वामप्रकोष्ठेनिक्षिप्यस्थलस्थश्चद्विराचमेत् । **जाबालिः**—निष्पीडितंधौतवस्त्रंयदास्कंधेविनिक्षिपेत् । तदादुष्टंभवेत्कर्मपुनःस्नानंविशोधनम् ।

अथमध्याह्नसंध्या । **दक्षः**—अध्यर्धयामादासायंसंध्यामाध्याह्निकीष्यते । संध्यात्रयंतुकर्तव्यंद्विजेनात्मविदासदा । उपनयनदिनेमध्याह्नसंध्यामाह **प्रयोगपारिजातेजैमिनिः**—यावद्ब्रह्मोपदेशस्तुतावत्संध्यादिकंचन । ततोमध्याह्नसंध्यादिसर्वकर्मसमाचरेत् । अत्रकश्चिद्ब्रह्मचानामुपनयनदिनेतिष्ठेदहःशेषमित्युपवेशननिषेधान्नतद्दिनेमध्याह्नसंध्येत्याह । तत्ररागप्राप्तस्यनिषेधात् । प्रातःसंध्यावन्मध्याह्नसंध्या । विशेषस्तूच्यते—आपःपुनंतुमध्याह्नेकुर्यादाचमनंततः । **अर्घ्यदानेव्यासः**—मध्याह्नेसकृदेवार्घ्यक्षेपणीयंद्विजातिभिः । **शौनकः**—मध्याह्नेतुविशेषोयमुपस्थानंतथार्घ्यकम् । अपामंजलिमापूर्यआकृष्णेनेतिनिक्षिपेत् । हंसवत्याकृष्णेनेतिवार्घ्यंदद्यादित्युक्तं बह्वृच

गृह्ये अर्घ्यदानेऋजुत्वमुक्तम् । **कात्यायनः**—पुष्पाण्यंबुमिश्राण्यूर्ध्वंप्रक्षिप्योर्ध्वबाहुःसूर्यमुदीक्षेतेति । अर्घ्यदानोत्तरंसंध्यातर्पणमुक्तं **प्रयोगपारिजाते**—कश्यपऋषिः रुद्रोदेवतात्रिष्टुप्छंदः पुरुषतर्पणेविनि० । ॐभूःपुरुषंतर्पयामि यजुर्वेदंतर्पयामि मंडलंत० रुद्ररूपिणंत० अंतरात्मानंत० सावित्रींत० वेदमातरंत० सांकृतिंत० संध्यांत० युवतींत० रौद्रींत० उपसंत० निम्रुचंत० सर्वसिद्धिकरींत० सर्वमंत्राधिपंत० एवंपंचदशतर्पणानिकृत्वाद्विराचम्यादित्यमुपतिष्ठेतेति । **गायत्रीध्यानम्**—सावित्रींयुवतींयुक्तांशुक्लवस्त्रांत्रिलोचनाम् । त्रिशूलिनींवृषारूढांपंचास्यांरुद्रदेवताम् । कैलासविहितावासामायांतींसूर्यमंडलात् । वरदांत्र्यक्षरांसाक्षाद्देवीमावाहयाम्यहम् । **गायत्रीजपेचंद्रिकायां शातातपः**—तिष्ठंश्चेद्वीक्षमाणोऽर्कमासीनःप्राङ्मुखोजपेत् । आसीनश्चेदित्यर्थः । रात्रौमध्याह्नसंध्याकरणे नोपस्थानम् । रात्रौप्रहरपर्यंतमित्यादिसंग्रहादितिचंद्रोदयः । **कृष्णभट्टीयप्रयोगपारिजातयोस्तु** रात्रौगायत्र्यार्घ्यंदद्यादुपस्थानेहविष्पांतसूक्तंजपेदित्युक्तं । इयंब्रह्मयज्ञात्पूर्वंकार्या । उपास्यविधिवत्संध्यामुपस्थायचभास्करम् । गायत्रींशक्तितोजप्त्वातर्पयेद्देवताःपितॄनितिवृद्धपराशरोक्तेरितिमाधवचंद्रिका **मदनरत्नस्मृत्यर्थसारकृष्णभट्टाः । प्रयोगपारिजातस्तु**—अपांसमीपेनियतोनित्यकंविधिमास्थितः । सावित्रीमप्यधीयीतगत्वारण्यं समाहितइतिमनूक्तेर्मध्याह्नसंध्योत्तरंब्रह्मयज्ञमाहसब्रह्मयज्ञप्रकरणानभिज्ञत्वादसंबद्धंवदन्नुपेक्ष्यः । **मदनपारिजातेतुततोर्घ्यंभानवेदद्यात्ति**लपुष्पजलान्वितमितिनारसिंहेततःशब्देनब्रह्मयज्ञानंतर्यंमध्याह्नसंध्यायाइत्युक्तं । **जयंतवृत्तावप्येवम्** । बह्वृचांतुतत्सूत्रे अथस्वाध्यायविधिरित्युपक्रम्यआप्रुत्येतिमध्याह्नस्नानमुक्त्वाततोब्रह्मयज्ञोक्तेरवांतरप्रकरणात्स्नानंब्रह्मयज्ञांगं तयोर्मध्येनसंध्या । अंगांगिनोरंगेनव्यवायापत्तेः कर्मणिकर्मांतरारंभायोगाच्च आगंतूनामंतेनिवेशइतिन्यायाच्च ब्रह्मयज्ञोत्तरमेवसंध्या । नचैवमंतेयद्ददातिसादक्षिणेत्युक्तेस्तावत्पर्यंतमवांतरप्रकरणाद्ब्रह्मयज्ञोत्तरमपिसंध्यानस्यादितियुक्तम् । ददातीत्यस्याविधायकत्वात् । अतएववृत्तिकृत्अन्यथादद्यादित्येवावक्ष्यदिति । संध्योत्तरंब्रह्म

यज्ञस्तुआपस्तंवादिपरः । इदमापःप्रवहतयाम्नोयाम्नस्तथैवच । विमोचनेतुतीर्थस्यआप्यायस्वेतिवैजपेत् । देवागातुविदइतिकृत्वाजप्य निवेदनम् । प्रक्षाल्यतीर्थदेशंचगत्वास्वधर्ममाचरेत् । **श्राद्धहेमाद्रावुशनाः**—स्रवंत्यादिष्वथाचम्यसोपानत्कोह्यसंस्पृशन् । आगतःसोद पात्रस्तुयत्नेनशुचिरेवसः । तेनोदकेनद्रव्याणिप्रोक्ष्याचम्यपुनर्गृहे । ततःकर्माणिकुर्वीतनित्यवैयानिकानिच । **शातातपः**—यद्यानीतंतुसव्येन प्रोक्षयेद्दक्षिणेनतु । इतिश्रीमन्नारायण० लक्ष्मणभट्टकृतेआचाररत्नेमाध्याह्निकविवरणम् ॥

अथदेवपूजा । तत्रप्रयोगपारिजातेवसिष्ठः—कौबेर्यांतुधनस्थानमैशान्यांदेवतालयम् । **माधवीयेदक्षः**—भागेतुपंचमेदेवम र्चयेत्पुरुषोत्तमम् । इति । **मंत्रराजविधाने**—प्रातर्होमंचकृत्वादेवतार्चनमारभेत् । यद्वामाध्याह्निकंकृत्वापूजयेत्पुरुषोत्तमम् । इति । **चं द्रिकायांहारीतः**—कुर्वीतदेवतापूजांजपयज्ञादनंतरम् । **अथपूजापात्राणि । प्रयोगपारिजाते पैठीनसिः**—सीसकायसपाषाण हीनभग्नपात्राणिवर्ज्यानि । हीनानि मानंतः । **मानं शिवरहस्ये**—षट्त्रिंशदंगुलंपात्रमुत्तमंपरिकीर्तितम् । मध्यमंतुत्रिभागोनंकनिष्ठंद्वाद शांगुलम् । तत्रैवदेवीपुराणे—वस्वंगुलविहीनंतुनपात्रंकारयेत्क्वचित् । क्वचिदितिसर्वधर्मकार्येनिषेधइतिटोडरानंदः । तत्रैव—नानावि चित्ररूपाणिपुडरीकाकृतीनिच । शंखनीलोत्पलाभानिपात्राणिपरिकल्पयेत् । **वाराहे**—शृणुतत्त्वेनमेदेविप्रियपात्राणियानिमे । सौवर्णराज तंताम्रंकांस्यंचैवतुयद्भवेत् । सर्वेभ्योभ्यधिकंताम्रंतदेवममरोचते । **अग्निपुराणे**—मृन्मयंचतथाकांस्यमारकूटादिसंभवम् । त्रपुसीसलोहजा तमर्घपात्रंविवर्जयेत् । **वैखानसग्रंथेअभिषेकपात्रमुक्तम्**—अरत्निमात्रविस्तारंमध्येष्टदलसंयुतम् । प्रतिपद्मदलंमध्येसुषिराणांशतं भवेत् । अष्टोत्तरशतंवापिभूषितंमध्यतस्तथा । खचितंचमहारत्नैरेवंधारासहस्रकम् । धाराष्टकेनवायुक्तमभिषेकायकल्पयेत् । विंशत्यावाष्टभि र्वापिद्वाभ्यांवादशभिश्चवा । तत्रैव—पानीयपात्रंसौवर्णराजतंताम्रमेवच । वृत्तायतंसुवृत्तंवाभवेदायतमेववा । प्रस्थमानप्रमाणांभःपूरयोग्यांत

रंशुचि । नीराजनक्रियापात्र्योर्हेमादिद्रव्यनिर्मिताः । तत्रैवपुष्पसारसुधानिधौ—अर्घ्यपात्रंतुवायव्येनैर्ऋत्यांपाद्यपात्रकम् । आग्नेय्यांस्नानकलशमीशेत्वाचमनीयकम् । मध्येतुमधुपर्कःस्यादित्येतत्पात्रलक्षणम्। चंद्रिकायामाचारादशौचस्कांदे—नैवेद्यपात्रंवक्ष्यामिकेशवस्य महात्मनः । सौवर्णराजतंताम्रंकांस्यंमृन्मयमेववा । पालाशंपद्मपत्रंविष्णोरतिप्रियम् । पूर्वोक्तमृन्मयनिषेधस्तुकुलालचक्रनिष्पन्नपरः।—कुलालचक्रनिष्पन्नमासुरंमृन्मयंस्मृतम् । तदेवहस्तघटितंस्थाल्यादिदैविकंमतमितिकल्पतरुदिवोदासीयादौवचनात् । शौनकः—पूजागृहं प्रविश्याथमंडलंपरिकल्प्यच । सौवर्णंचचतुर्द्वारंसप्राकारंसविस्तरम् । मंडपंरचयित्वातुनितानध्वजतोरणैः । कृष्णभट्टीये—दर्शनीयामहामुद्रापूजारंभावसानयोः । संहारमुद्राकर्तव्यापरिपूर्णेर्चनादिके । अधोमुखाभ्यांहस्ताभ्यामापादतलमस्तकम् । पसारिताभ्यांसंस्पृश्यमहामुद्रेयमीरिता । आचारचिंतामणौ—गंधादिकानिवेद्यांतापूजापंचोपचारिकी । अर्घपाद्याचमनीयमधुपर्काचमानिच । गंधादिपंचकंचेतिउपचारादशोदिताः । षोडशोपचारास्तत्रैव—आसनंस्वागतंचार्घःपाद्यमाचमनंतथा । मधुपर्काचमस्नानवसनाभरणानिच । गंधपुष्पेधूपदीपौनैवेद्यंचंदनंतथा । प्रयोगदीपिकायांविष्णुपुराणे—पूर्वमावाहनंप्रोक्तमासनंचततःपरम् । ततश्चपाद्यमर्घ्यंचततस्त्वाचमनीयकम् । स्नानंवस्त्रंचोपवीतंततोगंधादिचंदनम् । पुष्पंधूपंचदीपंचनैवेद्यंतदनंतरम् । ततोदेयःप्रणामश्चततोदेयाप्रदक्षिणा । विसर्जनंततोदद्यादुपचारास्तुषोडश । क्वचित्प्रणामप्रदक्षिणास्थानेतांबूलदक्षिणेउक्ते । हेमाद्रौभविष्ये—आवाहनासनार्घ्यपाद्याचमनमधुपर्कसेवाश्च । भूषणगंधाः सुमनोयुतधूपदीपभोज्यानि । ग्रादक्षिण्यंस्तुतिरितिकथयंत्युपचारषोडशकम् । आचारचिंतामणावष्टादशउक्ताः—आसनावाहनेचार्घ्यपाद्यमाचमनंतथा। स्नानंवस्त्रोपवीतंचभूषणानिचसर्वशः । गंधपुष्पेतथाधूपदीपावन्नेनतर्पणम्। माल्यानुलेपनंचैवनमस्कारविसर्जने । पाद्यार्घयोःपौर्वापर्येविकल्पइतिस्मार्ताः । तत्रैव—आसनाभ्यंजनेतद्वदुद्वर्तननिरूपणे । संमार्जनंसर्पिरादिस्नापनावाहनेततः । पाद्यार्घाचमनीयंच

स्नानीयमधुपर्ककौ । पुनराचमनीयंचवस्त्रयज्ञोपवीतके । अलंकारागंधपुष्पेधूपदीपौतथैवच । नैवेद्यमथतांबूलंपुष्पमालातथैवच । अनुलेपनं चशय्याचचामरव्यजनेतथा । आदर्शारार्तिकंचैवनमस्कारोथनर्तनम् । गीतवाद्यादिदानानिस्तुतिहोमप्रदक्षिणम् । दंतकाष्ठप्रदानंचततोदेववि सर्जनम् । उपचाराइमेज्ञेयाःषट्त्रिंशत्सुरपूजने । **शांतिहेमाद्रौत्वन्येउक्ताः**—आवाहनासनेपाद्यमर्घ्यमाचमनंतथा । गंधपुष्पेतथाधूपं दीपंचमधुपर्ककम् । उपहारंतथाचामंस्नानंचांगविभूषणम् । वस्त्रोपवीतमाचाममलंकारान्विलेपनम् । गंधपुष्पेतथाधूपंदीपमंजनमेवच । आद र्शंमंगलंसर्वंदेयंसर्वात्मनातथा । होमंभोजनमाचाममलंकारांस्तथापुनः । गंधादिचपुनर्दद्यान्मुखवासंप्रदक्षिणाम् । स्तुतिंदंडंनमस्कारमात्म नोपिनिवेदनम् । **तत्रैव**—स्तुतिःस्वकृतावैदिकीदेवादिकृतावेति ।

भार्गवार्चनदीपिकायांषष्टिसंख्याउक्ताः—पूर्वंप्रबोधनंकुर्याज्जयशब्दांस्ततःपुनः । नमस्कारंततःकुर्यात्ततोनीराजनंपरम् । ततोदिव्यासनंदद्यात्ततोवैदंतधावनम् । पादप्रक्षालनंदद्यात्ततोर्घ्यंचप्रकल्पयेत् । आचामंमधुपर्कंचपुनराचमनीयकम् । ततःसुगंधितैलेनमर्दनंका रयेद्धरेः । ततोभ्यंगंसुगंधैस्तुकुर्यात्तैलापसारणम् । ततःपुण्योदकैःकुर्यादभिषेकंसुगंधिभिः । क्षीरेणदध्नाचतथाघृतेनमधुनापिच । शर्करयामं त्रपूतैर्गंधपुष्पोदकैरपि । महाभिषेकंतथाचाममंगवस्त्रंततोर्पयेत् । वाससीपरिधानार्थमुपवीतंतथाचमम् । गंधमाभरणंपुष्पंधूपंनीराजनंतथा । दद्युत्तारणनैवेद्यौमुखवासंसुगंधिभिः । तांबूलंशयनंकेशसाधनंवस्त्रदानकम् । किरीटचंदनेदद्यात्ततआभरणानिच । पुष्पनीराजनादर्शामंडपा गमनंततः । तत्रासनंपाद्यमर्घ्यमाचामंधूपदीपकौ । नैवेद्यंचसतांबूलंचंद्रनीराजनंपरम् । चामरंव्यजनंछत्रंपुरोगीतंमनोहरम् । मृदंगादिस्वनं नृत्यंनमस्कारंप्रदक्षिणाम् । स्तुतिंकुर्यात्ततोविष्णोश्चरणौमस्तकेन्यसेत् । निर्माल्यधारणंकुर्यान्नैवेद्यांशस्यभोजनम् । सेवामुद्दिश्योपविशेन्मंचके तूलिकांनयेत् । सुखासनेनशयनेनीत्वातंतत्रशाययेत् । अर्चैत्कुसुमतांबूलैःपादौसंवाहयेत्ततः । अत्रविष्णुपदंशिवादेरुपलक्षणम् । विधिवच्चा

चयेत्सर्वान्योविप्रोभक्तितत्परइतिपारिजातेवृद्धपराशरोक्तेः । सएव—स्नानेवस्त्रेचनैवेद्येदद्यादाचमनंहरेः । अत्रपितृचरणाः—सुवर्णप्रतिमादौतंडुलपुंजादिपुचपोडशाद्युपचारपूजैव । आवाहनाभावेपूजायाअसंभवात् । पंचोपचारादशोपचारास्तुपूर्वस्थापितदेवेष्वित्यूचुः ।

प्रतिमाविचारः । **भविष्ये**—सौवर्णीराजतीताम्रीमृन्मयीचतथाभवेत् । पाषाणधातुयुक्तावारीतिकांस्यमयीतथा । शुद्धंदारुमयीवापिदेवतार्चाप्रशस्यते । अंगुष्ठपर्वादारभ्यवितस्तियावदेवतु । प्रतिमाचतथाकार्यानाधिकाशस्यतेबुधैः । **पंचरात्रे**—मृदारुलाक्षागोमेदमधूच्छिष्टमयीनतु । **स्मृतिसारेपुराणे**—शैलीदारुमयीलौहीलेप्यालेख्याचसैकती । मनोमयीमणिमयीप्रतिमाष्टविधास्मृता । चलाचलेतिद्विविधाप्रतिष्ठाजीवमंदिरम् । **प्रयोगपारिजातेविष्णुधर्मे**—तयोरसंभवेचैवसाचेहनवधास्मृता । रत्नजाहेमजाचैवराजतीताम्रजातथा । रैतिक्यर्चातथालौहीशैलजाद्रुमजातथा । अधमाधमाविज्ञेयामृन्मयीप्रतिमाचया । रैतिकी पित्तलजा । **स्मृतिसारे**—नार्च्यागृहेश्मजा मूर्तिश्चतुरंगुलतोधिका । नवितस्त्यधिकाधातुसंभवाश्रेयइच्छता । **देवीपुराणे**—सप्तांगुलंसमारभ्ययावच्चद्वादशांगुलम् । गृहेष्वर्चासमाख्यातााप्रासादेचाधिकाशुभा । **कपिलपंचरात्रे**—मानांगुलप्रमाणेनदशपंचदशांगुला । गृहेतुप्रतिमापूज्यानाधिकातुप्रशस्यते । **हयशीर्षपंचरात्रे**—दशांगुलप्रमाणावातिथ्यंगुलमितापिवा । **दानमदनरत्नेप्येवम्** । तत्रैव**मात्स्ये**—व्रीहिभिर्वात्रिभिश्चोर्ध्वैरधमांगुलमीरितम् । मध्यमंतुत्रिभिःसार्धैश्चतुर्भिश्चतथोत्तमम् । मानांगुलमितिख्यातंमात्रांगुलमथोच्यते । **गोविंदराजीये देवीपुराणे**—तथाचोर्ध्वस्थिताकार्यासदादेवीचतुर्भुजा । अन्यथातुनकर्तव्याकृताभयकरीसदा । अष्टभुजासदाकार्याप्रासादेवागृहेतथा । ऊर्ध्वस्थितागृहेघोरारौद्राचाभिभवेद्युधि । गृहेनसजटापूज्याशैलजापितथैवच । अष्टभुजाऊर्ध्वाघोरेति**गोविंदराजः** । **वाराहे**—गृहेग्निदग्धाभग्नाश्चनार्चाःपूज्यावसुंधरे । एतासां पूजनान्नित्यमुद्वेगंप्राप्नुयाद्गृही । **स्कांदे**—शालग्रामशिलायास्तुप्रतिष्ठानैवविद्यते । महापूजांतुकृत्वादौपूजयेत्तांततोबुधः । **बृहद्दामने**—

प्रतिष्ठादिविधानेनविनैववसतेहरिः । सदातत्रशिलामात्रेवक्रचिह्नंवरानने । चक्रचिह्नइत्युक्तेरचक्रेहिरण्यगर्भादौशालग्रामशिलाकृतमूर्त्यादौच प्रतिष्ठाभवतीति **पंचायतनसारः** । अत्रकेचित्प्रतिष्ठावाहनयोर्मिलितयोर्देवतासंनिधिजनकत्वात्स्थापितदेवेष्वप्यावाहनमित्याहुः । तन्न । आवाहनात्पूर्वपादस्पर्शादावपिदोषाभावप्रसक्तेः । मालादिदानेपुण्याभावापत्तेश्च । अतो नावाहनम् । **पंचायतनसारे**तुदेवतायाव्यासंगांतराभावध्यानार्थंप्रतिष्ठितदेवतायामप्यावाहनमित्युक्तम् । अन्येतुप्रतिष्ठयादेवसन्निधियोग्यताक्रियतेआवाहनेनतत्सन्निधिरित्याहुः । दैशिकसान्निध्येपिवौद्धसान्निध्यार्थमावाहनमितिभट्टदिनकरः । **स्मृतिसारेपुराणेच**—उद्वासावाहनेनस्तःस्थिरायामुद्ववार्चने । अस्थिरायांविकल्पात्स्यात्स्थडिलेतुभवेद्ध्रुवम् । स्नपनंचाविलेख्यायामन्यत्रपरिमार्जनम् । **पंचायतनसारेनंदिपुराणे**—स्थिरलिङ्गेऽनलेतोयेहृदयेसूर्यमंडले । आवाहनादिचत्वारिकुर्यान्नोद्वासनंतथा । तत्रैव**पाद्मे**—शालग्रामशिलायांचनावाहनविसर्जने । **देवीपुराणे**—पाद्येश्यामाकदूर्वाचविष्णुक्रांतादिरिष्यते । गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपाः । तत्रैव—बिल्वरक्ताक्षतैःपुष्पैर्दधिदूर्वाकुशैस्तिलैः । सामान्यःसर्वदेवानामर्घोयंपरिकीर्तितः । अभावेदधिदूर्वादेर्मानसंवाप्रकल्पयेत् । रक्तंकुंकुमम् । **पुष्पसारसुधानिधौ**—इक्षुर्मधुघृतंचैवपयोदधिसहैवतु । प्रस्थप्रमाणंवाग्राह्यंमधुपर्कमिहोच्यते । **पंचायतनपूजासारे**—जातीलवंगकंकोलान्याचमनीयद्रव्याणि ॥

अथस्नानं । **बृहन्नारदीये**—वादित्रनिनदैरुच्चैर्गीतमंगलनिःस्वनैः । यःस्नापयतिदेवेशंजीवन्मुक्तोभवेद्धिसः । वादित्राणामभावेतुपूजाकालेचसर्वदा । घटाशब्दोनरैःकार्यःसर्ववाद्यमयीयतः । **योगिनीतन्त्रे**—शिवागारेझल्लंकंचसूर्यागारेचशंखकम् । दुर्गागारेवंशवाद्यंमधूरींचन वादयेत् । **स्कांदे**—वेणुवीणास्वनैश्चैवकुर्यात्तुस्नपनंहरेः । शिवशंखेननस्नापयेत् । नशिवंशंखवारिणेतिपंचायतनसारेवचनात् । सर्वत्रैव

१ परिकल्पित । २ झल्लं कांस्यतालवाद्यम् । ३ मधूरीवेणुवाद्यम् ।

प्रशस्तोऽब्जःशिवसूर्यार्चनंविनेतिप्रयोगपारिजातेब्राह्म्याच्च । शिवार्चनेशंखउक्तःसौरपुराणेपाद्मे—कुशपुण्योदकस्नानाद्ब्रह्मलोकमवाप्नुयात् । रत्नोदकेनसावित्रंकौबेरंहेमवारिणा । नारसिंहंतुसंस्नाप्यकर्पूरागरुवारिणा । इंद्रलोकेसमोदित्वापश्चाद्विष्णुपुरंव्रजेत् । कपिलाक्षीरमादायशंखेकृत्वाजनार्दनम् । यज्ञायुतसहस्रस्यस्नापयित्वालभेत्फलम् । ताम्रमूर्तौगव्याभिषेकोननिषिद्धः । स्नानतर्पणदानेष्वित्यादिपूर्वोक्तवचनात् । नारसिंहे—यःपुनःपुष्पतैलेनसंस्नापयतिकेशवम् । दिव्यौषधियुतेनापितस्यप्रीतोभवेत्सदा । रुद्रयामले—द्वादश्यांचदिवास्नापस्तुलस्यवचयस्तथा । तत्रविष्णोर्दिवास्नानंवर्जनीयंसदाबुधैः । पाद्मे—शंखेतीर्थोदकंकृत्वायःस्नापयतिकेशवम् । द्वादश्यांबिंदुमात्रेणकुलानांतारयेच्छतम् । द्वादश्यांस्नानेविकल्पइतिकेचित् । दिवापदोपादानाद्दिवसेनिषिद्धंनतुरात्रावित्यन्ये । विष्णुमूर्तेःस्ननिषेधोनशालग्रामादेरित्यपरे । प्रयोगपारिजातेव्यासः—प्रतिमापट्टयंत्राणांनित्यंस्नानंनकारयेत् । कारयेत्पर्वदिवसेयदावामलधारणम् । पाद्मेवैशाखमाहात्म्ये—चंदनोशीरकर्पूरकुंकुमागरुवासितैः । सलिलैःस्नापयेन्मंत्रीनित्यदाविभवेसति । स्कांदे—क्षीराद्दशगुणंदध्नाघृतेनैवशतोत्तरम् । घृताद्दशगुणं क्षौद्रंक्षौद्राच्चैक्षवजंतथा । स्नानादिपुद्रव्यमानमुक्तंशिवधर्मोत्तरे—स्नानंपलशतंज्ञेयमभ्यंगंपंचविंशतिः । पलानांद्वेसहस्रेतुमहास्नानंप्रकीर्तितम् । हरनाथीये—अष्टोत्तरपलशतंस्नानेदेयंतुसर्वथा । व्रतहेमाद्रौकालिकापुराणे—पंचविंशत्पलंलिंगेअभ्यंगंकारयेदथ । शिवस्य सर्पिषास्नानंप्रोक्तंपलशतेनच । तावतामधुनाचैवदध्नाचैवपुनःपुनः । तावतैवचक्षीरेणगव्येनैवभवेत्ततः । भूयःसार्धसहस्रेणपलानामैक्षवंतथा । पलंचकुडवःप्रस्थआढकोद्रोणएवच । धान्यमानेपुवोद्धव्याःक्रमशोऽमीचतुर्गुणाः । मदनरत्नेआथर्वणपरिशिष्टे—पंचकृष्णलकोमाषस्तैश्चतुःषष्टिभिःपलम् । चंद्रिकायांपुलस्त्यः—स्नाप्यमानंचपश्यंतियेघृतेनोत्तरायणे । तेयांतिविष्णुसालोक्यंसर्वपापविवर्जिताः । घृतमानं प्रस्थोवाआढकंवेतितत्रैव । तत्रैवचामने—देवमाल्यापनयनंदेवागारसमूहनम् । स्नपनंसर्वदेवानांगोप्रदानसमंस्मृतम् ॥ ॥ वस्त्रादि ॥ अग्नि-

पुराणे—दुकूलपट्टकौशेयरांककार्पासकादिभिः । वासोभिःपूजयेद्देवंसुशुभैरात्मनःप्रियैः । **विष्णुधर्मोत्तरे**—रांकवामृगरोम्याश्चकंदस्यश्च तथाशुभाः । **निषिद्धानिवाराहे**—नीलिरंजितवस्त्रंयोमर्त्योमह्यंनिवेदयेत् । नवमक्षालितचैवसचिरंरौरवेवसेत् । नीलीदोषःकार्पासएवोक्तः । **तथा**—यज्ञोपवीतदानेनसुरेभ्योब्राह्मणायवा । भवेद्विप्रश्चतुर्वेदीशुद्धधीर्नात्रसंशयः । **नंदिपुराणे**—अलंकारचयोदद्याद्विप्रायचसुरायच । सोमलोकेरमित्वासविष्णुलोकेमहीयते । वस्त्रालंकारादिनप्रत्यहमपूर्वम् । वस्त्रमभ्युक्षणाच्छुध्येदपरंतुदिनेदिनेइतिहरनाथीयेतत्त्वसागर-संहितोक्तेः । अपरंतदेव । ननिर्माल्यंभवेद्वस्त्रंस्वर्णरत्नविभूषणमितितत्रैवविद्याकरीयनिबंधाच्च । उपवीतमपिप्रत्यहंनापूर्ववस्त्रसमत्वा दितिहरनाथः ॥ ॥ गंधपुष्पधूपदीपादेवताभेदेनवक्ष्यते । **चंद्रिकायांपाद्मे**—गंधेभ्यश्चंदनंपुण्यंचंदनादगरुर्वरः । कृष्णागरुस्ततः श्रेष्ठःकुंकुमतुततोवरम् । **मदनरत्नेगारुडे**—कस्तूरिकायाभागौद्वौचत्वारश्चदनस्यतु । कुंकुमस्यत्रयश्चैवशशिनःस्यात्ततःसमम् । कर्पूरंचंदनंदर्पःकुकुमंचसमांशके । सर्वगंधमितिप्रोक्तंसमस्तसुरवल्लभम् । **काशीखंडे**—कस्तूरिकायाद्वौभागौद्वौभागौकुंकुमस्यतु । चंदनस्यत्रयोभागाःशशिनस्त्वेकएवहि । **यक्षकर्दमइत्येषसर्वदेवमनोहरः** । **मदनरत्ने**—कर्पूरमगरुश्चैवकस्तूरीचंदनंतथा । कंकोलंचभवेदेभिःपंचभिर्यक्ष कर्दमः । **विष्णुधर्मोत्तरे**—दारिद्र्यंपद्मकंकुर्यादस्रास्थ्यंरक्तचंदनम् । **उशीरं**विप्रविभ्रंशमन्येकुर्युरुपद्रवम् । केवलनिषेधोयंमिलितानांविधानादितिपंचायतनसारः । **गारुडेस्कांदेच**—योददातिहरेर्नित्यंतुलसीकाष्ठचंदनं । पितॄणांचविशेषेणसदाभीष्टंहरेर्यथा । तुलसीदल लग्नेनचंदनेनजनार्दनम् । विलेपयतियोनित्यंलभतेचिंतितंफलम् ॥

अथपुष्पाणि । पुष्पदानंकराभ्यामितिकेचित् । तन्न । तत्रदक्षिणकरनियमात् । पुष्पांजलिविधानंजलिविधेश्च । यत्तु—यजन्क

---

१ कदली तृणविशेष । २ दर्भ जवादि ।

राम्यांयज्ञेशमिति । यच्च—तावेवकेवलौश्लाघ्यौयौतत्पूजाकरौकराविति । तत्कथंचिल्लुब्धकरद्वयव्यापारानुवादइतिटोडरानंदः । पुष्पांजल्यादिपरमितिवयम् । **पाद्मे**—श्यामापितुलसीविष्णोःप्रियागौरीविशेषतः । **विष्णुरहस्ये**—तुलसींप्राप्ययोनित्यंनकरोतिममार्चनम् । तस्माद्दंप्रतिगृह्णामिनपूजांशतवार्षिकीम् । **विष्णुधर्मे**—रक्तान्यकालजातानिचैत्यवृक्षोद्भवानिच । श्मशानजातपुष्पाणिनैवदेयानिकर्हिचित् । **विष्णुः**—नोग्रगंधिपुष्पंनागंधिनकंटकिजम् । कंटकिजमपिशुक्लंसुगंधिदद्यात् । नरक्तंदद्यात् । रक्तमपिकुंकुमंजलजंचदद्यादिति । **विष्णुरहस्ये**—नशुष्कैःपूजयेद्देवंकुसुमैर्नमहीगतैः । नविशीर्णदलैःस्पृष्टैर्नाशुभैर्नाविकासिभिः । अतिगंधीन्यगंधीनिअम्लगंधीनिवर्जयेत् । अविकासिभिरितियेषांविकासोनजातः । येषांतुविकासोत्तरंमुकुलत्वंकमलादीनांतेषांसूर्यएवनिषेधइतिवक्ष्यते । **भविष्ये**—केशकीटापविद्धानिशीर्णपर्युषितानिच । स्वयंपतितपुष्पाणित्यजेदुपहतानिच । मुकुलैर्नार्चयेद्देवमपक्वंननिवेदयेत् । गंधवंत्यपवित्राणिकुसुमानिविवर्जयेत् । गंधहीनमपिग्राह्यंपवित्रंयत्कुशादिकम् । **तिथ्यालोकेमत्स्यसूक्ते**—वंधुजीवंचद्रोणंचसरस्वत्यैनदापयेत् । **विष्णुधर्मोत्तरे**—नगृहे करवीरोत्थैःकुसुमैरर्चयेद्धरिम् । गृहेजातोयःकरवीरस्तदुत्थैरित्यर्थइति**पंचायतनसारः** । यथाश्रुतमेवतुयुक्तम् । **निषिद्धपुष्पाणिगारुडे**—नार्कंनोन्मत्तकंकिंचित्तथैवगिरिकर्णिकाम् । नकंटकारिकापुष्पमच्युतायनिवेदयेत् । कुटजंशाल्मलीपुष्पंशिरीषंचजनार्दने । निवेदितंभयंशोकंनिःस्वतांचप्रयच्छति । करानीतंपटानीतंतत्पुष्पंसकलंत्यजेत् । करोवामः । पटोऽधोवस्त्रम् । देवोपरिधृतंयच्चवामहस्तेचयद्धृतम् । अधोवस्त्रधृतंयच्चतत्पुष्पंपरिवर्जयेदितिपंचायतनसारात् । **विष्णुः**—याचितंनिष्फलंपुष्पंक्रयक्रीतंचनिष्फलम् । अस्पृश्यत्वाद्रजस्वलायादेवकार्यनिषेधेसिद्धे । नदेवकार्यंकुर्यादितिहारीतोक्तिर्देवार्थपुष्पनैवेद्यादीत्येतदर्थेतिकल्पतरुः । **विष्णुधर्मोत्तरे**—अधोवस्त्रधृतंयच्चजलांतःक्षालितंचयत् । देवतास्तन्नगृह्णंतिपुष्पंनिर्माल्यतांगतम् ॥ **पर्युषितदिनविचारः** । **हलायुधेभविष्ये**—केशकी-

टापविद्धानित्यजेत्पर्युषितानिच । तुलस्यगस्तिबिल्वानांनास्तिपर्युषितात्मता । **मदनपारिजाते**–जलंपर्युषितंत्याज्यंपत्राणिकुसुमानिच । तुलस्य गस्तिबिल्वानिगांगंवारिनदुष्यति । **विष्णुधर्मोत्तरे**—तुलस्यांबिल्वपत्रेचजलजेपुचसर्वशः । नपर्युषितदोषोस्तिमालाकारगृहेपुच । **स्कांदे**—पलाशंदिनमेकंचपंकजंचदिनत्रयम् । पंचाहंबिल्वपत्रंचदशाहंतुलसीदलम् । पर्युषितंनेत्यर्थः । **हलायुधे**—जलजानांचसर्वेषां बिल्वपत्रस्यचैवहि । तेषांपर्युषिताशंकाकार्यापंचदिनोर्ध्वतः । तीर्थसौख्येप्राप्ते—तुलसीनोपर्युषिताबिल्वंचत्रिदिनावधि । पद्मंपंचदिना त्याज्यंशेषंपर्युषितंविदुः । तत्रैवस्कांदेदमनमुपक्रम्य—तयमालाभगवतःपरमप्रीतिकारिणी । शुष्कापर्युषितावापिनदुष्टाभवतिकचित् । पूर्वोक्तदिनसंख्यातिक्रमेपिमालाकारगृहस्थमदुष्टमितिशैवागमः । **स्मृतिसारावल्यां**—जलजानांचसर्वेषांपत्राणामहतस्यच । कुश पुष्पस्यरजतसुवर्णकृतयोरपि । नपर्युषितदोषोस्तितीर्थतोयस्यचैवहि । **वोपदेवः**—विल्वापामार्गजातीतुलसिशमिशताकेतकीभृंगदूर्वामंदां भोजाहिद्मांमुनितिलतगरब्रह्मकह्लारमल्ली । चंपाश्वारातिकुंभादमनमरुवकाविल्वतोहानिशस्ताश्त्रिंशत्येकार्यरीशोदधिनिधिवसुभूभूयमाभूयएव । **अस्यार्थः**—शताशतावरी । मंदोमंदारः । अहिर्नागचंपकः । मुनिरगस्त्यः । ब्रह्मपलाशम् । कह्लारंकुमुदम् । तेननपौनरुक्त्यम् । अश्वारातिःकरवीरः । अरीपट् । ईशःएकादश । उदधिश्चत्वारः । निधिर्नव । वसुरष्टौ । भूरेकः । यमौद्वौ । बिल्वमारभ्याहिपर्यंतं गणयित्वादर्भमारभ्यत्रिंशदादिसंख्ययापुनर्गणयेदित्यर्थः । **तत्वसागरसंहितायां**—यद्वापर्युषितैश्चापिपुष्पाद्यैरविकारिभिः । गंधोदके नचैतानित्रिःप्रोक्ष्यैवप्रपूजयेत् । **पारिजातेआदित्यपुराणे**—शिवेकुंदमदंतींचयूथींवंधूककेतकम् । जपारक्तंत्रिसंध्यैद्वेसिंदूरकुटजानितु । मालतींधुमृणंचैवहयारिंवर्वरींत्यजेत् । नशस्तंशाल्मलंपुष्पंकूष्मांडंचनशोभनम् । कलिकामुकुलैर्नेज्याविनाचंपकपंकजैः । **पुष्पमालायाम्**– मंदारमर्कधत्तूरशाल्मलीकांचनालजम् । निषिद्धंविष्णुपूजायांपुष्पंवैभीतकंतथा । निषिद्धंविद्धितंविष्णौशिरीषंशक्रपुंड्रकम् । नरसिंहस्यपूजायां

निषिद्धंकेतकीद्वयम् । चंद्रिकायामप्येवम् । **मदनपारिजातेविष्णुधर्मे**—ककचाख्यस्यपुष्पाणितथाधत्तूरकस्यच । कृष्णंचकुटजं चार्कंनैवदेयंजनार्दने । शाल्मलंचशिरीषंचबृहतींगिरिमल्लिकाम् । सर्जकंचैवकूष्मांडंकंचनारंचवर्जयेत् । **शातातपः**—देवीनामर्कमंदारौ सूर्यस्यतगरंतथा । निषिद्धमित्यर्थः । **कार्तिकमाहात्म्ये**—गणेशंतुलसीपत्रैर्दुर्गांनैवतुदूर्वया । मुनिपुष्पैस्तुसूर्यंचलक्ष्मीकामोनचार्चयेत् । **पाद्मे**—नबिल्वेनार्चयेद्भानुंनकेतक्यामहेश्वरम् । नाक्षतैःपूजयेद्विष्णुंनतुलस्यागणाधिपम् ॥

तुलसीग्रहणादौविशेषः । हारीतः—स्नानंकृत्वातुयेकेचित्पुष्पंचिन्वंतिमानवाः । देवतास्तन्नगृह्णंतिभस्मीभवतिकाष्ठवत् । तन्म ध्याह्नस्नानपरम् । अस्नात्वातुलसींछित्त्वादेवतापितृकर्मणि । तत्सर्वंनिष्फलंयातिपंचगव्येनशुध्यति इति **पाद्मोक्तेरितिचंद्रिका** । अत्रतुलसीपदंपुष्पमात्रपरम् शिष्टाचारानुरोधादितिरुद्रधरः । **देवयाज्ञिकनिबंधेस्मृतिसारे**—श्रवणेचव्यतीपातेभौमभार्गवभानुषु । पर्वद्वयेचसंक्रांतौद्वादश्यांसूतकद्वये । तुलसींयेविचिन्वंतितेछिंदंतिहरेःशिरः । क्वचिच्छ्रवणस्थानेवैधृतिपदम् । **पाद्मे**—भृग्वर्कांगारवारेषुद्वा दश्यांपंचपर्वसु । येविचिन्वंतितुलसींतेछिंदंतिहरेःशिरः । **विष्णुधर्मोत्तरे**—रविवारंविनादूर्वांतुलसींद्वादशींविना । जीवितस्याविनाशाय नविचिन्वीतधर्मवित् । तथा—संक्रांतावर्कपक्षांतेद्वादश्यांनिशिसंध्ययोः । यैश्छिन्नंतुलसीपत्रंतैश्छिन्नंहरिमस्तकम् । **विष्णुधर्मे**—नछिंद्या तुलसींविप्रोद्वादश्यांवैष्णवःक्वचित् । **हरिभक्तिविलासे**–संक्रांत्यादौनिषिद्धोपितुलस्यवचयःस्मृतौ । परंश्रीविष्णुभक्तैस्तुद्वादश्यामेवनेष्यते । अयंनिषेधोनकृष्णतुलस्याम् ।—तुलसीकृष्णतुलसीतथारक्तंचचंदनम् । केतकीपुष्पपत्रंचसद्यस्तुष्टिकरंहरेरिति **भविष्ये**कृष्णतुलस्याःपुनरु पादानेनतुलसीत्वाभावात् । जीरकंकृष्णजीरकमितिवत् । **पाद्मे**—द्वादश्यांतुलसीपत्रंधात्रीपत्रंचकार्तिके । लुनातिसनरोगच्छेन्निरयानतिग हितान् । **रुद्रयामले**—देवार्थेतुलसीछेदोहोमार्थेसमिधस्तथा । इंदुक्षयेनदुष्येतगवार्थेपितृणस्यच । **पाद्मे**—तुलस्यमृतजन्मासिसदात्वंके

शवप्रिये । केशवार्थंविचिन्वामिवरदाभवशोभने । इतितुलसीग्रहणमंत्रः । **अवंतीखंडेस्कांदे**—येऽर्चयंतिहरेर्मूर्तिंकोमलैस्तुलसीदलैः । कोटिकोटिसुवर्णानांदानस्यफलमाप्नुयुः । तत्रैव—सुमंजर्यासदलयातुलसीभवयाहरेः । पूजांकुर्वीतयोनित्यंसपूजाफलमश्नुते । **शंखः**—वानस्पत्येमूलफलेदार्वम्यर्थेचगोस्तृणम् । देवतार्थंचकुसुममस्तेयंमनुरब्रवीत् । इदंद्विजपरम् । द्विजस्तृणैधःपुष्पाणिसर्वतःस्वयमाहरेदितियाज्ञवल्क्योक्तेः । एतन्नित्यपूजापरम् ।—पारक्यारामसंजातैःकुसुमैरर्चयेत्सुरान् । तेनपापेनलिप्येऽहंयदेतदनृतंभवेदितिनारदीयादितिपंचायतनसारः । **आह्निकप्रदीपेस्कांदे**—पत्रंवायदिवापुष्पंफलंनेष्टमधोमुखम् । दुःखदंतत्समाख्यातंयथोत्पन्नंप्रदापयेत् । अधोमुखार्पणंनेष्टंपुष्पांजलिविधिंविना ॥ ॥ **लक्षपूजायांविशेषः** । लक्षपूजासुसर्वासुपुष्पमेकैकमर्पयेत् । समुदायेनचेत्पूजालक्षपुष्पार्पणंहितत् । लक्षपुष्पादौपुष्पाद्यर्पणंयथेच्छमितिपंचायतनसारे । **जटमल्ले**—येषांशंसंतिपुष्पाणिप्रशस्तान्यर्चनेहरेः । पल्लवाअपितेषांस्युःफलंवार्चाविधौहरेः । **पाद्मे**—बिल्वपत्रंशमीपत्रंतुलस्यामलकंतथा । कुशपत्रंभृंगराजंसदाग्राह्यंहरेर्बुधैः । **बिल्वपत्रेविशेषः शिवधर्मोत्तरे**—अच्छिन्नैर्बिल्वपत्रैश्चअच्छिन्नाग्रैस्त्रिपत्रकैः । वामपत्रेवसेद्ब्रह्मापद्मनाभश्चदक्षिणे । पत्राग्रेलोकपालाश्चमध्येपत्रेसदाशिवः । पृष्ठभागेस्थितायक्षाःपूर्वभागेऽमृतंस्थितम् । तस्माद्बैपूर्वभागेनअर्चयेद्गिरिजापतिम् । **जटमल्ले**—येषांशंसंतिपुष्पाणिप्रशस्तान्यर्चनेहरेः । पल्लवाअपितेषांस्युःफलंवार्चाविधौहरेः । **भविष्ये**—फलानामप्यलाभेतुतृणगुल्मौषधीरपि । औषधीनामभावेतुभक्त्याभवतिपूजितः । मनसापूजयेदित्यर्थः ॥

अथधूपः । तिथितत्वेकालिकापुराणे—मधुमुस्ताघृतंगंधोगुग्गुल्वगरुशैलजम् । सरलंसिद्धसिद्धार्थादशांगोधूपइष्यते । **मदनरत्ने**—पड्भागकुष्ठंद्विगुणोगुडश्चलाक्षात्रयंपंचनखस्यभागाः । हरीतकीसर्जरसश्चमांसीभागैकमेकंत्वथशैलजस्य । घनस्यचत्वारिपुरस्यचैकंधूपोदशांगःकथितोमुनीद्रैः । द्विगुणोव्यंशः । शैलजंमध्यदेशेतूलइतिप्रसिद्धम् । घनोमुस्ता । पुरोगुग्गुलुः । **व्रतहेमाद्रौभविष्ये**—अगरुंचं

दनंमुस्तासिह्लकंवृपणंतथा । समभागंतुकर्तव्यंधूपोयममृताह्वयः । तथा–श्रीखंडंग्रंथिसहितमगरुंसिह्लकंतथा । मुस्तातथेंदुर्भूतेशशर्कराचददे त्रयम् । इत्येपोऽनंतधूपश्चकथितोदेवसत्तम । तथा—कृष्णागरुंसिह्लकंचवालकंवृपणंतथा । चंदनंतगरंमुस्ताग्रबोधःशर्करान्वितः । तथा—कर्पूरंचंदनंकुष्टमुशीरंसिह्लकंतथा । ग्रंथिकंवृपणंभीमकुंकुमंगृंजनंतथा । हरीतकीतथोशीरंयक्षधूपउदाहृतः । तथा—वृपणंसिह्लकंविल्वंश्रीखंडमगरुंतथा । कर्पूरंचतथामुस्ताशर्करासत्वचंद्विज । इत्येपविजयोधूपःस्वयंदेवेननिर्मितः । वृपणंकस्तूरिकेति**समयप्रदीपः** । कर्पूरंचंदनंमांसीत्वक्पत्रैलालवंगके । अगरुंसिह्लकंधूपंप्राजापत्यंप्रचक्षते । श्रीखंडंतगरंकुष्टंकर्पूरंसिह्लकंतथा । महानयंस्मृतोधूपःप्रियोदेवस्यसर्वदा । **चंद्रिकायांहारीतः**—रुंहिकाख्यंकणंदारुसिह्लकंसागरुंसितम् । शंखंजातीफलश्रीशेधूपानिस्युःप्रियाणिवै । रुहिकामांसी । कणोगुग्गुलविशेषः । दारुदेवदारुः । शंखंनखी । **नारसिंहे**—विनामृगमदंधूपेजीवजातंविवर्जयेत् । एतच्चसिंहान्यपरम् । महिषाख्यंगुग्गुलंयआज्ययुक्तंससर्करम् । धूपंददातिराजेंद्रनरसिंहायभक्तिमानितितत्रैवोक्तेः । देव्यादौतत्स्यवक्ष्यमाणत्वाच्च । तत्रैव—कृष्णागरुसमुत्थेनधूपेनश्रीधरालयम् । धूपयेद्वैष्णवोयस्तुसमुक्तोनरकार्णवात् । **गौतमः**—तीर्थकोटिशतैर्धौतोयथाभवतिनिर्मलः । करोतिनिर्मलंदेहंधूपशेपस्तथाहरेः । **पाद्मे**—धूपंचारात्रिकंविष्णोःकराभ्यांयःप्रविंदते । कुलकोटिंसमुद्धृत्ययातिविष्णोःपरंपदम् ॥

अथदीपः । नारसिंहे—घृतेनवाथतैलेनदीपंप्रज्वालयेन्नरः । **अथमहादीपःव्रतहेमाद्रौविष्णुधर्मे**—महावर्तिःसदादेयाकृष्णपक्षेविशेषतः । देवस्यदक्षिणेपार्श्वेदेयातैलतुलानृप । पलाष्टकयुतांराजन्वर्तिंतत्रप्रकल्पयेत् । महारजनरक्तेनसमग्रेणतुवाससा । वामपार्श्वेतुदेवस्यदेयाघृततुलानृप । पलाष्टकयुतांपुण्यांशुक्लांवर्तिंचदीपयेत् । वाससातुसमग्रेणसोपवासोजितेंद्रियः । एवंवर्तिद्वयमिदंसकृद्दत्त्वामहीयते ।

१ हरिकाख्येति पाठः ।

एकामप्यथवादद्यादभीष्टामनयोर्द्वयोः । दीपदानंमहासत्रंकृत्वाफलमुपाश्नुते । **दीपनिर्वाणनिषेधोभविष्ये**—तांश्चदत्वानहिंसेतनच तैलविवर्जितान् । कुर्वीतदीपहिंसायोमूपकोंऽधःप्रजायते । **भविष्योत्तरे**—प्रज्वाल्यदेवदेवस्यकर्पूरेणतुदीपकम् । अश्वमेधमवाप्नोति कुलंचैवसमुद्धरेत् । **संवर्तः**—देवागारेद्विजानांचदीपंदत्वाचतुष्पथे । मेधावीज्ञानसंपन्नश्चक्षुष्मान्जायतेनरः ॥

अथनैवेद्यं । **कृष्णभट्टीये**—नैवेद्यजलपुष्पादौधेनुमुद्रांप्रदर्शयेत् । **गोविंदराजीयेब्रह्मांडे**—पत्रंपुष्पंफलंतोयमन्नपानाद्य मौषधम् । अनिवेद्यनभुंजीतयदाहारायकल्पितम् । तत्रैव**पाद्मे**—अनिवेद्यहरेर्भुंजन्सप्तजन्मनिनारकी । निवेदितस्यभक्षणंप्रतिपत्तिरिति **गोविंदराजः** । तन्न । यद्भक्षयेत्तन्निवेदितमितिवाक्यार्थात् । अनिवेदितभक्षणनिषेधात्सर्वान्ननिवेदननिषेधः । व्यवदानद्वारापुरो डाशस्येवोद्धृतान्ननिवेदनद्वारासर्वान्ननिवेदनमितिवाच्यम् । उद्धरणाविधानात् । तद्विधानेपिसर्वपुरोडाशत्यागवत्सर्वान्ननिवेदनसिद्धेश्च । निवेदितशेषत्वेनसर्वस्यनिवेदितत्वांगीकारेलक्षणापानाच्च । पाकैक्येनिवेदितेनैववैश्वदेवःस्विष्टकृद्वत् । **यत्तुशातातपः**—एकस्मिन्वाप्यशक्त श्चेत्पूर्वंविष्णुनिवेदनम् । वैश्वदेवंततःशिष्टाभ्यासस्यवचनंयथेतिशिष्टपदंतत्सर्वपुरोडाशत्यागे शेषात्स्विष्टकृतवद्विष्णोर्निवेदितान्नेनयष्ट्व्यंदेवतांतर मितिश्रीधरोक्तेःसर्वनिवेदनेप्युपपन्नमिति**गोविंदराजः**। **भट्टदिनकरस्तु** वैश्वदेवार्थनैवद्यार्थपाकभेदेनिवेदितमेवसंस्कृतमेव भक्षयेदिति नियमद्वयंनयुक्तम् । एकभक्षणेन्यतरनियमबाधात् । उभयभक्षणेनियमद्वयबाधात् । अतोनिवेदितमेवभक्षयेदितिवचोहोमासाधनवटकतांबूला दिपरं । हुतमेवभक्षयेदितिहविष्यपरं । यद्वानिवेदितमेवभक्षयेदितिवैश्वदेवानधिकारिपरम् । अथवापाकैक्येप्यहविष्यस्येवपाकभेदेपिनिवेदित स्याहुतस्यापिहुतत्वमस्त्येव । नहिपाकभेदेवैश्वदेवभेदः । महानससंस्कारत्वाद्वैश्वदेवस्य । एवंनिवेदितत्वमपिनचसर्वनिवेदनं । निवेदितस्यदा हादिविधानेनसर्वान्नदाहाद्यापत्तेः । पाकैक्येप्येवम् । तस्मादुद्धृत्यैवनिवेदनमित्याह । **विष्णुः**—मेषीमहिषीछागीनांदुग्धदधिघृतान्यदेयानि ।

गारुडे—तुलसीदलसंमिश्रंहरेर्यच्छतियःसदा । नैवेद्यमित्यादिस्मृतिरत्नावल्याम् । नैवेद्यसत्वभावेतुफलान्यपिनिवेदयेत् । फलानामप्यलाभेतुतृणगुल्मौषधीरपि । औषधीनामलाभेतुतोयान्यपिनिवेदयेत् । तदलाभेतुसर्वत्रमानसंप्रवरंस्मृतम् । **नैवेद्यांशदानमुक्तं पारिजातेसंग्रहे**—विष्वक्सेनायदातव्यंनैवेद्यस्यशतांशकम् । पादोदकंप्रसादंचलिंगेचंडेश्वरायतु । **तद्विधिःपंचरात्रे**—ततोजवनिकांविद्वानपसार्ययथाविधि । मुख्यादीशानतःपात्रान्नैवेद्यांशंसमुद्धरेत् । **टोडरानंदेविष्णुधर्मे**—फलानिदत्वादेवेभ्यःसफलांविंदतेश्रियम् । **अथफलंभविष्ये**—फलंचकथितंविद्धंकृमिभिस्तद्विवर्जयेत् । यत्पक्वमपिग्राह्यंकदलीफलमुत्तमम् । **अथतांबूलंस्कांदे**—तांबूलानांकिसलयंदत्वास्वर्गमवाप्नुयात् । इति ॥

अथप्रणामः । टोडरानंदेचंद्रिकायांचवाराहभविष्ययोः—प्रणम्यदंडवद्भूमौनमस्करेणयोर्चयेत् । सयांगतिमवाप्नोतिनतांक्रतुशतैरपि । **हलायुधे**—नदेवंपृष्ठतःकृत्वाप्रणामंकचिदाचरेत् । वरमुत्थायकर्तव्यंनवृथाभ्रमणंचरेत् । तत्रैव–एकहस्तप्रणामश्चएकाचैवप्रदक्षिणा । अकालेदर्शनंचैवपुण्यंहंतिपुराकृतम् । एकेतिचंडान्यपरम् । तस्माएकप्रदक्षिणायावक्ष्यमाणत्वात् । **गोविंदराजीयेभविष्ये**—अग्रेपृष्ठेवामभागेसमीपेगर्भमंदिरे । जपहोमनमस्कारान्नकुर्यादेवतालये । **वाराहे**—वस्त्रप्रावृतदेहस्तुयोनरःप्रणमेतमाम् । सदासजायतेमूर्खःससजन्मसुभामिनि । इदंपरिधानीयान्यपरम् । **चंद्रिकायांनारसिंहे**—नमस्कारेणचैकेनअष्टांगेनहरिंस्मरेत् । पद्भ्यांकराभ्यांशिरसापंचांगाप्रणतिःस्मृता । दोर्भ्यांपद्भ्यांचजानुभ्यामुरसाशिरसातथा । मनसावचसाभक्त्याप्रणामोष्टांगईरितः । **चंद्रिकायांतु**—उरसाशिरसादृष्ट्वामनसापिधियापिच । पद्भ्यांकराभ्यांवाचाचप्रणामोष्टांगउच्यतेइत्युक्तम् । **संग्रहे**—शिरोहस्तौचजानूचचिबुकंबाहुकद्वयम् । पंचांगस्तुनमस्कारोविद्वद्भिःसमुदाहृतः । **पाद्मे**—भूमिमापीड्यजानुभ्यांशिरआसेव्यवैभुवि । प्रणमेद्योहिदेवेशंसोऽश्वमेधफलंलभेत् ॥

अथप्रदक्षिणा।वाराहे—प्रदक्षिणंनकर्तव्यंपुरतःपृष्ठदर्शनात् । चक्रवद्भ्रामयेदंगंपृष्ठतोंगंनदर्शयेत् । अत्रविशेषोवक्ष्यतेकेदारखंडे—आरात्रिकंसकर्पूरंयेकुर्वंतिदिनेदिने । तेप्राप्नुवंतिसायुज्यंनात्रकार्याविचारणा । **टोडरानंदेविष्णुधर्मे**—गीतवादित्रदानेनसौख्यंप्राप्नोत्यनुत्तमम् । प्रेक्षणीयकदानेननरूपवानभिजायते । प्रेक्षणीयंनृत्यगीतादि । **अथशंखपूजाभविष्ये**—त्रैलोक्येयानिभूतानिवासुदेवस्यचाज्ञया । शंखेवसंतितिर्थेंद्रतस्माच्छंखंप्रपूजयेत् । **तत्रमंत्रः**—त्वंपुरासागरोत्पन्नोविष्णुनाविधृतःकरे । निर्मितःसर्वदेवैश्चपांचजन्यनमोस्तुते । गर्भादेवादिनारीणांविशीर्यंतेसहस्रशः । तवनादेनपातालेपांचजन्यनमोस्तुते[1] । **वाराहे**—द्वौशंखौनार्चयेदिति । **शिवार्चनंचंद्रिकायां सारसंग्रहे**—शंखमानंतुप्रादेशंचतुरंगुलमुच्छ्रितम् । **क्रियासारे**—प्रस्थांबुप्रमितःशंखःश्रेष्ठस्तर्ध्यंशपूरकः । मध्यस्तदर्धप्रमितःकनिष्ठःक्रमशोभवेत् । गोक्षीरधवलःस्निग्धोदीर्घनालोवृहत्तनुः । वृत्तोयोदक्षिणावर्तःसज्ञेयःशंखसंज्ञकः । पूर्वोक्तलक्षणोपेतोवामावर्तोथवापियः । प्रस्थोदानरत्नेज्ञेयः । **मदनरत्नेस्कांदे**—पलद्वयेनप्रसृतंद्विगुणंकुडवंमतम् । चतुर्भि कुडवैःप्रस्थआढकस्तैश्चतुर्गुणैः । चतुराढकोभवेद्द्रोणइत्येतद्व्यमानकम् । इति ॥

अथपूजाधिकारिणः । तत्र**विष्णुपुराणे**—ब्राह्मणःक्षत्रियोवैश्यःशूद्रश्चपृथिवीपते । स्वधर्मतत्परोविष्णुमाराधयतिनान्यथा । **स्कांदेशालिग्राममाहात्म्ये**—ब्राह्मणक्षत्रियविशांस्त्रीशूद्राणामथापिवा । शालग्रामेधिकारोऽस्तिनान्येषांतुकदाचन । अन्येसंकरजाः । **प्रतिष्ठाहेमाद्रौ**—चत्वारोब्राह्मणैःपूज्यास्त्रयोराजन्यजातिभिः । वैश्यैर्द्वावेवसंपूज्यौतथैकःशूद्रजातिभिः । ब्राह्मणैर्वासुदेवस्तुनृपैःसंकर्षणस्तथा । प्रद्युम्नःपूज्यतेवैश्यैरनिरुद्धस्तुशूद्रकैः । **प्रयोगपारिजाते मंत्रराजानुष्ठ्विधाने**—शालग्रामशिलांवापिचक्रांकितशिलांतथा ।

---

१ लत्तोयेसर्वतीर्थानिपांचजन्यनमोस्तुते इति पाठ ।

ब्राह्मणःपूजयेन्नित्यंक्षत्रियादिर्नपूजयेत् । क्षत्रियादिरदीक्षितः । नित्यंसर्वदा । अतोब्राह्मणस्यादीक्षितस्यापिशालिग्रामपूजानित्या । क्षत्रियादेस्तुदीक्षितस्य । अत्रदीक्षामंत्रविहीनेपीत्युक्तेः अयंविनैवमंत्रेणपुण्यराशिःप्रकीर्तितइतिविष्णुपूजाप्रकरणे**भविष्योक्तेश्च** । विष्णुपूजायामदीक्षितस्याप्यधिकारोनान्यत्रेतिटोडरानंदः । तेनादीक्षितस्यापिक्षत्रियादेर्मूर्तिपूजनेऽधिकारः । **स्मृत्यर्थसारे**—स्त्रीणामप्यधिकारोस्तिविष्णोराराधनंप्रति । यत्तुस्मृतिकौमुद्यांशूद्राचारशिरोमणौच **मनुः**—जपस्तपस्तीर्थयात्राप्रव्रज्यामंत्रसाधनम् । देवताराधनंचेतिस्त्रीशूद्रपतनानिपडिति तत्स्पर्शवत्पूजापरम् ।—आर्जवंलोभशून्यत्वंदेवब्राह्मणपूजनम् । अनभ्यसूयाचतथाधर्मःसामान्यउच्यत इति**टोडरानंदे विष्णूक्तेः** । साधारणधर्माश्चतुर्वर्णपराइति **व्रतहेमाद्रौविज्ञानेश्वरीयेच** । स्त्रीशूद्रपतनानिपडितिशूद्रस्यद्विजसेवाऽविरोधेनस्त्रियास्तुभर्तृसेवाऽत्यागपरमिति**भट्टपादाः** । **जातिविवेके**—स्पर्शनंदेवतानांचकायस्थायविवर्जयेत् । नास्याधिकारोधर्मेस्तीति**मनुव्याख्यानेमेधातिथिः** । स्नानोपवासदेवतार्चनादौनशूद्रस्यनित्योधिकारइति । शूद्रादेःपूजास्पर्शंविना ।—स्त्रीणामनुपनीतानांशूद्राणांचजनेश्वर । स्पर्शनेनाधिकारोऽस्तिविष्णोर्वाशंकरस्यवेतिवृहन्नारदीयात् । यदिभक्तिर्भवेत्तस्यस्त्रीणांनापिवसुंधरे । दूरादेवास्पृशन्पूजांकारयेत्सुसमाहितइति**वाराहाच्च** । ब्राह्मण्यपिहरंविष्णुंनस्पृशेच्छ्रेयइच्छती । अनाथावासनाथावातस्यानास्तीहनिष्कृतिरिति**पंचायतनसाराच्च** । सांप्रदायिकास्तुनिषेधेपुस्त्रीशूद्रपदस्याप्यदीक्षितपरत्वाद्विधिपुतत्पदंदीक्षितपरम् । अतोदीक्षितानांतेषांशालग्रामपूजास्पर्शवत्यपिभवति । स्पर्शनिषेधोऽदीक्षितपरइत्याहुः । तन्न । वचनंविनाव्यवस्थाकल्पनेमानाभावात् । अतोऽदीक्षितस्यपूजैवन । **यत्तु**—मातरःसर्वलोकैस्तुस्थाप्याःपूज्याःसुरोत्तमेतिदेवीपुराणेसर्वपदंतत्स्त्रीशूद्रान्यपरमितिकेचित् । दीक्षितस्याप्यस्पर्शेनेतियुक्तम् । विष्णुमूर्तेःप्रतिष्ठायांचाधिकारः—चतुर्वर्णैस्तथाविष्णुःप्रतिष्ठाप्यःसुखार्थिभिरितिकल्पतरौदेवीपुराणात् । अन्येतुसर्वपदसंकोचेमानाभावात्—ब्राह्मणःक्षत्रियोवैश्यःशूद्रोवायदिवास्त्रियः । पूजयेन्मातरोभक्त्यास

सर्वैलभतेफलमितिदेवीपुराणाच्च शुचित्वस्यनैमित्तिकपरत्वादीक्षितस्यतत्पूजाभवतीत्याहुः । **कौमुद्यांनारसिंहे** शूद्राधिकारे—पुराणंश्रृणुयान्नित्यंनरसिंहस्यपूजन । कुर्यादितिशेषः। तत्रैव—ब्राह्मणाःक्षत्रियावैश्या.स्त्रियःशूद्रांत्यजातयः। संपूज्यतंसुरश्रेष्ठंभक्त्यासिंहवपुर्धरम् । अत्रांत्यजातयोऽसच्छूद्रानतुचंडालादयः। चंडालाःसर्वधर्मबहिष्कृताइतिस्मृतेः । **लिङ्गेपिचातुर्वर्ण्यस्याधिकारउक्तःशिवसर्वस्वेभविष्ये**—यस्तुपूजयतेदेविलिंगेमांचजगत्पतिम् । ब्राह्मण.क्षत्रियोवैश्यःशूद्रोवामत्परायणः । तस्यप्रीत.प्रदास्यामिशिवॉल्लोकाननुत्तमान् । **ब्रह्मचारिणंप्रकृत्यमनु.**—देवताभ्यर्चनचैवसमिदाधानमेवच । कुर्यादितिसवधः । **तिथितत्वेस्कांदे**—शूद्रःकर्माणियोनित्यस्वीयानिकुरुतेप्रिये । तस्याहमर्चांगृह्णामिचंद्रखंडविभूषिते । इदंपुराणप्रसिद्धजीर्णलिंगविषयमितित्रिस्थलीसेतौभट्टपादाः । **नूतनलिंगपूजायांतु**—यदाप्रतिष्ठितलिंगंमंत्रविद्विर्यथाविधि । तदाप्रभृतिशूद्रश्चयोपिद्वापिनसंस्पृशेदितिबृहन्नारदीयादस्पर्शपूजाकल्पकाभावाच्चनाधिकारः । यत्तु—लिंगं गृहीयतिर्वापिसस्थाप्यतुयजेत्सदेतिदेवीपुराणं तन्नयतिसाहचर्याद्बहिपदंद्विजपरम् । नचपरप्रतिष्ठितलिंगादिपूजायुक्ता—य.शूद्रेणार्चितंलिंगं विष्णुवापिनमेन्नरः । तस्येहनिष्कृतिर्नास्तिप्रायश्चित्तशतैरपीतिबृहन्नारदीयेअनमस्कार्यत्वोक्तेः । नचैतदन्यथानुपपत्त्यैवशूद्रस्यलिंगादिपूजाकल्पनं अन्यदीयलिंगपूजानिषेधेनापिचरितार्थत्वात् । **तिथितत्वेस्कांदे**—ब्रह्मचारीगृहस्थोवावानप्रस्थव्रतेस्थितः । एवदिनेदिनेदेवपूजयेदविकापतिम् । सन्यासीदेवदेवेशंप्रणवेनैवपूजयेत् । नमोंतेनशिवेनैवस्त्रीणांपूजाविधीयते । **बौधायनः**—स्त्रीशूद्राणांचभवतिनाम्नावैदेवतार्चनम् । सर्वेवागममार्गेणकुर्युर्वेदानुसारिणा । **पंचायतनसारेभागवते**—वैदिकस्तान्त्रिकोमिश्रइतिमेत्रिविधोमखः । वैदिकोमिश्रकोवापिविप्रादीनांविधीयते । तान्त्रिकोविष्णुभक्तस्यशूद्रस्यापिप्रकीर्तितः ॥

---

१ वानप्रस्थश्चसुव्रत ।

मंत्रराजानुष्टुप्विधाने—श्रौतार्चनंतुविप्राणांविशेषेणभवेत्सदा । स्मार्तागमार्चनंक्षत्रवैश्येकेवलमागमः । तस्माद्देवार्चनंश्रौतंविप्रस्यैवत दुच्यते । **बह्वृचपरिशिष्टे**—प्रतिमाःप्राङ्मुखीरुदङ्मुखोयजेतान्यत्रप्राङ्मुखःसंभृतसंभारोयजनभवनमेत्यद्वारेस्थित्वाहस्ततालत्रयेण—अपसर्प तुतेभूतायेभूताभुविसंस्थिताः । येभूताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञयेतिविघ्नानुद्वास्यप्रविश्य येभ्योमातामधुमत्पिन्वतेपयएवापित्रेविश्वदेवायवृष्ण इतिजपित्वा शुभासने—पृथिवित्वयाधृतालोकादेवित्वंविष्णुनाधृता।त्वंचधारयमांदेविपवित्रंकुरुचासनमित्युपविश्यायतप्राणःकर्मसंकल्प्य शुचि शंखंअद्भिःप्रणवेनपूरयित्वागंधाक्षतपुष्पाणिप्रक्षिप्यसावित्र्याभिमंत्र्यतीर्थान्यावाह्याभ्यर्च्य पत्रपुष्पाणितदुदकेनापोहिष्ठीयाभिरात्मानमायत नंयजनांगानिचाभ्युक्ष्यक्रियांगोदकुंभंगंधादिभिरभ्यर्च्यनमोंतनाम्नातत्तन्मंत्रेणवोपचारान्कुर्यादावाहनमासनंपाद्यमर्घ्यमाचमनीयंस्नानमाचमनं वस्त्रमाचमनमुपवीतमाचमनंगंधपुष्पाणिधूपंदीपमुपहारमाचमनंमुखवासंस्तोत्रंप्रणामंप्रदक्षिणाविसर्जनंचकुर्यादसंपन्नोमनसासंपादयेदाचमनमपृ थगुपचारःप्रणामस्तोत्रंप्रदक्षिणाविसर्जनांगम् । अथमंत्राः—गणानांत्वेतिगणपतेः । कुमारश्चित्पितरमितिस्कंदस्य । आकृष्णेनेत्यादित्यस्य । पावकानइतिसरस्वत्याः। जातवेदसइतिशक्तेः । त्र्यंबकमितिरुद्रस्य । गंधद्वारामितिश्रियः। इदंविष्णुरितिविष्णोरेवंषोडशेमानुपचारान्पौरुषेणवासू क्तेनप्रत्यृचंसावित्र्यावाजातवेदसावाप्राजापत्यावाव्याहृतिभिर्वाप्रणवेनवाकुर्वंतिसएषदेवयज्ञोऽहरहर्गोदानसंमितःसर्वाभीष्टप्रदःस्वर्गापवर्गदश्चत स्मादेनमहरहःकुर्वीतेति । **टोडरानंदेवाराहे**—अभावेवेदमंत्राणांपंचरात्रोदितोविधिः । उदङ्मुखइतिस्थिरप्रतिमाविषयमितिपारिजातः । **वैशाखमाहात्म्येपाद्मे**—स्वर्णघर्मानुवाकेनमहापुरुषविद्यया । पौरुषेणचसूक्तेनसामभीराजनादिभिः । अर्चयेदितिशेषः । **टोडरानंदे योगयाज्ञवल्क्यः**—दद्यात्पुरुषसूक्तेनयःपुष्पाण्यपएववा । अर्चितंस्याज्जगदिदंतेनसर्वचराचरम् ।

॥ ७९ ॥

अथन्यासादि। **शौनकः**-अंगुष्ठाग्रेतुगोविंदंतर्जन्यांतुमहीधरम्। मध्यमायांहृषीकेशमनामिक्यांत्रिविक्रमम् ।कनिष्ठिक्यांन्यसेद्विष्णुंकरम

ध्येतुमाधवम् । एवंन्यासंपुराकृत्वादेहांगन्यासमाचरेत् । मस्तकेकेशवंन्यस्यभालेनारायणंतथा । माधवंकर्णयोरक्ष्णोर्विष्णुंचैवतुनासयोः । मुखेतुमधुसूदनंकंठदेशेत्रिविक्रमम् । वामनंविन्यसेद्बाह्वोःश्रीधरंहृदिविन्यसेत् । नाभ्यांविद्याद्धृषीकेशंकट्यांवैपद्मनाभकम् । दामोदरंपादयोश्चन्यासंद्वादशधाचरेत्।ततःपुरुषसूक्तेनसर्वांगन्यासमाचरेत्।**अपरांकेनारसिंहे**–आनुष्टुभस्यसूक्तस्यत्रिष्टुबंतस्यदेवता।पुरुषोयोजगद्बीजमृषिर्नारायणःस्मृतः। प्रथमांविन्यसेद्बामेद्वितीयांदक्षिणेकरे । तृतीयांवामपादेतुचतुर्थींदक्षिणेपदे । पंचमींवामजानौतुपष्ठींवैदक्षिणेन्यसेत् । सप्तमींवामकुक्षौचअष्टमींदक्षिणेन्यसेत् । नवमींनाभिमध्येतुदशमींहृदयेतथा । एकादशींकंठदेशेवामबाहौततःपराम् । त्रयोदशींदक्षिणेतुआस्यदेशेचतुर्दशीम् । अक्ष्णोःपंचदशींचैवषोडशींमूर्ध्निविन्यसेत् । यथादेवेतथादेहेन्यासंकृत्वाविधानतः। एवंन्यासविधिंकृत्वापश्चाद्यागंसमाचरेत् । **गोविंदराजीये योगयाज्ञवल्क्यः**–षडंगन्यासइत्येकेउत्तरेपुरुषसूक्तके। अङ्ग्यःसंभूतइतिहृदयायनमः। वेदाहमितिशिरसेस्वाहा । प्रजापतिश्चरतीतिशिखायैवषट् । योदेवेभ्य इतिकवचायहुम् । रुचंब्राह्ममितिनेत्रत्रयायवौषट् । श्रीश्चेत्यस्त्रायफट् । **चंद्रिकायांनारदीये**—एवंन्यासंतुकृत्वादौपश्चाद्देवस्यपूजनम् । गंधमाल्यैःसुरभिभिरात्मानंचार्चयेद्बुधः। ततःपीठंसमाराध्यगंधपुष्पाक्षतैःशुभैः। **ऋग्विधाने**–वक्ष्येपुरुषसूक्तस्यविधिनात्वर्चनेपुनः। आद्ययावाहयेद्देव मृचातुपुरुषोत्तमम्। द्वितीययासनंदद्यात्पाद्यंचैवतृतीयया। चतुर्थ्यार्घ्यंप्रदातव्यंपंचम्याचमनीयकम् । षष्ठयास्नानंप्रकुर्वीतसप्तम्यावस्त्रमेवच। यज्ञोपवीतमष्टम्यानवम्यागंधमेवच। दशम्यापुष्पदानंचएकादश्यातुधूपकम्।द्वादश्याचतथादीपंत्रयोदश्योपहारकम् । चतुर्दश्यानतिंकुर्यात्पंचदश्याप्रदक्षिणाम् । षोडश्योद्वासनंकुर्यादेवमेवसमर्चयेत् । पौरुषेणचसूक्तेनतद्विष्णोःपरमेणच। नैताभ्यांसदृशोमंत्रोवेदेपूक्तश्चतुर्ष्वपि। पूजोत्तरंऋग्विधाने—हुत्वापोडशभिर्मंत्रैःपोडशान्नस्यचाहुतीः । शेषंनिवेदयेत्तस्मैदद्यादाचमनंततः । जानुभ्यांधरणींगत्वामूर्ध्नाहरिमथोवहेत् । पुनःपोडशभि

---

१ न्यासमारभेत् ।

मंत्रैर्दद्यात्पुष्पाणिषोडश । तच्चसर्वंजपेद्ध्रुवःपौरुषंसूक्तमुत्तमम् । षण्मासात्सिद्धिमाप्नोतिह्येवमेवसमर्चयेत् । **पूजांतेकर्तव्यमाह्योगयाज्ञव**
ल्क्यः—निवेदयेत्तदात्मानंतद्विष्णोरितिमंत्रतः । **पाद्मे**—ब्रह्माणंविष्णुमीशंवासूर्यमग्निंगणाधिपम् । दुर्गांसरस्वतींलक्ष्मींगौरींवानित्यमर्चयेत् ।
एतेष्वन्यतरार्चनेनापिनप्रत्यवैतीत्यर्थः। **केचित्तुपंचायतनपूजांनित्यांब्रुवते**—शिवंभास्करमग्निंचकेशवंकौशिकीमपि । मनसानर्चयन्याति
देवलोकादधोगतिम्। वरंप्राणपरित्यागःशिरसोवापिकर्तनम्। नत्वसंपूज्यभुंजीतकौशिकींकेशवंशिवमिति**कालिकापुराणादि**त्याहुः। केचित्तु—
अग्निर्गणेशःपावकःकार्तिकेयोविनायकइति**भविष्योत्तरात्तत्पूजामाहुः** । एतेनाग्निंस्मार्तमितिवदन्नर्थानभिज्ञत्वादपास्तः । कौशिकींदुर्गां
अनर्चयन्नपूज्यत्वज्ञानवानितिवर्ध**मानसमयप्रदीपादयः**। पुष्पाद्यभावेमनसापिपूजयेदितिवयम् । केचित्तुविष्णुपूजैवनित्या शिवदुर्गादिपूजा
तुकाम्येत्याहुः। यस्त्वेपांपूजायाअकरणेनिंदार्थवादःससंकल्पेसतिनित्यतापरइति**श्रीदत्तवाचस्पती** । तन्न । विष्णुपूजायामपितत्वापत्तेः—ब्रह्मा
णंविष्णुमीशंवागौरींवानित्यमर्चयेदिति**पाद्मे**वाशब्दश्रवणेपि—तस्मादनादिमध्यांतंनित्यमाराधयेद्धरिमिति**चंद्रिकायांकौर्मा**द्विष्णुपूजानित्या ।
—तत्रापिशालग्रामशिलांवापिचक्रांकितशिलांतथा । ब्राह्मणःपूजयेन्नित्यंक्षत्रियादिर्नपूजयेदिति**मंत्रराजानुष्टुब्विधानात्** । शालग्रामशिलापू
जांविनायोश्चातिकिंचन । सचंडालोहिविष्ठायामाकल्पंजायतेकृमिरितिह्**लायुधाच्च**शालग्रामपूजैवनित्येतिकेचित् । अन्येतुपूर्ववाक्येशालग्रामप
दंमूर्त्युपलक्षणमिति**पंचायतनसारात्**—केशवार्चागृहेयस्यनतिष्ठतिमहीपते। तस्यान्नंनैवभोक्तव्यमभक्ष्यसमंस्मृतमितिह्**लायुधे**वचनान्मूर्ति
पूजापिनित्येत्याहुः । अत्रविष्णोरर्चेतिपाठमाश्रित्य—शंखारिभ्यांगदाब्जाभ्यांपूज्योविष्णुःश्रियैनरैरित्युक्तलक्षणाविष्णुप्रतिमाशालग्रामसद्भावे
प्यावश्यकीतिटोडरानंदः । लिंगेदेवोमहादेवःसर्वदैवव्यवस्थितः । अनुग्रहायलोकानांतस्मान्नित्यंप्रपूजयेदिति**भविष्योत्तरा**ल्लिंगपूजानि
त्येत्याहुः । **चंद्रिकायांकौर्मे**—योमोहादथवालस्यादकृत्वादेवतार्चनम् । भुङ्क्तेसयातिनरकान्सूकरेष्विहजायते । **यत्त्वाश्वलायनः**—दानाध्य

यनदेवार्चांजपहोमव्रतादिकान् । नकुर्याच्छ्राद्धदिवसेप्राग्विप्राणांविसर्जनादिति तन्नित्यवर्जमितिचोपदेवः । विष्णुभिन्नपरमितिपरिचर्या । पूजयित्वाशिवंभक्त्यापितृश्राद्धंप्रकल्पयेदितिलैंगात्।—श्राद्धाह्नितुसमभ्यर्च्यनृवराहंजनार्दनमितिविष्णुधर्मोक्तेश्चविहितभिन्नपरमित्यपिकेचिन्।सर्वादौसूर्यपूजा—अपूज्यप्रथमंसूर्यमपरान्यःप्रपूजयेत्।नतद्भूतकृतंपाद्यंसंप्रतीच्छंतिदेवताइतिब्राह्मात् ।—रविर्विनायकश्चंडीईशो विष्णुश्चपंचमः। अनुक्रमेणपूज्यंतेव्युत्क्रमेणमहद्भयमिति । गणेशार्कौसमभ्यर्च्यशैवोविष्णुंप्रपूजयेत् । अर्चयेच्छिवंपश्चाद्विष्णुमादौतुवैष्णवः।ततःशिवंततोदुर्गामेवंस्यादर्चनक्रिया । अत्रगणेशार्कयोःक्रमेनतात्पर्यंकिंतुतावपूजयित्वाप्रधानंनपूजयेत् । आदौनसर्वादौकिंतुविष्ण्वादौ । पौराणोयंक्रमः।

आगमोक्तस्तुयोगिनीतंत्रे—गणेशसूर्यविष्ण्वीशदुर्गाआवाह्यपूजयेत् । **भैरवीतंत्रे**—आदौगणपतिंदेवंसूर्यंविष्णुमुमापतिम् । दुर्गांच पूजयेद्विद्वानिति । **आपस्तंबस्मृतौ**—प्रत्यहंदेवताःपूज्याइत्युक्तिर्वैश्वदेवदेवताभ्योन्याःपराशराद्युक्तप्रतिपदादितिथिदेवताःपूज्याइत्येतदर्थेति दीक्षितानंदः। तन्न । पूर्ववचनैकवाक्यतयास्यगणेशादिपूजापरत्वात् प्रतिपदादिदेवतापूजनस्यान्यत्रविधानाच्च । **पंचायतनस्थापनमाह्य मलमकाशेचोपदेवः**—शंभौमध्यगतेहरीनहरभूदेव्योहरौशंकरेभास्येनागसुतारवौहरगणेशाजांविकाःस्थापयेत् ।देव्यांविष्णुशिवैकदंतरवयोलं योदरेशेश्वर्यानाःशंकरभागतोऽतिसुखदाव्यस्तास्तुतेहानिदाः।यस्ययइष्टोदेवःसतेनमध्येस्थाप्यःसाधारणतयापूजनेविष्णुः । श्लोकार्थस्तु—पंच मुदेवतासुपूजकाभ्यर्हितत्वेनशिवादौमध्यस्थेशिष्टानामेपक्रमः । शंभौमध्यगे—ईशानेहरिःआग्नेयेसूर्यःनैर्ऋत्येगणेशःवायव्येदुर्गा । हरौमध्यगे— ईशानेशंकरःआग्नेयेगणेशःनैर्ऋत्येसूर्यःवायव्येदुर्गा। रवौमध्यगे—ईशानेहरःआग्नेयेगणेशःनैर्ऋत्येविष्णुःवायव्येदुर्गा। देव्यांमध्यगायाम्—विष्णु रीशानेशिवआग्नेयेगणेशोनैर्ऋत्येरविर्वायव्ये । गणेशेमध्यगे—विष्णुरीशानेईश्वरआग्नेयेदुर्गानैर्ऋत्येरविर्वायव्येइति**गोविंदराजः** । **मंत्रमहो दधौ**—पंचायतनपक्षेतुमध्येविष्णुंततोर्चयेत् । अग्निनैर्ऋतवायव्येशानेपुगणनायकम् । रविंशिवांशिवंमध्येगणेशश्चेच्छिवंशिवाम् । रविंविष्णुंरवौ

मध्येविघ्नाजनगजेश्वरान् । भवान्यांमध्यसंस्थायामीशविघ्नार्कमाधवान् । हरेमध्यगतेसूर्यगणेशगिरिजाच्युतान् । संपूज्यादौमध्यगतंगणेशादिं ततोयजेत् । गणेशेमध्यसंस्थेतुपूजयेद्भास्करादितः । एतेनाजेश्वरेनार्याइतिपाठंवदन्नाचारचंद्रोदयोपास्तः ॥

अत्रपूज्यपूजकांतरालंप्राची । तदुक्तमागमे—पूज्यपूजकयोर्मध्येप्राचीप्रोक्ताविचक्षणैः। प्राच्येवप्राचीसोद्दिष्टासुकृत्वावैदेवपूजनं । **प्रयोगपारिजातेमंत्रशास्त्रे**—देवस्यमुखमारभ्यदिशंप्राचींप्रकल्पयेत् । तदादिपरिवाराणामंगाद्यावरणस्थितिः । देवपूजायां—प्राक्पश्चिमो दगास्यश्चप्रातःसायंनिशासुचेतिवचनाव्यवस्थेतिवाचस्पतिमिश्राः।सूर्यसप्ताक्षरमंत्रपरमेतदितिपूजारत्नाकरेतिथितत्वेच । **टोडरानंदे गौतमः**—रात्रावुदङ्मुखःकुर्याद्देवकार्यंसदैवहि । शिवार्चनंसदाचैवशुचिःकुर्यादुदङ्मुखः । अर्कमर्कतनुर्यजेदितिभविष्योक्तेः । सूर्यनित्या र्चनेप्रणवेनपूरकादिभिर्वायुधारणशोषणादिभिर्भूतशुद्धिरंगमितिटोडरानंदः । **आगमिकास्तुनादेवोदेवमर्चयेदितिवाक्यात्सर्वदेवार्चनांग मित्याहुः** ॥

अथसूर्यपूजाभविष्ये—मेरुमंदरतुल्योपिराशिःपापस्यदारुणः । आसाद्यभास्करंमर्त्यस्तंनाशयतितत्क्षणात् । प्रदद्याद्धेगवांलक्षंदोग्ध्रीणां वेदपारगे।एकाहमर्चयेद्भानुंतस्यपुण्यंततोधिकम्। **स्मृतिरत्नावल्याम्**—शिवंसूर्यंतथाचेंद्रंदुर्गाद्याउग्रदेवताः।योर्चयेत्पणपूर्वंतुसद्यःपतंतिमान वः। **प्रयोगपारिजातेसंग्रहे**–संवत्सरत्रयंकुर्याद्यःपरार्थंसुरार्चनम्।संवत्सरंचगायत्रींपण्मासंरुद्रमेवच।प्रणवंवादिनंचैकंसचपातित्यमाप्नुयात्। तदपिमूल्येनभरणे । देवार्चनपरोविप्रोवित्तार्थीवत्सरत्रयम् । सवैदेवलकोनामहव्यकव्येषुगर्हितइतिचंद्रिकायांविष्णूक्तेः । आपःक्षीरंकुशाग्रा णिघृतंदधितथामधु । रक्तानिकरवीराणितथारक्तंचचंदनम् । अष्टांगमर्घमापूर्यभानवेद्विर्निवेदयेत् । **हरनाथीयेस्मृतिसारे**—दारवेणार्घपात्रे णदत्त्वार्घंयत्फलंलभेत् । तस्माच्छतगुणंपुण्यंमृत्पात्रेणनराधिप । ताम्रपात्रार्घदानेनपुण्यंदशगुणंस्मृतम्। पालाशपद्मपत्राभ्यांताम्रपात्रसमंलभेत् ।

रौप्यपात्रेणविज्ञेयंलक्षांशोनात्रसंशयः। सुवर्णपात्रविन्यस्तमर्घंकोटिगुणंभवेत्। एवंस्नानेपुनैवेद्येबलिपूजादिपुक्रमात्। मृन्मयमत्रहस्तकृतंग्राह्यम्। चक्रकृतस्यासुरत्वेननिषेधात्। तथाभविष्ये—कालेयकंतुरुष्कंचरक्तचंदनमेवच। यान्यात्मनःसदेष्टानियान्यशस्तान्यपाकुरु। कालेयं कृष्णागरुं। कालियाकाष्ठमित्यन्ये। तुरुष्कंसिह्लकम्॥

अथपुष्पाणितत्रैव—पुष्पैरण्यसंभूतैःपत्रैर्वागिरिसंभवैः। आत्मारामोद्भवैर्वापिभक्त्यासंपूजयेद्रविम्। पुष्पमालायाम्—जातिकुंदशमीकुशेशयकुशाशोकंवकंकिंशुकंपुन्नागंकरवीरचंपकजपानेपालिकाकुब्जकम्। वासंतीशतपत्रिकाविचकिलंमंदारमर्काह्वयंपीताम्रातकनागकेसरमिदंपुष्परवेःशस्यते। लोध्रंकैरवमुत्पलंचसकलंसिंहास्यकंपाटलायूथीकुंकुमकर्णिकारतिलकाबाणंकदंबंजपा। काशंकेशरकेतकीमरुवकंद्रोणंत्रिसंध्याह्वयंपुष्पंशस्तमिदंचपूजनविधौसर्वंसहस्रार्चिषः। तमालतुलसीबिल्वशमीभृंगारजोद्भवम्। केतकीदूर्वयोर्धात्र्याःपत्रंदिनकरप्रियम्। पुष्पंशस्तंभृंगराजशाल्मलीकांचनालजम्। निषिद्धंविहितंसूर्येतगरंकंटकारिका। गुंजापराजितोन्मत्तवराहंक्रांतयासह। भविष्ये—करवीरेनृपैकस्मिन्नकार्यविनिवेदिते। दशदत्वासुवर्णस्यनिष्कानांलभतेफलम्। ग्रथितेनृपशार्दूलतदेतद्द्विगुणंभवेत्। भक्त्यापूजयतेयोर्कंमर्कपुष्पैःसितासितैः। तेजसासोर्कसंकाशोह्यर्कलोकेमहीयते। जपापुष्पसहस्रेभ्यःकरवीरंविशिष्यते। करवीरसहस्रेभ्योबिल्वपत्रंविशिष्यते। बिल्वपत्रसहस्रेभ्यःपद्ममेकंविशिष्यते। वीरपद्मसहस्रेभ्योवकपुष्पंविशिष्यते। वकपुष्पसहस्रेभ्यःकुशपुष्पंविशिष्यते। कुशपुष्पसहस्रेभ्यःशमीपुष्पंविशिष्यते। सर्वासांपुष्पजातीनांश्रवरंनीलमुत्पलम्। नीलोत्पलसहस्रेणनीलोत्पलशतेनच। रक्तैश्चकरवीरैस्तुयश्चपूजयतेरविम्। वसेदर्कपुरेश्रीमान्सूर्यतुल्यपराक्रमः। शमीपुष्पंवृहत्याश्चकुसुमंतुल्यमुच्यते। करवीरसमाज्ञेयाजातीवकुलपाटलाः। श्वेतमंदारकुसुमंसितपद्मंचतत्समम्। नागचंपकपुन्नागमुकुराश्चसमाःस्मृताः। ग्रहरंतिष्ठतेजातीकरवीरमहर्निशम्। प्रत्येकमुक्तपुष्पेणदशसौवर्णिकंफलम्। स्रजोभिर्मुनिशार्दूलतदेवद्विगुणंभवेत्।मुकुराणिकदंबानिरात्रौदेयानिभानवे।दिवाशेषाणिपुष्पाणि

दिवारात्रौचमल्लिका। तथा—मल्लिकामालतीचैवदूर्वाकाशोतिमुक्तकः। पाटलाकरवीरंचजपाजायंतिरेवच। कुब्जकंतगरंचैवकर्णिकारःकुरंटकः। चंपकोवेणिकःकुंदोवालोवर्वरमल्लिका। अशोकस्तिलकोलोध्रस्तथाचैवाटरूषकः। शतपत्राणिचान्यानिवकाह्वंचविशेषतः। अगस्त्यंकिंशुकंतद्वत्पूजा यांभास्करस्यतु। तुलसीकालतुलसीतथारक्तंचचंदनम्। केतकीपुष्पपत्रंचसद्यस्तुष्टिकरंरवेः। नकंटकारिकापुष्पंतथान्यद्गंधवर्जितम्। नचाघ्रातकजैः पुष्पैर्चनीयोदिवाकरः। येपांनप्रतिषेधोस्तिगंधवर्णान्वितानिच। तानिपुष्पाणिदेयानिभानवेलोकभानवे। मुकुरो विचकिलः। अवचयोत्तरंजाती पुष्पंग्रहरपर्यंतंपूजार्हम्। **भविष्ये**—यथानलंघयेत्कश्चित्स्वपनंभास्करस्यच। तथाकार्यंप्रयत्नेनलंघितंत्वशुभावहम्॥

अथगणेशपूजा गोविंदराजीयेभविष्ये—गणेशःपूजनान्नित्यंसर्वविघ्नानपोहति। सर्वान्कामानवाप्नोतिगणेशंपूजयन्नरः। **वाराहे**—गृहेलिंगद्वयंनार्च्यंगणेशत्रितयंतथा। नर्मदातीरसंभूतांस्त्रीन्गृहीनार्चयेत्सुधीः। गृहिग्रहणात्संन्यासिव्रतिनोर्ननिषेधः। **अथदुर्गापूजा।टोडरानंदेभविष्यपुराणे**—दिग्विभागेषुसर्वेषुकौबेरीदिक्शिवाप्रिया। तस्मात्तन्मुखआसीनःपूजयेच्चसदांबिकाम्। **गोविंदराजीयेभविष्ये**—यःसदापूजयेद्दुर्गांप्रणमेद्वापिभक्तितः। सयोगीसुमतिर्धीमांस्तस्यमुक्तिःकरेस्थिता। आपःक्षीरंकुशाग्राणिअक्षतादधितंदुलाः। सहसिद्धार्थकादूर्वा कुंकुमंरोचनामधुः। अर्घोयंकुरुशार्दूलद्वादशांगउदाहृतः। **तथा**—नागकेशरकर्पूरंमुरामांसीसवालका। उद्वर्तनसमाख्याताभादृणांसर्वतःप्रिया। **शिवार्चनचंद्रिकायाम्**—चंदनागरुकर्पूरकाश्मीरैरोचनान्वितैः। ससिह्लकजटामांसीसटीभिःशक्तिसंभवम्। गंधाष्टकंशुभंवश्यंशक्तिमंत्रेणयो जयेत्। सिह्लकंशिलारसइतिप्रसिद्धम्॥

अथपुनःपुष्पाणि देवीपुराणे—शृणुशक्रप्रवक्ष्यामिपुष्पाध्यायंसमासतः।ऋतुकालोद्भवैःपुष्पैर्मल्लिकाजातिकुंकुमैः। सितरक्तैश्चकुसुमै स्तथापद्मैश्चपांडुरैः। किंशुकैस्तगरैश्चैवकिंकिरातैःसचंपकैः। वकुलैश्चैवमंदारैःकुंदपुष्पैस्तिरीटकैःकरवीरार्कपुष्पैश्चशांशपैश्चापराजितैः। सितरक्तै

स्तथापीतैःकृष्णैश्चैवचतुर्विधैः। धत्तूरकातिमुक्तैश्चवंधूकागस्त्यसंभवैः। मदनैःसिंदुवारैश्चसुरभीरुचकैस्तथा। लताभिर्ब्रह्मवृक्षस्यपुष्पैश्चैवमनोहरैः। मंजरीभिःकुशानांचबिल्वपत्रैःसुशोभितैः । पत्रैःपुष्पैर्यथालाभंसर्वौषधिमयैःशुभैः । धान्यानांसर्वपत्रैश्चपुष्पैश्चैवप्रपूजयेत् । कालोद्भवैरित्याकालिकपुष्पनिषेधः । मंदारैरितिमंदारार्कयोर्दुर्गायां । तौविहितनिषिद्धावित्यन्ये । ब्रह्मवृक्षःपलाशः । **देवीपुराणे**—केतकीचातिमुक्तश्चवंधूकवकुलारिपिः(?) । कदंबःकर्णिकारश्चसिंधुवारःसमुद्भवः । पुन्नागश्चंपकश्चैवयूथिकावनमल्लिका । तगरार्जुनमल्लीचबृहतीशतपत्रिका । वीराकुसुमकह्लारबिल्वपाटलमालती । जपाविचकिलाशोकवर्णनीलोत्पलासिता । पंकजंशतपत्रंचदशधापुण्यवृद्धये । द्रोणपुष्पसमाक्षीरनीलापामार्गपत्रिका । सुरसावर्चरीभद्रासुरभीकणमल्लिका । मदनोमरुपत्रश्चशतधापुण्यवृद्धये । कदंबैरर्चयेद्रात्रौमल्लिकोभयतःशुभा । दिवाशेषाणिपुष्पाणियथालाभंनियोजयेत् । प्रत्येकंमुक्तपुष्पेपुदशसौवर्णिकंफलम् । सन्निबद्धेपुतेष्वेवद्विगुणंफलमादिशेत् । सुरसा तुलसीविशेषः । सौवर्णेत्वक्षिणीराजन्भगवत्यैप्रयच्छति । गोसहस्रफलंप्राप्यसूर्यलोकेमहीयते । तथासुवर्णतिलकंदुर्गादेव्यैप्रयच्छति । सगच्छतिपरंस्थानंयत्र सापरमाकला । **धूपोदेवीपुराणे**—धूपंकल्याणनागंतुनित्यंदेव्याःप्रियंनृप । दीपनैवेद्येपूर्वोक्तेएव ।

अथशिवपूजारुद्राक्षादिचतिथितत्वेलैंगे—विनाभस्मत्रिपुंड्रेणविनारुद्राक्षमालया । पूजितोपिमहादेवोनस्यात्तस्यफलप्रदः । तस्मान्मृदापिकर्तव्यंललाटेवैत्रिपुंड्रकम्। **कृत्यकल्पद्रुमेउमासंवादे**–उच्छिष्टोवाविकर्मस्थःसंलिप्तःसर्वपातकैः । नासौलिप्यतिपापेनरुद्राक्षस्यतुधारणात् । लक्षंतुस्पर्शनेपुण्यंकोटिर्भवतिचालनात्। दशकोटिसहस्राणिधारणालभतेफलम् । रुद्राक्षदेहसंस्थोपिकुक्कुरोम्रियतेयदि । सोपिरुद्रपदंयातिकिंपुनर्मानवोगुरुःससविंशतिरुद्राक्षमालयादेहसंस्थया । यत्करोतिनरःपुण्यंसर्वकोटिगुणंभवेत् । हस्तेचोरसिकंठेयःशिरसाचैवधारयेत् । सुरासुराणांसर्वेषांसर्वद्योहियथाशिवः । शिखायांवाहुकंठेचकर्णयोश्चापियोनरः । रुद्राक्षंधारयेद्भक्त्यासशैवंलोकमाप्नुयात् । नववक्त्रंचरुद्राक्षंधारयेद्वामपा

दिवारात्रौचमल्लिका। तथा—मल्लिकामालतीचैवदूर्वाकाशेतिमुक्तकः। पाटलाकरवीरंचजपाजायंतिरेवच। कुब्जकंतगरंचैवकर्णिकारःकुरंटकः। चंपकोवेणिकःकुंदोवालोवर्वरमल्लिका। अशोकस्तिलकोलोध्रस्तथाचैवाटरूपकः। शतपत्राणिचान्यानिवकाह्वंचविशेषतः। अगस्त्यंकिंशुकंतद्वत्पूजा यांभास्करस्यतु। तुलसीकालतुलसीतथारक्तंचचंदनम्। केतकीपुष्पपत्रंचसद्यस्तुष्टिकरंरवेः। नकंटकारिकापुष्पंतथान्यद्गंधवर्जितम्। नचाघ्रातकजैः पुष्पैरर्चनीयोदिवाकरः। येषांनप्रतिषेधोस्तिगंधवर्णान्वितानिच। तानिपुष्पाणिदेयानिभानवेलोकभानवे। मुकुरो विचकिलः। अवचयोत्तरंजाती पुष्पंप्रहरपर्यंतंपूजार्हम्। **भविष्ये**—यथानलंघयेत्कश्चित्स्वपनंभास्करस्यच। तथाकार्यंप्रयत्नेनलंघितंत्वशुभावहम्॥

अथगणेशपूजा गोविंदराजीयेभविष्ये—गणेशःपूजनान्नित्यंसर्वविघ्नानपोहति। सर्वान्कामानवाप्नोतिगणेशंपूजयन्नरः। **वाराहे**—गृहेलिंगद्वयंनार्च्यंगणेशत्रितयंतथा। नर्मदातीरसंभूतांस्त्रीन्गृहीनार्चयेत्सुधीः। गृहिग्रहणात्संन्यासिव्रतिनोर्ननिषेधः। **अथदुर्गापूजा।टोडरानंदेभविष्यपुराणे**—दिग्विभागेषुसर्वेषुकौवेरीदिक्शिवाप्रिया। तस्मात्तन्मुखआसीनःपूजयेत्तुसदांबिकाम्। **गोविंदराजीयेभविष्ये**—यःसदापूजयेद्दुर्गांप्रणमेद्वापिभक्तितः। सयोगीसुमतिर्धीमांस्तस्यमुक्तिःकरेस्थिता। आपःक्षीरंकुशाग्राणिअक्षतादधितंदुलाः। सहसिद्धार्थकादूर्वा कुंकुमंरोचनामधुः। अर्घोयंकुरुशार्दूलद्वादशांगउदाहृतः। **तथा**—नागकेशरकर्पूरंमुरामांसीसवालका। उद्वर्तनसमाख्यातामातॄणांसर्वतःप्रिया। **शिवार्चनचंद्रिकायाम्**—चंदनागरुकर्पूरकाश्मीरैरोचनान्वितैः। ससिह्लकजटामांसीसटीभिःशक्तिसंभवम्। गंधाष्टकंशुभंवश्यंशक्तिमंत्रेणयोजयेत्। सिह्लकंशिलारसइतिप्रसिद्धम्॥

अथपुनःपुष्पाणि देवीपुराणे—शृणुशक्रप्रवक्ष्यामिपुष्पाध्यायंसमासतः।ऋतुकालोद्भवैःपुष्पैर्मल्लिकाजातिकुंकुमैः। सितरक्तैश्चकुसुमै स्तथापद्मैश्चपांडुरैः। किंशुकैस्तगरैश्चैवकिंकिरातैःसचंपकैः। वकुलैश्चैवमंदारैःकुंदपुष्पैस्तिरीटकैः।करवीरार्कपुष्पैश्चशांशपैश्चापराजितैः। सितरक्तै

स्तथापीतैःकृष्णैश्चैवचतुर्विधैः। धत्तूरकातिमुक्तैश्चवंधूकागस्त्यसंभवैः। मदनैःसिंदुवारैश्चसुरभीरुचकैस्तथा। लताभिर्ब्रह्मवृक्षस्यपुष्पैश्चैवमनोहरैः। मंजरीभिःकुशानांचबिल्वपत्रैःसुशोभितैः । पत्रैःपुष्पैर्यथालाभंसर्वौषधिमयैःशुभैः । धान्यानांसर्वपत्रैश्चपुष्पैश्चैवत्रपूजयेत् । कालोद्भवैरिल्याकालिकपुष्पनिषेधः । मंदारैरितिमंदारार्कयोर्दुर्गायां । तौविहितनिषिद्धाविल्यन्ये । ब्रह्मवृक्षःपलाशः । **देवीपुराणे**—केतकीचातिमुक्तश्चवंधूकवकुलारिपिः(?) । कदंबःकर्णिकारश्चसिंधुवारःसमुद्भवः । पुन्नागश्चंपकश्चैवयूथिकावनमल्लिका । तगरार्जुनमल्लीचवृहतीशतपत्रिका । वीराकुसुमकह्लारबिल्वपाटलमालती । जपाविचकिलाशोकवर्णनीलोत्पलासिता । पंकजंशतपत्रंचदशधापुण्यवृद्धये । द्रोणपुष्पसमाक्षीरनीलापामार्गपत्रिका । सुरसावर्चरीभद्रासुरभीकणमल्लिका । मदनोमरुपत्रश्चशतधापुण्यवृद्धये । कदंबैर्चयेद्रात्रौमल्लिकोभयतःशुभा । दिवाशेषाणिपुष्पाणियथालाभंनियोजयेत् । प्रत्येकंमुक्तपुष्पेपुदशसौवर्णिकंफलम् । सन्निबद्धेषुतेष्वेवद्विगुणंफलमादिशेत् । सुरसा तुलसीविशेषः । सौवर्णेत्वक्षिणीराजन्भगवत्यैप्रयच्छति । गोसहस्रफलंप्राप्यसूर्यलोकेमहीयते । तथासुवर्णतिलकंदुर्गादेव्यैप्रयच्छति । सगच्छतिपरंस्थानंयत्र सापरमाकला । **धूपोदेवीपुराणे**—धूपंकल्याणनागंतुनित्यंदेव्याःप्रियंनृप । दीपनैवेद्यपूर्वोक्तेएव ।

अथशिवपूजारुद्राक्षादिचतिथितत्वेलैंगे—विनाभस्मत्रिपुंड्रेणविनारुद्राक्षमालया । पूजितोपिमहादेवोनस्यात्तस्यफलप्रदः । तस्मान्मृदापिकर्तव्यंललाटेवैत्रिपुंड्रकम् । **कृत्यकल्पद्रुमेउमासंवादे**—उच्छिष्टोवाविकर्मस्थःसंलिप्तःसर्वपातकैः । नासौलिप्यतिपापेनरुद्राक्षस्यतुधारणात् । लक्षंतुस्पर्शनेपुण्यंकोटिर्भवतिचालनात् । दशकोटिसहस्राणिधारणाल्लभतेफलम् । रुद्राक्षदेहसंस्थोपिकुक्कुरोम्रियतेयदि । सोपिरुद्रपदंयाति किंपुनर्मानवोगुरुः।सप्तविंशतिरुद्राक्षमालयादेहसंस्थया । यत्करोतिनरःपुण्यंसर्वंकोटिगुणंभवेत् । हस्तेचोरसिकंठेयःशिरसाचैवधारयेत् । सुरासुराणांसर्वेषांसर्वंद्योहियथाशिवः । शिखायांवाहुकंठेचकर्णयोश्चापियोनरः । रुद्राक्षंधारयेद्भक्त्यासशैवंलोकमाप्नुयात् । नववक्त्रंचरुद्राक्षंधारयेद्यामपा

दिवारात्रौचमल्लिका। तथा—मल्लिकामालतीचैवदूर्वाकाशोतिमुक्तकः। पाटलाकरवीरंचजपाजायंतिरेवच । कुब्जकंतगरंचैवकार्णिकारःकुरंटकः । चंपकोवेणिकःकुंदोवालोवर्बरमल्लिका। अशोकस्तिलकोलोध्रस्तथाचैवाटरूषकः। शतपत्राणिचान्यानिवकाह्वंचविशेषतः । अगस्त्यंकिंशुकंतद्वत्पूजा यांभास्करस्यतु। तुलसीकालतुलसीतथारक्तंचचंदनम्। केतकीपुष्पपत्रंचसद्यस्तुष्टिकरंरवेः। नकंटकारिकापुष्पंतथान्यद्गंधवर्जितम्। नचाघ्रातकजैः पुष्पैरर्चनीयोदिवाकरः। येषांनप्रतिषेधोस्तिगंधवर्णान्वितानिच । तानिपुष्पाणिदेयानिभानवेलोकभानवे। मुकुरो विचकिलः। अवचयोत्तरंजाती पुष्पंप्रहरपर्यंतंपूजार्हम् । **भविष्ये**—यथानलंघयेत्कश्चित्स्वप्नंभास्करस्यच । तथाकार्यंप्रयत्नेनलंघितंत्वशुभावहम् ॥

अथगणेशपूजा गोविंदराजीयेभविष्ये—गणेशःपूजनान्नित्यंसर्वविघ्नानपोहति । सर्वान्कामानवाप्नोतिगणेशंपूजयन्नरः। **वाराहे**—गृहेलिंगद्वयंनार्च्यंगणेशत्रितयंतथा। नर्मदातीरसंभूतांस्त्रीन्गृहीनार्चयेत्सुधीः। गृहिग्रहणात्संन्यासिव्रतिनोर्ननिषेधः। **अथदुर्गापूजा।टोडरानंदेभविष्यपुराणे**—दिग्विभागेषुसर्वेषुकौवेरीदिक्शिवाप्रिया । तस्मात्तन्मुखआसीनःपूजयेच्चसदांबिकाम् । **गोविंदराजीयेभविष्ये**—यःसदापूजयेद्दुर्गांप्रणमेद्वापिभक्तितः । सयोगीसुमतिर्धीमांस्तस्यमुक्तिःकरेस्थिता । आपःक्षीरंकुशाग्राणिअक्षतादधितंदुलाः । सहसिद्धार्थकादूर्वा कुंकुमंरोचनामधुः। अर्घोयंकुरुशार्दूलद्वादशांगउदाहृतः। **तथा**—नागकेशरकर्पूरंमुरामांसीसवालका । उद्वर्तनसमाख्यातामातृणांसर्वतःप्रिया । **शिवार्चनचंद्रिकायाम्**—चंदनागरुकर्पूरकाश्मीरैरोचनान्वितैः। ससिह्लकजटामांसीसटीभिःशक्तिसंभवम् । गंधाष्टकंशुभंवश्यंशक्तिमंत्रेणयोजयेत् । सिह्लकंशिलारसइतिप्रसिद्धम् ॥

अथपुनःपुष्पाणि देवीपुराणे—शृणुशक्रप्रवक्ष्यामिपुष्पाध्यायंसमासतः।ऋतुकालोद्भवैःपुष्पैर्मल्लिकाजातिकुंकुमैः । सितरक्तैश्चकुसुमै स्तथापद्मैश्चपांडुरैः । किंशुकैस्तगरैश्चैवकिंकिरातैःसचंपकैः। वकुलैश्चैवमंदारैःकुंदपुष्पैस्तिरीटकैः।करवीरार्कपुष्पैश्चशांशपैश्चापराजितैः । सितरक्तै

म्तथापीतैःकृष्णैश्चैवचतुर्विधैः। धत्तूरकातिमुक्तैश्चवंधूकागस्त्यसंभवैः। मदनैःसिंदुवारैश्चसुरभीरुचकैस्तथा। लताभिर्ब्रह्मवृक्षस्यपुष्पैश्चैवमनोहरैः। मंजरीभिःकुशानांचबिल्वपत्रैःसुशोभितैः । पत्रैःपुष्पैर्यथालाभंसर्वौषधिमयैःशुभैः । धान्यानांसर्वपत्रैश्चपुष्पैश्चैवप्रपूजयेत् । कालोद्भवैरित्याकालिकपुष्पनिषेधः । मंदारैरितिमंदारार्कयोर्दुर्गायां । तौविहितनिषिद्धावित्यन्ये । ब्रह्मवृक्षःपलाशः । **देवीपुराणे**—केतकीचातिमुक्तश्चवंधूकयकुलारिपिः(?) । कदंवःकर्णिकारश्चसिंधुवारःसमुद्भवः । पुन्नागश्चंपकश्चैवयूथिकावनमल्लिका । तगरार्जुनमल्लीचबृहतीशतपत्रिका । वीराकुसुमकह्लारबिल्वपाटलमालती । जपाविचकिलाशोकवर्णनीलोत्पलासिता । पंकजंशतपत्रंचदशधापुण्यवृद्धये । द्रोणपुष्पसमाक्षीरनीलापामार्गपत्रिका । सुरसावर्चरीभद्रासुरभीकणमल्लिका । मदनोमरुपत्रश्चशतधापुण्यवृद्धये । कदंवैरर्चयेद्रात्रौमल्लिकोभयतःशुभा । दिवाशेषाणिपुष्पाणियथालाभंनियोजयेत् । प्रत्येकंमुक्तपुष्पेपुदशसौवर्णिकंफलम् । सन्निवद्धेपुतेष्वेवद्विगुणंफलमादिशेत् । सुरसा तुलसीविशेषः । सौवर्णेत्वक्षिणीराजन्भगवत्यैप्रयच्छति । गोसहस्रफलंप्राप्यसूर्यलोकेमहीयते । तथासुवर्णतिलकंदुर्गादेव्यैप्रयच्छति । सगच्छतिपरंस्थानंयत्र सापरमाकला । **धूपोदेवीपुराणे**—धूपंकल्याणनागंतुनिलंदेव्याःप्रियंनृप । दीपनैवेद्येपूर्वोक्तएव ।

अथशिवपूजारुद्राक्षादित्रितिथितत्वेलैंगे—विनाभस्मत्रिपुंड्रेणविनारुद्राक्षमालया । पूजितोपिमहादेवोनस्यात्तस्यफलप्रदः । तस्मान्मृदापिकर्तव्यंललाटेत्रिपुंड्रकम् । **कृत्यकल्पद्रुमेउमासंवादे**—उच्छिष्टोवाविकर्मस्थःसंस्पृष्टःसर्वपातकैः । नासौलिप्यतिपापेनरुद्राक्षस्यतुधारणात् । लक्षंतुस्पर्शनेपुण्यंकोटिर्भवतिचालनात् । दशकोटिसहस्राणिधारणाल्लभतेफलम् । रुद्राक्षदेहसंस्थोपिकुक्कुरोम्रियतेयदि । सोपिरुद्रपदंयातिकिंपुनर्मानवोगुरुः।सप्तविंशतिरुद्राक्षमालयादेहसंस्थया । यत्करोतिनरःपुण्यंसर्वंकोटिगुणंभवेत् । हस्तेचोरसिकंठेयःशिरसाचैवधारयेत् । सुरासुराणांसर्वेषांसर्वंद्योहियथाशिवः । शिखायांबाहुकंठेचकर्णयोश्चापियोनरः । रुद्राक्षंधारयेद्भक्त्यासशैवंलोकमाप्नुयात् । नववक्त्रंचरुद्राक्षंधारयेद्वांमपा

णिना । चतुर्दशमुखंचैवशिखायांधारयेद्बुधः । निश्छिद्राश्चसुपक्वाश्चरुद्राक्षाधारणेस्मृताः । **नववक्त्रादिभेदाःशिवरहस्येपुरुषार्थप्रबो**
धेच—बभूवुस्तेचरुद्राक्षाअष्टत्रिंशत्प्रभेदतः । सूर्यनेत्रसमुद्भूताःकपिलाद्वादशस्मृताः । सोमनेत्रोत्थिताःश्वेतास्तेषोडशविधाःक्रमात् । वह्निनेत्रो
द्भवाःकृष्णादशभेदाभवंतिहि । श्वेतवर्णंतुरुद्राक्षंजातितोब्राह्मणमुच्यते । क्षात्ररक्तंतथामिश्रंवैश्यंकृष्णंतुशूद्रकम् । एकवक्त्रःशिवःसाक्षा
द्ब्रह्महत्यांव्यपोहति । द्विवक्त्रेहरगौरीस्याद्गोवधंनाशयेद्ध्रुवम् । त्रिवक्त्रस्त्वनलःसाक्षात्स्त्रीहत्यांदहतिक्षणात् । चतुर्वक्त्रःस्वयंब्रह्मानरहत्यांव्य
पोहति । पंचवक्त्रस्तुकालाग्निःसर्वपापप्रणाशकृत् । षड्वक्त्रःकार्तिकेयस्तुभ्रूणहत्यादिनाशयेत् । सप्तवक्त्रस्त्वनंतःस्यात्स्वर्णस्तेयादिपापहृत् ।
विनायकोष्टवक्त्रस्तुसर्वव्रतविनाशकृत् । भैरवोनववक्त्रस्तुशिवसायुज्यकारकः । दशवक्त्रःस्मृतोविष्णुर्भूतप्रेतभयापहः । एकादशमुखोरुद्रो
नानायज्ञफलप्रदः । द्वादशास्यस्तथादित्यःसर्वरोगनिवर्हणः । त्रयोदशमुखःकामःसर्वकामफलप्रदः । चतुर्दशास्यःश्रीकंठोवंशोद्धारकरःपरः ।
पंचायतनसारेतिथितत्वेच—विनामंत्रंतुयोधत्तेरुद्राक्षान्भुविमानवः । सयातिनरकान्घोरान्यावदिंद्राश्चतुर्दश । **आचारदर्पणेचो**
पदेवः—रुद्राक्षान्कंठदेशेदशनपरिमितान्मस्तकेविंशतीद्वेपट्पट्कर्णप्रदेशेकरयुगलकृतेद्वादशद्वादशैव । बाह्वोरिंदोःकलाभिर्नयनयुगकृतेएकमेकं
शिखायांवक्षस्यष्टाधिकंयःकलयतिशतकंसस्वयंनीलकंठः । **पुरुषार्थप्रबोधे**—प्रक्षाल्यगंधतोयेनपंचगव्येनचोपरि । शिवांभसाथप्रक्षाल्यश्रीरुद्रे
णाभिषेचयेत् । श्रीरुद्राणांप्रतिष्ठेयमेवंवैदिकसंमता । तांत्रिकेणप्रतिष्ठासाग्राह्यानोवैदिकेनतु । अथवावैदिकमतेप्रतिष्ठानैवविद्यते । **शिवर**
हस्ये—पंचामृतंपंचगव्यंस्नानकालेप्रयोजयेत् । रुद्राक्षस्यप्रतिष्ठायांमंत्रंपंचाक्षरंतथा । **पंचायतनसारेपाद्मे**—शालग्रामशिलालिंगेयः
करोतिममार्चनम् । तेनार्चितःकार्तिकेयोयुगानामेकसप्ततिम् । **शूलपाणौलैंगे**—वरंप्राणपरित्यागःशिरसोवापिकर्तनम् । नचैवापूज्यभुंजी
तशिवलिंगमदेश्वरम् । सूतकेमृतकेचैवनत्याज्यंशिवपूजनम् । **भारतेमूर्तावपिशिवपूजोक्ता**—ताभ्यांलिंगेर्चितोदेवस्त्वर्चायांचयुगे

युगेइति । शिवमूर्तिर्दशभुजापूज्या—पिनाकिनंवज्रिणंदीप्तशूलंपरश्वधिनंगदिनंखायतासिम् । दिव्यंचापमिषुधीचाददानंव्याघ्राजिनंपरिघिणंदंडपाणिमितिभारतात् । चतुर्भुजेत्यन्ये । त्रियंबकेतिमंत्रंतुतथातत्रप्रयोजयेत् । देवीपुराणे—वार्क्षंवित्तप्रदंलिंगंस्फाटिकंसर्वकामदम् । नर्मदागिरिजंश्रेष्ठमन्यद्वापिहिलिंगवत् । कृत्वापूजयविप्रेंद्रलप्स्यसेचेप्सितंफलम् । तिथितत्वेभविष्ये—तथामलकमात्रंतुकृत्वा लिंगंहिरण्मयम् । संपूज्यरत्नजटितंशिवलोकेमहीयते । मृद्भस्मगोशकृत्पिष्टताम्रकांस्यसमुद्भवम् । कृत्वालिंगंसकृत्पूज्यवसेत्कल्पायुतंदिवि । काशीखंडेनर्मदेशमाहात्म्ये—यावत्योद्यदःसंतितवरोधसिनर्मदे । तावत्योलिंगरूपिण्योभविष्यंतिवरान्मम । भविष्ये—बाणलिंगानिराजेंद्रख्यातानिभुवनत्रये । नप्रतिष्ठानसंस्कारस्तेषामावाहनंनच । एवमेवप्रपूज्यानिशिवरूपाणिभावतः । कालोत्तरे—त्रिपंचवारंयस्यैवतुलासाम्यंनजायते । तद्वाणंहिसमाख्यातंशेषंपापाणसंभवम् । क्रियासारे—लिंगस्यशिवनाभेस्तुनहिपीठप्रकल्पनम् । तदाधारशिलैवस्यात्तस्यपीठमितिस्मृतम् । उत्तममध्यमंचैवाधमंलिंगत्रिधोच्यते । एष्वेकैकंत्रिधातद्वदुक्तमंगुलिमानतः । नवाष्टसप्तांगुलिकंलिंगंश्रेष्ठंतथास्मृतम् । षट्पंचकचतुर्मानंमध्यमंत्रिविधंस्मृतम् । त्रिद्व्येकांगुलिकंलिंगंत्रिविधंतुकनीयसम् । उत्तमंबुद्बुदाकारंमध्यमंकुक्कुटांडवत् । अधमंगोकुक्कुरस्यादितिलिंगंत्रिधास्मृतम् । तिथितत्वेकालकौमुद्यांचस्कांदे—अक्षादल्पपरिमाणंनलिंगंकुत्रचिन्नरः । कुर्वीतांगुष्ठतोहस्वंनकदाचित्सगाचरेत् । अंगुष्ठतोंगुष्ठपर्वग्रथेः । अंगुष्ठांगुलिमानंतुयत्रयत्रोपदिश्यते । तत्रतत्रबृहत्पर्वग्रंथिभिर्मिनुयात्सदेतिछंदोगपरिशिष्टादित्युक्तंतिथितत्वे । सिद्धांतशेखरे—अंगुलादितस्त्यतंलिंगगेहेत्रपूजयेत् । प्रासादेतुतदूर्ध्वंस्यात्पूजनीयप्रयत्नतः । लिंगमस्तकविस्तारंपूजाभागसमंनयेत् । नाहंतन्त्रिगुणंकुर्यान्नाहवत्पीठविस्तृतिः । विस्तारद्विगुणंकुर्यादुन्नतंपीठमुत्तमम् । वृत्तंवाचतुरस्रंवामध्येकंठसमन्वितं । द्विगुणंलिंगनाह्याच्चकंठनाहंसमाचरेत् । निमेखलमधश्चोर्ध्वसमंवायद्विमेखलम् । लिंगमस्तकविस्तारेपड्भागंविभजेत्ततः । मेखलामेकभागेनकुर्यात्खातंचतत्स

मम् । लिंगदैर्घ्यसमंकुर्यात्प्रणालंपीठवाह्यतः । विस्तारंतत्समंमूलेतदग्रेचतदर्धतः । जलमार्गःप्रकर्तव्यस्तस्यमध्येत्रिभागतः । कुर्यात्पीठार्धंदीर्घंवाप्रणालंचशिवोदितम् । सर्वेषांरत्नलिंगानांसपीठानांविशेषतः । लौहादीनांचलिंगानामेवंलक्षणमाचरेत् । **गौतमीतंत्रेतु**— लिंगमस्तकविस्तारो लिंगोच्छ्रायसमोभवेत् । परिधिस्तत्त्रिगुणितस्तद्वत्पीठंव्यवस्थितम् । प्रणालिकातथैवस्यात्पंचसूत्रविनिर्णयः । लिंगमस्तकविस्तारदैर्घ्यलिंगोच्चतेसमे । तद्द्विगुणवेष्टनाहंलिंगस्थौल्यम् । तत्समंवृत्तचतुस्रंवापीठमधश्चोर्ध्वंचेतितत्वम् । पीठोच्चतालिंगोच्चताद्विगुणा । **नंदिपुराणे**—त्रिकोणंफलकाकारंशूलाग्रंजर्जरंनतम् । कपिलंचापियल्लिंगंतद्गृहस्थोनपूजयेत् । तथादीक्षितानांद्विजान्येषांस्त्रीणामपितथैवच । लिंगेस्वगुरुणादत्तेपूजानान्यत्रचोदिता । **सूतसंहितायांशिवपूजाविधिंप्रक्रम्य**—समासीनःसदामौनीनिश्चलोदङ्मुखःशुचिः । **सोमशंभुः**—देवस्यदक्षिणेभागेसन्निविष्टःसुखासने । **ज्ञानरत्नावल्याम्**—नम्राच्यामग्रतःशंभोर्नोत्तरेयोपिदाश्रये । नम्रतीच्यांयतःपृष्ठंतस्माद्दक्षंसमाश्रयेत् । दक्षंदक्षिणभागं । तिष्ठितत्वेनंदिपुराणे—चरलिंगेर्चयेद्देवंपूर्वाभिवदनंबुधः । स्थिरलिंगेयथाकामंसुखमादौतथार्चयेत् । **चंद्रिकायांहारीतः**—आराधयेन्महादेवंभावपूतोमहेश्वरम् । मंत्रेणरुद्रगायत्र्याप्रणवेनाथवापुनः । ऐशानेनाथवारौद्रेत्र्यंबकेणसमाहितः । तथोत्तमःशिवायेतिमंत्रेणानेनवायजेत् । **बौधायनः**—अथातोमहादेवस्याहरहःपरिचर्याविधिंव्याख्यास्यामः । स्नात्वाशुचौदेशेगोमयेनोपलिप्यप्रतिकृतिंकृत्वाक्षतपुष्पैर्यथालाभमर्चयेत्सहपुष्पोदकेनमहादेवमावाहयेदोंभूर्महादेवमावाहयामिॐभुवोमहादेवमावाहयामिॐस्वर्महादेवमावाहयामिॐभूर्भुवःस्वर्महादेवमावाहयामीत्यावाह्यायातुभगवान्महादेवइत्यर्घस्वागतेनाभिनंदयतिस्वागतंसुस्वागतंभगवतेमहादेवायैतदासनमुपकल्पतमत्रास्तांभगवान्महादेवइत्यत्रकूर्चंददाति भगवतेयंकूर्चोदर्भमयस्त्रिवृद्धरितःसुपर्णस्तंजुपस्वेत्यत्रस्थानासनानिकल्पयत्यग्रेब्रह्मणेकल्पयामिविष्णवे दक्षिणतःस्कंदाय पश्चिमत शूलायमहाकालाय उत्तरतःउमायै नंदिकेश्वरायकल्पयामीतिकल्पयित्वा सावित्र्या योरुद्रोअग्नाविति चपात्रमभिमंत्र्य प्रक्षाल्यत्रिप

तिरःपवित्रमपआनीय सहपवित्रेणादित्यंदर्शयेदोमित्यातमितोस्तासांत्वरितरुद्रेणपाद्यंदद्यात्प्रणवेनार्घ्यमथव्याहृतिभिर्निर्माल्यंव्यपोह्योत्तरतश्चंडेशा
यनमइत्यथैनंस्नपयत्यापोहिष्ठामयोभुवइतितिसृभिर्हिरण्यवर्णाःशुचयःपावकाइतिचतसृभिःपवमानःसुवर्जनइत्येतेनानुवाकेनाथाद्भिस्तर्पयतिभवंदेवं
तर्पयामिशर्वंदेवंईशानदेवंपशुपतिंदेवंरुद्रदेवंउग्रदेवंभीमंदेवंमहांतंदेवंतर्पयामि ब्रह्मजज्ञानंकेतुंरुद्रायत्वरितरुद्रंवामदेव्यमापोवाइदमितिचाभिषेकं
कुर्याद्व्याहृतिभिःप्रदक्षिणमुदकंपरिषिच्य ॐनमोभगवतेरुद्रायत्र्यंबकायेतितर्पयित्वाथैतानिवस्त्रयज्ञोपवीतानिदद्याद्भवायदेवायनमइतिव्याहृतिभि
र्दत्वाव्याहृतिभिःप्रदक्षिणमुदकंपरिषिच्यनमस्तेरुद्रमन्यवइतिगंधंदद्यात्सहस्राणिसहस्रशइतिपुष्पंदद्यात्ईशानंत्वाभुवनानामपिश्रियामित्यक्षतंदद्या
त्सावित्र्याधूपमुद्दीप्यस्वेतिदीपंदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांभगवतेमहादेवायजुष्टंचरुंनिवेदयामीतित्रियंबकमितिपरिषेकम
मृतोपस्तरणमसीतिप्रतिपदंकृत्वाहविरुद्वासयामीतिनिवेद्यामृतापिधानमसीतिप्रतिपदंकृत्वात्र्यंबकमित्याचमनीयमथाष्टभिर्नामधेयैरष्टौपुष्पाणिदद्या
द्भवायदेवायनमः । शर्वायदेवायनमः । ईशानायदेवायनमः । पशुपतयेदेवायनमः । रुद्रायदेवायनमः । उग्रायदेवायनमः । भीमायदेवा
यनमः । महतेदेवायनमः । ब्रह्मणेनमः । विष्णवेनमः । स्कंदायनमः । विनायकायनमः । शूलायनमः । महाकालायनमः । उमायैनमः । नंदिकेश्वरा
यनमः । इतिचरुशेषेणनामधेयैरष्टाहुतीर्जुहोति । भवायदेवायस्वाहा । शर्वायदेवायस्वाहा । ईशानायदेवायस्वाहा । पशुपतयेदेवायस्वाहा ।
रुद्रायदेवायस्वाहा । भीमायदेवायस्वाहा । महतेदेवायस्वाहेत्यथशिष्टैर्गंधमाल्यैर्ब्राह्मणानात्मानंवालंकृत्यथैनमृग्यजुःसामाथर्वभिःस्तुवंतिसहस्राणि
सहस्रशइत्यनुवाकंजप्त्वाअन्यांश्चरौद्रान्मंत्रान्यथाशक्तीत्येके ॐ भूर्भुवःसुवर्महरोंभगवतेमहादेवायचरुमुद्वासयामीतिचरुमुद्वास्योद्वासनकालं ॐ
भूर्भुवःस्वः महादेवमुद्वासयामीत्युद्वास्य । प्रयातुभगवानीशःसर्वलोकपरायणः । अनेनहविषातुष्टःपुनरागमनायच । पुनःपुनःसंदर्शनायचे
तिलिंगेप्रतिमास्थानेष्वप्स्वग्नावावाहनविसर्जनवर्जंसर्वसमानंमहत्स्वस्त्ययनमित्याहभगवान्बौधायनः ॥

शिवपूजायांविशेषोभविष्ये—आपःक्षीरंकुशाग्राणिदध्यक्षतसितामधु । सिताश्चसर्षपाश्चैवअर्घोष्टांगःप्रकीर्तितः । तत्रैव—चंदनेप्यगरौज्ञेयंपुण्यमष्टगुणंनृप । कृष्णागरौविशेषेणद्विगुणंफलमादिशेत् । तस्माच्छतगुणंपुण्यंकुंकुमस्यविधीयते । चंदनागरुकर्पूरैःसूक्ष्म पिष्टैःसकुंकुमैः । शिवस्यार्चांसमालभ्यवसेत्कल्पायुतंदिवि । अर्चेतिलिंगोपलक्षणम् । **शिवार्चनचंद्रिकायांभविष्ये केदारखंडे**—करवीराद्दशगुणमर्कपुष्पंविशिष्यते । अर्कपुष्पाद्दशगुणंधत्तूरंहिविशिष्यते । चंपकंनागपुष्पंचकह्लारंचविशिष्यते । नीलोत्पलंचकह्लारात्सहस्रेणवि शिष्यते । वकपत्रसहस्रेभ्यएकंधत्तूरकंवरम् । धत्तूरकसहस्रेभ्योवृहतीपुष्पमुत्तमम् । वृहतीपुष्पसाहस्राद्द्रोणपुष्पंविशिष्यते । द्रोणपुष्पसहस्रे भ्योह्यपामार्गविशिष्यते । अपामार्गसहस्रेभ्यःकुशपुष्पंविशिष्यते । कुशपुष्पसहस्रेभ्यःशमीपुष्पंविशिष्यते । शमीपुष्पसहस्रेभ्यःश्रीमन्नीलोत्प लंवरम् । शमीपुष्पवृहत्योश्चकुसुमंतुल्यमुच्यते । अपामार्गः अपामार्गपुष्पं । करवीरसमाज्ञेयाजातीवकुलपाटलाः । श्वेतमंदारकुसुमंसितपद्मंचत त्समम् । नागचंपकपुंनागाधत्तूरकुसमाःस्मृताः । तत्समं करवीरसमम् । नागो नागकेसरः । तथा—केतकीचातिमुक्तंचकुंदोयूथीमदंतिका । शिरीषसर्जवंधूककुसुमानिविवर्जयेत् । कुंदंवार्पिकशिवपूजायांमाघेविहितम् । अन्यथानिषिद्धम् । तथा—कंदकानिकदंबानिरात्रौदेयानिशंकरे । दिवाशेषाणिपुष्पाणिदिवारात्रौचमल्लिका । प्रत्येकमुक्तपुष्पेपुदशसौवर्णिकंफलम् । मंत्रान्वितेपुतेष्वेवद्विगुणंफलमिष्यते । विल्वपत्रैरखंडैस्तुशंकरंपू जयेत्क्वचित् । सर्वपापविनिर्मुक्तःशिवलोकेमहीयते । तुलसीविल्वनिर्गुंडीजंवूराव्रणकंतथा । पंचविल्वमितिप्रोक्तमर्चयेदिंदुशेखरम् । वृहतीकुं कुमैर्भक्त्यायोलिंगंसकृदर्चयेत् । गवामयुतदानस्यफलंप्राप्यशिवंव्रजेत् । तथा—अशोकश्वेतमंदारकर्णिकारवकानिच । करवीरार्कमंदारशमी तगरकेशरम् । पुष्पैरेतैर्यथालाभंयोनरःपूजयेच्छिवम् । सयत्फलमवाप्नोतितदेकाग्रमनाःशृणु । सूर्यकोटिप्रतीकाशैर्विमानैःसर्वकामिकैः ।

१ कदकानि केतकानि ।

दोधूयमानश्चमरैःशिवलोकेमहीयते । करवीरोबकश्चैवअर्कउन्मत्तकस्तथा । पालाशोबृहतीचैवतथाचगिरिकर्णिका । तथाकाशस्यपुष्पाणिमंदार श्चापराजिता । शमीपुष्पाणिचान्यानिकुंजकःशिखिनातथा । अपामार्गस्तथापद्मंजातीपुष्पंसकोपनम् । चंपकोशीरतगरंतथावैनागकेसरम् । पुंनागःकिंकिरातंचद्रोणपुष्पंतथाशुभम् । शिंशपोदुंबरश्चैवजपामल्लीतथैवच । पुष्पाणियज्ञवृक्षस्यतथाबिल्वदलंशुभम् । कुसुंभस्यचपत्राणितथा वैकुंकुमस्यच । नीलंचकुमुदंचैवतथारक्तोत्पलानिच । सुरभीणिचसर्वाणिस्थलजान्यंबुजानिच । गृह्णामिशिरसादेवियोमेभक्त्यानिवेदयेत् । केसरो बकुलः । किंकिरातःकुरंटकः । सर्वाणीतिनिषिद्धेतरपरम् । वसंतेतुऋतौप्राप्तेसर्वैःपुष्पैर्मनोरमैः । पूजितेतुमहादेवेअश्वमेधफलंलभेदितिवचना दत्रनिषिद्धैरपिपूजा । सर्वशब्दसंकोचेमानाभावात् निषेधस्यकालांतरेसावकाशत्वाच्च । **देवीपुराणे**—वैशाखेमासिकर्तव्यापूजापाटलयासदा । सर्वान्कामानवाप्नोतिज्येष्ठेपद्मार्चनैःसदा । आषाढेबिल्वकह्लारैरीप्सितंलभतेफलम् । नवमल्लिकयापूजानभोमासिमहाफला । कदंबैश्चंपकैरेव नभस्येसर्वकामदा । पूजापंकजमालत्याइषेप्युदयदायिनी । शतपत्रिकयापूजाकार्तिकेसर्वकामदा । मार्गेनीलोत्पलैःपूजापौषेतुकुब्जकैःसदा । मा घेतुकुदकुसुमैरुचकेनचफाल्गुने । शतपत्रैस्तथाचैत्रेयोर्चयेद्दिदुशेखरम् । लभतेसर्वयज्ञानांसर्वदानफलंतथा । **केदारखंडे**—जातीपुष्पंमल्लि कायाश्चपुष्पंसमोगरंनीलपुष्पंतथैव । तथापुष्पंकुटजंकर्णिकारंकौसुंभाख्यंवारिजंरक्तवर्णम् । एतान्येवचपुष्पाणिमध्याह्नेलिंगपूजने । रात्रौमो गरकान्येवपवित्राणिविशेषतः ।

अथधूपः । शिवपुराणे—गुग्गुलंघृतसंयुक्तंशिवेयश्चनिवेदयेत् । रुद्रलोकमवाप्नोतिगाणपत्यंचगच्छति । **भविष्ये**—दधित्थंघृतसं-युक्तंदग्धबिल्वमथापिवा । अग्निष्टोमस्ययज्ञस्यफलप्राप्नोतिमानवः । दधित्थःकपित्थः । बिल्वंबिल्वफलम् । दीपस्तुपूर्वोक्तएव । **आदि त्यपुराणे**—प्रदक्षिणात्रयकुर्वन्शिवस्यायतनेनरः । अश्वमेधसहस्रस्यइष्टस्यलभतेफलम् । **बह्वृचपरिशिष्टे**—एकांविनायकेदद्याद्वेसूर्येत्री

णिशंकरे । चत्वारिकेशवेदद्यात्सप्ताश्वत्थेप्रदक्षिणाः । **वृहन्नारदीये**—एकांचंड्यांरवौसप्ततिस्तोदद्याद्विनायके । चतस्रःकेशवेदद्याच्छिवेत्व
र्धप्रदक्षिणम् । पदांतरेपदंन्यस्येत्करौचलनवर्जितौ । स्तुतिर्वाचिहृदिध्यानंचतुरंगंप्रदक्षिणम् । **लैंगे**—सव्यंव्रजेत्ततोऽसव्यंप्रणालंनैवलंघयेत् ।
स्कांदे—प्रदक्षिणंप्रकुर्वीतशतमष्टोत्तरंतथा । **वृहन्नारदीये**—शिवप्रदक्षिणेमर्त्यःसोमसूत्रंनलंघयेत् । **प्रदक्षिणाप्रकारस्तु**—वृषंचंडं
वृषंचैवसोमसूत्रंपुनर्वृषम् । चंडंचसोमसूत्रंचपुनश्चंडंपुनर्वृषम् । **प्रतिष्ठाहेमाद्रौ**—प्राच्यांनंदिमहाकालौयाम्येभृंगिविनायकौ । वारुणेवृ
षभस्कंदौदेवीचंडौतथोत्तरे । **त्रैविक्रम्यांत्वीशान्यांचंडउक्तः** । तत्रैव—वाणलिंगेचलेलौहेसिद्धलिंगेस्वयंभुवि । प्रतिमासुचसर्वासुनचं
डोऽधिकृतोभवेत् । **आदित्यपुराणे**—लिंगेस्वायंभुवेचैवरत्नेतैजसनिर्मिते । सिद्धप्रतिष्ठितेचैवनचंडोधिकृतोभवेत् । तथा—अपसव्ययतिः
कुर्यात्सव्यंतुव्रह्मचारिणः । सव्यापसव्यंगृहिणोनित्यंशंभोःप्रदक्षिणम् । तृणैःकाष्ठैस्तथापर्णैःपाषाणैर्वेष्टकादिभिः । अंतर्धानंपुरःकृत्वासोमसूत्रं
तुलंघयेत् । **तत्प्रमाणंतत्रैव**—प्रासादविस्तारसमानसूत्रंसोमस्यसूत्रेदिशिसोमसूत्रम् । सूत्राद्वहिर्लघनतोनदोषःस्याद्दोषआभ्यंतरलंघनेन ।
शिल्पशास्त्रे—लिंगमस्तकमध्यात्तुसूत्रंस्यादाप्रणालकम् । लिंगप्रणालीपुष्टत्वंतावदेवप्रकीर्तितम् । **विशेषांतरंतत्रैव**—सोमसूत्रद्वयंय
त्रयत्रवाविष्णुमंदिरम् । अपसव्यंनकुर्वीतकुर्वीतैवप्रदक्षिणम् । **केदारखंडे**—वृषभांतरितोभूत्वापीठकांतरमेवच । प्रदक्षिणंनकुर्वीतकुर्वन्किल्विष
माप्नुयात् । **कालिकापुराणे**—स्पृष्ट्वारुद्रस्यनिर्माल्यंसवासाआप्लुतःशुचिः । इदमशुचिविषयम् । निर्माल्यंयोहिमद्भक्त्याशिरसाधारयिष्यति ।
अशुचिर्भिन्नमर्यादोनरःपापसमन्वितः । नरकेपच्यतेघोरेतिर्यग्योनौचसंभवेदितिस्कांदादितिश्रीदत्तः । **अपास्तएवायंदोषःस्कांदे**—
शिवनिर्माल्यभोक्तारःशिवनिर्माल्यलंघकाः । शिवनिर्माल्यदातारःस्पर्शस्तेषांहिपुण्यहृत् । शिवैकभक्तानांननिषेधः । पादोदकंचनिर्माल्यंभक्तै
र्धार्यंविशेषतइत्यग्निपुराणात् ।—निर्माल्यंधारयेद्भक्त्याशिरसापार्वतीपतेः । राजसूयस्यसयज्ञस्यफलंप्राप्नोतिनिश्चितमित्यादित्यपुराणाच ।

लोभात्तुनधार्यम् । लोभान्नाधरयेच्छंभोर्निर्माल्यंनचभक्षयेत् । नस्पृशेदपिपादेनलंघयेन्नापिनारदेतिपाद्मात् । **अग्निपुराणे**—बाणलिंगेचले लौहेसिद्धलिंगेस्वयंभुवि । प्रतिमासुचसर्वासुनदोषोमाल्यधारणे । शालग्रामसंसर्गेतुनदोषः । अग्राह्यशिवनिर्माल्यंपत्रंपुष्पंफलंजलम् । शालग्रा मस्यसंसर्गात्सर्वंयातिपवित्रतामितिस्कांदवाराहोक्तेः । **अस्यार्थः**—पंचायतनपूजायांकांडानुसमयपदार्थानुसमयौविहायसहैवपंचानांपू जनेशालग्रामसंसर्गाच्छिवनैवेद्यंभक्ष्यम् । यदाशिवेनैवेद्यंपृथक्तदानभक्ष्यमिति ॥

अत्रपुरुषार्थप्रबोधेचतुर्धाव्यवस्थोक्ता—द्विजानांनिषेधोद्विजानांविधिरित्याद्या । वैदिकतांत्रिकविषयेत्यन्या । दीक्षितादीक्षित विषयेतितृतीया । ततःसिद्धांतकृतः—ज्योतिर्लिंगविनालिंगंय.पूजयतिमानवः । तस्यनैवेद्यनिर्माल्यभक्षणात्तप्तकृच्छ्रकम् । शालग्रामोद्भवेलिंगेवा णलिंगेस्वयंभुवि । रसलिंगेतथार्पेचसुरसिद्धप्रतिष्ठिते । हृदयेचंद्रकांतेचस्वर्णरूप्यादिनिर्मिते । शिवदीक्षावतामक्तेनेदंभक्ष्यमितीर्यते । इतिभवि ष्योक्तेः । तथा—बाणलिंगेस्वयंभूतेचंद्रकांतेहृदिस्थिते । चांद्रायणसमज्ञेयंशंभोर्नैवेद्यभक्षणम् । यत्रचंडाधिकारोस्तिनभोक्तव्यंचमानवैः । चंडाधिकारोनोयत्रभोक्तव्यंतत्रभक्तिइतितत्रैवोक्तेः ।—निवेदितंयद्देवेशतच्छेपंचात्मशुद्धये । श्रद्दधानोनलोभेनचंडायह्यनिवेदितमितिवायुपु राणाच्च ।—येवीरभद्रशपिताःशिवभक्तिपराश्रुवाः । शंभोरन्यत्रदेवेपुयेभक्तायेनदीक्षिताः । तेषामनर्हमीशस्यतत्प्रसादचतुष्टयमितिशिवपुरा णाच्चसामान्यविधिरेतत्परएव । एतैर्विशेषवाक्यैरुपसंहारात्, अन्यथानिषेधानांनिरवकाशत्वापत्तेः । यत्तुशिवनिर्माल्यस्पर्शेप्रायश्चित्तं तदेतदन्यपरम् । यत्तुशिवनैवेद्यभक्षणादेःकाम्यत्वात्तत्सकलशिवस्वभक्षणादिनिषेधबाधकत्वमिति तत्रपूर्वोक्तव्यवस्थासंभवात् फलरहितवि धिसद्भावाच्चेतिश्रीभट्टनारायणचरणाः । **सिद्धांतशेखरे**—धराहिरण्यगोरत्नताम्ररौप्यांशुकादिकान् । विहायशेषनिर्माल्यंचंडे शायनिवेदयेत् । अन्यदन्नादिपानीयंतांबूलंगंधपुष्पकम् । दद्याच्चडायनिर्माल्यशिवभुक्तंतुसर्वशः । आचार्यशिवचंडानामाज्ञाभंगेतुलक्षकम् ।

धनस्यभक्षणेतेपांपादोनंलक्षमीरितम् । निर्माल्येभक्षितेपादलक्षतःशुद्धिरीरिता । दानंचभक्षणसमंतदर्धंतदुपेक्षणे । अकामाद्भक्षणेयद्वानिर्माल्यस्यज
पेत्सुधीः । ब्रह्मपंचकसाहस्रमर्धेनसहितंततः । कामतोभक्षणेदीक्षाप्रायश्चित्तंनचान्यतः । निर्माल्यलंघनेघोरंत्रजपेदयुतंततः । स्पर्शश्चविक्रयस
मोविक्रयोभक्षणेनच । **स्मृत्यर्थसारे**—शैवसौरनिर्माल्यभक्षणेचांद्रम् । अभ्यासेद्विगुणम् । मत्याभ्यासेपतनम् । अन्यनिर्माल्येप्यनापद्येव
मिति । अत्र—ब्रह्महापिशुचिर्भूत्वानिर्माल्यंयस्तुधारयेत् । तस्यपापंमहच्छीघ्रंनाशयिष्येमहाव्रतेतिस्कांदादशुचिनानधार्यं किंतुस्नात्वेति
स्मार्ताः। अनुपनीतेननधार्यमितिश्रीदत्तः । शिवदीक्षाहीनैर्नधार्यमितिशैवाः । **माघमाहात्म्येपाद्मे**–द्रव्यमन्नंफलंतोयंशिवस्यनस्पृशेत्क
चित् । निर्माल्यंलंघयेन्नैवकूपेसर्वंतुतत्क्षिपेत् । **हरनाथीयेस्मृत्यर्थसारे**—ब्रह्मांगलग्नंविप्रेभ्योविष्णवेचप्रदीयते । रुद्रांगलग्नमग्नौचदहेत्सर्वं
तुतत्क्षणात् । विप्रेभ्यस्त्वथतद्देयंब्रह्मणेयन्निवेदितम् । वैष्णवंसात्वतेभ्यश्चभस्मांगेभ्यश्चशांभवम् । सौरंभृगेभ्यःशाक्येभ्यस्तापिनेयन्निवेदितम् ।
वाडवेभ्यस्तुतद्देयंगणेशायनिवेदितम् । भूतप्रेतपिशाचेभ्योयत्तद्दीनेपुनिक्षिपेत् । मृगःशाकद्वीपीयोब्राह्मणइति**पंचायतनसारः** । **विष्णुः**—
देव्यैनिवेदितंकुमार्यै । विष्णवेनिवेदितंसात्वताय ब्राह्मणायवेति । सात्वतो देवलकः । **पुराणे**—नैवेद्यप्रतिपत्त्यर्थंसात्वतश्चेन्नलभ्यते ।
ग्रासमात्रंसमुद्धृत्यजलेक्षौवाक्षिपेदिति । यद्वासात्वतप्रतिपत्तिः साधारणप्रतिमादत्तपरा, सात्वतपूज्यदेवतादत्तपरावा । यद्योनिरत्तिनैवेद्यंदा
तुश्चानवधानतः । क्षतातद्योनिमाप्नोतितस्माद्देयंतदुत्तमेइति**विष्णुरहस्योक्तेः** उत्तमपदंहीनान्यपरम् । तेनोत्तमजातिनिवेदितंनीचजातिभ्यो
नदद्यादित्यर्थइति**पंचायतनसारः** । वस्तुतस्तुसात्वतपदंभक्तपरम् । निवेदितंतद्भक्तायदद्याद्भुंजीतवाखयमितिमहापुराणात् । सर्वमेत
त्साधारणस्थावरप्रतिमादत्तपरं रागप्राप्तपरंवेति **गोविंदराजः** । अतएवजाबालोपनिषदि—रुद्रभुक्तंभुंजीयादित्युपक्रम्य तस्माद्ब्राह्मणाः

१ तापिने युद्धाय । २ वाडवेभ्यः अनुपनीतब्राह्मणेभ्यः ।

शिन्निर्माल्यंभक्षयंतीत्युक्तम्। अत्रब्राह्मणग्रहात्तदन्यस्यनिषेधः। अतएव**पाद्मे**—शिवस्यैवतुपूजायामिभक्त्याधेयाद्विजातिभिः। **विष्णुनैवेद्यभक्षणमुक्तं गारुडे**—पादोदकंपिवेन्नित्यंनैवेद्यंभक्षयेद्धरेः। **पाद्मे**—गौरींप्रतिशिवः—अग्निष्टोमसहस्रैश्चवाजपेयशतैरपि। तत्फलंलभतेदेवि विष्णोर्नैवेद्यभक्षणात्। **कौर्मे**—मध्याह्नेविधिवत्पूज्यःश्रीविष्णुर्वैष्णवोत्तमैः। नैवेद्यंशिरसानत्वाश्लोकमेतमुदीरयेत्। यस्योच्छिष्टंहिवांच्छंति ब्रह्माद्याऋषयोऽमलाः। सिद्धाद्याश्चहरेस्तस्यवयमुच्छिष्टभोजिनः। इति।

अथविष्णुपूजा। तदाधारश्चनरसिंहे—अप्स्वग्नौहृदयेसूर्येस्थंडिलेप्रतिमासुच। पट्स्वेतेपुहरेःसम्यक्पूजनंमुनिभिःस्मृतम्। सम्यगितिपण्णांप्राशस्त्यम्। एतच्चाधारपरिगणनं **नारसिंहे**वक्ष्यमाणपूजाद्वये अर्चनंवक्ष्यामीत्युपक्रम्य तयोरेवोक्तत्वात्। **वाराहे**—कुड्येलेप्येचमेकश्चित्पटेकश्चित्तुमानवः। पूजयेद्यदिवाचक्रेममतेजोंशसंभवम्। चक्रेशालग्रामशिलाचक्रे। तथा—पद्मेसंपूजनंशस्तंशस्तंचैवतुस्थंडिले। सर्वत्रसंप्रतिष्ठाग्निपूजामग्नस्त्वहंततः। **पाद्मे**—कृत्वाताम्रमयेपात्रेयोर्चयेन्मधुसूदनम्। फलमाप्नोतिपूजायाःप्रत्यहंशतवार्षिकम्। **आधारविशेषेविधिविशेषमाह**—हविषाग्नौजलेपुष्पैर्मनसारविमंडले। ध्यानेनहृदयेवाद्यैर्गंधाद्यैःस्थंडिलादिषु। **शौनकः**—उत्तमा हरिपूजाप्सुमध्यमास्थंडिलेरवौ। अधमाप्रतिमादौतुपूजासात्रिविधामता। **भागवते**—सूर्योग्निर्ब्राह्मणागावोवैष्णवःखंमरुज्जलम्। भूरात्मासर्वभूतानिभद्रपूजापदानिमे। सूर्येतुविद्ययात्रय्याहविषाग्नौयजेतमाम्। आतिथ्येनचविप्राग्र्येगोष्वंगयवसादिना। वैष्णवेबंधुसत्कृत्याहृदिखेध्याननिष्ठया। स्थंडिलेमन्नद्दयैर्भोगैरात्मानमात्मनि। क्षेत्रज्ञंसर्वभूतेषुसमत्वेनयजेतमाम्। **पाद्मे**—अग्निहोत्रंहुतंतेनदत्तापृथ्वीससागरा। येनार्चितोहरिश्चक्रेशालग्रामसमुद्भवे। शालग्रामशिलारूपीयत्रतिष्ठतिकेशवः। तत्रदेवाःसुरायक्षाभुवनानिचतुर्दश। शालग्रामसमीपेतुक्रोशमात्रंसमं

---

१ मद्गणादुक्तप्रतिपत्तिस्तदन्यपरा। अतएवतन्नैवेद्यभक्षणमुक्तंपुराणेषुगारुडेपि इतिपाठ।

ततः । कीटकोपिमृतोयातितद्विष्णोःपरमंपदम् । मनोधृतिर्धारणास्यात्समाधिर्ब्रह्मणिस्थितिः । अमूर्तौचेत्स्थिरानस्यात्ततोमूर्तिंविचिंतयेत् । चतुर्विंशतिमूर्तिःस्याच्छालिग्रामशिलास्थितः । द्वारकादिशिलासंस्थोध्येयःपूज्योथवाहरिः । तत्रैव—मौक्तिकंचप्रवालंचपद्माक्षंतुलसीमणीन् । जपपूजनवेलायांधारयेद्यःसवैदिकः । इति ।

अथकेशवादिचतुर्विंशतिमूर्तयः । तत्र वोपदेवः—केविगोवादापुरुषेप्रजाच्युकृममात्रिना । वाधोनृहसानिश्रीपशाचगेविगपे चपे । **अस्यार्थः**—केशवविष्णुगोविंदवामनदामोदरपुरुषोत्तमहृषीकेशउपेंद्रप्रद्युम्नजनार्दनाच्युतकृष्णमधुसूदनमाधवत्रिविक्रमनारायणवासुदेवाधोक्षजनृसिंहहरिसंकर्षणानिरुद्धश्रीधरपद्मनाभानां क्रमेणमूर्तयोभिधीयंते । तत्रकेशवे शात्शंखात् चगेचक्रगदेइत्यर्थः । शिष्टेभुजेपद्ममर्थात्सिद्धम् । इदंदक्षिणोर्ध्वकरप्रभृतिप्रादक्षिण्येनज्ञेयम् । दक्षिणोर्ध्वकरक्रमादितिहेमाद्रिवचनात् । तथाचदक्षिणोर्ध्वभुजेशंखः । वामोर्ध्वभुजेचक्रं वामाधोहस्तेगदा दक्षिणाधःपद्मम् । विष्णौवामोर्ध्वप्रभृतिशंखचक्रगदापद्मानि । गोविंदेवामाधः प्रभृतिशंखचक्रगदापद्मानि । वामनेदक्षिणाधः प्रभृतिशंखचक्रगदापद्मानि विपरीतंगचेइत्यर्थः । दामोदरेदक्षिणोर्ध्वप्रभृतिशंखगदाचक्रपद्मानि । दक्षिणोर्ध्वेपांचजन्यमधस्तात्तुकुशेशयं । सव्योर्ध्वेकौमुदीदेवीहेतिराजमधःस्थितम् । अनिरुद्धस्यभेदोयंदामोदरइतिस्मृतइति **हयशीर्षपंचरात्रात्** । पुरुषोत्तमेवामोर्ध्वप्रभृतितानि । हृषीकेशेवामाधःप्रभृतितानि । उपेंद्रेदक्षिणाधःप्रभृतितानि । शात्गपेगदापद्मेइत्यर्थः । शिष्टेचक्रमर्थात् । प्रद्युम्नेदक्षिणोर्ध्वप्रभृतिशंखगदाचक्रपद्मानि । जनार्दनेवामोर्ध्वप्रभृतितानि । अच्युतेवामाधःप्रभृतितानि । कृष्णेदक्षिणाधःप्रभृतितानि । विपरीतंपगेइत्यर्थः । दक्षिणोपरिशंखचक्रंचाधःपद्मंस्यते । वामोर्ध्वेपंकजंयस्यगदाचाधोव्यवस्थिता । मधुसूदननामायंभेदःसंकर्षणस्यचेतिहयशीर्षपंचरात्रात् । मधुसूदनेदक्षिणोर्ध्वप्रभृतिशंखपद्मगदाचक्राणि । माधवेवामोर्ध्वप्रभृतितानि । नारायणेदक्षिणाधःप्रभृतितानि । शात्चपे चक्रपद्मेइत्यर्थः शिष्टेगदा

ऽर्थात् । वासुदेवेदक्षिणोर्ध्वप्रभृतिशंखचक्रपद्मगदाः । अधोक्षजेवामोर्ध्वप्रभृतितानि । नृसिंहेवामाधःप्रभृतितानि । हरौदक्षिणाधःप्रभृतितानि । विपरीतंपचेइत्यर्थः । संकर्षणोगदाशंखपद्मचक्रधरःस्मृतः । एताश्चमूर्तयोज्ञेयादक्षिणाधःकरक्रमादिति **सिद्धार्थसंहितोक्तेः** । संकर्षणेदक्षिणोर्ध्वप्रभृतिशंखपद्मचक्रगदाः । अनिरुद्धेवामोर्ध्वप्रभृतिताः । श्रीधरेवामाधःप्रभृतिताः । पद्मनाभेदक्षिणाधःप्रभृतिताः । अत्रमूलंहेमाद्रि **काशीखंडशिवार्चनचंद्रिकादौज्ञेयम् । वाराहे**—शक्तित्रयंमत्स्यकूर्मवराहदशकंनच । अर्च्यमितिपूर्वेणसंबंधः ।

पंचायतनपूजासारेपाद्मे—स्वमंत्रेणबुधैःपूज्यःस्वकैर्ध्यानैःस्वमुद्रया । शालग्रामेनायंनियमइत्युक्तंस्कांदे—पूज्यानिजनिजैरेवमंत्रैः स्वस्वेष्टमूर्तयः । शालग्रामात्मकेरूपेनियमोनैवविद्यते । **भारते**—यामेवदेवतामिच्छेदाराधयितुमव्ययाम् । सर्वोपायैःप्रयत्नेनसंपूजयतुसद्विजान् । **लैंगे**—शालग्रामशिलाग्रेतुयच्छ्राद्धंक्रियतेनृभिः । तस्यब्रह्मांतिकंस्थानंतृप्ताश्चपितरोदिवि । **पाद्मे**—स्कंधेकृत्वातुयोध्वानंवहतेशिलनायकम् । तेनव्यूढंभवेत्सर्वंत्रैलोक्यंसचराचरम् । कृतार्चनाहरेर्येनपित्रर्थंमुनिसत्तम । गयायांपिंडदानंतुकृतंतेनपदेपदे । यमुद्दिश्यहरेःपूजाक्रियतेमुनिसत्तम । उद्धृतोनरकाद्दुःखात्सयातिपरमंपदम् । पित्रर्थमपिक्रियमाणाविष्णुपूजासव्येनैव एकादशाहश्राद्धादिदानवत् । **स्कांदे**—शालग्रामनमस्कारःशाठ्येनापीहयैःकृतः । मद्भक्ताअपितेनैवमानमस्यंतुमानवाः । **हलायुधेपाद्मे**—अपिपापसमाचाराःकर्मण्यनधिकारिणः । शालग्रामार्चकावैश्यनैवयांतियमालयम् । शालग्रामोद्भवंद्दृष्ट्वान्यस्तंद्दिजनाधिप । नैवेक्षितुंशक्नुवंतिसर्वेतेयमकिंकराः । **हयग्रीवपंचरात्रे**—चांडालमद्यपस्पर्शदूषितावह्निनाथवा । अपुण्यजनसंस्पृष्टाविप्रक्षतजदूषिता । पुनःसंस्कार्यतिशेषः । पुनःसंस्कारःशालग्रामस्यमहापूजेतिशिष्टाः । **पदार्थादर्शेत्राह्मे**—खंडितेस्फुटितेदग्धेभ्रष्टेमानविवर्जिते । यागहीनेपशुस्पृष्टेपतितेदुष्टभूमिषु । अन्यमंत्रार्चितेचैवपतितस्पर्शदूषिते । दशस्वेतेपुनोचक्रुःसंनिधानंदिवौकसः । यागः पूजा । पशुर्गर्दभादिः । अर्चाभंगादावुपवासःकार्यः । नराज्ञोवैष्णवेश्नीयात्सुरार्चांविद्यतेयतेविधि

१ तेपुनोचक्रःसनिधानंदिशेत्कचित् इतिपाठ ।

ष्णुधर्मोक्तेः । **सिद्धांतशेखरे**—चौरचांडालपतितोदक्यादेःस्पर्शनेसति । शवाद्युपहतेचैवप्रतिष्ठांपुनराचरेत् । **पंचरात्रे**—अंगादंगादिसंपातेप्रतिष्ठांपुनराचरेत् । **पूजाभावेविशेषमाह्वौधायनः**—पूर्वप्रतिष्ठितस्याबुद्धिपूर्वकमेकरात्रंद्विरात्रमेकमासंवार्चनादिविच्छेदेशूद्रस्पर्शजलाद्युपस्पर्शेजलेऽधिवास्य श्वोभूतेद्वौकलशावधिवास्यैकंपंचगव्येनपूरयेदपरंशुद्धोदकेनाथस्नपयेदष्टशतमष्टाविंशतिंवाकलशैः पुरुषसूक्तेनमूलमंत्रेणच ततःपुण्याणिदत्वायथासंभवंसंपूज्यगुडौदनंनिवेदयेद्बुद्धिपूर्वमर्चनादिविच्छेदेप्येवमिति । शालग्रामस्यावरव्यावृत्त्यर्थंपूर्वप्रतिष्ठितस्येत्युक्तम् । **बुद्धिपूर्वंविच्छेदेपुनःप्रतिष्ठा**—द्रव्यवत्कृतशौचानांदेवतानांभूयःप्रतिष्ठापनेनशुद्धिरितिशुद्धिविवेकेविष्णूक्तेरितिकेचित् । तन्न । तत्रापिवौधायनोक्तविधिसत्वात् । **विष्णूक्तिस्तुमद्यादिस्पर्शपरा** मासद्वयाधिकविच्छेदपरावा । अर्चादिपदंलिंगस्याप्युपलक्षणम् ॥

चंद्रिकायांनारदः—शृण्वंतुमुनयःसम्यक्पुरुषोत्तमपूजनम् । स्नात्वायथोक्तविधिनाप्राङ्मुखःशुद्धमानसः । स्वशाखोक्तक्रियांकृत्वाहुत्वाचैवाग्निहोत्रकम् । कुर्यादाराधनंविष्णोर्देवदेवस्यचक्रिणः । **वौधायनः**—अथातोमहापुरुषस्यपरिचर्याविधिंव्याख्यास्यामः । स्नात्वाशुचिःशुचौदेशेगोमयेनोपलिप्य प्रतिकृतिंकृत्वाक्षतपुष्पैर्यथालाभमर्चयेत् सहपुण्योदकेनमहापुरुषमावाहयेदोंभूः पुरुषमावाहयामि । ॐ भुवःपुरुषमावाहयामि । ॐ स्वःपुरुषमावाहयामि । ॐ भूर्भुवःस्वःपुरुषमावाहयामीत्यावाह्य । आयातुभगवान्महापुरुषइत्यर्घस्वागतेनाभिनंदयति स्वागतमनुचागतंभगवतेमहापुरुषायैतदासनमुपकल्पतमत्रास्तांभगवान्महापुरुषइत्यत्र कूर्चंददातिभगवतेयं कूर्चोदर्भमयस्त्रिवृद्धरितस्तंजुषस्वेत्यत्रस्थानासनानिकल्पयति अग्रतःशंखायकल्पयामि चक्रायदक्षिणतो गदायैक० वनमालायैक० पश्चिमतः श्रीवत्सायगरुत्मते । उत्तरतः श्रियैसरस्वत्यै पुष्ट्यैतुष्ट्यै । अथसावित्र्यापात्रमभिमंत्र्यप्रक्षाल्यत्रिरपःपवित्रमानीयसहपवित्रेणादित्यं दर्शयेदोमित्यादितस्तासांत्रीणिपदाविचक्रमेइतिपाद्यंप्रणवेनार्घ्यंमहाव्याहृतिभिर्निर्माल्यंव्यपोह्योत्तरतोविष्वक्सेनायनमइत्यथैनंस्नपयत्यापोहिष्ठे

तितिसृभिर्व्रह्मजज्ञानंवामदेव्यर्चायज्ञःपवित्रेणेत्येताभिःपङ्क्तिःस्नपयित्वाद्भिस्तर्पयति । केशवंतर्पयामि नारायणं माधवं गोविंदं विष्णुं मधुसूदनं त्रिविक्रमं वामनं श्रीधरं हृषीकेशं पद्मनाभं दामोदरं । इत्यथैतानिवस्त्रयज्ञोपवीताचमनीयान्युदकेनव्याहृतिभिर्दत्वाव्याहृतिभिःप्रदक्षिणमुदकंपरिषिच्येदंविष्णुरितिगंधंतद्विष्णोरितिपुष्पंइरावतीत्यक्षताःसाविञ्याधूपमुद्दीप्यस्वेतिदीपंदेवस्यत्वाहस्ताभ्यांभगवते महापुरुषायजुष्टंचरुंनिवेदयामीतिनैवेद्यं । अथकेशवादिद्वादशनामभिर्नमोन्तैःपुष्पाणिदत्त्वा शंखायनमश्चक्रायनमोवनमालायैनमःश्रीवत्सायनमोगरुत्मतेनमःश्रियैनमःसरस्वत्यैनमः पुष्ट्यैनमस्तुष्ट्यैनमोऽथशिष्टैर्गंधमाल्यैर्ब्राह्मणान्स्वमात्मानंचालंकृत्यैनमृग्यजुःसामाथर्वभिःस्तुतिभिःस्तुवंति । ध्रुवसूक्तं पुरुषसूक्तंचान्यांश्चवैष्णवमंत्रानित्येके ॐ भूर्भुवःसुवर्महरोंभगवतेमहापुरुषायचरुमुद्वासयामीतिचरूद्वासनकाले ॐ भूःपुरुषमुद्वासयामि ॐ भुवःपुरुषमुद्वासयामि ॐ सुवःपुरुषमुद्वासयामि ॐ भूर्भुवःसुवःपुरुषमुद्वासयामीत्युद्वास्य । प्रयातुभगवान्महापुरुषोनेनहविपातृप्तोहरिःपुनरागमनायपुनःसंदर्शनायचेतिप्रतिमास्थानेष्वन्नावावाहनविसर्जनेयान्नावावाहनविसर्जनवर्जंसमानं महत्स्वस्त्ययानमित्याह भगवान्यौधायनः । **ध्यानमुक्तंचंद्रिकायांनारसिंहे**—ध्येयःसदासवितृमंडलमध्यवर्तीनारायणःसरसिजासनसंनिविष्टः । केयूरवान्मकरकुंडलवान्किरीटीहारीहिरण्मयवपुर्धृतशंखचक्रः । **शिवार्चनचंद्रिकायाम्**—ह्रीबेरंचंदनंकुष्टमगरुंकुंकुमंमुरम् । सेव्यकंचजटामांसीवैष्णवंतदुदीरितम् । ह्रीवेरंवालकम् । मुरंमोरहरीतिप्रसिद्धम् । **अथपुष्पाणि—चंद्रिकामदनपारिजातयोर्नारसिंहे**—दशदत्वासुवर्णानियत्फलंलभतेनरः । तत्फलंलभतेविष्णोर्द्रोणपुष्पप्रदानतः । द्रोणपुष्पसहस्रेभ्यःखादिरंपुष्पमुत्तमम् । खादिरात्पुष्पसाहस्राच्छमीपुष्पंविशिष्यते । शमीपुष्पसहस्राद्विबिल्वपत्रंविशिष्यते । बिल्वपत्रसहस्राद्विबकुलंपुष्पमुत्तमम् । बकुलात्पुष्पसाहस्रान्नंद्यावर्तंविशिष्यते । नंद्यावर्तसहस्रेभ्यःकरवीरविशिष्यते । करवीरसहस्रेभ्यःपालाशंपुष्पमुत्तमम् । पालाशपुष्पसाहस्रात्कुशपुष्पंविशिष्यते । कुशपुष्पसहस्राद्विवनमाला

विशिष्यते । वनमालासहस्राद्धिचंपकापुष्पमुत्तमम् । चंपकापुष्पसाहस्रादशोकंपुष्पमुत्तमम् । अशोकपुष्पसाहस्रात्सेवंतीपुष्पमुत्तमम् । सेवंतीपुष्पसाहस्राद्गोजुकापुष्पमुत्तमम् । गोजुकापुष्पसाहस्रान्मालतीपुष्पमुत्तमम् । मालतीपुष्पसाहस्रात्संध्यारक्तंतुपुष्पकम् । संध्यारक्त सहस्राद्धिकुंदपुष्पंविशिष्यते । कुंदपुष्पसहस्राद्धिशतपत्रंविशिष्यते । शतपुष्पसहस्राद्धिमल्लिकापुष्पमुत्तमम् । मल्लिकापुष्पसाहस्राज्जातीपुष्पं विशिष्यते । जातीपुष्पसहस्रेणयोमालांसंप्रयच्छति । विष्णवेविधिवद्भक्त्यातस्यपुण्यफलंशृणु । कल्पकोटिसहस्राणिकल्पकोटिशतानिच । वसेद्विष्णुपुरेश्रीमान्विष्णुतुल्यपराक्रमः । इति ।

देवपूजा-

अथत्रिंशदपराधाः । वाराहे—भुक्त्वातुपरकीयान्नंतत्परस्तन्निवर्तकः । प्रथमश्चापराधोयंधर्मविघ्नायजायते १ अभुक्त्वादंतकाष्ठंच यस्तुमामुपसर्पति । अपराधोद्वितीयोयंधर्मविघ्नायजायते २ कृत्वामैथुनसंयोगंयस्तुमांस्पृशतेनरः । तृतीयमपराधंतंकल्पयामिवसुंधरे ३ स्पृष्ट्वारजस्वलांनारीमस्नात्वायःप्रपद्यते । चतुर्थमपराधंतंकल्पयामिवसुंधरे ४ स्पृष्ट्वातुमृतकंचैवअसत्कारकृतंतुवै । पंचमंचापराधंतंनक्षमामिवसुंधरे ५ स्पृष्ट्वातुमृतकंयश्चनाचम्यस्पृशतेहिमाम् । षष्ठंतंचापराधंवैकल्पयामिवसुंधरे ६ ममार्चनस्यकालेतुपुरीषंयस्यगच्छति । सप्तमंचापराधंतंकल्पया मिवसुंधरे ७ त्यक्त्वातुममशास्त्राणिवाक्यमन्यत्प्रभाषते । अष्टमंचापराधंवैकल्पयामिवसुंधरे ८ ममैवार्चनकालेतुयस्त्वसत्यंप्रभाषते । नवमं चापराधंतंकल्पयामिवसुंधरे ९ अविधानेनमांस्पृश्यमामेवप्रतिपद्यते । दशमश्चापराधोयंममचाप्रियकारकः १० सक्रोधोमेस्पृशेद्गात्रंचित्तंकृत्वा चलाचलम् । एकादशंचापराधंनसहिष्येवसुंधरे ११ अकर्मण्यानिपुण्याणियस्तुमामुपकल्पयेत् । द्वादशंचापराधंतंकल्पयामिवसुंधरे १२ यस्तुरक्तेनवस्त्रेणकौसुंभेनोपगच्छति । त्रयोदशंचापराधंकल्पयामिवसुंधरे १३ अंधकारेतुमांदेवियःस्पृशेतकदाचन । चतुर्दशंचापराधंकल्पयामि

॥ ९० ॥

१ विष्णुपदे इति पाठः ।

वसुंधरे १४ यस्तुकृष्णेनवस्त्रेणममकर्माणिकारयेत् । पंचदशापराधंतंकल्पयामिवसुंधरे १५ अधौतेनचवस्त्रेणयस्तुमामुपसर्पति । षोडशंत्वपराधं
तंकल्पयामिवसुंधरे १६ स्वयमन्नंचयोदद्यादज्ञानायचमाधवि । सप्तदशापराधंतंकल्पयामिवसुंधरे१७ यस्तुमत्स्यांश्चमांसानिभक्षयित्वोपसर्पति ।
अष्टादशापराधंतंकल्पयामिवसुंधरे १८ जालपादंभक्षयित्वायस्तुमांप्रतिपद्यते । ऊनविंशापराधंतंकल्पयामिवसुंधरे १९ दीपंस्पृष्ट्वातुयोदेविममकर्मा
णिकारयेत् । विंशकंचापराधंतंकल्पयामिवसुंधरे २० श्मशानंयस्तुवैगत्वामामेवप्रतिपद्यते । एकविंशापराधंतंकल्पयामिवसुंधरे २१ पिण्याकं
भक्षयित्वातुयोमामेवाभिगच्छति । द्वाविंशंचापराधंतंकल्पयामिवसुधरे २२ यस्तुवाराहमांसानिभक्षयित्वोपसर्पति । अपराधंत्रयोविंशंकल्पया
मिवसुंधरे २३ सुरांपीत्वातुयोमर्त्यःकदाचिदुपसर्पति । अपराधंचतुर्विंशंकल्पयामिवसुंधरे २४ भुक्त्वाकुसुंभशाकंचयस्तुमामुपसर्पति ।
अपराधंपंचविंशंकल्पयामिवसुंधरे २५ परप्रावरणेनैवयस्तुमामुपसर्पति । षड्विंशमपराधंतंकल्पयामिवसुंधरे २६ नदेवान्नपितॄनिष्ट्वानवान्नंयस्तुभक्ष
येत् । सप्तविंशचापराधंकल्पयामिवसुंधरे २७ उपानहौचप्रपदेतथार्चायांचगच्छति । अपराधमष्टाविंशंकल्पयामिवसुंधरे २८ शरीरंमंडयित्वा
तुयोमामाप्नोतिमाधवि । ऊनत्रिंशापराधंतंत्वंविजानीहिमेदिनि २९ अजीर्णेनसमाविष्टोयस्तुमामुपसर्पति । त्रिंशकंचापराधंतंकल्पयामिवसुंधरे ३०
गंधपुष्पाण्यदत्वातुयस्तुधूपंप्रयच्छति । एकत्रिंशंचापराधंकल्पयामिवसुंधरे ३१ विनातूर्यादिशब्देनद्वारस्योद्घाटनंमम । महापराधंजानीयाद्वात्रिं
शंतंममप्रिये ३२ ॥ **कृष्णभट्टीये प्रकारान्तरेणद्वात्रिंशदपराधाः**–तिर्यक्पुंड्रधरोभूत्वाह्यकृत्वादेवतार्चनम् । याचितैःपत्रपुष्पाद्यैर्यः
करोतिममार्चनम् । अप्रक्षालितपादोयःप्रविशेन्मममंदिरम् । ममदृष्टेरभिमुखंतांवूलंचर्वयेच्चयः । ममार्चामासुरेकालेयःकरोतिविमूढधीः ।
अवैष्णवस्यपक्वान्नंयोमह्यंविनिवेदयेत् । अवैष्णवेपुपश्यत्सुममपूजांकरोतियः । दिनांतरितपक्वान्नंयन्मह्यंविनिवेदयेत् । अमौनीघर्मलिप्तांगो
मत्पूजांविदधातियः । वातमूत्रनिरोधेनमत्पूजांविदधातियः । कृत्वावातमनाचम्यतथाप्रावृत्यकंबलम् । पीठासनोपविष्टःसन्पूजयेद्वानिरासनः ।

मृन्मयेधूपदहनंदीपंयःकुरुतेर्चने । मत्पूजकोनकुरुतेतंतुपूजांचदामनीम् । मत्पूजकोशिवद्वेषीशिवभक्तश्चमांद्विषेत्। भूताष्टम्योर्नकुरुतेनक्तंनहरि वासरम् । अपूजयित्वाविघ्नेशमसंभाव्यकपालिनम् । कुर्द्धोयत्कर्मकुरुतेत्रिकालार्चनविघ्नकृत् । वामहस्तेचमांकृत्वास्रापयेद्यदिमूढधीः । इति प्रकारांतरेणद्वात्रिंशदपराधाउक्ताः । परवस्त्रं परपरीधानं । कुसुंभभुजिः कुरवकपुष्पभक्तिः । **एषुप्रत्येकंप्रायश्चितंतत्रैव**— संवत्सरस्यमध्ये चतीर्थेसूकरकेमम । कृतोपवासःस्नानेनगंगायांशुद्धिमाप्नुयात् । मथुरायांतथाचैवसापराधःशुचिर्भवेत् । **स्कांदेअवंतीखंडे**—जागरेद्वाद शीरात्रौपठेद्यस्तुलसीस्तवम् । द्वात्रिंशदपराधांश्चक्षमतेतस्यकेशवः । तुलसीस्तवोव्रतरत्नेज्ञेयः ।

अथचिह्नविशेषेणशालग्राममूर्तयः। पाद्मे—चक्राकारेणरेखासायत्ररेखामयीभवेत् । ससुदर्शनइत्येवंख्यातःपूजाफलप्रदः । उपर्य धश्चचक्रेद्वेनातिदीर्घमुखेबिलम् । मध्येचरेखालंवैकासचदामोदरःस्मृतः । यस्यदीर्घमुखंपूर्वंकथितैर्लक्षणैर्युतम् । रेखाश्चकेशराकारानारसिंहोमतो हिसः । वाराहाकृतिराभुग्नश्चक्ररेखास्खलंकृतः । वाराहइतिसंप्रोक्तोवामनोवदरोपमः । गरुडःसतुविज्ञेयश्चतुश्चक्रैर्जनार्दनः । हयग्रीवोयथाद्वारारे खाद्यायाशिलाभवेत् । तयासौम्याद्धयग्रीवःपूजितोज्ञानदोभवेत् । चतुश्चक्रःसूक्ष्मद्वारोवनमालांकितोदरः । लक्ष्मीनारायणःश्रीमान्भुक्तिमुक्तिफल प्रदः । कूर्माकाराचचक्रांकाशिलाकूर्मःप्रकीर्तितः । एवंमत्स्यादयोज्ञेयाःशालग्रामामनीषिभिः । अनंतचक्रैर्बहुभिश्चिह्नैरप्युपलक्षितः । अनंतःसतुवि ज्ञेयःसर्वपूजाफलप्रदः । चक्रंचकेवलंयत्रपद्मेनसहसंयुतम् । केवलावनमालावाहरिर्लक्ष्म्यासहस्थितः । विदिक्षुदिक्षुसर्वासुयस्योर्ध्वंदृश्यतेमुखम् । पुरुषोत्तमःसविज्ञेयोभुक्तिमुक्तिफलप्रदः । दृश्यतेशिखरेलिंगंशालग्रामसमुद्भवम् । सचयोगेश्वरोनामब्रह्महत्यांव्यपोहति । आरक्तंपद्मनाभाख्यंपद्म च्छत्रसमन्वितम् । तुलस्यापूजयेन्नित्यंदरिद्रस्त्वीश्वरोभवेत् । वामपार्श्वेतथाचक्रेरेखाचैवतुदक्षिणे । दक्षिणावर्तचक्राचवनमालाविभूषिता । याशिलाकृष्णसंज्ञासाधनधान्यसुखप्रदा । **नारदः**—द्वारदेशेसमेचक्रेदृश्येतेनांतरीयके । वासुदेवःसविज्ञेयःशुक्लाभश्चातिशोभनः । नानाव.

र्णोऽनंतःस्याच्चागभोगेनचिह्नितः । अनेकमूर्तिसंयुक्तःसर्वकामफलप्रदः । प्रद्युम्नःसूक्ष्मचक्रस्तुपीतदीप्तिस्तथैवच । शिखरंछत्रबहुलंदीर्घाकारं तुयद्भवेत् । अनिरुद्धस्तुनीलाभोवर्तुलश्चातिशोभनः । रेखात्रयंतुतद्वारेपृष्ठंपद्मेनलांछितम् । शिवनाभिरितिख्यातंयत्रदेशेव्यवस्थितम् । तच्छैव विष्णुवत्तीर्थशालग्रामसमुद्भवम् । नाभौलिंगेनयुक्तावागर्तेनचतथापुनः । शिवनाभिरितिख्याताभुक्तिमुक्तिप्रदायिका । यवमात्रंतुगर्तंस्याद्यवा र्धलिंगमुच्यते । वासुदेवमयंक्षेत्रंलिंगंशिवमयंशुभम् । तस्मात्तद्धारितेक्षेत्रेपूजयेच्छंकराच्युतौ । पांचजन्यांकितायंतुपद्मेनगदयायुता । तत्र श्रीःप्रत्यहंतिष्ठेत्सदासंपदमादिशेत् । शालग्राममयीमुद्रासंस्थितायत्रकुत्रचित् । वाराणस्यायवाधिक्यंसमंताद्योजनत्रयम् । एकमूर्तिर्नैवपूज्या गृहिणावृद्धिमिच्छता । अनेकमूर्तिसंपन्नासर्वकामफलप्रदा । अन्येपिभेदाग्रंथगौरवान्नोक्ताः । **गोविंदराजीयेस्कांदे**—स्निग्धासिद्धिकरी मंत्रेकृष्णाकीर्तिंददातिच । पांडुरापापदहनीपीतापुत्रप्रदायिनी । नीलाचदिशतेलक्ष्मींरक्तारोगप्रदायिनी । रूक्षाचोद्वेगदानित्यंवक्रादारिद्र्यदा यिका । दुःखदासातुविज्ञेयानारसिंहीतथैवच । बहुचक्रा मुखंविनाबहुचक्रा । अन्यथात्रिविक्रमानंतपूजाविरुध्येत । यथायथाशिलासूक्ष्मात थातथामहत्फलम् । तथाचामलकीतुल्यासूक्ष्माचातीवयाभवेत् । तस्यामेवशिलायांतुश्रियासहवसेद्धरिः । कपिलोनारसिंहश्चपृथुचक्रःसुशोभनः । ग्रहचर्येणपूज्यस्तुअन्यथाविघ्नदोभवेत् । इदंसकामपरम् । निष्कामेनशालिग्रामशिलामात्रंपूज्यम् । येकेचिच्चैवपाषाणाविष्णुचक्रेणमुद्रिताः । तेषांस्पर्शनमात्रेणमुच्यतेसर्वकिल्बिषैरितिवाराहात् । खंडितंत्रुटितंभग्नंपार्श्वेभिन्नंसुभेदितम् । शालग्रामसमुद्भूतंशैलंदोषावहंनहीतिपाद्मोक्तेः । शालग्रामशिलामग्रापूजनीयासचक्रकेतिवाराहाच्च । यत्तुलग्नंभग्नंनपूजयेदितितत्रलग्नंलग्नचक्रम् । भग्नंभग्नचक्रम् । चक्रेतरप्रदेशभग्नस्यापिपू ज्यत्वम् । शिलारूपीरमाप्रोक्ताचक्ररूपीजनार्दनइतिविष्णुपुराणे चक्ररूपेणहरिसान्निध्योक्तेः ।

पूज्यशालग्रामसंख्योक्ता हेमाद्रौ । साकाम्येतिकश्चित् । ततःकामनाश्रवणात् । **मानसोल्लासेपाद्मवाराहयोः**—यःपुनः

पूजयेद्भक्तयाशालग्रामशिलाशतम् । उपित्वासहरेर्लोकेचक्रवर्तीहिजायते । शिलाद्वादशभोवैश्यशालग्रामसमुद्भवाः । विधिवत्पूजितायेनतस्य पुण्यंददामिते । कोटिद्वादशलिंगैस्तुपूजितैःस्वर्णपंकजैः । यत्स्याद्वादशकल्पेषुदिनेनैकेनतद्भवेत् । स्कांदे—प्रत्यहंद्वादशशिलाःशालग्रामस्ययो जयेत् । द्वारावत्याःशिलायुक्ताःसवैकुंठेमहीयते । लिंगे—ततोवह्नीरर्चयतिशालग्रामशिलास्तुयः । नहिब्रह्मादयोदेवाःसंख्यांजानंति तत्फले । स्मृत्यंतरे—शालग्रामाःसमाःपूज्याविषमानकदाचन । समेपुनद्वयंपूज्यंविषमेष्वेकएवहि । विषमेष्वेकएवेज्यःसमेद्वेपद्विवर्जयेत् । प्रयोगपारिजातेस्कांदे—एवंलक्षणसंपन्नामध्यमायाचिताधमा । उत्तमासातुविज्ञेयापारंपर्यक्रमागता । फलपुष्पैश्चतत्स्थानंशालग्रामोद्भवंहरिम् । ऐहिकामुष्मिकार्थायममदेहिगुरूत्तम । इत्युक्त्वापादयोःपुष्पंदत्वाचप्रणिपत्यच । गुरुःपुष्पफलैःसार्धंगृहीत्वापूजितंहरिम् । दत्तापुण्यांजलिंमूर्ध्नाक्षांतिरस्तुशिवंत्विति । स्कांदे—शालग्रामशिलायास्तुमूल्यंयःकुरुतेनरः । विक्रेताचानुमंताचयःपरीक्षानुमोदकः । सर्वेते नरकंयांतियावदाभूतसंप्लवम् । त्याज्याःशिलाउक्तास्तत्रैव—तिर्यक्चक्रापरित्याज्यावद्धचक्रातथैवच । क्रूरापिसंपरित्याज्यास्फोटारूक्षातथैवच । कुरूपानिर्गुणास्यानकरालविकरालिका । कपिलावेपमानाचवृत्तास्याकर्बुरातथा । आसनेचलनाभग्नामहास्थूलाविगर्हिता । आसनेमुष्टिमात्रातुचक्रेणैकेनसंयुता । दर्दुरावहुचक्राचलग्नचक्राप्यधोमुखी । छिद्रादग्धासुरक्ताचवृहच्चक्रातिभीषणा । वहुरेखासमायुक्ताभग्नचक्रातथैवच । दीर्घनक्रापरित्याज्यापृष्ठचक्राविशेषतः । मस्तकास्याद्यचक्राचवर्ज्याह्येताःसदाबुधैः । क्रूरदंष्ट्रासमायुक्तास्फोटाबुद्बुदसंयुता । अनिरान्कुष्कृतांयातियस्यालिप्तंतुचंदनम् ॥ इति ॥

अथद्वारवतीचक्रमहिमा । प्रह्लादसंहितायांहलायुधेच—शालग्रामशिलायत्रयत्रद्वारवतीशिला । उभयोःसंगमोयत्रमुक्तिस्तत्रसंशयः । शिलेतिविशेषोक्तेर्नास्तिचक्राणांपूज्यता । प्रयोगपारिजातेस्कांदे—संवत्सरंतुयःकुर्यात्पूजास्पर्शनदर्शने । विनासांख्येनयो

गेनमुच्यतेनात्रसंशयः । चक्रसंख्यायास्तन्नामानिप्रह्लादसंहितायाम्—एकःसुदर्शनोद्वाभ्यांलक्ष्मीनारायणःपरः । त्रिभिस्त्रिविक्रमोना मचतुर्भिश्चजनार्दनः । पंचभिर्वासुदेवःस्यात्षड्भिःप्रद्युम्नउच्यते । सप्तभिर्बलदेवश्चअष्टाभिःपुरुषोत्तमः । नवभिश्चनवव्यूहोदशभिर्दशमूर्तिकः । एकादशोऽनिरुद्धोवैद्वादशद्वादशात्मकः । अतऊर्ध्वंपरमात्मासुखंयच्छतिपूजितः । अग्निपुराणे—चक्रैर्द्वादशभिर्युक्तोऽपीकेशउदाहृतः । अतऊर्ध्वमनंतःस्यात्पूजितोनंतकामदः । श्वेताःस्निग्धाःशिलाःपूज्याअच्छिद्राश्चसुसंयताः । सुखदाःसमचक्राश्चविपमादुःखदाःस्मृताः । सुदर्शनाद्यास्तुशिलाःपूजिताःसर्वकामदाः । एकः एकचक्रः । गालवः—वर्तुलाचतुरस्राचनराणांचसुखप्रदा । प्रह्लादसंहितायाम्—कृष्णामृत्युप्रदानित्यंकपिलाचभयावहा । रोगार्तिंकर्बुरादद्यात्पीताविंत्तविनाशिनी । धूम्राभावित्तनाशायभग्नाभार्याविनाशिका । सच्छिद्राचत्रिकोणाचतथाविपमचक्रिका । अर्धचंद्राकृतिर्यातुपूज्यास्तानभवंतिहि । एकचक्रविषयेविशेषउक्तस्तत्रैव—एकचक्रेविशेषोस्तितंविशेषंतुवच्म्यहम् । शुक्लंनीलंतथारक्तंद्विवर्णंचत्रिवर्णकम् । यद्येकचक्रेस्युरेवंतेषांसंज्ञानिबोधमे । पुंडरीकःप्रलंबश्चोरामोवैकुंठएवच । विष्वक्सेनइतिब्रह्मन् तेषांपूजाफलंशृणु । मोक्षंमृत्युंविवादंचदारिद्र्यमक्षतंतथा । पाद्मद्वारार्चयोः—द्वेचक्रेद्वारकायास्तुनार्च्यैसूर्यद्वयंतथा । विष्णुधर्मे—चक्रांकमिथुनंपूज्यंनैकंचक्रांकमर्चयेत् । इति ।

तज्जलादिमहिमास्कांदे—शालग्रामोद्भवोदेवोयत्रद्वारवतीभवः । उभयोःस्नानतोयेनब्रह्महत्यानिवर्तते । हेमाद्रौस्कांदे—कुंकुमंचंदनंपत्रंनैवेद्यंचफलंजलम् । शालग्रामशिलालग्नंतीर्थकोटिशताधिकम् । पाद्मे—सस्नातःसर्वतीर्थेषुसर्वयज्ञेषुदीक्षितः । शालग्रामशिलातोयैर्योभिषेकंसमाचरेत् । गौतमांबरीषसंवादे—हरेःस्नानीयशेषंतुजलंयस्योदरेस्थितम् । अंबरीषप्रणम्योच्चैःपादपांसुप्रगृह्यताम्; । जन्मप्रभृतिपापानांप्रायश्चित्तंयदीच्छसि । शालग्रामशिलावारिपापहारिनिषेव्यताम् । येतुद्वादश्यल्पत्वेतीर्थपानान्नानाद्भोजनस्थानीयंतन्मत्वोपवासदिनेश्राद्धादे

थप्रोक्तन्नेच्छंतितेप्रांताः । तस्यशरीरशुद्ध्यर्थत्वात् । **गारुडे**—जलंनयेपांतुलसीविमिश्रंपादोदकंचक्रशिलासमुद्भवम् । नित्यंत्रिसंध्यंप्लवतेहगा त्रंखगेंद्रतेधर्मवहिष्कृतानराः । **आह्निकप्रदीपे**—सूतकेमृतकेवापिआशौचंनैवविद्यते । येषांपादोदकंमूर्ध्निप्राशनंयेचकुर्वते । अंतकालेपियस्ये हृदीयतेपादयोर्जलम् । सोपितद्गतिमाप्नोतिसदाचारैर्वहिष्कृतः । **वाराहेविष्णुपूजाप्रकरणे** शूद्रंप्रकृत्य—चरणामृतपानेनसर्वपापक्षयोभवेत् । अत्रकेचिच्छालग्रामोदकमेवग्राह्यंनचक्रांकोदकमित्याहुः । तन्न । विष्णुपादोदकंयस्यमुखेशिरसिविग्रहे । इतिनृसिंहपुराणात् । शालग्रा मशिलातोयमस्थिचक्रशिलाजलम् । मिश्रितंतत्पिबेद्यस्तुदेहेशिरसिधारयेत् । तस्यचक्रांकितोदेहोभवत्येवनसंशयः।**तीर्थपानविधिर्गारुडे**— शालग्रामशिलातोयमपीत्वायस्तुमस्तके । प्रक्षेपणंप्रकुर्वीतब्रह्महत्यासमंस्मृतम् । शालग्रामशिलातीर्थपिबेत्तोयंकरेणतु । अज्ञानादैंदवंप्रोक्तंज्ञाना द्दण्डंसमाचरेत् । विष्णोःपादोदकंपीत्वाकोटिजन्माघनाशनम् । तदेवाष्टगुणंपापंभूमौबिंदुनिपातनात् । **भक्तिचंद्रोदये**—आयसेचतथाकां स्येकाष्ठेवालावुकेतथा । उद्धृत्यपादसलिलंकरेकृत्वामुखेक्षिपेत् । अदत्वातुपिबेत्तोयंरौरवेनरकेवसेत् । करेणतीर्थपानंतत्पानोत्तरंचजलपानंनकार्य मित्यर्थः । **विप्रपादोदकग्रहणमुक्तंकाशीखंडे**—निःस्पृहाःसोमपायेवैविप्रपादोदपाश्चये । तएतेमत्प्रियाभक्तास्त्यक्तीर्थप्रतिग्रहाः । श्रद्धावीजोविप्रपादांबुसिक्तइति । तत्रपूर्वंविप्रपादोदकंग्राह्यं ततःशालग्रामशिलोदकमितिशिष्टाः । **स्कांदे**—कृत्वापादोदकंशंखेवैष्णवानांम हात्मनाम् । यद्दातितिलैर्मिश्रंचांद्रायणफलंलभेत् । **ग्रहणमंत्रोहलायुधे**—अकालमृत्युहरणंसर्वव्याधिविनाशनम् । विष्णोःपादोदकं पीत्वाशिरसाधारयाम्यहम् । इतिश्रीमन्नारायणभट्टात्मजरामकृष्णभट्टसुतलक्ष्मणभट्टकृताचाररत्नेपूजाविधिः ।

॥ ९३ ॥

अथवैश्वदेवः । तत्राधिकारिणआह **चंद्रिकायांसंवर्तः**—ततःपंचमहायज्ञान्कुर्यादहरहर्द्विजः । ततोविवाहानंतरमितिमदनपा रिजातः । **शंखः**—पंचयज्ञविधानंचगृहीयज्ञंनहापयेत् । शूद्रस्याप्यधिकारइत्युक्तंप्राक् । नास्तिस्त्रीणांपृथग्यज्ञइतियाज्ञवल्क्योक्तेः,

नस्त्रीजुहुयान्नानुपेतइतिआपस्तंबोक्तेश्च स्त्रीणांनाधिकारः । यत्तुस्मृत्यर्थसारे—स्त्रीबालश्चकारयेदितितद्विधवापरम् । यदपिस्मृति सारे—स्नातकोब्रह्मचारीपृथक्वैश्वदेवंकुर्यादिति । तन्न । भैक्षेणवर्तयेन्नित्यमितिमनूक्तेर्ब्रह्मचारिणःपाकाभावात् पंचमहायज्ञाधिकारेगृहीतिपदश्रवणाच्च नत्वेनमग्निहवनबलिहरणयोर्नियुंज्यादिति । शौनकः—स्नातकेनापितत्कार्यंपृथक्पाकोभवेद्यदि । वानप्रस्थस्याप्यधिकारः । अत्र वैश्वदेवमकृत्वैवश्राद्धंकुर्यादनग्निकइतिविशिष्टोक्तेरनग्नेरप्यधिकारः । शौनकः—पुत्रोभ्रातायवापत्नीशिष्योदासोबलिंहरेत् । मदनरत्नेऽत्रिः—पुत्रोभ्रातायवाऋत्विक्शिष्यश्वशुरमातुलाः । पत्नीश्रोत्रिययाज्याश्चद्द्यास्तेबलिकर्मणि । प्रतिनिधयइत्यर्थः । अतोबलावेवप्रतिनिधिरिति मदनरत्ने । बलिपदंवैश्वदेवोपलक्षणमितिपृथ्वीचंद्रः । अन्यैस्तुकारयेदेतानातुरोपिस्पृशन्द्विजः । सूतकाद्यैस्त्वशुद्धात्मानकुर्यान्नचकारयेदिति होमोपीतिचंद्रिका । एतत्प्रवासादिपरमिति चंद्रिकामदनरत्नयोः । ऋत्विक्साहचर्यात्साग्निकपरमित्याचारादर्शः । नस्त्री जुहुयादित्यापस्तंबोक्तेः । पत्नीबलिंकुर्यान्नहोममितिपृथ्वीचंद्रः । सायंत्वन्नस्यसिद्धस्यपत्न्यमंत्रंबलिंहरेदितिमनुस्मृतेरुपलक्षणत्वात्पत्न्या अपिहोमइतिपृथ्वीचंद्रः । वस्तुतस्तुसदास्वयंकर्तृकत्वविकल्पः । स्वयंत्वेवैतान्यावद्गृहेवसन्बलिंहरेदपिवान्योब्राह्मणइति गोभिलोक्तेः । निरग्नेस्तुसदास्वकर्तृकत्वमेववैश्वदेवइत्याचारादर्शः । बौधायनः—प्रवासंगच्छतोयस्यगृहेकर्तानविद्यते । पंचानांमहतामेषांसयज्ञैःसहगच्छति । प्रवासेकुरुतेचैतद्यदन्नमुपपद्यते । नचेदुत्पद्यतेन्नंतुअद्भिरेतान्समापयेत् । मिताक्षरायांनारदः—भ्रातृणामविभक्तानामेकोधर्मः प्रवर्तते । विभागेसतिधर्मोपिभवेत्तेषांपृथक्पृथक् । चंद्रोदयेमरीचिः—बहवःस्युर्यदापुत्राःपितुरेकत्रवासिनः । सर्वेस्वानुमतंकृत्वाज्येष्ठेनैवतुयत्कृतम् । द्रव्येणचाविभक्तेनसर्वैरेवकृतंभवेत् । एकपाकेनवसतांपितृदेवद्विजार्चनम् । एकंभवेद्विभक्तानांतदेवस्याद्गृहेगृहे । आश्वलायनः—वसतामेकपाकेनविभक्तानामपिप्रभुः । एकस्तुचतुरोयज्ञान्कर्याद्वाग्यज्ञपूर्वकान् । वाग्यज्ञपूर्वकानित्यतद्गुणसंविज्ञानोबहुव्रीहिः ।

अतएवचतुरइत्युक्तम् । एकपाकेनवसतामविभक्तानामितिकश्चित्।तत्र अस्यविभक्ताविभक्तस्यसाधारणत्वात् विभक्तानामित्यस्यानुवादकत्वेनसंकोचकत्वायोगाच्च अविभक्तेपुसंसृष्टेष्वेकेनापिकृतंतुवेतिव्यासोक्तेश्च । अतःपाकैक्यएवाविभक्तानांयज्ञैक्यम् । नचैवंकदाचित्पाकभेदेभेदापत्तिः । वसतामित्यनेनबहुकालिकपाकैक्योक्तेः । यद्येकस्मिन्कुलेबहुधान्नंपच्येत गृहपतिमहानसादेवतद्बलिंतंत्रंकुर्वीतेतिगोभिलोक्तेश्च । यत्त्वविभक्तस्यभात्रधिकारेगोभिलः—यस्यत्वेषामग्रतोन्नंसिद्ध्येत्सतियुक्तमग्नौकृत्वाग्रंब्राह्मणायदत्वाभुंजीतेतितत्कनिष्ठभ्रातुःकदाचित्पाकभेदेज्ञेयमितिपृथ्वीचंद्रः । नियुक्तंभोज्यमन्नं । अग्नौकृत्वाहुत्वेत्यर्थः । इदमपिप्रथममन्नसिद्धौज्येष्ठेनकृतेवैश्वदेवेपश्चात्कनिष्ठस्यपाकभेदेतेनाहुत्वैवभोक्तव्यम् । अयंचान्नप्रक्षेपस्तूष्णीमित्युक्तं चंद्रोदये । देशांतरगमनेपाकभेदेत्वेकपाकेनवासाभावात्पृथग्वैश्वदेवः । अविभक्ताविभक्तावापृथक्पाकाद्विजातयः । कुर्युःपृथक्पृथग्यज्ञान्भोजनात्प्राग्दिनेदिने । इति प्रयोगपारिजातेआश्वलायनोक्तेः । भ्रातॄणामविभक्तानांपृक्पाकोभवेद्यदि । वैश्वदेवादिकंश्राद्धंकुर्युस्तेवैपृथक्पृथगितिवाक्यमेतद्विषयकमेव । नचेदंनिर्मूलम् । अन्येतु—वैश्वदेवासंभवेतुकुक्कुटांडप्रमाणकम् । अन्नमग्नौसंप्रदत्यकिल्विषात्तुप्रमुच्यते इतिजीवत्पितृकनिर्णयेकुक्कुटांडप्रमाणान्नप्रक्षेपइत्याहुः । पाकासाध्येतुजपोपवासादावविभक्तानांपृथगधिकारः । पृथगप्येकपाकानांब्रह्मयज्ञोद्विजन्मनां । अग्निहोत्रंसुरार्चाचसंध्यानित्यंपृथग्भवेदितिप्रयोगपारिजातेआश्वलायनोक्तेः । यत्तु—एकपाकेनवसतांपितृदेवद्विजार्चनमेकमिति तत्रदेवार्चनंवैश्वदेवइतिपृथ्वीचंद्रः । भ्रातॄणामविभक्तानांपृथक्पाकोभवेद्यदि । वैश्वदेवादिकंश्राद्धंकुर्युस्तेवैपृथक्पृथक् । इतिवाक्यमेतद्विषयमेव । नचेदंनिर्मूलं।एकपाकेनवसतामित्यादिवाक्यनिचयेनविभक्तानामपिपाकभेदेपंचयज्ञभेदानुक्तेरविभक्तानामपिपाकभेदेपंचयज्ञभेदोक्तेरन्वयव्यतिरेकाभ्यांपाकभेदस्यैवपंचयज्ञाभेदानुष्ठानेप्रयोजकत्वात्पूर्वोक्तवचननिचयविरोधाभावाच्च । यत्त्वेकेनापीतितत्पाकभेदेइतिवयंप्रतीमः । पूज्यदेवतामूर्तिभेदेइतिवयम् ।

अथ वैश्वदेवकालः । तत्रनिरग्निनानित्यश्राद्धोत्तरंसकार्यः । दद्यादहरहःश्राद्धं०इत्युक्त्वावैश्वदेवश्चगृह्येग्नौविधिपूर्वकमितिमनूक्तेः । पितृभ्योथमनुष्येभ्योदद्यादहरहर्द्विजइतिकात्यायनेनश्राद्धोत्तरंमनुष्ययज्ञोक्तेर्वैश्वदेवोत्तरंनित्यश्राद्धमितिपक्षद्वयंचंद्रोदयेउक्तं । आहिताग्निनाश्राद्धात्प्राक्कार्यइत्युक्तं **मदनरत्ने** । श्राद्धांतरेतुवृद्धगौतमः—पितृश्राद्धमकृत्वातुवैश्वदेवंकरोतियः । आसुरंतद्भवेच्छ्राद्धंपितृणांनोपतिष्ठते । एतदनग्निकपरम् । श्राद्धात्प्रागेवकुर्वीतवैश्वदेवंचसाग्निकः । एकादशाहिकंमुक्त्वातनद्येतद्विधीयतेइति । एकादशाहिकपदंप्रेतश्राद्धोपलक्षणमिति **मदनरत्नेबह्वृचपरिशिष्टे** । स्मार्ताग्निरनग्निश्चाग्नौकरणोत्तरं ब्राह्मणविसर्गोत्तरंवाकुर्यात् । आद्यउक्तोहेमाद्रौ **ब्रह्मांडे**–वैश्वदेवाहुतेरग्रावर्वाग्ब्राह्मणभोजनात् । जुहुयाद्भूतयज्ञादिश्राद्धंकृत्वातुतत्स्मृतम् । भूतयज्ञोवलिः । **श्राद्धंप्रकृम्यमनुः**—ततोग्नौहवलिंकुर्यादितिधर्मोव्यवस्थितः । वलिपदंवैश्वदेवोपलक्षणार्थमितितुकर्कः । काकादिवलिपरमितिदिवोदासः । विकिरमित्यन्ये । **द्वितीयउक्तोहेमाद्रौभविष्ये**—पितॄन्संतर्प्यविधिवद्बलिंदद्याद्विधानतः । वैश्वदेवंततःकुर्यात्पश्चाद्ब्राह्मणवाचनम् । वलिंयेअग्निदग्धाइतिदीयमानम् । **तृतीयोप्युक्तस्तत्रैव**—कृत्वाश्राद्धंमहाबाहोब्राह्मणांश्चविसृज्यच । वैश्वदेवादिकंकर्मततःकुर्यान्नराधिप । एतदनग्निपरम् । यदाश्राद्धंपितुःकश्चित्कर्तुमिच्छत्यनग्निमान् । वैश्वदेवंतदाकुर्यान्निवृत्तेश्राद्धकर्मणि । वृद्धावादौक्षयेचान्तेमध्येजुह्वतिपार्वणे । एकोद्दिष्टेतथाचांतेवैश्वदेवोविधीयतइतिहेमाद्रौस्मृतिसारात् । **मेधातिथिरप्येवं** । **वृत्तिकृता**विसर्जनांतंश्राद्धमुक्त्वा उच्छेषणंत्विति**मनुवाक्यो**दाहरणाद्बह्वृचानांश्राद्धांतेएववैश्वदेवः । मध्यपक्षस्तुयच्छाखायामुक्तस्तच्छाखीयपरइतिबोपदेवः । **स्मृतिसारे**—बलिकारादयोपिबहुस्मृत्युक्तत्वात्सर्वेषांविसर्जनांतेवैश्वदेवइतिमेनिरे । साग्नितैत्तिरीयाणांतुसर्वत्रादौवैश्वदेवः । पंचयज्ञाश्चादावंतेचेति**सुदर्शनभाष्येदिवोदासी**येस्मृतिः—याजुषाःसामगाःपूर्वमध्येश्राद्धंतुबह्वृचाः । अथर्वापाकशेषेणवैश्वदेवेविधिःस्मृतः । याजुषसामगौसाग्नी । इतरौनिरग्नी । सर्वशाखि

नामनग्निकानामपिप्रागेवेतिदिवोदासः। तत्रपिंडदानात्पूर्ववैश्वदेवपक्षेभिन्नः । पितृपाकात्समुद्धृत्यवैश्वदेवंकरोतियः। आसुरंतद्धवेच्छ्राद्धंपितृणांनोपतिष्ठतइतिपैठीनसिस्मृतेः । पितृसंबंधश्चापिंडदानात् । श्राद्धोत्तरंतुश्राद्धशेषेणपाकांतरेणच—श्राद्धंनिर्वर्त्यविधिवद्वैश्वदेवादिकंततः । कुर्याद्भिक्षांततोदद्याद्धंतकारादिकंतत इतिपैठीनसिस्मृतेः। द्वितीयस्ततःशब्दःश्राद्धशेषपरइतिहेमाद्रिः । नित्यश्राद्धंतुश्राद्धशेषेणपाकांतरेणवा । ततोनित्यक्रियांकुर्याद्भोजयेच्चततोऽतिथीन् । पृथक्पाकेननैत्यकमितिहेमाद्रौमार्कंडेयपुराणात् । एकादशाहश्राद्धेतुपृथक्पाकेनैव । एकोद्दिष्टेतुशेषेणब्राह्मणेभ्यश्चउत्सृजेदितिदेवलोक्तेः । एकोद्दिष्टंहैकोद्दिष्टमितिहेमाद्रिः । दार्शवैश्वदेवयोरेकःपाकइतिकर्कहरिहरौ । तन्न । पित्रर्थंनिर्वपेत्पाकंवैश्वदेवार्थमेवच । वैश्वदेवोनपित्रर्थंनदार्शवैश्वदेविकम् । दार्शशब्देनतद्विकृतयो युगादिमन्वादयइतिहेमाद्रिः ॥ ॥

अथपाकः। सस्वयंपत्न्यावाकार्यः। आश्रमधर्मविरोधेनतंडुलान्वाप्रातःपत्न्यैदद्यात्स्वयंवाधिश्रयेदिति **चंद्रिकायांशंखलिखितोक्तेः**। **आपस्तंबः**—आर्याप्रयतावैश्वदेवान्नकर्तारइतिछंदोगपरिशिष्टे । पत्नीभूतप्रवचनेयद्यसंनिहिताभवेत् । रजोरागादिनातत्रकथंकुर्वंतियाज्ञिकाः। महानसेनवाकुर्यात्सवर्णांतांप्रवाचयेत्। प्रणवाद्यपिवाकुर्यात्कात्यायनवचोयथा। **शातातपः**—नैवेद्यार्थंपृथग्भांडेस्नातापत्नीपचेत्तथा। वैश्वदेवार्थमन्यस्मिन्व्यंजनानिपृथक्पृथक् । एकस्मिन्वाप्यशक्तौचेत्पूर्वंविष्णुनिवेदनम् । वैश्वदेवंततःशिष्टाद्यासस्यवचनंयथा। विष्णुपदंयजनीयोपलक्षणमितिपृथ्वीचंद्रः। **माधवीयेपिनारसिंहकौर्मयोः**—पौरुषेणचसूक्तेनततोविष्णुंसमर्चयेत्। वैश्वदेवंततःकुर्याद्बलिकर्मतथैवच। **चंद्रिकामाधवभागवतटीकासुचैवं** । इदंवह्वृचभिन्नपरम्। तमेवंवैश्वदेवशेषेणकुर्यान्नास्यशेषेणवैश्वदेवंकुर्यादितिवह्वृचपरिशिष्टात्। केचित्सर्वंतुपूर्ववदितिमार्कंडेयपुराणात् देवयज्ञादीनामेकःपाकइतिहेमाद्रिः । **मदनरत्नेतुसर्वेषांपृथक्पाकः** । पितृयज्ञस्यवापृथक्पाक

इत्युक्तम् । **मनुः**—वैवाहिकेग्नौकुर्वीतगार्ह्यकर्मयथाविधि । पंचयज्ञविधानंचपक्तिंदैनंदिनीमपि । **काशीखंडेप्येवम् । मदनरत्नेपरिशिष्टे**—प्रवसेदाहिताग्निश्चेत्कदाचित्कालपर्ययात् । यस्मिन्नग्नौभवेत्पाकोवैश्वदेवस्तुतत्रवै । **शातातपः**—लौकिकेवैदिकेवापिहुतोत्सृष्टेज लेक्षितौ । वैश्वदेवस्तुकर्तव्यःपंचसूनापनुत्तये । वैदिकेस्मार्ते । अन्यसंभवेभूम्यादाविति**वृद्धपराशरः** । अभावादग्निहोत्रस्यतथाचावसथ स्यच । यस्मिन्नग्नौपचेदन्नंतत्रहोमोविधीयते । सर्वाधानिपरमिदमितिचंद्रिका । **आपस्तंबः**—औपासनेपचनेवापङ्क्तिराद्यैःप्रतिमंत्रंहस्तेनजु हुयादिति । पचन.सर्वाधानिपरइत्युक्तंतद्भाष्ये**अंगिराः**—शालाग्नौतुपचेदन्नंलौकिकेवापिनित्यशः । **माधवीयेदेवलः**—चांडालाग्ने रमेध्याग्नेःसूतिकाग्नेश्चकर्हिचित् । पतिताग्नेश्चिताग्नेश्चनशिष्टैर्ग्रहणंस्मृतम् । अत्रायंनिष्कर्षः—आपस्तंबस्यस्मार्तेलौकिकेवापिपाकेस्मार्तएवहोम स्तदभावेलौकिके । वह्वृचस्यतुपचनेलौकिकेवापाकः । स्मार्तेपचनेलौकिकेवाहोमइतिवृत्तिः । देशांतरस्थितौवाशाकलहोमः । छंदोगानामप्येवम् ।

स्मार्तेपाकपक्षेविशेषःकर्मप्रदीपे—प्रातर्होमंचनिर्वर्त्यसमुद्धृत्यहुताशनम् । शेषंमहानसेकृत्वातत्रपाकंसमाचारेत् । तमग्निंपुनराहृ त्यशालाग्नावेवनिक्षिपेत् । ततोस्मिन्वैश्वदेवादिकर्मकुर्यादतंद्रितः । शूद्रेणवैश्वदेवोलौकिकेनौकार्यइत्यपरार्केमेधातिथिः—**शूद्राचारशि रोमणौतु** त्रैवर्णिकानामन्यभावेजलादेरुक्तत्वाच्छूद्रस्यापिजलादावित्युक्तम् । एतत्सायंप्रातश्चकार्यम् । सायंप्रातर्वैश्वदेवःकर्तव्योबलिकर्मच । अनश्नतापिसततमन्यथाकिल्बिषीभवेदितिचंद्रिकायांकात्यायनोक्तेः । प्रातःशब्दोमध्याह्नपरः । पूर्वाह्णोवैदेवानांमध्याह्नोमनुष्याणामि तिश्रुतेः । अनश्नतापीत्युक्तेरेकादश्यादावपिपक्वंचेदंकार्यमिति **नारायणवृत्तिः** । इदमपिवह्वृचपरम् । अन्येषांतुतंडुलादिनातदभावेज लेन । नचेदुत्पद्यतेन्नंतुअद्भिरेतान्समाप्नुयेदितिबोधायनोक्तेः । दधिघृतादितुवह्वृचान्यपरम् । पक्वाभावेप्रवासेचतंडुलानोपधींस्तथा । दद्या द्दधिघृतंवापिकंदमूलफलानिच । योजयेद्देवयज्ञादौजलेवापत्सुवाजलमितिचंद्रोदयेवचनात् । पक्वाभावइतिशुद्धोपवासपरमितिचंद्रोदयः ।

एतेनैकादश्यांवैश्वदेवोनकार्यइतिवदंतःपरास्ताः । अत्रकेचित्—स्नात्वागृहंसमागत्यवैश्वदेवंसमाचरेत् । प्रातरेवद्विरावृत्त्याकुर्याद्वासहतद्भिजः । सायंवायदिभुंजीयात्तत्कृत्वाजात्वपिस्वयमितिप्रयोगपारिजातेआश्वलायनस्मृतेः । द्वितीयभोजनाभावेपिसायंकालिकवैश्वदेवस्यसायंवानुष्ठानंप्रातर्वेत्याहुः । पितृचरणास्तुआश्वलायनवाक्येयदिभुंजीयादित्युक्तेःसायंवैश्वदेवोद्वितीयभोजनेसत्येवप्रातर्द्विरावृत्तिस्तुप्रातः पाकेनैवसायंपुनर्भोजने । यदिभुंजीयादित्यस्यतत्रापिसंबंधात् । पुनःपाकमुपादायसायमप्यवनीपते । वैश्वदेवनिमित्तंवैपक्व्यासार्धंचलिंहरेत् । तत्रापिश्वपचादिभ्यस्तथैवान्नापवर्जनमितिविष्णुपुराणाच्च । वैश्वदेवंतथारात्रौकुर्याद्वलिहृतिंतथा । महतःपंचयज्ञांस्तुदिवैवेत्याहधर्मविदितिमदनपारिजातेजमदग्निवाक्ये—तदासायंचप्रातश्चजुहोतीत्यादिवत्समुच्चयबोधकत्वशब्दाद्यभावाच्च सायंप्रातरितितुकातीयपरमित्याहुः । वस्तुतस्तुनित्यवच्छ्रुतस्यसूत्रोक्तस्यसायंकालिकस्यकादाचित्कत्वेमानाभावात् वैश्वदेवद्वयाकरणेप्रायश्चित्तश्रवणात् दिवाचारिभ्यइतिलिंगाच्च दिवास्यप्रारंभइतिवृत्तेश्च यथाकथंचित्सायंप्रातरनुष्ठानंयुक्तं । असतिबाधकेऽतिसंकोचस्यायुक्तत्वादितियुगपद्वैश्वदेवपक्षेसहपदश्रवणात्प्रातस्तनंसंपूर्णंवैश्वदेवंकृत्वासायंकालिकवैश्वदेवकरणेसहपशूनालभतइतिवत्सहत्वबाधात् पूर्वंहोमौततोबलीततःपितृयज्ञाविति । आपस्तंबानांवैश्वदेवप्रथमारंभेविशेषउक्तोधर्मप्रश्नेवैश्वदेवंचतुर्दशमहोभवतीतिज्ञात्वादंपत्योर्द्वादशाहमधःशय्याब्रह्मचर्यक्षारलवणवर्जनंत्रयोदशेहन्युपवासश्चतुर्दशेहनिवैश्वदेवःस्थालीपाकंकृत्वागृहपाकाद्वाहविष्यान्नमादायजुहुयादितिचंद्रोदयेबृहत्पराशरेणान्नसंस्कारोक्तेः, अहरहःकुर्यादितिपुरुषार्थत्वावगतेश्च । अन्नस्यचात्मनश्चैवसंस्कारार्थंतदिष्यतइतिमदनरत्नेशौनकोक्तेश्च । यत्तुचंद्रिकायांपरिशिष्टम्—श्रोषितोप्यात्मसंस्कारंकुर्यादेवाविचारयन्नितितदुभयार्थत्वेप्यविरुद्धम् । आश्वलायनवृत्तौमदनरत्नेस्मृत्यर्थसारेचैवम् । तत्रस्विष्टकृद्यज्ञक्षेपांशेऽन्नसंस्कारता । यत्त्वग्नौहूयतेनैवेत्युक्तेः त्यागांशेपुरुषार्थता । चंद्रिकामिताक्षरयोस्तुपुरुषार्थत्वमेवो

क्तंतद्वचनविरोधाच्चिंत्यम्। **व्यासः**—वैश्वदेवंप्रकुर्वीतस्वशाखाविहितंततः। संस्कृतान्नैश्चविविधैर्हविष्यैर्व्यंजनान्वितैः। इदंबह्वृचान्यपरं। वर्जयित्वाविशेषान्नंशुद्धेनान्नेनकेवलमितिशौनकोक्तेः, हविष्याहविष्यपाकेहविष्येणैवसिद्धस्यहविषस्जुहुयादित्याश्वलायनोक्तेः। **हविष्यान्नादिगोडरानंदेस्मृतौ**—हैमंतिकंसितास्विन्नंधान्यंमुद्गास्तिलायवाः। कलायकंगुनीवारावास्तुकंहिलमोचिका। पष्टिकाःकालशाकंचमूलकंकेमुकेतरत्। कंदःसैंधवसामुद्रेलवणेदधिसर्पिषी। पयोनुद्धृतसारंचपनसाम्रहरीतकी। पिप्पलीजीरकंचैवनागरंचैवतिंतिणी। कदलीलवलीधात्रीफलान्यगुडमैक्षवम्। अतैलपक्वंमुनयोहविष्यान्नंप्रचक्षते। सर्पिःपयश्चात्रगव्यम्। अतैलपक्वमित्युक्तानामेवविशेषणमितिव्रतहेमाद्रिः। हैमंतिकमितिवार्षिकव्यावृत्तिः। सितमितिश्यामव्यावृत्तिः। अस्विन्नमितिस्विन्नव्यावृत्तिः। युगपत्क्रमेणवाहविष्यद्वयपाकेन्यतरेण। यद्येकस्मिन्काले व्रीहियवैःपच्येतान्यतरस्यहुत्वाहुतंमन्येत। यद्येकस्मिन्कालेपुनःपुनरन्नंपच्येतसकृदेवबलिंकुर्वीतेतिगोभिलोक्तेः। अहविष्यान्नमात्रपाकेफलादिनावैश्वदेवःकार्यः। अहविष्यंत्वसंस्कृतमेवभोज्यमितिकेचित्। **वोपणभट्टस्तु** गृहमेधिनोयदशनीयंतस्यहोमावलयश्चस्वर्गपुष्टिसंयुक्ताइत्यापस्तंबोक्तेरहविष्येणापिहोममाह। शृतफलाहारेतेनैववैश्वदेवोनतंडुलादिना।—अजानन्योद्विजोनित्यमहुत्वात्तिशृतंहविः। पितृदेवमनुष्याणामृणयुक्तःसयात्यधइतिचंद्रोदयेवृद्धपराशरोक्तेः, अशृतफलाहारेतेनैवपूर्वोक्तापस्तंबोक्तेः। शुष्कोपवासेतंडुलादिना। —पक्वाभावेप्रवासेचतंडुलानौषधीस्तथा। दद्याद्दधिघृतंचापिकंदमूलफलानिवा। योजयेद्देवयज्ञादौजलेवापत्सुवाजलमितिचंद्रोदयेवचनात्। पक्वाभावइतिशुद्धोपवासपरम्। प्रवासेत्वनियमः। क्षारादिमिश्रहविष्यपाकेतुबोधायनः—अंगारान्भस्ममिश्रांस्तुनिरुह्योत्तरतोन्नतु। जुहुयाद्वैश्वदेवार्थंयदिक्षारादिमिश्रितम्। वृद्धपराशरः—स्वगृह्योक्तविधानेनजुहुयाद्वैश्वदेविकम्। हविष्यस्यद्विजोऽभावेयथालाभंशृतं हविः। फलंवायदिवामूलंरसंवायदिवापयः। पक्वान्नप्रतिग्रहेपितेनैववैश्वदेवः। तस्यपाकाप्रयोजकत्वात्वृत्तिकृत्पाकप्रयोजकतामाह।

शूद्रलब्धेनवैश्वदेवादिनकार्यम् । आमंशूद्रस्ययत्किंचिच्छ्राद्धिकंप्रतिगृह्यते । तत्सर्वंभोजनायालंनित्येनैमित्तिकेनचेतिषट्त्रिंशन्मतात् । वैश्वदेव
वृद्धपराशरः—जुहुयात्सर्पिषाभ्यक्तंगव्येनपयसापिवा । क्रीतेनगोविकारेणतिलतैलेनवापुनः । संप्रोक्ष्यपयसावापिनानक्तंजुहुयादपि ।
अस्नेहायवगोधूमशालयोहवनीयकाः । इति ।

वैश्वदेवेनिषिद्धद्रव्यमुक्तंकाशीखंडे—निष्पावान्कोद्रवान्मापान्कलायांश्चणकांस्त्यजेत् । तैलपक्वंचपक्वान्नंसर्वंलवणयुक्त्यजेत् ।
आढकींचमसूरांश्चवर्तुलान्वदरांस्तथा । भुक्तशेषंपर्युषितंवैश्वदेवेविवर्जयेत् । निष्पावा वल्लाः । **आपस्तंबः**—नक्षारलवणहोमोविद्यते
तथापरान्नसंस्पृष्टस्येति । क्षारलवणमूषरलवणमितिकल्पतरुः । **व्यासः**—जुहुयात्सर्पिषाभ्यक्तंतैलक्षारविवर्जितम् । **क्षाराश्चाग्नेये**—
तिलमुद्गाद्यतेशिंब्यंसस्येगोधूमकोद्रवौ । चीनकंदेवधान्यंचशमीधान्यंतथैक्षवम् । खिन्नधान्यंतथार्पेयंमूलंक्षारगणःस्मृतः । जुहुयाद्व्यंजनक्षारवर्ज्य
मन्नंहुताशने । व्यंजननिषेधोहविःपरःकेवलव्यंजनपरोवा । हविष्यव्यंजनान्वितैःपूर्वोक्तैः । चीनकं कलायः । **चतुर्विंशतिमते**—
पयोदधिघृतैःकुर्याद्वैश्वदैवंसुवेणतु । हस्तेनान्नादिभिःकुर्यादद्भिरंजलिनाजले । अत्रभूसंस्कारादिनभवतीतिवृत्तिःकर्कश्च । **मार्कंडेये**—
संपूजयेत्ततोवह्निंदद्याच्चाहुतयःक्रमात् । **हविःपरिमाणमुक्तंप्राक् । चंद्रोदयेस्मृतिः**—उत्तानेनतुहस्तेनअंगुष्ठाग्रेणपीडितम् । संह
तांगुलिपाणिस्तुवाग्यतोजुहुयाद्धविः । **बहूचपरिशिष्टे**—नात्रपांकतंत्रंसिद्धंहविष्यमेधिश्रित्याद्भिःप्रोक्ष्योदगुद्वास्याग्नेःप्रत्यग्रदर्भेपुनिधायस
व्यपाणितलंहृदयेन्यस्यसकृदवदायजुहुयादंतेचपरिसमुह्यपर्युक्ष्यपर्यूहनोक्षणेअपिवानकुर्वंतीति । **शौनकः**—त्रिधाविभज्यसिद्धान्नंत्रिःप्रो

१ पाकतंत्रंइत्यादिहिरित्यादि । २ अधिश्रित्याग्नेरुपरिकृत्वा ।

क्ष्यपुरतःस्थितम् । काशीखंडे—पृष्टोदिवीतिमंत्रेणपर्युक्षणमथाचरेत् । एषोहिदेवमंत्रेणकुर्याद्बर्हिचसंमुखम् । तथादेवकृतस्याद्याज्जुहुयाच्चषडाहुतीः । यमायतूष्णीमेकांचतथास्विष्टकृदाहुतिम् । अत्रिः—साग्निकःपितृयज्ञान्नाद्बलिकर्मसमाचरेत् । अनग्निर्हुतशेषेणबलिंकाकबलिंहरेत् । नरयज्ञादृतेनास्तिनिरग्नेस्तुमहामखः । हुत्वाकाकबलिंरव । वसिष्ठः—अनग्निकस्तुयोविप्रःसोऽन्नंव्याहृतिभिःस्वयम् । हुत्वाशाकलमंत्रैश्चशिष्टाद्भूतबलिंहरेत् । व्यासः—शाकलेनविधानेनजुहुयाल्लौकिकेऽनले । व्यस्ताभिश्चव्याहृतिभिःसमस्ताभिस्ततःपरम् । पङ्क्तिर्देवकृतस्येतिमंत्रवद्भिर्यथाक्रमम् । अयंविधिःकातीयपरइतिकेचित् । निरग्नेरपितस्यसूत्रोक्तएवहोमः । जयंतकृष्णभट्टीययोस्तुव्याहृतिभिर्व्यस्तसमस्ताभिर्जुहुयादित्युक्तम् । मनुः—वैश्वदेवस्यसिद्धस्यगृह्येग्नौविधिपूर्वकम् । आभ्यःकुर्याद्देवताभ्योब्राह्मणोहोममन्वहम् । अग्नेःसोमस्यचैवादौतयोश्चैवसमस्तयोः । विश्वेषांचैवदेवानांधन्वंतरयएवच । कुह्वैचैवानुमत्यैचप्रजापतयएवच । सहद्यावापृथिव्योश्चतथा स्विष्टकृदाहुतिः । विष्णुपुराणे—अपूर्वमग्निहोत्रंचकुर्यात्प्राग्ब्रह्मणेततः । प्रजापतिंसमुद्दिश्यदद्यादाहुतिमादरात् । गृह्येभ्यःकश्यपा यायततोनुमतयेक्रमात् । अयमेववैश्वदेवःशूद्रस्येतिशूद्राचारशिरोमणिः । मनूक्तइतिकौमुदीराघवानंदतीर्थीच । शूद्रस्यशाक लमंत्रोक्तदेवतानाम्नाहोमइतिगोविंदराजः । पाकयज्ञैःस्वयंयजेतेत्येकेइतिगौतमोक्तेः स्वयंकरणविकल्पःशूद्रस्येतिहरिहरः । पाकयज्ञाः प्रयोगपारिजातेहेमाद्रौच । आसुरेभ्यःप्रहीणेभ्यःशिशुभ्योयच्चदीयते । वैश्वदेवंनतत्कुर्याच्छ्राद्धार्थंयच्चपच्यते । इति ।

अथभूतयज्ञः । मनुः—एवंसम्यग्वहिर्हुत्वासर्वदिक्षुप्रदक्षिणम् । इंद्रांतकाप्पतींदुभ्यःसानुगेभ्योबलिंहरेत् । मरुद्भ्यइतितुद्वारिहरेद
ग्नाम्नाहलमि । वनस्पतिभ्यइत्येवंमुसलोलूखलेहरेत् । उच्छीर्षकेश्रियैकुर्याद्भद्रकाल्यैतुपादतः । ब्रह्मवास्तोष्पतिभ्यांतुवास्तुमध्येबलिंहरेत् ।

१ ऽरक्षसामितिपाठः । २ द्यावापृथिवीभ्यामिति । ३ अग्नयेस्विष्टकृतेस्वाहेति ।

विश्वेभ्यश्चैवदेवेभ्योबलिमाकाशउत्क्षिपेत् । दिवाचारिभ्योनक्तंतुनक्तंचारिभ्यएवच । पृष्ठवास्तुनिकुर्वीतबलिंसर्वानुभूतये । पितृभ्योबलिशेषंतुस
र्वंदक्षिणतोहरेत् । शुनांचपतितानांचश्वपचांपापरोगिणाम् । वायसानांकृमीणांचशनकैर्निक्षिपेद्भुवि । सायंत्वन्नस्यसिद्धस्यपल्यमंत्रंबलिंहरेत् ।
वैश्वदेवंहिनामैतत्सायंप्रातर्विधीयते । यजमानतत्पुत्रादीनामसन्निधौपत्नीबलिंहरेदितिकल्पतरुः । द्वंद्वंचमुसलोलूखलयोः । मुसलोलूखलेक्षि
स्यातत्रैकोबलिरितिसर्वज्ञनारायणः । युक्तंचैतदेवलाघवात् । मुसलोलूखलोद्देश्यत्वात्प्रत्युद्देश्यंबलिक्षेपविधेर्बलिद्वयमितिमेधातिथिः ।
उलूखलइत्येकवचननिर्देशादितरेतरयोगः । द्वंद्वेद्विवचनापत्तेः समाहारद्वंद्वाश्रयणेनमुसलयुक्तमुलूखलमितिवा समासाश्रयणेनमुसलयुक्तमुलूख
लमित्येकत्वम् । उच्छीर्षकं शय्याशिरःवास्तुशिरोवा । पादतः शय्यायावास्तोर्वा । पृष्ठवास्तूपरिगृहमितिमेधातिथिः । पश्चाद्गृहंकाशी
खंडे । निर्णेजनोदकांतंतुपावन्यां (?) यक्ष्मणेर्पयेत् । कात्यायनः—अमुष्यैनमइत्येवंबलिदानंविधीयते । स्वधाकारःपितॄणांचहंत
कारोनॄणांकृतः । नारायणवृत्तौतुबलिदानेस्वाहाकारउक्तः । नेत्याशार्कः । शूद्रस्यनमइत्येव । आशार्के—स्वधाकारेणनिनयेत्पित्र्यंव
लिमतःसदा । तदप्येकेनमस्कारंकुर्वतेनेतिगौतमः । तत्रनेत्यर्थः । मार्कंडेये—स्वधानमइतिह्युक्त्वापितृभ्यश्चापिदक्षिणे । हुतावशेषमन्नंवै
तोयंदद्याद्यथाविधि । विष्णुपुराणे—तच्छेषंमणिकेपृथ्वीपर्जन्याङ्ग्यःक्षिपेत्ततः । द्वारेधातुर्विधातुश्चमध्येचब्रह्मणःक्षिपेत् । गृहस्यपुरुषंचै
वदिग्देवानांचमेशृणु । इंद्रायधर्मराजायवरुणायतथेंदवे । प्राच्यादिषुबुधोदद्याद्भुतशेषात्मकंबलिम् । प्रागुत्तरेचदिग्भागेधन्वंतरिंबलिंबुधः ।
वायव्यांवायवेदिक्षुसमस्तासुततोदिशम् । ब्रह्मणेचांतरिक्षायवायवेचक्षिपेद्बलिम् । विश्वेदेवान्विश्वभूतांस्ततोविश्वपतीन्पितॄन् । यक्ष्माणंचसमुद्दि
श्यबलिंदद्यान्नरेश्वर । ततोन्यदन्नमादायभूमिभागेशुचौबुधः । दद्यादशेषभूतेभ्यःस्वेच्छयातत्समाहितः । देवामनुष्याःपशवोवयांसिसिद्धाश्चय
क्षोरगदैत्यसंघाः । प्रेताःपिशाचास्तरवःसमस्तायेचान्नमिच्छंतिमयाप्रदत्तम् । पिपीलिकाःकीटपतंगकाद्याबुभुक्षिताःकर्मनिबंधबद्धाः । प्रयांतु

१ निक्षिपेद्बलिम् ।

तेतृप्तिमिदंमयान्नंतेभ्योविसृष्टंसुखिनोभवंतु । येपांनमातानपितानबंधुर्नचान्नसिद्धिर्नतयान्यदस्ति । तस्मादहंभूतनिकायभूतमन्नंप्रयच्छामिभ वायतेषाम् । चतुर्दशोभूतगणोपियस्तुतन्नास्तितायेखिलभूतसंघाः । तृप्त्यर्थमन्नंहिमयाविसृष्टंतेषामिदंतेमुदिताभवंतु । इत्युच्चार्यनरोदद्याद न्नं श्रद्धासमन्वितः । भुविभूतोपकारायगृहीसर्वाश्रयोयतः । श्वचांडालविहंगानांभुविदद्यात्ततोनरः । येचान्येपतिताःकेचिदपुत्राभुविमानवाः । इदमेववलिदानंशूद्रस्येत्युक्तंशूद्राचारशिरोमणौस्मृतिकौमुद्यांच ।

वलिदेशसंस्कारः । आपस्तंबः—वलीनांदेशस्यसंस्कारोहस्तेनपरिमृज्यावोक्ष्यन्युप्यचेति । **छंदोगपरिशिष्टे**—नावरार्घ्यावलयो भवंतिमहामार्जारश्रवणप्रमाणात् । एकत्रचेदविकृष्टाभवंतिइतरेतरमसंसक्ताश्चेदिति । नानास्थानेवलिदानासंभवे अविकृष्टा अव्यवहिताः । **शौनकः**—वदरीफलमात्रान्नमंगुल्यग्रैर्विनिक्षिपेत् । **वलिहरणेविशेषोवह्वृचपरिशिष्टे**—अथगृहवलिदेवतानांकीर्तयिष्यामोयत्र यत्रवसंतिताः । द्वारेपितामहंविद्यात्प्रक्रीळेतुउमापतिम् । आग्नेय्यामित्यग्रेदर्शनात् द्वारे प्राच्याम् । आग्नेय्यांवलभद्रंचयमंविष्णुंचदक्षिणे । नैर्ऋत्यांस्कंदवरुणौसोमंसूर्यंचपश्चिमे । वायव्यामश्विनौ । वसवःसौम्यां । रुद्रईशान्यां । नैर्ऋत्यांस्कंदं । वरुणसोमौपश्चिमे । सूर्योवायव्यामि त्यर्थः । नक्षत्रेंदुग्रहाःपूर्वादिशमाश्रिताः । गृहमध्येब्रह्माणंप्रतिष्ठाप्यऋद्धिर्वृद्धिःश्रीःकीर्तिरिति प्रदक्षिणंब्रह्मणःप्रागादिदिक्ष्वित्यर्थः । निष्क्रम्य गृहनिवेशनात्प्राङ्मुखःप्रोक्ष्यवलीन्निनयेत् । निवेशनंमुख्यगृहम् । ऐंद्रवारुणवायव्यायाम्यावैनैर्ऋतास्तथा ।' तेकाकाःप्रतिगृह्णंतुभूम्यांपिंडं मयार्पितम् । इतिकाकवलिः । द्वौश्वानौश्यामशबलौवैवस्वतकुलोद्भवौ । ताभ्यांपिंडंप्रयच्छामिस्यातामेतावहिंसकाविति श्ववलिः । येभू ताःप्रचरंतिदिवानक्तंवलिमिच्छंतोविदुरस्यप्रेष्ठाः । तेभ्योबलिंपुष्टिकामोददामिमयिपुष्टिंपुष्टिपतिर्ददात्विति भूतवलिः । प्रक्षाल्यपाणिपादौ गृहंप्रविश्यजपेत् शांतापृथिवीशिवमंतरिक्षंद्यौर्नोदेव्यभयंनोअस्तु । शिवादिशःप्रदिशउद्दिशोनआपोविद्युतःपरिपांतुसर्वतःशांतिः ३ ॥

अत्रकेचित्बलिहरणेनत्यागोहरणमात्रोक्तेःयजतिजुहोतिचोदितत्वाभावाच्च । अन्यथातर्पणेपित्यागापत्तेरित्याहुः । तन्न । सूक्तवाककरणत्वान्यथानुपपत्त्याहरतेर्यागकल्पवन्मन्त्रादिर्ष्विद्रादिपुचतुर्थीनिर्देशान्यथानुपपत्त्याअत्रापिहरतेर्यागार्थत्वौचित्यात् । इति ॥

बलिहरणभेदानाह शौनकः—चक्राकारमथाष्टारंकुर्यादग्निसमीपतः । आयुःकामोदिवारात्रौछत्राकारंबलिंहरेत् । आयुरारोग्यकामोवाध्वजाकारंबलिंहरेत् । मृत्युरोगविनाशार्थीनराकारंबलिंहरेत् । आयुरारोग्यसौभाग्यपुत्रविद्यापशूनपि । कामश्रीधर्ममोक्षार्थीचक्राकारं बलिंहरेत् । पंचस्वेतेपुविप्राणांमुख्याचक्राकृतिर्भवेत् । वह्वृचानांनराकारोमुख्यइतिकृष्णभट्टीयेजयंतवृत्तौनारायणवृत्तौच । यत्तु व्यजनाकारंबलिमापस्तंवाहरंतितत्रमूलंमृग्यम् । **पृथ्वीचंद्रोदये**—अनुद्धृत्यबलीनश्नन्प्राणायामान्पडाचरेत् । स्वयमुद्धरणेचैवप्राजापत्यंसमाचरेत् । बलिप्रतिपत्तिमाहकात्यायनः—पिंडवच्चपश्चिमाप्रतिपत्तिरिति । यथापिंडप्रतिपत्तिर्गोजविप्राभ्यंबुपुतथाश्वादिबलिभिन्नबलीनामित्यर्थः । **चंद्रिकायांकात्यायनः**—वैश्वदेवंचपित्र्यंचबलिमग्नौविनिक्षिपेत् । शेषंभूतबलेर्विप्रस्त्यक्त्वाकाकबलेःसमम् । **अग्निस्मृतौ**—वैश्वदेवबलेःशेषंनाश्नीयाद्ब्राह्मणोगृही । काकादिभ्यस्तुतद्देयंविप्रेभ्योवाविशेषतः । इति ।

अथपितृयज्ञः । सद्वेधाबलिहरणरूपोनित्यश्राद्धरूपश्च । श्राद्धंवापितृयज्ञःस्यात्पित्र्योबलिरथापिवेतिकात्यायनोक्तेः । द्विविधोपिच त्युत्तरंकाकबलेःपूर्वंकार्यः । भूतयज्ञस्त्वयंनित्यःसायंप्रातर्यथाविधि । एकंतुभोजयेद्विप्रंपितॄनुद्दिश्ययत्नतः । पूजयेदतिथिंनित्यंनमस्येदर्चयेत्तथेतिकौर्मात् । भूतयज्ञस्तथाश्राद्धंनित्यंत्वतिथितर्पणम् । क्रमेणानेनकर्तव्यंस्वाध्यायाध्ययनंतथेति **शातातपोक्तेः** । अदत्त्वावायसबलिंनित्यश्राद्धंसमाचरेदितिकाशीखंडाच्च । **वसिष्ठेनतु** मनुष्ययज्ञोत्तरंश्राद्धमुक्तं—श्रोत्रियायाग्रंदत्त्वाब्रह्मचारिणेचानंतरंपितृभ्योदद्यादिति । एतद्बल्युत्तरंश्रोत्रियादेरुपस्थितावित्याचाराद्दर्शः । **मनुस्मृतौ** वैश्वदेवात्पूर्वंनित्यश्राद्धमुक्तम् । **श्रुतौतु** देवयज्ञःपितृयज्ञोभूतयज्ञोमनु

प्ययज्ञोब्रह्मयज्ञइतिक्रमउक्तः । अपवर्गेतुसर्वत्रनित्यमेवप्रकीर्तितमितिशातातपोक्तेः वैश्वदेवोत्तरंनित्यश्राद्धमितिगोविंदराजः ।

अथनित्यश्राद्धम् । मनुः—दद्यादहरहःश्राद्धमन्नाद्येनोदकेनवा । पयोमूलफलैर्वापितृभ्यःप्रीतिमावहन् । **कात्यायनेनतर्पणेना** पिनित्यश्राद्धसिद्धिरुक्ता पितृयज्ञस्तुतर्पणमिति । **बौधायनोपि** अपिवाअपस्तत्पितृयज्ञइति । अत्रतुल्यवद्विकल्पइतिकर्कः । शक्ताशक्तवि षयत्वेनव्यवस्थेतिपित्र्यबलिनित्यश्राद्धयोःसमुच्चयः **मनुमार्कंडेयपुराणादिपूभयोर्नित्यत्वावगतेरित्युक्तंमदनरत्ने । प्रयोगपारिजाते** तुपित्र्यबलेर्दैवपित्र्यर्थत्वान्नित्यश्राद्धस्यमनुष्यपित्र्यर्थत्वादुभयोःसमुच्चयउक्तः । तन्न । देवताभेदेमानाभावात् । **नारायणवृत्तिकृत्तुबह्वृचा** नांपित्र्यबलिनैवनित्यश्राद्धसिद्धिमाह । **तदयमर्थः**—शक्तस्यनित्यश्राद्धंबलिश्च । श्राद्धाशक्तावुद्धृतान्नदानंबलिश्च । तदसंभवेबलिमात्रं । उद्धृतान्नप्रतिपत्तिश्चकौर्मे—उद्धृत्यवायथाशक्तिकिंचिदन्नंसमाहितः । वेदतत्वार्थविदुपेद्विजायैवोपपादयेत् । पित्र्यबलेर्नित्यश्राद्धत्वेतत्रगोत्राद्यु चारोपिभवति । येषांतुपित्र्यबलौस्वधापितृभ्यइतिमंत्रान्नानंतेषांनगोत्राद्युच्चारःमंत्रानर्थक्यापत्तेः । नित्यश्राद्धंचअमादौप्रसंगसिद्धेःपृथङ्नकार्यम् । नित्यश्राद्धंनकुर्वीतप्रसंगाद्यन्नसिध्यति । श्राद्धांतरेकृतेन्यत्रनित्यत्वात्तन्नहापयेदितिहेमाद्रौनागरखंडात् । यत्रद्रव्यकर्त्रैक्ये । अन्यत्रतदभावे । श्राद्धंकृत्वातुतस्यैवपुनःश्राद्धंनतद्दिने । नैमित्तिकंतुकर्तव्यंनिमित्तानुक्रमोदयमितिजाबालिस्मृतेश्च । **त्रिस्थलीसेतौतु**—आमेनहेम्नावातीर्थश्राद्धेकृतेनित्यश्राद्धंपृथक् । तस्यपक्वद्रव्यकत्वनियमात् । यत्तुनांदीमुखतीर्थश्राद्धाभ्यांनित्यश्राद्धस्यसिद्धिरितिहेमाद्रिरूचेतत्तीर्थश्राद्धस्यान्ने नकरणेज्ञेयमित्याहुर्भट्टपादाः । अस्यदिवाकरणेलोपःरात्रौश्राद्धंनकुर्वीतेतिवचनात्किंतुप्रायश्चित्तमेवेत्युक्तंमदनरत्नेगोविंदार्णवेप्रयोग पारिजातेच । अत्रकेचित्—नित्यश्राद्धंरात्रावपिकार्यम् । दिवोदितानीत्यादिबृहन्नारदीयात् । रात्रौप्रहरपर्यंतमित्यादिचंद्रोदयेसं ग्रहाच्च । नचैवंदार्शिकाद्यपिरात्रौस्यादितिवाच्यम् । तिथिसंबंधित्वेनदिवासंबंधित्वादित्याहुः । प्रांचाअप्येवम् । तन्न ।—संध्यारात्र्योर्नकर्तृ

अत्रकेचित्वलिहरणेनत्यागोहरणमात्रोक्तेःयजतिजुहोतिचोदितत्वाभावाच्च । अन्यथातर्पणेपित्यागापत्तेरित्याहुः । तन्न । सूक्तवाककरणत्वान्यथानुपपत्त्याहरतेर्यागकल्पवन्मन्त्रादिर्विद्रादिपुचतुर्थीनिर्देशान्यथानुपपत्त्याअत्रापिहरतेर्यागार्थत्वौचित्यात् । इति ॥

बलिहरणभेदानाह शौनकः—चक्राकारमथाष्टारंकुर्यादग्निसमीपतः । आयुःकामोदिवारात्रौछत्राकारंबलिंहरेत् । आयुरारोग्यकामोवाध्वजाकारंबलिंहरेत् । मृत्युरोगविनाशार्थीनराकारंबलिंहरेत् । आयुरारोग्यसौभाग्यपुत्रविद्यापशूनपि । कामश्रीधर्ममोक्षार्थीचक्राकारं बलिंहरेत् । पंचस्वेतेषुविप्राणांमुख्याचक्राकृतिर्भवेत् । वह्वृचानांनराकारोमुख्यइति**कृष्णभट्टीयेजयंतवृत्तौनारायणवृत्तौच** । यत्तु व्यजनाकारंबलिमापस्तंबाहरंतितत्रमूलंमृग्यम् । **पृथ्वीचंद्रोदये**—अनुद्धृत्यबलीनश्नन्प्राणायामान्पडाचरेत् । स्वयमुद्धरणेचैवप्राजापत्यंसमाचरेत् । बलिप्रतिपत्तिमाह**कात्यायनः**—पिंडवच्चपश्चिमाप्रतिपत्तिरिति । यथापिंडप्रतिपत्तिर्गोजविप्राम्भंबुपुतथाश्वादिबलिभिन्नबलीनामित्यर्थः । **चंद्रिकायांकात्यायनः**—वैश्वदेवंचपित्र्यंचबलिमग्नौविनिक्षिपेत् । शेषंभूतबलेर्विप्रस्त्यक्त्वाकाकबलेःसमम् । **अग्निस्मृतौ**—वैश्वदेवबलेःशेषंनाश्नीयाद्ब्राह्मणोगृही । काकादिभ्यस्तुतद्देयंविप्रेभ्योवाविशेषतः । इति ।

अथपितृयज्ञः । सद्वेधाबलिहरणरूपोनित्यश्राद्धरूपश्च । श्राद्धंवापितृयज्ञःस्यात्पित्र्योबलिरथापिवेति**कात्यायनोक्तेः** । द्विविधोपिबल्युत्तरंकाकबलेःपूर्वंकार्यः । भूतयज्ञस्त्वयंनित्यःसायंप्रातर्यथाविधि । एकंतुभोजयेद्विप्रंपितॄनुद्दिश्ययत्नतः । पूजयेदतिथिंनित्यंनमस्येदर्चयेत्तथेति**कौर्मात्** । भूतयज्ञस्तथाश्राद्धंनित्यंत्वतिथितर्पणम् । क्रमेणानेनकर्तव्यंस्वाध्यायाध्ययनंतथेति **शातातपोक्तेः** । अदत्वावायसबलिंनित्यश्राद्धंसमाचरेदितिकाशीखंडाच्च । **वसिष्ठेनतु** मनुष्ययज्ञोत्तरंश्राद्धमुक्तं—श्रोत्रियायाग्रंदत्त्वाब्रह्मचारिणेचानंतरंपितृभ्योदद्यादिति । एतद्बल्युत्तरंश्रोत्रियादेरुपस्थितावित्याचारादर्शः । **मनुस्मृतौ** वैश्वदेवात्पूर्वंनित्यश्राद्धमुक्तम् । **श्रुतौतु** देवयज्ञःपितृयज्ञोभूतयज्ञोमनु

व्ययज्ञोव्रह्मयज्ञइतिक्रमउक्तः । अपवर्गेतुसर्वत्रनित्यमेवप्रकीर्तितमितिशातातपोक्तेः वैश्वदेवोत्तरंनित्यश्राद्धमितिगोविंदराजः ।

अथनित्यश्राद्धम् । मनुः—दद्यादहरहःश्राद्धमन्नाद्येनोदकेनवा । पयोमूलफलैर्वापितृभ्यःप्रीतिमावहन् । **कात्यायनेनतर्पणेना** पिनित्यश्राद्धसिद्धिरुक्ता पितृयज्ञस्तुतर्पणमिति । **बौधायनोपि** अपिवाअपस्तत्पितृयज्ञइति । अत्रतुल्यवद्विकल्पइतिकर्कः । शक्ताशक्तवि पयत्वेनव्यवस्थेतिपित्र्यबलिनित्यश्राद्धयोःसमुच्चयः **मनुमार्कंडेयपुराणादिपूभयोर्नित्यत्वावगतेरित्युक्तंमदनरत्ने । प्रयोगपारिजाते** तुपित्र्यबलेर्दैवपित्र्यर्थत्वान्नित्यश्राद्धस्यमनुष्यपित्र्यर्थत्वादुभयोःसमुच्चयउक्तः । तन्न । देवताभेदेमानाभावात् । **नारायणवृत्तिकृत्तुवह्वृचा** नांपित्र्यबलिनैवनित्यश्राद्धसिद्धिमाह । **तदयमर्थः**—शक्तस्यनित्यश्राद्धंबलिश्च । श्राद्धाशक्तावुद्धृतान्नदानंबलिश्च । तदसंभवेबलिमात्रं । उद्धृतान्नप्रतिपत्तिश्चकौर्मे—उद्धृत्यवायथाशक्तिकिंचिदन्नंसमाहितः । वेदतत्वार्थविदुषेद्विजायैवोपपादयेत् । पित्र्यबलेर्नित्यश्राद्धत्वेतन्नगोत्राद्यु च्चारोपिभवति । येषांतुपित्र्यबलौस्वधापितृभ्यइतिमंत्रान्नानंतेषांनगोत्राद्युच्चारःमंत्रानर्थक्यापत्तेः । नित्यश्राद्धंचअमादौप्रसंगसिद्धेःपृथङ्नकार्यम् । नित्यश्राद्धंनकुर्वीतप्रसंगाद्यत्रसिध्यति । श्राद्धांतरेकृतेन्यत्रनित्यत्वात्तन्नहापयेदितिहेमाद्रौनागरखंडात् । यत्रद्रव्यकर्त्रैक्ये । अन्यत्रतदभावे । श्राद्धंकृत्वातुतस्यैवपुनःश्राद्धंनतद्दिने । नैमित्तिकंतुकर्तव्यंनिमित्तानुक्रमोदयमितिजाबालिस्मृतेश्च । **त्रिस्थलीसेतौतु**—आमेनहेम्नावाती र्थश्राद्धेकृतेनित्यश्राद्धंपृथक् । तस्यपक्वद्रव्यकत्वनियमात् । यत्तुनांदीमुखतीर्थश्राद्धाभ्यांनित्यश्राद्धस्यसिद्धिरितिहेमाद्रिरूचेतत्तीर्थश्राद्धस्यान्ने नकरणेज्ञेयमित्याहुर्भट्टपादाः । अस्यदिवाकरणेलोपःरात्रौश्राद्धंनकुर्वीतेतिवचनात्किंतुप्रायश्चित्तमेवेत्युक्तंमदनरत्नेगोविंदार्णवेप्रयोग पारिजातेच । **अत्रकेचित्**—नित्यश्राद्धंरात्रावपिकार्यम् । दिवोदितानीत्यादिबृहन्नारदीयात् । रात्रौप्रहरपर्यंतमित्यादिचंद्रोदयेसं ग्रहाच्च । नचैवंदार्शिकाद्यपिरात्रौस्यादितिवाच्यम् । तिथिसंबंधित्वेनदिवासंबंधित्वादित्याहुः । प्रांचाअप्येवम् । तन्न ।–संध्याराज्योर्नकर्त

व्यंश्राद्धंखउविचक्षणैरितिविष्ण्वादिवचनैर्नित्यश्राद्धस्यापिरात्रौनिषेधात् । नचेदममावास्यादितिथिसंबंधिश्राद्धपरम् । संकोचेमानाभावात्। तस्याप्यपराह्णसंबंधित्वेनदिवासंबंधित्वाच्च । नचैवमल्पद्वादश्यामपररात्रेनित्यश्राद्धंनस्यादितिवाच्यम् । इष्टापत्तेः अपकर्षविधेर्बलीयस्त्वाद्वातत्करणम् । यत्तुस्मृत्यर्थसारे—नित्यश्राद्धेन्नदेशकालनियमोनास्तीतितदप्यपराह्णनियमोनास्तीत्येतत्परंनतुरात्रिप्राप्तिपरम् । अतएवतीर्थद्रव्योपपत्तौचनकालमवधारयेदितिदेवलोक्तावपराह्णनियमएवोक्तोनतुरात्रिग्रहणमपीत्युक्तम् । शूलपाणिनातीर्थश्राद्धे—रात्रौवायदिवादिवेतिस्पष्टंरात्रिविधेरात्रावनुष्ठानंयुक्तम् । नत्वत्र—श्राद्धंसायाह्नदत्तंहिराक्षसैर्विप्रलुप्यते । ग्रहोपरागसंक्रांतितीर्थश्राद्धादिकंचनेतिग्रहादिपर्युदासेनरात्रौश्राद्धनिषेधप्रतीतेश्च । अन्यथापरिगणनवैयर्थ्यापत्तेः । यत्तुत्रिमुहूर्तंतुसायाह्नस्तत्रश्राद्धंविवर्जयेदितितन्नित्यश्राद्धपरम् । स्वकालातिक्रमेकुर्याद्रात्रेःपूर्वतयाविधिरितिकालमाधवीयेव्यासोक्तेः । पित्र्यबलेर्नित्यश्राद्धेपिनरात्रौनिषेधः । प्रतिनिधौनिषेधाप्रवृत्तेः । समुच्चयपक्षेस्थानापत्त्यभावाच्च । नित्यश्राद्धंशक्तस्याप्यनग्न्यादेरामेन । अनग्निश्चप्रवासीचयस्यभार्यारजस्वला। आमश्राद्धंप्रकुर्वीतमाससंवत्सरादृतइतिमरीच्युक्तेः । नचनित्यश्राद्धेवृद्धिश्राद्धेचभोजनमेवप्रधानमित्याशाकोक्तेर्नामग्राहिरितिवाच्यम् । वृद्धिश्राद्धेपितदभावापत्तेरितिकेचित् । हेमाद्रिस्त्वनग्न्यादेरपिपाकासंभवएवामेनेत्यूचे । युक्तंचैतत् । इंगुदैर्वदरैर्बिल्वैरामस्तर्पयतेपितॄन् । यदन्नःपुरुषोलोकेतदन्नास्तस्यदेवताइतिरामायणात् । नित्यश्राद्धेततोदद्याद्बुद्ध्येयत्स्वयमेवहीतिब्रह्मांडाच्च । नित्यश्राद्धस्यपक्वद्रव्यकत्वनियमादितिपितामहोक्तेश्च । अतः प्रवासादावपिपक्वेनैवेदम् । यत्तुस्मृत्यर्थसारे अन्ननियमोनास्तीतितदप्यन्यश्राद्धंवदृतपक्वादिनियमोनास्तीत्येतत्परं नतुपक्वानियमपरम् । अस्मादेववचनद्वयान्नित्यश्राद्धंनिषिद्धद्रव्येणापितैलादिनाकार्यमित्युक्तंहेमाद्रौचंद्रिकायांदिवोदासीयेच । श्राद्धहेमाद्रौयमः—सपिंडीकरणेनित्येनाधिमासंविवर्जयेत् । निर्णयदीपेगार्ग्यः—नांदीश्राद्धेकृतेपश्चाद्यावन्मातृविसर्जनत् । दर्शश्राद्धंक्षयश्राद्धंस्नानं

शीतोदकेनच । अपसव्यंस्वधाकारंनित्यश्राद्धंतथैवच । ब्रह्मयज्ञंचाध्ययनंनदीसीमातिलंघनम् । उपवासव्रतंचैवश्राद्धभोजनमेवच । नैवकुर्युः सपिंडाश्चमंडपोद्वासनावधि । एतद्वर्षपर्यंतमावश्यकमूर्ध्वंकृताकृतम् । नित्यश्राद्धंप्रक्रम्य—एवंसंवत्सरमित्युक्त्वाकृताकृतमतऊर्ध्वमित्या **पस्तंबोक्तेरितिशूद्राचारशिरोमणिः कल्पतरुश्च** । तन्न । **आपस्तंबोक्त**नित्यश्राद्धस्येतिकर्तव्यताभेदेनस्मृत्युक्तनित्यश्राद्धभेदात् । नित्यक्रियांपित्तृणांतुकेचिदिच्छंतिसत्तमाइति **मार्कंडेयपुराणा**न्नित्यश्राद्धेविकल्पः । सचपट्पुरुषश्राद्धोत्तरंनित्यश्राद्धंनकार्यं श्राद्धोत्तरंतुकर्तव्यमितिव्यवस्थितइतिपितृभक्तिः**श्रीदत्तः** । नित्यश्राद्धाकारणेनदोषः करणेतुमहाफलमितिकल्पतरुः । तन्न नित्यसंयोगविरोधात् फलाश्रवणाच्च अकरणेप्रायश्चित्तोक्तेः । **हेमाद्रौदेवलः**—अनेनविधिनाश्राद्धंकुर्यात्संवत्सरंसकृत् । द्विश्चतुर्वायथाश्राद्धंमासेमासेदिनेदिने । प्रत्यहमनुष्ठानाशक्तौमासेमासे तत्राप्यशक्तोवर्षमध्येद्विश्चतुर्वासकृद्वाकार्यमितिहे**माद्रिश्चंद्रिकाच** । नेदंनित्यश्राद्धपरम् । अनेनविधिना श्राद्धंत्रिशुद्धस्येहनिर्वपेत् । हेमंतग्रीष्मवर्षासुपांचयज्ञियमन्वहमितिमनूक्तेः । **मात्स्ये**—पूर्वार्धंतदेव । कन्याकुंभवृषस्थेर्केकृष्णपक्षेपुसर्वदेति । सकृदितिकन्यास्थार्कपरम् । अतःसर्वामावास्याश्राद्धाशक्तौसर्वकृष्णपक्षेपुश्राद्धाशक्तौचेदमिति**श्राद्धशूलपाणिः** । युक्तंचैतदेव ॥

अथविधिः । **व्यासः**—नित्यश्राद्धेयगंधाद्यैर्द्विजानभ्यर्च्यशक्तितः । सर्वान्पितृगणान्सम्यक्सहैवोद्दिश्यभोजयेत् । नावाहनंस्वधाकारंपिंडान्वौकरणादिकम् । ब्रह्मचर्यादिनियमोविश्वेदेवास्तथैवच । नित्यश्राद्धेत्यजेदेतान्भोज्यमन्नंप्रकल्पयेत् । दद्यात्तुदक्षिणांशक्त्यानमस्कारैर्विसर्जयेत् । ब्रह्मचर्यभावेदातृभोक्तोः भोक्तारंप्रतिदातारंव्रतंतत्रनविद्यतइतिदे**वलोक्तेः** **मात्स्ये**—नित्यंतावत्प्रवक्ष्येहमर्घावाहनवर्जितम् । अर्घ्यपात्रमेवनिषिद्धंनार्घ्यदानम् । नैत्यकेपितरएतद्वोर्घ्यमितिपाणिनैवार्घ्यंदद्यादितिगृह्यांतरादितिदि**वोदासः** । **प्रचेताः**—नामंत्रणंनहोमश्च नावाहनविसर्जने । नपिंडदानंनसुरान्नित्येकुर्याद्द्विजोत्तमः । उपवेश्यासनंदत्वासंपूज्यकुसुमादिभिः । निर्दिश्यभोजयित्वातुकिंचिद्दत्वाविसर्ज

येत् । वाजेवाजेइतिमंत्रविशिष्टविसर्जननिषेधोनकेवलस्य नमस्कारैर्विसर्जयेदितिपूर्वमुक्तेरितिश्राद्धहेमाद्रिः । आसनादित्वोक्तेर्नपाद्यमिति स एव । किंचिदत्वेतिकाकिन्यादक्षिणामितिकल्पतरुः । यत्तुदानहेमाद्रौ—सुवर्णरजतंताम्रंतंदुलाधान्यमेवच । नित्यश्राद्धंदेवपूजासर्वमेतदद क्षिणमिति । यदपिव्यासः—तत्तुपाद्पुरुषज्ञेयंदक्षिणापिंडवर्जितमिति । यदप्यपरार्केप्रचेताः—नावाहनाग्नौकरणेनपिंडानांविसर्जनम् । अनुव्रज्योदक्षिणाचत्रिभ्यश्चातिथिकल्पनमिति । तत्रदक्षिणाभावोद्विजानुपवेशनपक्षइतिपृथ्वीचंद्रः । त्रिभ्योधिकस्यनित्यश्राद्धेभोजनं किंत्वतिथिकल्प्यमित्यर्थः । पण्मुख्याइतिदिवोदासः । दक्षिणाविकल्पइतिमदनरत्नेमात्स्ये—यद्येकंभोजयेद्विप्रंत्रीनुद्दिश्यपितॄंस्तथा । छंदोगपरिशिष्टेच—एकमप्याशयेद्विप्रंपित्रर्थंपांचयज्ञिके । शौनकः—आर्चन्नत्रजपेन्मंत्रंदशवारंसदाबुधः । नित्यश्राद्धंयदान्यूनंकुरुते नात्रसंशयः । नित्यश्राद्धाशक्तौमनुः—भिक्षांवापुष्कलंवापिहंतकारमथापिवा । असंभवेसदादद्यादुदपात्रमपिद्विजे । इति ।

अथप्रयोगः । आचम्यप्राणानायम्यापवित्रःपवित्रोवेतिपुंडरीकाक्षंस्मृत्वागायत्रींपठित्वाप्राङ्मुखोदेशकालौसंकीर्त्यदक्षिणामुखःप्राचीना वीती सव्यंजान्वाच्यास्मत्पितृपितामहप्रपितामहानाममुकशर्मणामुकगोत्राणां वसुरुद्रादित्यस्वरूपाणांसपत्नीकानांमातामहानांचैवंविधानांनित्य श्राद्धमहंकरिष्यइतिसंकल्प्य संकल्पोत्तरमपसव्यादीतिपृथ्वीचंद्रः । पित्रादीनांमातामहादीनांचेदमासनमितिद्विगुणभुग्नंकुशंवामतोदत्वागंधा दिदत्वामंडलेनिहितंभस्मादिनावेष्ट्यपरिविष्यगायत्र्याभ्युक्ष्यपात्रमालभ्यपृथिवीतइतिपठित्वेदंविष्णुरितिपंचभिर्द्विजांगुष्ठंहविपिनिवेश्यवामेनपा णिनापात्रमालभ्य नामगोत्रोच्चारणपूर्वंपित्रादिभ्यःसपत्नीकेभ्यइदमन्नंयथाशक्तिसोपस्करममृतरूपेणस्वधासंपद्यतांकव्यंनममेतित्यजेत् । एवंमाता महेभ्योपि ।कल्पतरूरप्येवम् । त्रेधाविभज्यान्नंयुष्मभ्यंनमइतिविशेषमाह । इदमन्नंतुभ्यंस्वधेतिप्रत्येकंपड्भ्योनमःपितृभ्यइतिपड्भ्यःसकृद्वा त्यजेदितिश्रीदत्तः । गायत्रीमष्वितिजपित्वापोशनंदत्वागायत्रींपठित्वाभोजनोत्तरंतृप्तान्पृष्ट्वोत्तराचमनंदत्वासुप्रोक्षितादिकृत्वादक्षिणांदत्वाअ

दत्वावाविसर्जयेत् । भोक्तृभावेन्नंभिक्षवेगोभ्योवादद्यात् अग्नौजलेवाक्षिपेत् । **दिवोदासीयेगृह्यांतरे**—सहचेदश्नीयात्पूर्वमेवस्वधाक्षय्यं स्वस्तीतिचेदित्युक्तेसहाशनंनमुख्यम् इतिनित्यश्राद्धम् ।

अथमनुष्ययज्ञः । सचमनुष्यभोजनात्मकः । यन्मनुष्येभ्योददातीत्याश्वलायनसत्रात् । नियुज्यैकमनेकंवाश्रोत्रियंप्राङ्मुखं सदा । निवीतीतद्गतमनाऋषीन्ध्यायन्समाहितः इति **चंद्रिकायांनारायणोक्तेः** । ऋषीन् सनकादीन्मनुष्यान् । तत्राप्यतिथिभोजनं मुख्यम् । **यत्तयाज्ञवल्क्यः**—भोजयेच्चागतान्कालेसखिसंबंधिबांधवानितितदतिथेर्भोजनोत्तरमपिपंक्तौसख्यादयोभोज्याइत्येतदर्थं । मनुष्ययज्ञार्थमथितिंभोजयेदित्यापस्तंबपरिशिष्टात् । पितृभ्योदद्यात्ततोतिथीन्भोजयेदितिवसिष्ठस्मृतेर्नित्यश्राद्धोत्तरंमनुष्ययज्ञइत्या **चारादर्शः**। **कल्पतरौमदनरत्नेचैवम्** । नित्यश्राद्धात्पूर्वमनुष्ययज्ञइतिदिवोदासः । अतिथ्यभावेन्येनापिब्राह्मणेनमनुष्ययज्ञसिद्धिः । अहरहर्ब्राह्मणेभ्योदद्यान्मूलफलशकेभ्योऽप्येवंमनुष्ययज्ञमाप्नोतीतिबौधायनोक्तेः । तत्राशक्तौचंद्रिकायांनारायणः—अशक्तावन्नमुद्धृत्यहतेत्येवंप्रकल्पयेत् इति ॥ ॥ यत्किंचिन्मनुष्यभोजनेनहुंतकारादिनावाकृतेपिमनुष्ययज्ञेऽतिथिभोजनमावश्यकम्—अतिथिर्गृहमभ्येत्यस्वप्रतिनिवर्तते । असत्कृतोनिराशश्चससद्योहंतितत्कुलमितिमाधवीयेदेवलोक्तेः । विष्णुपुराणे—ततोगोदोहमात्रंवैकालंतिष्ठेद्गृहांगणे । अतिथिग्रहणार्थायतदूर्ध्वंवायथेच्छया । अतिथिंतत्रसंप्राप्तंपूजयेत्स्वागतादिना । **अतिथिलक्षणं व्यासः**—मुहूर्तस्याष्टमंभागमुद्दीक्ष्योह्यतिथिर्भवेत् । दूराच्चोपगतंश्रांतंवैश्वदेवउपस्थितम् । अतिथिंतंविजानीयान्नातिथिःपूर्वमागतः । **मनुः**—एकरात्रंतुनिवसन्नतिथिर्ब्राह्मणःस्मृतः । नैकग्रामीणमतिथिंविप्रंसांगतिकंतथा । उपस्थितंगृहेविद्याद्भार्यायत्राग्नयोपिच । **शातातपः**—अचिंतितमनाहूतदेशकालोपस्थितम् । अतिथिंतंविजानीयान्नातिथिःपूर्वमागतः । **यमः**—तिथिपर्वोत्सवाःसर्वेत्यक्तायेनमहात्मना । सोऽतिथिःसर्वभूतानांशेषानभ्यागतान्विदुः । त्रयीयतिर्वैकरात्रंनिवसन्नुच्यतेऽतिथिः । **श्राद्धहेमाद्रौशातातपः**—प्रियोवायदिवाद्वेष्योमूर्खःपंडितएववा । प्राप्तस्तुवैश्वदे

वांतेसोऽतिथिःस्वर्गसंक्रमः। **चंद्रोदयेपाद्मे**—देशंनामकुलंविद्यांपृष्ट्वायोऽन्नंप्रयच्छति। नसततफलमावाप्नोतिदत्वास्वर्गंनगच्छति। **मनुः**—ब्राह्मणस्यनत्वतिथिर्गृहेराजन्यउच्यते। वैश्यःशूद्रःसखाचैवज्ञातयोगुरुरेवच। यदित्वतिथिधर्मेणक्षत्रियोगृहमाव्रजेत्। भुक्तवत्सुचविश्रेषुकामंतमपिभोजयेत्। वैश्यशूद्रावपिप्राप्तौकुटुंबेतिथिधर्मिणौ। काममिच्छया नत्ववश्यं। कुटुंबेतद्वदितिगृहे नप्रवासादौ। **आपस्तंबः**—शूद्रमभ्यागतंकर्मणिनियुंज्यादथास्मैदद्यादासावाराजकुलादाहृत्यातिथिवच्छूद्रंपूजयेयुरिति। राजकुलं स्वस्वामिगृहम्। **पूजामंत्रमाहपराशरः**—अतिथेऽमरदेहस्त्वमुत्तारार्थमिहागतः। संसारपंकमग्नंमामुद्धरस्वाघनाशन। अतिथिबहुत्वेविशेषमाहतुर्बोधायनशंखौ—ब्राह्मणक्षत्रियविट्शूद्रानभ्यागतान्यथाशक्त्यापूजयद्यदिबहूनांनशक्नुयादेकस्मैगुणवतेदद्याद्योवाप्रथममागतःस्याच्छ्रोत्रियस्तस्माइति। **आपस्तंबः**—अतिथिंनिराकृत्योपोष्यश्वोभूतेयथामनसंतर्पयित्वासंसाधयेदिति। संसाधयेत्प्रेषयेत्। **पराशरः**—यतिश्चब्रह्मचारीचपक्कान्नस्वामिनावुभौ। तयोरन्नमदत्वातुभुक्त्वाचांद्रायणंचरेत्। दद्याच्चभिक्षात्रितयंपरिव्राट्ब्रह्मचारिणाम्। इच्छयावाततोदद्याद्विभवेसत्यवारितम्। **कौर्मे**—भिक्षांचभिक्षवेदद्याद्विधिवद्ब्रह्मचारिणे। **भिक्षूनाहव्यासः**—ब्रह्मचारीयतिश्चैवविद्यार्थीगुरुपोषकः। अध्वगःक्षीणवृत्तिश्चपडेतेभिक्षुकाःस्मृताः। वैश्वदेवात्पूर्वमप्येतेपूज्याः। अकृतेवैश्वदेवेतुभिक्षुकेगृहमागते। वैश्वदेवार्थमुद्धृत्यभिक्षांदत्वाविसर्जयेत्। वैश्वदेवकृतंदोषंशक्तोभिक्षुर्व्यपोहितुम्। नतुभिक्षुकृतंदोषंवैश्वदेवोव्यपोहतीतिव्यासोक्तेः। **चंद्रोदयेशातातपः**—ग्रासमात्राभवेद्भिक्षाचतुर्ग्रासंतुपुष्कलम्। पुष्कलानिचचत्वारिहंतकारःप्रकीर्तितः। **मदनरत्नेप्रकारांतरम्**—ग्रासमात्राभवेद्भिक्षाअग्रंग्रासचतुष्टयम्। अग्रंचतुर्गुणीकृत्यहंतकारोविधीयते। मयूरांडप्रमाणोग्रासइतिमिताक्षरा। **गौतमस्तु**—ग्रासप्रमाणस्याविकारेणेति। कुक्कुटांडार्द्रामलकप्रमाणमप्युक्तंस्मृत्यंतरे। **शातातपेनप्रकारांतरमु**

---

१ तत्पदासः स्वस्वामिगृहादागत्य।

क्तम्। यावन्मात्राशनोवास्याद्भुताशीस्नातकोद्विजः। तस्यान्नस्यचैतुर्भागंहंतकारंविदुर्बुधाः। हंतकारादिदानंमनुष्यभोजनेकृतेपिनित्यमितिकेचित्। मनुष्यभोजनाशक्तावित्यन्ये। **ब्राह्मे**—यःपात्रपूरणींभिक्षांयतिभ्यःसंप्रयच्छति। विमुक्तःसर्वपापेभ्योनासौदुर्गतिमाप्नुयात्। **व्यासः**—यतिहस्तेजलंदद्याद्भैक्षंदद्यात्पुनर्जलम्। तद्भैक्षंमेरुणातुल्यंतज्जलंसागरोपमम्। पाखंडेभ्योपिभिक्षांदद्यादित्युक्तंचंद्रोदयेब्राह्मे—तेभ्योदेयं[1] गृहाद्बहिरिति। **विष्णुः**—भिक्षुकामावेऽन्नंगोभ्योदद्यादग्नौवाक्षिपेदिति। **प्रोषितभर्तृकायाःपराशरः**—भार्याभोजनवेलायांभिक्षाःसप्तषंचवा। दत्त्वाशेषंसमश्नीयात्सायंसाभृत्यकैःसह॥

अथगोग्रासः। सचशिष्टाचारात्पंचयज्ञोत्तरमितिमदनरत्ने। **प्रभासखंडे**—तृणान्नाद्यपरागावःकर्तव्याभक्तितोऽन्वहम्। अकृत्वास्वयमाहारंकुर्वन्प्राप्नोतिदुर्गतिम्। आत्माहारप्रमाणेनप्रत्यहंगोषुदीयते। आत्माहारप्रमाणान्नाशक्तौचंद्रोदयेब्रह्मांडे—सौरभेय्यःसर्वहिताःपवित्राःपुण्यराशयः।प्रतिगृह्णंतुमेग्रासंगावस्त्रैलोक्यमातरः। दद्यादनेनमंत्रेणगवांग्रासंसदैवहि। सदैवेत्युक्तेरकरणेप्रत्यवायश्रुतेश्चायंनित्यइत्याचारादर्शः। **प्रभासखंडे** मंत्रांतरमुक्तं—सौरभेयीजगत्पूज्यादेवीविष्णुपदेस्थिता। सर्वदेवमयीग्रासंमयादत्तंप्रतीक्षतु। अयंकाम्यश्च—तृणोदकेनसंयुक्तंयःप्रदद्याद्गवाह्निकम्। कपिलाशतदानस्यफलंविद्यान्नसंशयइतिचंद्रोदयेभविष्यात्। इतिश्रीमन्नारायणभट्टात्मजसूरिरामकृष्णभट्टसूनुदिनकरभट्टानुजलक्ष्मणभट्टकृतावाचाररत्नेपंचमहायज्ञप्रकरणम्॥

अथभोजनविधिः। **वसिष्ठः**—वारुण्यांभोजनगृहंनैर्ऋत्यांसूतिकागृहम्। इति। **याज्ञवल्क्यः**—बालःसुवासिनीवृद्धगर्भिण्यातुरकन्यकाः। संभोज्यातिथिभृत्यांश्चदंपत्योःशेषभोजनम्[2]। कन्यानूढा। **मनुविष्णू**—सुवासिनींकुमारांश्चरोगिणोगर्भिणीस्तथा। अतिथिभ्योग्रएवै[3]

---

१ चतुर्थांशम्। २ तेभ्योदद्याद्गृहात्।३ इदंभोजनंभृत्यादिवर्गेभुक्तेपश्चादेकातेविधेयं-दंपत्यो शेषभोजनमिति **याज्ञवल्क्योक्तेः**। आहारनिर्हारविहारयोगा.सदैवसद्भिर्विजनेविधेयाइतिवचनात्।

तान्भोजयेदविचारयन् । अग्रेप्रथमम् । नात्रयथाश्रुतेतात्पर्यं किंत्वेतेपुभुक्तवत्सुखयंभुंजीतेत्यत्रेतिकल्पतरुः । वयंत्वेवकारानुपपत्तेर्यथाश्रुते एवतात्पर्यं अतएवाविचारयन्नित्युक्तमितिब्रूमः । **याज्ञवल्क्यः**—बालः(स्व)सुवासिनीवृद्धगर्भिण्यातुरकन्यकाः । संभोज्यातिथिभृत्यां श्चदंपत्योःशेषभोजनम् । भोजयेच्चागतान्कालेसखिसंबंधिबांधवान् । शक्तावितम् । तथाच**मार्कंडेये**—कुटुंबिनोभोजनीयाःस्वसंविभवे सति । **आचारादर्शेनंदिपुराणे**—यतेद्ब्राह्मणपूर्वंतुभोक्तुमन्नंसदागृही । **पराशरः**—एकद्वित्रिचतुर्विप्रान्भोजयेत्स्नातकान्द्विजः । **शंखः**—पंचार्द्रोभोजनंकुर्याद्भूमौपात्रंनिधायच । उपवासेनतत्तुल्यंमनुराहप्रजापतिः । उपलिप्तेशुचौदेशेपादौप्रक्षाल्यवैकरौ । आचम्यार्द्रान नोह्येवंपंचार्द्रोभोजनंचरेत् । आचमनंचभोजनशालायावहिःकार्यम् । यस्तुभोजनशालायांभोक्तुकामउपस्पृशेत् । आसनस्थोनचान्यत्रस विप्रःपंक्तिदूषकइतिचंद्रोदयेआपस्तंबोक्तेः । तस्माद्बहिरुपस्पृश्यआचांतःप्रविशेद्गृहमित्याचारादर्शेब्राह्मेच । **यमः**—आर्द्रपादस्तु भुंजानःशतंवर्षाणिजीवति । इति ॥

अथभोजनपात्राणि । चंद्रोदयेग्निपुराणे—भुंजीतपात्रेसौवर्णेपद्मिन्यादिदलादिके । **माधवीयेमेधातिथिः**—सौवर्णेराजतेताम्रे पद्मपत्रपलाशयोः । भुंजीतेतिशेषः । **चंद्रोदयेत्रिः**—पंचाशत्पलिकंकांस्यंद्व्यधिकंभोजनायवै । गृहस्थैस्तुसदाकार्यमभावेहेमरौप्ययोः । तत्रैवप्रचेताः—पलाद्विंशतिकान्नार्वागतऊर्ध्वंयदृच्छया । **चंद्रिकायांपैठीनसिः**—एकएवतुयोभुङ्क्तेविमलेकांस्यभाजने । भाजनेभोजने चैवत्रिरात्रंफलमश्नुते । चत्वारितस्यवर्धतेआयुःप्रज्ञायशोबलम् । भोजनंकांस्यपात्रेणयःकरोतिसकृद्द्विजः । वर्धतेतस्यचत्वारिआयुःकांतिर्यशोब लम् । **हेमाद्रौहारीतः**—राजतपार्णताम्रकांस्यपात्राणिभोजनेइति । ताम्रविधिर्गृहस्थेतरपरः । ताम्रपात्रेनभुंजीतभिन्नकांस्येमलाविले । पलांश

१ वल्लीपलाशपत्रेषुइतिपाठः ।

पद्मपत्रेपुगृह्णीभुक्त्वैदंचरेदितिपृथ्वीचंद्रः । ताम्रविधिःश्राद्धपरइत्यन्ये । **यत्त्वपरार्के**—सप्तम्यांनैवकुर्वीततताम्रपात्रेचभोजनमिति तत्पूर्वोक्तनिषेधोपसंहारार्थंदोषाधिक्यार्थंवा । ताम्रवत्पैत्तलेपिनिर्णयः । यत्तु—नायसान्यपिकार्याणिपैत्तलानिनतुकचिदितिश्राद्धहेमाद्रौवाराहं तत्प्रकरणाच्छ्राद्धपरं । भिन्नदोषोनकांस्येएवकिंतुतत्रदोषाधिक्यम् । नकाष्णायसे नमृत्पात्रे नभिन्नावकीर्णेइतिहारीतोक्तेः । शूद्रभाजनभिन्नभाजनेभुक्त्वोपवासोभिन्नकांस्येत्रिरात्रमितिस्मृत्यर्थसाराच्चभिन्नदोषस्ताम्राद्यन्यपरः । ताम्ररजतसुवर्णशंखमुक्ताश्मस्फटिकानांभिन्नमभिन्नमितिपैठीनसिस्मृतेः। **स्कांदेकार्तिकमाहात्म्ये**—पत्रभोजीभवेद्दूर्जेकांस्यंत्याज्यंप्रयत्नतः । तथा—योव्रतीकांस्यभोजीस्यान्नसव्रतफलंलभेत् । **ज्योतिर्निबंधे**—भोज्यपात्रंसुधासिंधौघटयेद्वासमाहरेत्[1] । तत्रान्नप्राशनप्रोक्तेकालेभोजनमाचरेत् । सुधासिंधौ सोमे । **स्मृतिरत्नावल्याम्**—वल्लीपलाशपत्रेपुस्थलजेपुष्करेतथा । गृहस्थस्तुनचाश्नीयाद्भुक्त्वाचांद्रायणंचरेत् । करेकर्पटकेचैवआयसेताम्रभाजने । वटार्काश्वत्थपत्रेपुभुक्त्वाचांद्रायणंचरेत् । **चंद्रिकायांपैठीनसिः**—वटार्काश्वत्थपर्णेपुकुंभीतिंदुकजेपुच । श्रीकामोनैवभुंजीतकोविदारकरंजयोः । **आग्नेये**—वटार्काश्वत्थधवलसर्जभल्लातकीस्त्यजेत् । **स्कांदेप्रभासखंडे** शूद्रंप्रक्रम्य—मध्यपत्रेनभुंजीतब्रह्मवृक्षस्यभामिनि । प्रचेताः—मृन्मयेपर्णपृष्ठेवाकार्पासेतांतवेतथा । नाश्नीयान्नपिवेच्चैवकरेणांजलिनापिच । यस्तुनकदलीपत्रमितिहेमाद्रौनिषेधःसश्राद्धपरः । **नृसिंहांबुधिमहोदधौगोविंदार्णवेच**—करंजपिप्पलवटप्लक्षकुंभ्यर्कतिंदुकाः । एषांपत्रेपुनाश्नीयात्कोविदाराम्रयोरपि । विपर्यस्तेपुपत्रेपुतिर्यक्पत्रेचदारुजे । अजपीब्रह्मपत्रेपुशूद्रस्यूतेतदाहृते । कंटकैःसीवितेपत्रेतथावेणुदलेनच । अत्रमूलंमृग्यम् । **चंद्रिकायां पुराणे**—पालाशेपुचपत्रेपुमध्यमेषुविशेषतः । यःकरोत्यशनंतस्याजापत्यंदिनेदिने । यदीच्छत्यूर्ध्वगामित्वंपरंस्थानंचशाश्वतम् । पत्रेपर्णेषु भोक्तव्यंमासमेकंनिरंतरम् । इति ॥

---

१ घटयेच्चारमाहरेत् । २ पर्णपत्रेषु ।

अथभोजनेदिगादिनियमाः । यमः—प्राङ्मुखोन्नानिभुंजीतसूर्याभिमुखएवच । **ब्राह्मे**—प्राङ्मुखोदङ्मुखोवापिस्वाचांतोवाग्यतः शुचिः । भुंजीतान्नंचतच्चित्तोह्यंतर्जानुःसदानरः । **यत्तुकौर्मे**—योभुंक्तेवेष्टितशिरायश्चभुङ्क्तेउदङ्मुखः । सोपानत्कश्चयोभुङ्क्तेसर्वंविद्यात्तदासुर मिति । तत्रविकल्पइतिकेचित् । भोजनेउदङ्मुखत्वादिनिषेधोनिष्कामपरइत्याचारादर्शः । पुत्रिपरइतिवयम् । पुत्रवान्स्वगृहेनित्यंनाश्नी यादुत्तरामुखइतिस्मृतिमंजर्यांवचनात् । **प्रयोगपारिजातेस्मृतिमंजर्याम्**—पितरौजीववंतौचेन्नाश्नीयादुत्तरामुखः । तयोस्तुजीव वानेकस्तथैवनियमःस्मृतः । **विष्णुपुराणे**—विशुद्धवदनःप्रीतोभुंजीतनविदिङ्मुखः । **मनुः**—आयुष्यंप्राङ्मुखोभुङ्क्तेयशस्यंदक्षिणामुखः । श्रियंप्रत्यङ्मुखोभुङ्क्तेऋतंभुङ्क्तेउदङ्मुखः ।आयुपेहितमायुष्यं । श्रियंऋतंचेच्छन्नितिशेषः । सकृदनुष्ठानेनापिफलमितिकेचित् । यावज्जीवंनियमः। फलायविधीयतइत्यन्ये । **कौर्मे**—नांतरिक्षेनचाकाशेनचदेवालयादिपु । भुंजीतेतिशेषः । **हारीतः**—भूमावेवनिदध्यान्नोपरिपात्राणीति । **वसिष्ठः**—नोत्संगेनभुविनपाणौनाकाशइति । पात्राणिनिदध्यादितिशेषः । भुविकेवलायाम् । अतएव**आपस्तंबः**—नवाविभुंजीतकृतभूमौतु भुजीतेति । कृतत्वंनावोमृत्प्रक्षेपेणेतिकल्पतरुः । कृतायांगोमयादिनासंस्कृतायामितिहरदत्तः ॥

मंडलविचारः । मदनरत्नेब्राह्मे—अकृत्वामंडलंयेतुभुंजतेऽधमयोनयः । तेपांतुयक्षरक्षांसिहरंत्यन्नंसतद्बलम् । तत्रैवशंखः— आदित्यावसवोरुद्राब्रह्माचैवपितामहः । मंडलान्युपजीवंतितस्मात्कुर्वीतमंडलम् । चतुष्कोणंद्विजाग्र्यस्यत्रिकोणंक्षत्रियस्यतु । मंडलाकृतिवैश्य स्यशूद्रस्याभ्युक्षणंस्मृतम् । **मदनपारिजातेव्यासः**—चतुरस्रंत्रिकोणंचवर्तुलंचार्धचंद्रकम् । कर्तव्यमानुपूर्व्येणब्राह्मणादिपुमंडलम् । तत्रैवब्राह्मे—मंडलंगोमयेनस्यादथवागौरमृत्तया। **आचारादर्शेबौधायनः**—भस्मनावारिणावापिकारयेन्मंडलंततः । **अग्निस्मृतौ**— नासंदीभोजनेशस्तावित्प्राणांतुकदाचन । यत्तु**स्मृत्यर्थसारे**–प्राणाहुत्यूर्ध्वमुत्क्षिप्यपात्रंयंत्रेविनिक्षिपेदिति तत्क्षत्रियादिपरं श्लोकेविप्रग्रहणादि

१ आसंदीलौहंत्रिपदमुपवेशनदीपस्थापनादिसाधनम् ।

तिकेचित् । पंचग्रासांस्तुभुक्त्वादौकचिद्देशमनिसंकटे । पात्रमुद्धृत्यशेषंतुभक्षयेत्सांकराद्भयादितिब्राह्मोक्तेः । आसंदीआपत्परेतिमदन रत्ने । श्राद्धेआसंदीनिषेधोहेमाद्रौब्राह्मे—पित्र्येकर्मणिभुंजानोभूमेःपात्रंनचालयेत् ॥ स्मृत्यर्थसारे—नैयत्रिकायांयतिर्मितीमक्षचारीविधवाभुंजीतेति ।

भोजनकालविचारः । **श्रुतौ**—सायंप्रातराश्येवस्यादिति । **गौतमः**—सायंप्रातस्त्वन्नमभिपूजितमनिंदन्भुंजीतेति । प्रातःशब्दःपंचमभागपरः । सायशब्दोघटिकात्रयोर्ध्वरात्रिपरः । चत्वार्येतानिकर्माणिसंध्यायांपरिवर्जयेत् । आहारंमैथुनंनिद्रांस्वाध्यायंचचतुर्थकमितिशातातपोक्तेः । मुनिभिर्द्विरशनमुक्तंविप्राणांमर्त्यवासिनांनित्यम् । अहनिचतथातमस्विन्यांसार्धप्रहरयामांतइतिछंदोगपरिशिष्टात् । अत्र सार्धप्रहरानुज्ञाआपद्विषया । निशायाःप्रथमेयामेजपयज्ञार्चनादिकम् । स्वाध्यायोभोजनंप्रोक्तंवर्जयित्वामहानिशामिति शौनकोक्तेः । महानिशाशब्देनयामद्वयमुच्यतइत्युक्तंप्राक् । दिवाचनभोजनद्वयम् । सायंप्रातर्द्विजातीनामशनंश्रुतिचोदितम् । नांतराभोजनंकुर्यादग्निहोत्रसमोविधिरितियमोक्तेः । द्विजग्रहणाच्छूद्रस्यनायंनियमः । अंतरानिषेधादेवरात्रावपिभोजनद्वयंन । अत एवापस्तंबेनहरदत्तेनचद्विर्भोजनविधिःपरिसंख्येत्युक्तं । परिसख्यात्वोक्तेरेतन्मतेद्वितीयभोजनंनावश्यकम् । विज्ञानेश्वरेणतुद्विर्भुंजीयादेवेतिनियमविधित्वोक्तेः शक्तस्यद्विर्भोजनमावश्यकम् । चंद्रिकाप्येवम् । अशक्तौतुयत्किंचिदल्पंभक्ष्यम् । औपवस्तमेवैकालांतरेभोजनमित्यापस्तंबोक्तेः । औपवस्तंउपवासस्तत्तुल्यमितिहरदत्तः । तदशक्तौअद्भिर्वासायमिति बौधायनोक्तंज्ञेयम् । नांतरेतिफलमूलान्यपरम् । दिवाचनांतराभुंजीतान्यत्रमूलफलेभ्यइत्यापस्तंबोक्तेः । आचारादर्शेतुद्विरशननियमःप्राणाग्निहोत्रमात्रपरः अग्निहोत्रसाम्यादित्युक्तम् । साम्योक्तिरुपासनापरेतिवाचस्पत्ये । साग्निकब्रह्मचारिणोस्तुनद्विर्भोजननियमः । आहिताग्निरनड्वां

१ एकस्मिन्काले ।

श्रमब्रह्मचारीचतेत्रयः । अश्नंतएवसिध्यंतिनैपांसिद्धिरनश्नताम्इत्यपरार्केवसिष्ठस्मृतेः । ब्रह्मचारीतुउपकुर्वाणकोनैष्ठिकश्च । अनड्डत्प
देनकालानियमउक्तइत्युज्ज्वला । यतु—ब्रह्मचारिणःसायंप्रातर्भिक्षेथाइतिनियमःसभिक्षायाएवनभोजनस्य । गृहस्थोब्रह्मचारीचयोनश्नंस्तु
तपश्चरेत् । प्राणाग्निहोत्रलोपेनअवकीर्णीभवेत्तुसइत्यपरार्केबौधायनोक्तेरुपवासादिरनयोर्न । एकादश्यादेस्तुनित्यत्वात्तयोरुपवासत्वा
भावाद्यानुष्ठानम् । अत्रगृहस्थःसाग्निः । अनग्नयस्तुयेविप्रास्तेषांश्रेयोविधीयते । व्रतोपवासनियमैर्नानादानैस्तथानृपेतिमदनरत्नेभविष्यो
क्तेः । अपरार्केयौधायनः—प्राणाग्निहोत्रमंत्रांस्तुनिरुद्धेभोजनेजपेत् । त्रेताग्निहोत्रमंत्रांस्तुद्रव्यालाभेयथाजपेत् । बृहस्पतिः—दि
वानिद्रापरान्नंचपुनर्भोजनमैथुने । क्षौद्रंकांस्यामिषंतैलंद्वादश्यामष्टवर्जयेत् । पुनर्भोजनमध्वानंभारमायासमैथुने । श्राद्धकृच्छ्राद्धभुक्चैवस
र्वमेतद्विवर्जयेत् । हेमाद्रौव्यासः—आदित्येहनिसंक्रांतावसितैकादशीग्रहे । व्यतीपातेकृतेश्राद्धेपुत्रीनोपवसेद्गृही । अपरार्के—अयनेर
विसंक्रांतौरविवारेषपर्वसु । मृताहेजन्मदिवसेनकुर्याद्रात्रिभोजनम् । हेमाद्रौजातूकर्ण्यः—अहन्येवतुभोक्तव्यंकृतेश्राद्धेनराधिप । हेमाद्रौ
कौर्मे—शाकंमांसंमसूरांश्चपुनर्भोजनमैथुने । घृतमत्स्यंबुपानंचदशम्यांसप्तसंत्यजेत् । क्वचिद्व्रतपरमितिहेमाद्रिः । दशम्यांपुनर्भोजननिषेधः
काम्यैकादशीव्रते । सायमाद्यंतयोरह्नोःसायंप्रातश्चमध्यमे । उपवासफलंप्रेप्सुरित्युक्तेरितिहेमाद्रिमाधवकालादर्शनिर्णयामृतादयः ।
चंद्रिकायांतुनित्येपिफलसत्वान्नित्यपरत्वमपीत्युक्तम् । इतिविज्ञायकुर्वीतावश्यमेकादशीव्रतम् । विशेषनियमाशक्तोहोरात्रंभुजिवर्जितइतिमाध
वीयेब्रह्मवैवर्तात् । मृताष्टम्योर्दिवाभुक्त्वारात्रौभुक्त्वाचपर्वसु । एकादश्यामहोरात्रंभुक्त्वाचांद्रायणंचरेत् । अत्र—शुक्लाष्टमीकृष्णचतुर्दशी
चदर्शोऽधराकारविसंक्रमश्चेतिग्रंथांतरेशुक्लाष्टमीकृष्णचतुर्दश्योःपर्वत्वात्कृष्णाष्टमीशुक्लचतुर्दशीपरंमृताष्टमीपदम् । तेनतयोरेवदिवाभोजनंनेत्युक्तं

१ भोजनंत्वारंवारम् । २ तपोरूपत्वाभावादितिपाटः । ३ प्राणायस्याहेत्यादयः प्राणाग्निहोत्रमंत्राः । ४ एकादशीदिने । ५ दशमीद्वादश्योः । ६ एकादश्यां ।

निर्णयामृते । स्मृत्यर्थसारे—अष्टमीचतुर्दश्योर्नक्तंकार्यमेकभक्तंचेति । अत्रकेचिदुपवासात्पूर्वदिनेदशम्यल्पत्वेदशमीमध्यएवभोजनं कार्यम् । एकादश्यांनभुंजीतेत्येकादश्यांभोजननिषेधात् । निषेधस्तुनिवृत्त्यात्माकालमात्रमपेक्षतइतिन्यायाच्चेत्याहुः । तन्न । दशम्यामेकभक्तस्तुमांसमैथुनवर्जितइतिचंद्रिकायांदेवलेनमध्याह्नकालिकैकभक्तव्रतविधानाद्विधिस्पष्टेचनिषेधानवकाशात् द्वादश्यादिवन्माध्याह्निकापकर्षकाभावाच्च । नचायंनव्रतविधिःकिंतुपुनर्भोजननिषेधमात्रमितिवाच्यम् । निषेधकल्पनेमानाभावात् । हविष्याशनमध्याह्नाद्यप्राप्तिप्रसंगात् । सर्वत्रैकभक्तादौतथाप्रसंगाच्च । नचहविष्यादिकाम्यैकादशीव्रतमात्रांगं संकोचेमानाभावात् । प्रयोगपारिजातेदेवलः—श्राद्धंकृत्वातुयो मर्त्योनचभुङ्क्तेकदाचन । देवाहविर्नगृह्णंतिकव्यानिपितरस्तथा । एकादश्यादौतुसएव—उपवासोयदानित्यःश्राद्धंनैमित्तिकंभवेत् । उपवासंतदाकुर्यादाद्यायपितृसेवितम् । प्रयोगपारिजातस्त्वेकादशीमात्रपरम् । मातापित्रोःक्षयेप्राप्तेभवेदेकादशीयदा । संभाव्यपितृदेवांश्चआजिघ्रेत्पितृसेवितमितिकात्यायनोक्तस्तेनशिवरात्र्यादौभोजनमेवेत्याह । पितृपदंजनकपरमिदं । तेनान्यश्राद्धेनावघ्राणम् । हेमाद्रिस्तु—चतुर्दश्यांयदाचैवश्राद्धंनैमित्तिकंतथा । उपवासंतदाकुर्यादाद्यायपितृसेवितमितिप्रभासखंडाच्छिवरात्रावप्यवघ्राणम् । एवंचयस्मिन्नुपवासेकृतेपुण्यंत्यक्तेमहत्पापंतत्रावघ्राणम् । यत्रद्वयमप्यल्पंतत्रायाचितमेकभक्तंवाकार्यम् । उपवासदिनेश्राद्धकथंचिद्यदिजायते । उपवासेश्वमेधाख्यराजसूयमयाचिते । वाजपेयंलभेद्भोक्ताएकभक्तेऽग्निहोत्रजमितिप्रभासखंडादित्याह ॥

अथभक्ष्याभक्ष्यनिर्णयः । याज्ञवल्क्यः—अदत्तमग्निहीनस्यनान्नमद्यादनापदि । कदर्यबद्धचौराणांक्लीवरंगावतारिणाम् । वैणाभिशस्तवार्धुष्यगणिकागणदीक्षिणाम् । अग्निहीनःशूद्रः । शूद्रान्ननिषेधोऽसच्छूद्रपरः । गौर्भूमिरन्नंहोमार्थंसच्छूद्रस्यगृहेगृहेइतिब्राह्मादितिटोडरानंदः । तन्न । राजान्नंतेजआदत्तेशूद्रान्नंब्रह्मवर्चसम् । आयुःसुवर्णकारान्नंयशश्चर्मावकर्तिनः । भुक्त्वायोन्यतमस्यान्नममत्याक्षपणंत्र्यहमिति

मनूक्तेः । आत्मानंधर्मकृत्यंचपुत्रान्दारांश्चपीडयेत् । लोभाद्यःपितरौभृत्यान्सकदर्यइतिस्मृतः । वद्धोवाचानिगडैश्च । गणोत्राविभक्तभिन्नानाम् । अन्यथातेषामपिस्वान्नाभक्षणापत्तेः । चिकित्सकातुरक्रुद्धपूंश्चलीमत्तविद्विषाम् । क्रूरोग्रपतितव्रात्यदांभिकोच्छिष्टभोजिनाम् । अवीरास्त्रीस्वर्णकारस्त्रीजितग्रामयाजिनाम् । शस्त्रविक्रयिकर्मारतंतुवायश्ववृत्तिनाम् । नृशंसराजरजककृतघ्नवधजीविनाम् । चैलधावसुराजीविसहोपपतिवेश्मनाम् । पिशुनानृतिनोश्चैवतथाचाक्रिकवंदिनाम् । एषामन्नंनभोक्तव्यंसोमविक्रयिणस्तथा । क्रूरोभयानकः । उग्रःक्रूरकर्मेतिमिताक्षरा । राजन्याच्छूद्रायामुत्पन्नइतिमदनरत्ने । शंखः—भीतावगीतरुदितक्रंदितावधुष्टपरिभुक्तविस्मितोन्मत्तावधूतराजपुरोहितान्नानिवर्जयेदितिमदनरत्ने । यमः—स्वसुतान्नंतुयोभुङ्क्तेसभुङ्क्तेपृथिवीमलम् । तत्रैवविष्णुपुराणे—विष्णुंजामातरंभक्त्वातस्यकोपंनकारयेत् । अप्रजायांतुकन्यायांनाश्नीयात्तस्यवैगृहे । मनुः—उग्रान्नंसूतिकान्नंचपर्याचांतमनिर्दशम् । नाद्याच्छूद्रस्यपक्वान्नंविद्वान्श्राद्धिकोद्विजः । आददीतामभेवास्मादवृत्तावेकरात्रिकम् । सूतिकान्नंसूतिकामुद्दिश्यपक्वं । पर्याचांतमुत्तराचमनोत्तरंपात्रस्थितम् । पार्श्वाचांतमितिपाठेपंक्तिस्थेउत्थितेस्वपात्रस्थमपिनभक्ष्यम् ॥

निषिद्धभोजनेप्रायश्चित्तम् । शौनकः—अराड्वेजपेन्मंत्रंदशवारंनसंशयः । सीमंतेचयदाभुंक्तेमुच्यतेकलुपात्तदा । उपासानक्ताभूतंतुजपेद्दशजलेपिवा । प्रमादाद्यस्ततोभुङ्क्तेसूतकान्नमकल्मषम् । प्रविष्टःप्रजपेन्मंत्रंशतवारंशिवालये । सूतकान्नंयदाभुङ्क्तेतदापापात्प्रमुच्यते । पर्जन्यवातावर्गेचशतवारंजपेज्जले । सूतकस्यगृहेभुङ्क्तेतदापापात्प्रमुच्यते । इंद्रोअश्रायिमंत्रंचअयुतंचेन्नकल्मषम् । ज्ञानतोज्ञानतःस्पृष्ट्वाभुक्तिकालेरजस्वलाम् । इदंनमोजपेन्मंत्रंसहस्रंचेन्नदुष्कृतम् । ज्ञानतोज्ञानतोदृष्ट्वाभुक्तिकालेरजस्त्रियाः । अग्निनमाजपेन्मंत्रंदशकृत्वोविशेषतः । अंत्यजानांध्वनिंश्रुत्वापश्चाद्भुङ्क्तेनकल्मषम् । अज्येष्ठासोजपेन्मंत्रंदशवारंनकल्मषम् । श्वानादिदर्शनंकृत्वापश्चाद्भुङ्क्तेयदातदा । आयेतस्थुर्जपेन्मंत्रंदशवैविष्णुमंदिरे । हस्तदत्तंयदाभुङ्क्तेतदापापात्प्रमुच्यते । तेअज्येष्ठाजपेन्मंत्रंशतंविद्यालयेसदा । दिवाद्विर्भोजनंकृत्वातस्मान्मुच्येतकल्म-

पात् । हयोनप्रजपेन्मंत्रंशतवारंजलेतथा । रात्रौद्विर्भोजनंकृत्वाकल्मषाच्चप्रमुच्यते । त्यंसुमेषंजपेन्मंत्रंदशवारंशिवालये । अष्टम्यांवाचतुर्दश्यांदिवाभुङ्क्तेनकिल्बिषम् । सहिद्वरोजपेन्मंत्रंशतंवैविष्णुमंदिरे । एकादश्यामहोरात्रेभुङ्क्तेयदिचपातकम् । आपःपृणीतमंत्रंचशतवारंनकिल्बिषम् । रात्रौभुक्त्वावत्सरेतुमन्वादिपुयुगादिषु । अश्वाइवजपेन्मंत्रंदशवारंजलेपिवा । नित्यश्राद्धेयदाभुंक्तेतदापापात्प्रमुच्यते । मयोभूश्चजपेत्सूक्तंवृषोत्सर्गेतुरौद्रकम् । भुक्त्वायदिविनश्येतविंशद्वारंजलेतदा । त्वेपंगणंजपेन्मंत्रंदशवैविष्णुमंदिरे । व्यतीपातेयदाभुङ्क्तेतदादोषाद्विमुच्यते । आप्यायस्वजपेन्मंत्रंदशलक्षंशिवालये । सूर्यग्रहेयदाभुङ्क्तेतदापापात्प्रमुच्यते । अराइवेजपेन्मंत्रंदशवारंयदातदा । बहवश्चैकपात्रेषुभुंजतेतन्नकल्मषम् । अग्नेमरुद्भिर्मंत्रंचशतसंख्यंजपेद्यदि । भुंजतेसहपात्रेतुबहवोब्रह्मचारिणः । मानस्तोकेजपेन्मंत्रंशतवारंनकिल्बिषम् । प्रमादाज्ज्ञानतोभुङ्क्तेगणान्नंतुयदातदा । यज्ञायज्ञाजपेत्सूक्तंएकरात्रंजलेपिवा । गणकान्नंयदाभुङ्क्तेतदापापात्प्रमुच्यते । अच्छानइंद्रसूक्तंतुएकवारंजलेजपेत् । विधुरान्नंयदाभुङ्क्तेतदापापात्प्रमुच्यते । ईळेअग्निंजपेन्मंत्रंदशवारंयदातदा । पंचयज्ञविहीनस्यगृहेभुङ्क्तेनपातकम् । किमंगत्वाजपेन्मंत्रमयुतं वैजलेसुधीः । ज्ञानतोपियदाभुङ्क्तेकुष्ठान्नंचेन्नपातकम् । सत्येनोत्तभितामंत्रंजपेद्विष्ण्वालयेयदा । उच्छिष्टेतुयदाभुङ्क्तेतदामुच्येतकिल्बिषात् सहस्रवारंगायत्रींव्याहृतीभिःससंपुटाम् । किल्बिषान्नंयदाभुङ्क्तेदोषोनास्तितदाजपेत् । इति ।

शूद्रादेर्ग्राह्यवस्तूनि । अपरार्केसुमंतुः—गोरसंचवसक्तूंश्चैतिलंपिण्याकमेवच । अपूपान्भक्षयेच्छूद्राद्यच्चान्यत्पयसाकृतम् । **तथा**—कंदुपक्वंस्नेहपक्वंपायसंदधिसक्तवः । एतान्यशूद्रान्नभुजोभोज्यानिमनुरब्रवीत् । तत्रैव **कौर्मे**—कंदुपक्वानितैलेनपायसंदधिसक्तवः । द्विजैरेतानिभोज्यानिशूद्रैरेवकृतान्यपि । **मदनरत्नेंगिराः**—मांसंदधिघृतंधान्यंक्षीरमाज्यमथौषधम् । गुडोरसस्तथोदश्विद्भोज्यान्येता

---

१ घृतपक्वान्यपूपादीनि.

निनित्यशः । अमृतंचारनालंचकंदुकाःसक्तवस्तिलाः । सक्तुपदमनार्द्रपक्वस्योपलक्षणम् । **प्रायश्चित्तशूलपाणावंगिराः**—स्वपात्रे यतुविन्यस्तंदुग्धंयच्छतिनित्यशः । पात्रांतरेणतद्ग्राह्यंशूद्रात्स्वगृहमागतम् । शूद्रवेश्मनिविप्रेणक्षीरंवायदिवादधि । निवृत्तेननभोक्तव्यंशूद्रान्नंतदपिस्मृतम् । तच्चप्रोक्ष्यग्राह्यमितिशूलपाणिः ।

निषिद्धान्नादीनि । अपरार्केशातातपः—गोकारुकंदुशालायांतैलयंत्रेक्षुयंत्रयोः । अमीमांस्यानिशौचानिस्त्रीपुचानंतरेपुच । कंदुपक्वादिचकलौनिषिद्धम् । एतानिलोकगुप्त्यर्थंकलेरादौमहात्मभिः । निवर्तितानिकर्माणिव्यवस्थापूर्वकंबुधैरितित्रैवशातातपोक्तेः । **शंखः**—नापणीयान्नमद्यादिति । सएव—अपूपाःसक्तवोधानास्तक्रंदधिघृतंमधु । एतत्पण्येपुभोक्तव्यंभांडलेपोनचेद्भवेत् । **शूलपाणौ शातातपः**—घृतंतैलंपयःक्षीरंतथैवेक्षुरसोगुडः । शूद्रभांडस्थितंतक्रंतथामधुनदुष्यति । पयस्तुनवभांडस्थमेव । नवभांडेपुपानीयंशूद्रविट्क्षत्रजन्मनाम् । पेयंतदपिविप्राणांपयोदधितथैवचेति तत्रैवजावालोक्तेः । **शंखः**—घृतदधिपयस्तक्राणामाकरभांडस्थानामदोषइति । **याज्ञवल्क्यः**—अनर्चितंवृथामांसंकेशकीटसमन्वितम् । भुक्तंपर्युषितोच्छिष्टंश्वस्पृष्टंपतितेक्षितम् । उदक्यास्पृष्टसंघुष्टंपर्यायान्नंचवर्जयेत् । गोघ्रातं शकुनोच्छिष्टंपदास्पृष्टंचकामतः । अनर्चितमवज्ञातम् । वृथामांसमात्मार्थमेवपक्वं । उपलक्षणमेतत् । नपचेदन्नमात्मानइत्यात्मार्थमन्नमात्रपाकस्य निषेधात् । पित्राद्युच्छिष्टंभोज्यम् । मातापित्रोरयोच्छिष्टंकलौभुंजन्भवेत्सुखीतिचंद्रिकायामादिपुराणात् । पितुर्ज्येष्ठस्यभ्रातुरित्यप्येके । इति **आपस्तंबस्मृतेश्च** शुक्तंदध्यादिभिन्नम् । नपर्यायान्नमश्नीयान्नद्विःपक्वंनशुष्कंनपर्युषितमन्यत्रारागपाडवचुक्रदधिगुडगोधूमयवपिष्टविकारेभ्यइतिशंखोक्तेः । यस्यान्नस्यैकैकेनपाकेननस्वरूपसिद्धिस्तद्द्विःपक्वमपिभोज्यमिति**मदनरत्नेश्राद्धहेमाद्रौच** । एतेनयच्छाकादिसंकारार्थंजीरकादिसंस्कारेणयत्पुनःपच्यतेतत्पुनःपक्वमितिमदनरिजातोक्तिःपरास्ता । पाकादावेवसंस्कारेपुनर्नसंस्कारः । यस्तुव्यंजनादेरात्मविनिगमार्थंपु

नःसंस्कारःसवर्ज्यएवेतिमदनपारिजातः । अन्यदीयंस्वीयत्वेनदत्तंपर्यायान्नम् । शातातपः—केशकीटशुनास्पृष्टंवायसोपहतंचयत् । क्लीवाभिशस्तपतितैःसूतिकोदक्यनास्तिकैः । दृष्टंचस्याद्यदन्नंतुतस्यनिष्कृतिरुच्यते । अभ्युक्ष्यकिंचिदुद्धृत्यतद्भुंजीतविशेषतः । भस्मनावापिसंस्पृश्यसंस्पृशेदुल्मुकेनच । सुवर्णरजताभ्यांवाभोज्यंघ्रातमजेनवा । स्पृष्टमित्युक्तेःसहपाकेअभोज्यं । नित्यमभोज्यंकेशकीटावपन्नमितिगौतमोक्तेः। हारीतः—पिपीलिकादिभिरन्नाद्युपघातेकांचनभस्मरजतताम्रवज्रवैडूर्यगोवालाजिनदंतानामन्यतमेनाद्भिःसंस्पृष्टमन्नंप्रोक्षणपर्यग्निकरणादित्यदर्शनाच्छुद्धमिति । मनुः—पक्षिजग्धंगवाघ्रातमवधूतमवक्षुतम् । दूषितंकेशकीटैश्चमृत्प्रक्षेपेणशुध्यतीति । जमदग्निः—शृतान्नंद्रोणमात्रं तुश्वकाकाद्युपघातितम् । ग्रासमुद्धृत्याग्नियोगात्प्रोक्षणंतत्रशोधनम् । माधवीयेसंवर्तः—विडालमूषिकोच्छिष्टेपंचगव्यंपिवेद्द्विजः । तत्रैव उशनाः—ब्राह्मणोच्छिष्टेप्राणायामशतमितियाज्ञवल्क्यः । अन्नंपर्युषितंभोज्यंस्नेहाक्तंचिरसंस्थितम् । अस्नेहाअपिगोधूमयवगोरसविक्रियाः । चिरस्थितमविकृतंचेत् । पर्युषितःशाकोपिभोज्यइतिहरदत्तः । कल्पतरौयमः—अपूपाश्चकरंभश्चधानावटकसक्तवः । शाकंमांसमपूपंच सूपंकृसरमेवच । यवागूंपायसंचैवयच्चान्यत्स्नेहसंयुतम् । सर्वंपर्युषितंभोज्यंशुष्कंचेत्परिवर्जयेत् । मिताक्षरायांयावकमप्युक्तम् ।

पलांड्वादिनिषिद्धवर्गः । भविष्ये—लशुनंगृंजनंचैवपलांडुंकवकानिच । वृंताकनालिकालाबुजानीयाज्जातिदूषकम् । गृंजनंलशुनाकारकंदविशेषइतिमिताक्षरायाम् । मदनरत्ने—यदीयंचूर्णगायकाःकंठशुद्ध्यर्थंभक्षयंतितानिपत्राणि । मूलविशेषोगाजरापरपर्यायइति माधवोहेमाद्रिश्च । तन्न । हेमाद्रावेवब्रह्मांडे—गृंजनंचुक्रिकांचैवगाजरंजीरकंतथेति । श्राद्धेगृंजनभिन्नगाजरनिषेधात् । गृंजनो

---

१ शूद्राभंगब्राह्मणेनमदीयमितिकृत्वादत्तम् । २ कीटादिनासहपाकेजाते ।

यवनेष्टश्चपलांडोर्दशजातयइतिसुश्रुतोक्तरपिनगाजरंगृंजनशब्दवाच्यम् । हेमाद्रावप्युत्तरत्रपलांडुविशेषएवगृंजनमित्युक्तम् । वैजयंत्यामप्येवम् । राजनिघंटौ—रसोनोहिमहाकंदोगृंजनोदीर्घपत्रकः । पृथुपत्रःस्थूलकंदोयवनेष्टोविलोहितः । गृंजनस्यमधुरंकटुकंदंनालमप्युपदिशंतिकषायम् । पत्रशाश्चयमुशंतिचतिक्तंसूरयोलवणमस्त्रिवदंति । गाजरंपिंडमूलंचपीतकंदःसुमूलकम् । स्वादुमूलंसुपीतंचनागरंपीतमूलकम् । गाजरंमधुरंरुच्यंकिंचित्कटुकंकफापहम् । आध्मानकृमिशूलघ्नंदाहपित्ततृषापहम् । यत्तुसारसंग्रहे—गृंजनंपीतकंचान्यत्स्थौणेयंरक्तपित्तलम् । गृंजनंशीतलंग्राहिदाहमांद्यविषापहम् । तद्बीजंवीर्यदंश्रेष्ठमुष्णंगर्भहरंपरमिति । तन्न । गाजरेगृंजनशब्दोलाक्षणिकः । वैद्यके—गृंजनंशिखिमूलंचयवनेष्टंचवर्तुलम् । ग्रंथिमूलंशिखाकंदंकंदंडिंडीरमोदकम् । गृंजनंकटुरुष्णंचकफवातरुजापहम् । रुच्यंचदीपनंह्रद्यंदुर्गंधिगुल्मनाशनम् । मदनविनोदेपि—गृंजनःपित्तलोग्राहीतीक्ष्णोष्णोरोगनाशनः । गंधाकृतिरसैस्तुल्यःसूक्ष्मनालःपलांडुना । तथागृंजनोयोगह्याकंदोजर्जरीदीर्घपत्रकइतिलशुनभेदोप्युक्तः । तथा—कासमर्दःकर्कशःस्याद्गृंजनोगाजरस्तथा । गृंजनःकटुकस्तीक्ष्णस्तिक्तोष्णोदीपनोलघुः । संग्राहीरक्तपित्तार्शोग्रहणीकफवातजित् । त्रिविधेपिगृंजनेगार्जरंनांतर्भवति । गुणभेदात् । लवणयुतंदुग्धंदुग्धयुतंदधिचनभोज्यम् । विनायकशांतौबलिदानेब्राह्मणस्यसुरामांसस्थानेताद्दशयोस्तयोरुक्तेः । चतुर्विंशतिमते—मूलकंमातृमूलंचश्वेतरक्तौचसूरणौ । चत्वार्यभोज्यमूलानिपंचमीचार्द्रमूलिका । मातृमूलंमाइणीमूलमितिप्रसिद्धम् । कल्पतरौब्राह्मे—राजमाषाःस्थूलमुद्गास्तथावृषकवासकौ । मसूराःतशपुष्पाश्चकुसूलकनिकेतनम् । सस्यान्येतान्यभक्ष्याणिनचेदयानिकस्यचित् । तत्रैवापस्तंबः—कृष्णधान्यंचशूद्रान्नंयेचान्येनाश्यसंमिताः । वर्जयेदितिसंबंधः । कृष्णधान्यंकलिंगकानि । शूलपाणौदेवलः—कुविंदांश्वेतवृंताकंकूष्मांडंचनभक्षयेत् । कुविंदा

१ फसूलाःकुल्थियाः ।

घोटकः। तत्रैवहारीतः—श्लेष्मातकप्राशनेसांतपनमिति। अपरार्केहारीतः—कुसुंभंश्वेतवृंताकंकुंभांडंचविवर्जयेत्। हेमाद्रौविष्णुः—वर्जयेच्छ्वेतवृंताकमलाबुंवर्तुलंत्यजेत्। श्वेतोक्तेःकृष्णवृंताकस्यानिषेधइतिकल्पतरौमदनरत्नेमाधवीयेच। स्मृत्यर्थसारेपि—क्षुद्रश्वेतकटकिवृंताकानिवर्जयेदिति। तत्रैव—यतिव्रतिभ्यांसदालाबुशिग्रुवृंताकानिजातिमात्रेणवर्ज्यानीति। व्रतहेमाद्रावग्निपुराणे—व्रतंप्रक्रम्य—कूष्मांडालाबुवार्ताकपालंकीज्योत्स्निकास्त्यजेत्। मदनरत्नेपैठीनसिः—नलिकायौतकुसुंभाश्मंतकाश्वेतिशाकानामभोज्याइति। नलिकाकलंबिकेतिशूलपाणिः। तत्रैवकौर्मे—गृंजनंकिंशुकंचैवकंडरंचतथैवच। उदुंबरमलाबुंचजग्ध्वापततिद्विजः। अलाबुर्वर्तुलः। पूर्वोक्तविष्णुस्मृतेः। स्मृत्यर्थसारेप्येवम्। हारीतः—नवटप्लक्षाश्वत्थदधित्थमातुलिंगानिभक्षयेदिति। दधित्थंकपित्थम्। माधवीयेबृहद्यमः—नलिकानालिकेरीचश्लेष्मातकफलानिच। भूतृणंशिग्रुकंचैवखट्टांकंकनकंतथा। वर्जयेदितिशेषः। तत्रैवचतुर्विंशतिमते—तृणराजफलंवल्लींभुक्त्वाचांद्रंचरेद्द्विजः। कंदमूलफलादीनिअज्ञात्वोपवसेत्तथा। याज्ञवल्क्यः—देवतार्थहविःशिग्रुलोहितार्द्रश्वनांस्तथा। लोहितपदमुभयत्रान्वितम्। तेनरक्तशिग्रुर्निषिद्धइतिमाधवः। स्मृत्यर्थसारेप्येवम्। विद्जानितंदुलीयादीनिनिषिद्धानि। विद्जानांफलानिभक्ष्याणीत्याहबौधायनः—अमेध्येपुचयेवृक्षाउष्माःपुष्पफलोपगाः। तेषामपिनदुष्यंतिपुष्पाणिचफलानिच। तथाचोशनाः—नलिकाशणछत्राककुसुंभालाबुविज्ञवान्। कुंभीककेबुवृंताककोविदारांश्चवर्जयेत्। तथाकालप्ररूढानिपुष्पाणिचफलानिच। देवलः—नवीजान्युपभुंजीतरोगापद्मृतेबुधः। बीजानिकूष्मांडसेत्युक्तंकल्पतरौमदनरत्नेच। वर्ज्यानुवृत्तौशंखः—कुनखीकुष्ठिसस्पृष्टमिति। कृष्णभट्टीयेस्कांदे—आज्यपात्रेस्थितंतक्रंमधुमिश्रंतुयद्घृतम्। ताम्रपात्रस्थितंक्षीरंत्रपुसर्पिःसुरासमम्। आर्द्रकंसगुडंमद्यंसै

१ खट्वांकछत्राकं। कनकंधत्तूरंबिल्वंवा।

क्षवंवदरंतथा । नारिकेलरसंकांस्येदध्नासंमिश्रितोगुडः । **वसिष्ठः**—अभोज्यंस्योच्छिष्टोपहतंवसनकेशकीटोपहतंचेति । स्योच्छिष्टंस्वभुक्तशिष्टंत्यक्तं । वसनंपरिहितमिति**मदनरत्ने** । **सुमंतुः**—क्षुतवचोभिहतमदधिपर्युषितंश्वचांडालवीक्षितमन्नमभोज्यमन्यत्रहिरण्योदकैःस्पृष्टादिति । वचोभिहतंतात्कालिकमुखवातादिदुष्टं । दधिस्नेहलक्षकं स्नेहरहितंपर्युषितमित्यर्थः । स्पृष्टात्भावेक्तः । श्वचांडालदृष्टंभोज्यमन्नांतराभावइति**मदनरत्ने** । वर्ज्यानुवृत्तौ**यमः**—लशुनंगृंजनंचैवविलयःसंमुखंतथा । विलयोघृतकिट्टम् । संमुखंघृतफेनस्तन्मंडश्च । **विष्णुपुराणे**—भुंजीतोद्धृतसाराणिनकदाचिन्नरेश्वर । **स्कांदे**—वृंताकंवृहतींचैवदग्धमन्नंमसूरिका । यस्योदरेप्रवर्ततेतस्यदूरतरोहरिः । अलाबुंभक्षयेद्यस्तुदग्धमन्नंकलंबिकाम् । सनिर्लज्जःकथंभूतेपूजयामिजनार्दनम् । **स्कांदे**—शिरःकपालमंत्राणिनखचर्मतिलानिच । एतानिक्रमशोनित्यमष्टम्यादिषुवर्जयेत् । चर्मपदेनमसूरिकाउच्यंतइति**कालनिर्णयदीपिका** । **हरिभक्तिविलासेयामले**—यत्रमद्यंतथामांसंतथावृंताकमूलकौ । निवेदयेन्नैवतत्रहरेरैकांतिकीरतिः । **भारते**—तिलान्भृष्टान्नचाश्नीयात्तथास्यायुर्नरिष्यति । **गौतमः**—उद्धृतस्नेहविलयनपिण्याकमथितप्रभृतीनिनाश्नीयादिति । मथितंजलंविनालोडितंदधीति**मदनरत्ने** । **आमिषंपाद्मेकार्तिकमाहात्म्ये**—प्राण्यंगमामिषंचूर्णेफलेजंबीरमामिषम् । धान्येमसूरिकाप्रोक्ताद्यन्नंपर्युषितंतथा । गोकांजिकंचमहिषीदुग्धादिचतथामिषम् । द्विजक्रीतारसाःसर्वेलवणंभूमिजंतथा । ताम्रपात्रस्थितंगव्यंजलंपल्वलसंभवम् । आत्मार्थंपाचितंचान्नमामिषंतत्स्मृतंबुधैः । नचेदंप्रकरणात्कार्तिकमात्रपरम् । अन्यत्रापितद्धेवाधकाभावात् । **मदनरत्ने**—घृतात्फेनंघृतान्मंडंपीयूषमथवार्द्रगोः । सगुडंमरिचाक्तंतुतथापर्युषितंदधि । दीर्णंतक्रमपेयंचनष्टस्वादुचफेनवत् । गुडमरीचयुक्तंपर्युषितंदधिचनभक्षयेत् । दीर्णंस्फुटितम् । **हारीतः**—नरजस्वलयादत्तंनक्रुद्धयानमलवद्वाससानापरयाद्वारापन्नमिति । **याज्ञवल्क्यः**—वृथाकृसरसंयावपायसापूपशष्कुलीः । अत्र नपचेदन्नमात्मनेइत्यनेननिषेधेसिद्धेपुनर्निषेधोदोषाधिक्यार्थइति**मदनरत्ने** ।

मनुः—अनिर्दशायागोःक्षीरमौष्ट्रमैकशफंतथा । आविकंसंधिनीक्षीरंविवत्सायाश्चगोःपयः । गोग्रहणमजामहिष्योरुपलक्षणम् । गोमहिष्य जानामनिर्दशानांपयोनपेयमितिवसिष्ठोक्तेरितिमदनरत्ने । वत्सग्रहणेनसवत्साधेनुरानीयतामितिवद्गोग्रहणेसिद्धेपुनर्गोग्रहणमजामहिष्यो र्व्यपत्ययोःपयसोनिषेधार्थमितिमेधातिथिः ।

संस्कारादिभोजननिषेधः—मदनरत्नेंगिराः—जन्मप्रभृतिसंस्कारेबालस्यान्नस्यभोजने । असपिंडैर्नभोक्तव्यंचूडायांचविशेषतः । नारीप्रथमगर्भेपुभुक्त्वाचांद्रायणंचरेत् । **पराशरमाधवीयेधौम्यः**—ब्रह्मौदनेचसोमेचसीमंतोन्नयनेतथा । जातकर्मनवश्राद्धेभुक्त्वा चांद्रायणंचरेत् । तत्रैव—निवृत्तचूडहोमेतुप्राङ्नामकरणात्तथा । चरेत्सांतपनंभुक्त्वाजातकर्मणिचैवहि । अतोन्येषुतुसंस्कारेपूपवासेन शुद्ध्यति । **चंद्रिकायाम्**—नवश्राद्धस्यच्छिष्टंगृहेपर्युषितंचयत् । दंपत्योर्भुक्तशिष्टंचभुक्त्वाचांद्रायणंचरेत् । **आचारदर्पणे**—भानुवारे तथारात्रावष्टम्यांचतथैवच । धात्रीफलंनरःखादन्नलक्ष्मीकोभवेत्सदा । सप्तम्यांरविवारेचदिवारात्रौतथैवचेतिकृष्णभट्टीपूर्वार्धपाठः । अमावास्यापितृश्राद्धेसंक्रांतौपारणेतथा । परान्नंनैवभोक्तव्यंयस्मान्नंतस्यतत्फलम् । **हेमाद्रौ**—दिवादधित्यधानासुरात्रौचदधिसक्तुषु । श्लेष्मातकेतथाऽलक्ष्मीर्नित्यमेवकृतालया । **काशीखंडे**—नदिवोद्धृतसारंचभक्षयेद्दधिनोनिशि । **स्कांदे**—रात्रौदधिनभोक्तव्यंदिवानवनीतकम् । **यमः**—नभिन्नभांडेभुंजीतनरात्रौदधिसक्तुकान् । **भारतेप्येवम् । आचारादर्शेलघुहारीतः**—पृथग्यानंपुनर्दानं मांसेनपयसानिशि । दंतच्छेदनमुष्णंचसप्तसक्तुपुवर्जयेत् । सक्तनक्तुंदिनक्षयइतिभारतेशतपथाच । **सुमंतुः**—कूष्मांडंबृहतींचैवतरुणी मूलकंतथा । श्रीफलंचकलिंगंचवार्त्ताकींप्रतिपदादिषु । शिरःकपालमंत्राणिनखचर्मकृतानिच । उदुंबरफलंचैवतिलानपितथैवच । यदीच्छे त्स्वर्गगमनमष्टम्यादिषुवर्जयेत् । **रत्नमालायाम्**—कूष्मांडंमातुलिंगंचपटोलंबृहतीफलम् । श्रीफलंपिचुमंदंचधात्रीपक्षादितस्त्यजेत् ।

नालिकेरंशिरःप्रोक्तंकपालंतुंवकंस्मृतम् । अंत्राणिनलिकाशाकंनखानिग्रामशिंविकाः । चर्माख्यंपोइकाशाकंवृंताकंतिलमुच्यतइति । **धर्मसारे**—धात्रीफलंभानुवारेश्रीफलंशुक्रवासरे । शमीफलंमंदवारेश्रीकामःपरिवर्जयेत् । **गौडनिबंधे**—रविवारेचसंक्रांतौपष्ठ्यावैसप्तमीतिथौ । आरोग्यकामस्तुनरोनिंवपत्रंनभक्षयेत् । **भारतेदानधर्मे**—आज्याहुतिंविनाचैवयत्किंचित्परिविष्यते । दुराचारैश्चयद्भुक्तंतंभागं रक्षसांविदुः । इदंश्राद्धपरमितिकेचित् ।

अथपरिवेषणम् । चंद्रोदयेंगिराः—नीलरक्तेनवस्त्रेणयःपाकःश्रपितोभवेत् । तेनभुक्तेनविप्राणांदिनमेकमभोजनम् । **वैद्यः**—भक्ष्यंचदक्षिणेपार्श्वेपेयंलेह्यंचवामतः । हस्तदत्तानिचान्नानिप्रत्यक्षंलवणंतथा । मृत्तिकाभक्षणंचैवगोमांसाशनवत्स्मृतम् । **हेमाद्रौयमः**—एकेनपाणिनादत्तंशूद्रादत्तंचयद्भवेत् । **पैठीनसिः**—लवणंव्यंजनंचैवघृतंतैलंतथैवच । लेह्यंपेयंचविविधंहस्तदत्तंनभक्षयेत् । **एतदपवादः स्मृतिरत्नावल्याम्**—अपक्वंस्नेहपक्वंचहस्तेनैवप्रदापयेत् । यत्किंचिदितरद्भक्ष्यंदर्व्यादेयंतुयत्नतः । **कल्पतरौभविष्ये**—आयसेनतुपात्रेणयदन्नमुपनीयते । भोक्ताविष्ठासमंभुङ्क्तेदाताचनरकंव्रजेत् । **मात्स्येपि**—उभाभ्यामपिहस्ताभ्यामाहृत्यपरिवेषयेत् । **मनुः**—दर्व्यादेयंशृतान्नंतुसमस्तव्यंजनानिच । उदकंयच्चपक्वान्नंयोदर्व्यादातुमिच्छति । सभ्रूणहासुरापश्चसस्तेनोगुरुतल्पगः । **काशीखंडे**—फाणितंगोरसंचैवलवणंमधुकानिच । हस्तेनब्राह्मणोदद्यात्कृच्छ्रंचांद्रायणंचरेत् । **हेमाद्रौहारीतः**—पङ्क्तौसहोत्थितानांतुभोजनादिसमंस्मृतम् । **तत्रैववसिष्ठः**—यद्येकपंक्तौविषमंददातिस्नेहाद्भयाद्वायदिवापिहेतोः । वेदेपुदृष्टामृषिभिश्चगीतांतांब्रह्महत्यांमुनयोवदंति ।

परिवेष्टुरुच्छिष्टस्पर्शेहारीतः—द्रव्यहस्तस्तुसंस्पृष्टउच्छिष्टंवाकदाचन । भूमौनिक्षिप्यतद्द्रव्यमपःस्पृष्ट्वाततःशुचिः । अद्भिरभ्युक्ष्यतद्द्रव्यंपुनरादायदापयेत् । **यत्तुमनुः**—उच्छिष्टेनतुसंस्पृष्टेद्रव्यहस्तःकथंचन । अनिधायैवतद्द्रव्यमाचांतःशुद्धिमाप्नुयादिति । **आचार**

चंद्रोदये—अंगधारणयोग्यमंगेनिधायाचामेत् तदयोग्यंस्पृष्ट्वा । यद्वाभक्ष्येतरद्रव्यंभूमावनिधायाचम्यशुचिर्भवेत् । भक्ष्यंभूमानिधाया चामेत् । **मार्कंडेयः**—पक्कान्नेनगृहीतेनमूत्रोच्चारंकरोतियः । अनिधायैवतद्द्रव्यमंगेकृत्वासमाश्रितम् । शौचंकृत्वायथान्यायमपःस्पृश्ययथा विधि । अन्नमभ्युक्षयेच्चैवउद्धृत्यार्कंप्रदर्शयेत् । त्यक्त्वाग्रासमथैतस्माच्छेपंशुद्धिमवाप्नुयात् । द्रव्यस्यैवसाक्षादुच्छिष्टस्पर्शेत्यागइतिचंद्रिका । **स्मृत्यर्थसारे**—परिवेषणंकुर्वन्मूत्रोच्छिष्टश्चेदन्नादिनिधायशौचाचमनेकृत्वान्नादिप्रोक्ष्याग्निमर्कंवासंस्पृश्यपरिविष्यादिति ।

आपोशनबलिप्राणाहुत्यादि । **मार्कंडेयः**—अन्नंदृष्ट्वाप्रणम्यादौप्रांजलिःकथयेत्ततः । अस्माकंनित्यमस्त्वेतदितिभक्त्याथवंदयेत् । **आपस्तंबः**—भापांकासंक्षवयुमित्यभिमुखोन्नंवर्जयेदिति । भापांशब्दोच्चारणम् । **याज्ञवल्क्यः**—अपोशानेनोपरिष्टादधस्तादक्षतातथा । अनग्नममृतंचैवकार्यमन्नंद्विजन्मना । अत्रयद्यपि—अद्यतेत्तिचभूतानितस्मादन्नंतदुच्यतइतिश्रुतौसर्वमविशेषेणान्नत्वेनप्रतीयते तथापिजला दावपितदापत्तेः । भिःसाक्षीभक्तमंधोन्नमितिकोशादन्नमोदनः । अतएव–अन्नाश्रितानिपापानीत्यत्राप्योदनवर्जनम् । तेनभक्तेएवापोशनं नान्यत्रेतिकेचित् । अन्येतु – सस्संक्षेत्रगतंप्राहुःसतुषंधान्यमुच्यते । आमंवितुषमित्युक्तंस्विन्नमन्नमुदाहृतमितितिथितत्त्वेवसिष्ठोक्तेः स्विन्नमात्रेआपोशनम् । नचैवंगुडादावपितदापत्तिः । अन्नेनव्यंजनमित्यादिषुव्रीह्यादिविकारएवान्नपदप्रयोगात् गुडादेश्चसरसत्वात् अतोगु-डादौनापोशनम् । **मदनरत्नेमाधवीयेचकौर्मे**—महाव्याहृतिभिस्त्वन्नंपरिषिच्योदकेनतु । अमृतोपस्तरणमसीत्यपोशानक्रियांचरेत् । **मदनपारिजातेतु**—व्याहृतिभिर्गायत्र्याचान्नमभिमंत्र्याभ्युक्ष्यपरिषिच्य धर्मराजादिबलीन्दद्यादिति । **माधवीये**—ऋतेनसायं सत्येनप्रातश्चपरिषिंचयेत् । **भविष्ये**—भोजनार्तिकचिदन्नाग्रंधर्मराजायवैबलिम् । चित्रायचित्रगुप्तायप्रेतेभ्यश्चेदमुद्धरेत् । यत्रकचनसं

१ पक्कमन्नमितिपाठ. ।

स्यानांक्षुत्तृपोपहतात्मनाम् । प्रेतानांतृप्तयेक्षय्यमिदमस्तुयथासुखम् । **स्कांदे**—प्रदद्याद्भूतपतयेभुवनपतयेतथा । भूतानांपतयेस्वाहेत्यु क्त्वाभूमौबलित्रयम् । **ब्राह्मे**—ब्रह्मणेनमइत्येवंब्रह्मादिभ्योबलीन्दद्यादिति । **स्मृत्यर्थसारे**—यमायनमःचित्रगुप्तायनमःसर्वेभ्योभूतेभ्यइतिव लीन्दद्यादिति । **श्रौतवृत्तिः**—यःकश्चनास्मिन्छास्त्रेदेवतोद्देशेनद्रव्यात्मकोव्यापारोयागोहोमोभ्यादानंबलिहरणादयोवामंत्रेणसाध्यंतेतत्रसर्व त्रस्वाहाकारःकर्तव्यइति । **आश्वलायनानां**स्वाहांतत्वमेववलिदाने । एतानिबलिदानादीनियथाशाखंव्यवस्थितानि । इदंचपरिषेचनो त्तरंकार्यमित्युक्तंमाधवीयेमदनरत्नेच । **यत्तुस्मृत्यर्थसारे** बल्युत्तरंपरिषेचनमुक्तंतत्पदार्थगणनमात्रेनतत्रक्रमेतात्पर्यम् । परिषे चनोत्तरंपादक्षालनोक्तेः । अत्रब्रह्मरुद्रेंद्रचंद्रार्कवसवोमंडलांतरात् । निवेदितंनरैरन्नंयस्माद्भुंक्तिनान्यथेतिब्राह्मात् ब्रह्मादिभ्योभुजिकाले बलिर्देयः । मंडलार्थवादोयमितिचेत् तस्यापि सालंबनत्वात् । अर्थाभावोपिस्तुतिरितिचेत्असंभवेह्येवंस्यात् । नचवाक्यभेदः । सूक्तवाका दौदृष्टत्वादित्याचारादर्शः । तन्न । तद्धितादीनामेवदेवतात्ववोधकत्वात् । सूक्तवाकस्यकरणत्वेप्युक्तं हरतौदेवताकल्पकत्वम् । अर्थ वदेवतुदेवताकल्पत्वमत्यंतासंभवीत्यलंमीमांसागंधशून्यहृदयप्रलापेन । **श्राद्धेबलिदानाभावमाहहेमाद्रावत्रिः**—दत्तेवाप्यथवा दत्तेभूमौयोनिक्षिपेद्बलिम् । तदन्नंनिष्फलंयातिनिराशैःपितृभिर्गतैः । **स्मृत्यर्थसारे**—पायसेनतथाज्येनमापान्नेनतथैवच । नकुर्याद्बलि दानंतुओदनेनप्रकल्पयेत् । **कृष्णभट्टीये**—भोजनादौबलिंमुक्तंसमुद्धृत्यैवभोजयेत् । अनुद्धृत्यतुयोभुङ्क्तेप्राणायामाष्टकंचरेत् । आखुमा र्जारसंस्पर्शेपोडशैवतथाचरेत् । तत्रैव—दत्त्वाथचित्रगुप्तायहस्तंप्रक्षालयेत्ततः । अप्रक्षाल्यकरौभुंजन्रौरवेनरकेवसेत् ।

अपोशनविचारः । **ब्राह्मे**—अपोशनंचगृह्णीयात्सर्वतीर्थमयंचतत् । हस्तेनलंघयेन्नान्नंसोदकेनकदाचन । आपोशनाकरणेदोष— **श्चिंतामणौ**—अपोशानमकृत्वातुयोभुङ्क्तेऽनापदिद्विजः । भुंजानोयदिवाब्रूयाद्गायत्र्यष्टशतंजपेत् । इदंचबलिंदत्त्वाहस्तंप्रक्षाल्यकार्यमि

त्युक्तमाधवीये—हस्तंप्रक्षालयेच्चैवपश्चात्प्रयतमानसः । धारयेत्सव्यहस्तेनपात्रंतद्वाग्यतोद्विजः । अपोशानंशूद्रेणनकार्यम् । द्विजश्रुतेः । नैवेद्यभक्षणमत्रमिथ्या । लोके—उच्छिष्टभोजिनस्तस्यवयमक्लिष्टकारिणः । येनलीलावराहेणहिरण्याक्षोनिपातितः । स्मार्तोपीदंलिलेख । **पात्र धारणेविशेषश्चिंतामणौ**—अंगुष्ठस्तर्जनीचैवमध्यमाचतृतीयका । तिस्रोद्वेवांगुलीचैवप्रशस्ताःपात्रधारणे । **वृहन्नारदीये**—याव द्विजोऽन्नमश्नीयात्पात्रंनैवपरित्यजेत् । **आपस्तंबः**—नापजिहीतापजिहीतवेति । अपजिहीतत्यजेत् । अतःपात्रधारणेविकल्पः । सोपि प्राणाहुत्युत्तरमिति । **मदनरत्ने**—प्राणाहुत्युत्तरंपात्रंधृत्वानमुंचेदन्यथामुंचेदितिकल्पतरूः । **यत्तुपट्त्रिंशन्मते**—समुत्थितस्तुयो भुङ्क्तेयोभुङ्क्तेमुक्तभाजने । एवंवैवस्वतःप्राहभुक्त्वासांतपनंचरेदिति तद्भोजनोपक्रमेपात्रंधृत्वातन्मध्यत्यागे । **स्मृतिमंजर्याम्**—पात्रस्य धारणंमौनंत्यजेच्चभ्रातृमान्गृही । **शातातपः**—अग्रासनोपविष्टस्तुयोभुङ्क्तेप्रथमद्विजः । बहूनांभुंजतांसोंतःपंक्त्याहरतिकिल्बिषम् । **अत्रिः**—मौनव्रतंमहाकाष्ठंहुंकारेणविनश्यति । एतत्पंचग्रासपरम् । पंचग्रासान्महामौनंप्राणाद्याप्यायनंचत्तदितिविष्णुपुराणादिति **माधवः** । महामौनंकाष्ठमौनम् । तथाचस्मृतिमंजर्याम्—काष्ठमौनेनभुंजीतप्राणादिग्रासपंचकम् । प्राणाहुत्युत्तरंनमौननियमः । मौनीवाप्यथवामौनीप्रहृष्टःसंयतेंद्रियः । भुंजीतविधिवद्विप्रोनचोच्छिष्टानिदापयेदितिव्यासोक्तेरितिमदनरत्ने । **रत्नावल्याम्**—यवी यान्सपितायश्चभुक्त्वाश्राद्धादिभोजनम् । प्राणाग्निहोत्रादन्यत्रनासौमौनंसमाचरेत् । यवीयान्कनिष्ठः । अतोभ्रातृमतोमौननिषेधोजीव ज्ज्येष्ठभ्रातृकपरः । तत्रैव—यदिभुंजीततूष्णींतुसर्वत्रैवतुभोजने । सपापोभ्रातरहंतिसंततिंचाचिराद्ध्रुवम् । **गोभिलः**—अथातःप्राणाहु तिकल्पोव्याहृतिभिर्गायत्र्यान्नमभिमंत्र्यऋतत्वासत्येनपरिषिंचामीतिसायं सत्यंत्वर्तेनपरिषिंचामीतिप्रातरतश्चरतिभूतेषुगुहायांविश्वतोमुखः ।

---

१ श्राद्धिकभोजनम् । २ विश्वमूर्तिषु ।

त्वंयज्ञस्त्वंवषट्कारस्त्वंग्रहस्त्वंप्रजापतिस्त्वंतदापआपोज्योतीरसोमृतंब्रह्मभूर्भुवःसुवरोममृतोपस्तरणमसीत्यपःपीत्वा दशहोतारंमनसानुद्रुत्यात्वरन्पंचग्रासान्गृह्णीयात् प्राणायस्वाहापानायस्वाहाव्यानायस्वाहोदानायस्वाहासमानायस्वाहेति । दशहोत्राश्चित्तिःस्रुगित्याद्याः । अमृतोपस्तरणमसिस्वाहेत्याचारादर्शः कृष्णभट्टश्च । तन्न । स्वाहांतत्वेमानाभावात् । गोभिलाद्यलिखनाच्च ।

प्राणाहुतिविचारः । **कौर्मे**—स्वाहाप्रणवसंयुक्तांप्राणायान्नाहुतिंततः । **शौनकः**—तर्जनीमध्यमांगुष्ठलग्नाप्राणाहुतिर्भवेत् । मध्यमानामिकांगुष्ठैरपानेजुहुयाद्बुधः । कनिष्ठानामिकांगुष्ठैर्व्यानेतुजुहुयाद्बिधः । तर्जनींचबहिःकृत्वाउदानेजुहुयाद्बुधः । समानेसर्वहस्तेनसमुदायाहुतिर्भवेत् । एताश्चदंतैर्नच्छेद्याः । प्राणायस्वाहेतिसमस्तानिगिरतीत्याचारादर्शेहारीतोक्तेः । अंगुष्ठानामिकामात्रग्राह्यानान्येनताआहुतयइतिहारीतव्याख्यातारः । सर्वाभिरंगुलीभिरश्नीयादितिसामान्यविधेःपंचग्रास्यपितथैवेत्याचारादर्शः । उभयमप्ययुक्तम् । पूर्वोक्तशौनकविरोधात् । **भारते**—पयारसंनजानातिजिह्वाप्राणाहुतौनृप । तथासमाहितंकुर्यात्प्राणाहुतिमतंद्रितः । **अपरार्केबौधायनः**—अथशालीनयायावरात्मयाजिनांप्राणाहुतिंव्याख्यास्यामः प्रक्षालितपाणिपादआचम्यशुचौदेशेप्राङ्मुखउपविश्य ध्रुवाद्यौरितिपृथिवीमावाहयेद्धृतवतीमितिभूमौपात्रंनिधायमूर्धानंदिवइत्युद्धृत्यतमाहियमाणंभूर्भुवःस्वरोमित्युपस्थायवाचंयच्छेत्प्राक्तुमहाव्याहृतिभिःप्रदक्षिणमन्नमुदकंपरिषिच्यसव्येनपाणिनाविमुंचन्नमृतोपस्तरणमसीत्यपःपीत्वापंचान्नेनप्राणाहुतीर्जुहोतिप्राणेनिविष्टोऽमृतंजुहोमिशिवोमाविशाप्रदाहायप्राणायस्वाहाअपानेनिविष्टोऽमृतंजुहोमिशिवोमा०व्यानेनिविष्टो०उदाने०इतिसमाने०हुत्वातूष्णींभूयोव्रतयेत् प्रजापतिंमनसाध्यायन्नांतरावाचंविसृजेत्भूभुर्वःस्वरोमितिजपित्वापुनर्भुंजीत त्वक्केशनखकीटाखुपुरीषाणिदग्धातदेशात्पिंडमुद्धृत्याभ्युक्ष्यभस्मावकीर्यपुनःप्रोक्ष्यवाचाशस्तंभुंजीतसर्वभक्ष्यापूपकंदमूलमांसानांदंतैर्नायेन्नातिसुहितोमृतापिधानमसीत्युपरिष्टादपःपीत्वाचांतोहृदयमभिमृशतिप्राणानांग्रंथिरसिरुद्रोमाविशांतकइत्यतस्तेनान्नेनाप्याय

१ त्वंयज्ञस्त्वंविष्णुस्त्वंवषट्कारः । २ विशांतर्गतेनान्नेन ।

स्वेतिपुनराचम्यदक्षिणपादांगुष्ठेपाणिंस्रावयति । अंगुष्ठमात्रःपुरुषोह्यंगुष्ठंचसमाश्रितः । ईशःसर्वस्यजगतःप्रभुःप्रीणातुविश्वभुगितिहुत्वानु मंत्रणमूर्ध्वहस्तःसमाचरेत्–श्रद्धायांप्राणेनिविश्यामृतंहुतंशिवोमाविशशिवमाविशप्राणमन्नेनाप्यायस्वेतिपंचब्रह्मणिमआत्मामृतत्वायेत्यनेनचाक्षरेणात्मानंयोजयेदेवमेवाहरहःसायंप्रातर्जुहुयादद्धिर्वासायमिति । **अत्रिः**—अपोशानंवामभागेसुरापानसमंभवेत् । दक्षभागेतुयःकुर्यात्सोमपानसमंभवेत् । पुनरापूर्यापोशानंसुरापानसमंभवेत् । इदंश्राद्धपरमितिकेचित् । नित्यभोजनेपीतिकृष्णभट्टः ।

भोजनविचारः । प्राणाहुत्युत्तरमाहवसिष्ठः—सर्वाभिरंगुलीभिरश्नीयादितिबौधायनः । यावद्ग्रासंसन्नयन्नस्कंदयन्कृत्स्नंग्रासं ग्रसीत । विष्णुपुराणे—अश्नीयात्तन्मनाभूत्वापूर्वंतुमधुरंरसम् । लवणाम्लौतथामध्येकटुतिक्तादिकंततः । प्राकूद्रवंपुरुषोऽश्नीयान्मध्येतुकठिनंपुनः । अंतेपुनर्द्रवाशीतुबलारोग्येनमुंचति । कौर्मे—ततोन्यदन्नमश्नीयात्पूरणायोदरस्यच । स्मृतिमंजर्यांकाशीखंडे—दर्भपाणिस्तुयोभुङ्क्तेतस्यदोषोनविद्यते । केशकीटादिसंभूतस्तदश्नीयात्सदर्भकः । यत्त्वाश्वलायनः—ग्रंथीकृतपवित्रेणनभुंजीयान्नचाचमेदिति तद्दर्भतुलान्यपरम् । भोजनेवर्तुलइत्यत्रिस्मृतेः । विष्णुः—नतृतीयमथाश्नीयान्नापश्यंश्चकदाचन । अपश्यन्नंधकारादौ । कौर्मे—नाश्नीयात्प्रेक्षमाणानामप्रदायैवदुर्मतिः । नायज्ञशिष्टमद्याद्धानकुद्धोनान्यमानसः । आत्मार्थंभोजनंयस्यरत्यर्थंयस्यमैथुनम् । वृत्त्यर्थंयस्यचाधीतं निष्फलंतस्यजीवितम् । नोच्छिष्टोघृतमादद्यान्नमूर्धानंस्पृशेदपि । नन्नब्रूकीर्तयन्वापिननिःशेषंनभार्यया । नैकवस्त्रस्तुभुंजीतनवापिशयनस्थितः । नपादुकाधिष्ठितोवानहसन्विलपन्नपि । पराशरः—अदुष्टासंततधारावांतोद्भूताश्चरेणवः । भोजनपात्रमुद्धृत्यजलादिनपेयमित्युक्तं माधवीयेबृहन्नारदीये—द्विजोनाभोज्यमश्नीयात्पात्रंनैवपरित्यजेत् । संस्थाप्यह्यासनेपादौवस्त्रार्धंपरिधायच । मुखेनधमितंभुक्त्वासुरापीत्युच्यतेबुधैः । खादितार्धंपुनःखादन्मोदकानिफलानिच । प्रत्यक्षंलवणंखादन्गोमांसाशीनिगद्यते । नृसिंहाब्धिमहोदधौ—सामुद्रं

सैंधवंचैवलवणेपरमाद्भुते । प्रत्यक्षेअपितेग्राह्येनिषेधस्त्वन्यगोचरः । **हेमाद्रौब्रह्मांडे**—सैंधवंलवणंयच्चतथामानससंभवम् । पवित्रेपरमे श्वेतेप्रत्यक्षेअपिनित्यशः । **देवलः**—नभुंजीताघृतंनित्यंगृहस्थोभोजनंस्वयम् । पवित्रमथहृद्यंचसर्पिराहुरघापहम् । **ब्राह्मे**—यस्तुपाणितलेभुङ्क्तेयश्चफूत्कारसंयुतम् । प्रसृतांगुलिभिर्यश्चतस्यगोमांसवच्चतत् । हस्त्यश्वरथयानोष्ट्रमाश्रितोनैवभक्षयेत् । श्मशानाभ्यंतरस्थोवादेवालयगतोपिवा । शयनस्थोनभुंजीतनपाणिस्थंनचासने । **तत्रैव**—नार्द्रवासानार्द्रशिरानचायज्ञोपवीतवान् । नप्रसारितपादस्तुपादारोपितपाणिमान् । नावसक्थिकसंस्थश्चनचपर्यंकिकास्थितः । नवेष्टितशिराश्चापिनोत्संगकृतभाजनः । नचमौपरिसंस्थश्चचर्मवेष्टितपार्श्ववान् । **भारते**—निपण्णश्चापिखादेतनतुगच्छन्कदाचन । **क्षत्रियेविशेषस्तत्रैव**—क्षत्रियःप्रावृतशिराभुंजीतासन्नशस्त्रभृदिति । अन्नस्य जन्मकालुष्यंदुष्पक्तिंचनकुत्सयेत् । ग्रासशेषंचनाश्नीयात्पीतशेषंपिबेन्नतु । शाकमूलफलेक्ष्वादिदंतच्छेदैर्नभक्षयेत् । संवपेन्नान्नमन्नेनविक्षिप्तंपात्रसंस्थितम् । बहूनांभुंजतांमध्येनाश्नीयात्त्वरयान्वितः । वृथानविकिरेदन्नंनोच्छिष्टंतुघृतंत्यजेत् । तिलकल्कंजलंक्षीरंदधिक्षौद्रंघृतानिच । नत्यजेदर्धजग्धानिसक्तूंश्चाथकदाचन । संवपेद्राशीकुर्यात् । **त्रिकांडमंडनः**—शिरोवेष्टयतुयोभुङ्क्तेयोभुङ्क्तेदक्षिणामुखः । वामपादेकरं न्यसतद्वैरक्षांसिगच्छति ।

भोजनकालेस्पर्शास्पर्शे । शुद्धितत्वेवृद्धशातातपः—यदाभोजनकालेतुअशुचिर्भवतिद्विजः । भूमौनिक्षिप्यतंग्रासंस्नात्वाविप्रो विशुध्यति । भक्षयित्वातुतंग्रासमहोरात्रेणशुध्यति । अशित्वासर्वमेवान्नंत्रिरात्रेणविशुध्यति । अशुचिपदंनस्नानार्हमात्रपरंस्नानविधिवैयर्थ्यापत्तेरित्युक्तम् । **तत्रैवमार्कंडेये**—अंगुलिंचोद्धरेद्यस्तुगोमांसाशनवत्स्मृतम् । **अत्रिः**—मुखेनचान्नमश्नातितुल्यंगोमांसभक्षणैः । मुखेनगवादिवत् । **चंद्रिकायांवृद्धमनुः**—नपिबेन्नचभुंजीतद्विजःसव्येनपाणिना । नैकहस्तेनचजलंशूद्रेणावर्जितंपिबेत् । पीत्वावशेषितं

कृत्वाब्राह्मणःपुनरापिवेत् । त्रिरात्रंतुव्रतंकुर्याद्वामहस्तेनवापुनः । इदंभोजनकालेएव । अन्यत्रास्य प्रायश्चित्तोक्तेः । **कौर्मे**—नवाम हस्तेनोद्धृत्यपिवेद्वक्त्रेणवैजलम् । वामहस्तेनकेवलेनेत्यर्थः । एकहस्तेनेत्यस्यवामहस्तेनोपसंहारइतिकश्चित् । तन्न । पुनरेकहस्तनिषेधात् । अतःसव्येननपिवेत् । एकहस्तेनासव्येनापिनपिवेदित्यर्थः । ननुभोजनेपात्रधारणेसव्यहस्तस्यव्यापृतत्वाद्दक्षिणहस्तस्यचोच्छिष्टत्वात्कथंजल पानमितिचेत्–दक्षिणेनपात्रंधृत्वावामेनद्रोणादौजलंकृत्वावामेनपात्रंधृत्वादक्षिणेनजलपानसंभवात् । एकहस्तनिषेधोभोजनभिन्नकालविषयः । नचैकहस्तनिषेधाद्धस्तद्वयप्राप्तौजलंपिवेन्नांजलिनेत्यादिवाक्यविरोधः । तस्यानुद्धृतजलपानपरत्वात् । एतस्यपात्रादिद्वाराजलपानपरत्वात् हस्त द्वयप्राप्तावपिसव्येनान्वारंभणात् आचमनादौतथैवदर्शनादितिचंद्रिका ।

भोजनेग्रासप्रमाणम् । अपरार्केवसिष्ठः—अष्टौग्रासामुनेर्भैक्षंषोडशारण्यवासिनः । द्वात्रिंशतंगृहस्थस्यअमितंब्रह्मचारिणः । वक्त्रप्रमाणपिंडंचग्रसेदेकैकशःपुनः । वक्त्राधिकस्तुयःपिंडआत्मोच्छिष्टःसउच्यते । पिंडावशिष्टमन्नंचदंतनिःसृतमेवच । अभोज्यंतद्द्विजानी याद्भुक्त्वाचांद्रायणंचरेत् । **आदित्यपुराणे**—नोच्छिष्टोग्राह्येदाज्यंजग्धशेषंनसंत्यजेत् । शूद्रभुक्तावशिष्टंतुनाद्याद्भांडस्थितंत्वपि । **भारतेदानधर्मे**—समानमेकपात्रेतुभुंजेन्नान्नंकदाचन ।

भार्यायासहभुक्तिनिषेधः । मनुः—नाश्नीयाद्भार्ययासार्धंनैनामीक्षेतवाश्नतीम् । नभार्यादर्शनेऽश्नीयादिति । **वसिष्ठः**—भार्ययासहनाश्नीयादवीर्यवदपत्यंभवतीति । इदंचासवर्णाविषयम् । **तथाचांगिराः**—ब्राह्मण्यासहयोश्नीयादुच्छिष्टंवाकदाचन । न तत्रदोषंमन्यंतेसर्वएवमनीषिणः । उच्छिष्टमितरस्त्रीणांयोऽश्नीयाद्ब्राह्मणःक्वचित् । प्रायश्चित्तीसविज्ञेयःसंकीर्णोभूदचेतनः[1] । ब्राह्मणीपदंभर्तृसवर्णोपलक्षणम् । अतएवाग्रेब्राह्मणग्रहणम् । तेनक्षत्रियादिरप्यसवर्णयासहनाश्नीयादित्यर्थइतिपृथ्वीचंद्रः । **ब्राह्मेपि**—ब्राह्मण्या

1 मृदुचेतन° ।

भार्ययासार्धंक्वचिद्भुंजीतचाध्वनि । असवर्णस्त्रियासार्धंभुक्त्वापततितत्क्षणात् । **चंद्रिकायामादित्यपुराणेतु**—अधोवर्णस्त्रियासार्धमिति तृतीयपादउक्तः । क्वचिदितिदेशकालाद्यसंभवविषयंविवाहविषयंवेति**विज्ञानेश्वरः** । इदमपिदाक्षिणात्यभिन्नपरम् । पंचधाविप्रतिपत्तिर्दक्षिणातोनुपनीतेनभार्ययासहभोजनमित्युक्त्वाइतरइतरस्मिन्दुष्यतिनेतरइतरस्मिन्[1]देशग्रामाण्यादिति**माधवीयेबोधयनोक्तेः** । यत्तु**माधवीयेबृहद्यमः**—माताचभगिनीवापिभार्याचान्याश्चयोषितः । नताभिःसहभोक्तव्यंभुक्त्वाचांद्रायणंचरेदितितदसवर्णापरम् । यदपि **प्रायश्चित्तहेमाद्रौगालवः**—एकयानसमारोहएकपात्रेचभोजनम् । विवाहेपथियात्रायांकृत्वाविप्रोनदुष्यति । अन्यत्रदोषमाप्नोतिपश्चाच्चांद्रायणंचरेदितितदप्यसवर्णापरम् ।

पंक्तिभेदावश्यकता । मदनरत्नेबृहस्पतिः—अप्येकपंक्त्यानाश्नीयात्संयुतःस्वजनैरपि । कोहिजानातिकिंकस्यप्रच्छन्नंपातकं भवेत् । एकपङ्क्त्युपविष्टानांदुष्कृतंयदुरात्मनाम् । सर्वेषांतत्समंतावद्यावत्पंक्तिर्नभिद्यते । **बृहस्पतिः**—अग्निनाभस्मनाचैवस्तंभेनसलिलेनवा । द्वारेणचैवमार्गेणपंक्तिभेदोबुधैःस्मृतः । तृणेनापिपंक्तिभेदइति**माधवीयेमदनरत्नेच** । तथाच**चंद्रिकायांहारीतः**—तृणेनांतरितंकृत्वापंक्तिदोषोनविद्यते । सएव—नस्पृशेद्वामहस्तेनभुंजानोहिकदाचन । नपादौनशिरोवस्तिनपदाभाजनंतथा । **गोभिलः**—एकपंक्त्युपविष्टानांविप्राणांसहभोजने । यद्येकोपित्यजेत्पात्रंनाश्नीयुरपरेप्यनु । मोहाद्भुंक्तेतुयस्तत्रससांतपनमाचरेत् । सहएककाले ।

उदक्यादिशब्दश्रवणनिषेधः । माधवीयेआश्वमेधिके—उदक्यामपिचांडालंश्वानंकुक्कुटमेववा । भुंजानोयदिपश्येतक

[1] इतरेतिशशिगालश्वनुपनीतेनभार्ययाचसहइतरस्मिन्नुत्तरदेशेनदुष्यतिऔदीच्योवाइतरस्मिन्दक्षिणेनदुष्यतीत्यर्थः ।

तदन्नंतुपरित्यजेत् । **कात्यायनः**—चांडालपतितोदक्यावाक्यंश्रुत्वाद्विजोत्तमः । भुंजीतग्रासमात्रंतुदिनमेकमभोजनम् । उत्तरार्धेयदीति शेषः । **वृहन्नारदीये**—स्नानदानजपादीनांभोजनाध्वरयोस्तथा । मध्येशृणोतियद्येषांशब्दंकुर्यात्कदाचन । उद्धमेद्भुक्तमखिलंस्नात्वाचोप वसेत्तदा । द्वितीयेह्निघृतंप्राश्यशुद्धिमाप्नोतिमानवः । **माधवीयेगौतमः**—काहलभ्रमणंग्राव्णांचक्रस्योलूखलस्यच । एतेषांनिनदाया वत्तावत्कालमभोजनम् । **कात्यायनः**—नृणांभोजनकालेतुयदिदीपोविनश्यति । पाणिभ्यांपात्रमालभ्यभास्करंमनसास्मरेत् । पुनश्चदीपिकां कृत्वातच्छेषंभोजयेन्नरः । पुनरन्नंनभोक्तव्यंभुक्त्वापापैर्विलिप्यते । अन्नंगृहीत्वेत्यर्थः । **स्मृत्यर्थसारे**—अन्नभोजनकालेऽस्थ्नादूषिते स्नानंघृतप्राशनंच दंतपातेचैवमिति । **विष्णुपुराणे**—जठरंपूरयेदर्धमन्नैरर्धंजलेनच । वायोःसंचरणार्थायचतुर्थमवशेषयेत् । **पुलस्त्यः**—भोजनंतुनिःशेषंकुर्यात्प्राज्ञःकथंचन । अन्यत्रदधिसक्तवाज्यपललक्षीरमध्वपः । **चंद्रिकायांवृद्धमनुः**—भार्याभर्तृकदासेभ्यउच्छिष्टंशे षयेत्ततः । **भारते**—पानीयंपायसंसक्तून्सर्पिर्मधुदधीन्यपि । निरस्यंशेषमेतेषांनप्रदेयंतुकस्यचित् । **टोडरानंदेविष्णुपुराणे**—नाशे षंपुरुषोश्नीयादन्यत्रजगतीपतेः । ओदनोपिसशेषोभोज्यइतिटोडरानंदे । **मदनरत्नेब्राह्मे**—कुर्यात्क्षीरांतमाहारंनदध्यंतंकदाचन । **का शीखंडे**—अनुपीयततःक्षीरंतक्रंपानीयमेवच । अमृतापिधानमसीत्येवंप्राश्योदकंसकृत् । पीतशेषंक्षिपेद्भूमौतोयंमंत्रमिमंपठन् । अप्रक्षा लितहस्तस्यदक्षिणांगुष्ठमूलतः ।—रौरवेपूयनिलयेपद्मार्बुदनिवासिनाम् । उच्छिष्टोदकमिच्छूनामक्षय्यमुपतिष्ठताम् । **देवलः**—भुक्तोच्छिष्टा त्समादायसर्वस्मात्किंचिदाचमन् । उच्छिष्टभागधेयेभ्यःसोदकंनिर्वपेद्भुवि । उत्तराचमनंचाक्षालितहस्तेनकार्यम् । हस्तंप्रक्षाल्यगंडूषंयःपिबे त्पापमोहितः । सदैवेचैवपित्र्येचआत्मानमवसादयेत् । अर्धंपीत्वातुगंडूषमर्धंत्यक्त्वामहीतले । रसातलगतानांगास्तेनप्रीणंतिनित्यशइति **व्यासोक्तेः** । गंडूषममृतापिधानमसीतिजलपानम् । एतदकरणेप्रायश्चित्तमुक्तं**भारते**—यद्युत्तिष्ठत्यनाचांतोभुक्त्वानासनात्ततः । सद्यः

स्नानंप्रकुर्वीतसोनयप्रयतेभवेत् । **शातातपः**—आचम्यपात्रमुत्सार्यकिंचिदार्द्रेणपाणिना । केचिदुत्तरापोशनोत्तरंप्रथमंगंडूपःपश्चाद्धस्तप्रक्षाल नमाहुः । तन्न । पूर्वोक्तग्रंथविरोधात् । **देवलः**—भोजनेदंतलग्नानिनिर्हृत्याचमनंचरेत् । दंतलग्नमसंहार्यज्ञेयंतदपिदंतवत् । नतत्रबहुशः कुर्याद्यत्नमुद्धरणंप्रति । **मार्कंडेये**—अनूत्तिष्ठन्नकुर्वीतभुक्त्वांदंतविशोधनम् । दंतलग्नेकालांतरच्युते**बौधायनः**—तत्त्यक्त्वैवंशुचिर्नपुन स्त्यागोत्तरमाचामेदिति । निगिरन्नेवतच्छुचिरिति**याज्ञवल्क्यः** । अतस्त्यागनिगिरणयोर्विकल्पः । **मदनरत्नेगौतमः**—गंडूपस्याथसम येतर्जन्यावक्रर्षणम् । यःकरोतिसमूढात्मारौरवेनरकेवसेत् । हस्तक्षालनोत्तरंहस्तादौस्नेहशेषेनदोषः । द्वावेवोष्ठौश्मश्रुकरौसस्नेहौभोजनादनु । अदुष्टान्शक्तिजःप्राहुर्बालवृद्धस्त्रियोमुखमितिवृद्धपराशरोक्तेः । गंडूपप्रक्षेपश्चकांस्यपात्रेनकार्यः । तथा**चांगिराः**—गंडूपंपादशौचंचकृ त्वावैकांस्यभाजने । भूमौनिक्षिप्यपण्मासात्पुनराहारमादिशेत् । उत्तरार्धेकांस्यपात्रमितिशेषः । पुनराहारंतक्षणंपात्रांतरानयनंवा । **माध वीये व्यासः**—तस्माद्देशान्मनागपसृत्यविधिवदाचामेदिति । तदुत्तरंद्विराचामेदित्युक्तं । **विष्णुपुराणे**—अंतर्बलायमेभूमेरपामद्य निलस्यच । भवत्वेतत्परिणतंममास्त्वव्याहतंसुखम् । अगस्तिकुंभकर्णेचशनिंचवडवानलम् । आहारपरिणामार्थंसंस्मरामिवृकोदरम् । आता पिर्भक्षितोयेनवातापिश्चमहासुरः । समुद्रःशोषितोयेनसमेऽगस्त्यःप्रसीदतु । इत्युच्चार्यस्वहस्तेनपरिमृज्यात्तथोदरम् । **अत्रिः**—आचांतोप्य शुचिस्तावद्यावत्पात्रमनुद्धृतम् । उद्धृतेप्यशुचिस्तावद्यावद्भूमिर्नलिप्यते । भूमावपिहिलिप्तायांतावत्स्यादशुचिःपुमान् । आसनादुत्थितस्तस्मा द्यावन्नस्पृशतेमहीम् । **आपस्तंबः**—यत्रभुज्यतेतत्समूह्यानिहृत्यावोक्ष्यतंदेशंलेप्यलेपात्संमृज्याद्भिःसंश्रित्योत्तरतःशुचौदेशेरुद्रायनिनयेदेवंवा स्तुशिवंभवत्विति । **आश्वलायनः**—ततःशतपदंगत्वावीक्ष्यादित्यंशनैःशनैः । पाणिनोदकमालभ्यमंत्रमेनंसमुच्चरेत् । **काशीखंडे**— इत्यत्रपरिसंकल्प्यप्रक्षाल्यचरणौकरौ । ततोन्नपरिणामार्थंमंत्रानेतानुदीरयेत् । अग्निराप्याययन्धातून्पार्थिवान्परिवारितः । दत्तावकाशोनभसो

जरयत्वस्तुमेसुखम् । प्राणापानसमानानामुदानव्यानयोस्तथा । अन्नंपुष्टिकरंचास्तुममाप्यव्याहतंसुखम् । समुद्रोवडवाग्निश्चत्रह्मोत्रह्मस्यनंदनः । मयाभ्यवहृतंयत्तदशेषंजरयंत्वमी । **विष्णुः**—विष्णुःसमस्तेंद्रियदेहदेहिप्रधानभूतोभगवान्यथैकः । सत्येनतेनान्नमशेषमेतदारोग्यदंमेपरिणाममेतु । इत्युच्चार्यस्वहस्तेनपरिमृज्यात्तथोदरम् । **ऋग्विधानेशन्नोभवेतिद्वाभ्यांतुभुक्त्वान्नंप्रयतःशुचिः** । हृदयंपाणिनास्पृष्ट्वाज्योग्जीवेदगदःसुखी । **हारीतः**—पश्चात्तदन्नशेषंवलिंहरेदिति । एतच्चपाकशिष्टेनरौद्रबलिहरणमितिजयस्वामी । **धर्मप्रश्नेब्रह्मचारिप्रकरणे**—भुक्त्वास्वयममत्रंक्षालयीतेति । अमत्रंभोजनस्य । भिक्षापात्रस्यत्वन्येनक्षालनेनदोषइत्युज्ज्वला । उभयोरपिपात्रयोर्ग्रहणमित्यन्ये । स्नातकादीनामप्येतत् ।

तांबूलभक्षणविचारः । विशेषानुपक्रमेण **मार्कंडेये**—भूयोप्याचम्यकुर्वीततततस्तांबूलभक्षणम् । **माधवीयेवसिष्ठः**—सुपूगंचसुपत्रंचसुचूर्णेनसमन्वितम् । अदत्त्वाद्विजदेवेभ्यस्तांबूलंवर्जयेद्विजः । एकपूगंसुखारोग्यंद्विपूगंनिःफलंभवेत् । अतिश्रेष्ठंत्रिपूगंचअधिकंनैवदुष्यति । **मार्कंडेये**—पर्णाग्रंपर्णपृष्ठंचचूर्णपर्णंद्विपर्णकम् । दंतधावनपर्णंचशक्रस्यापिश्रियंहरेत् । अकृत्वाचमुखेपर्णंपूगंखादतियोनरः । दशजन्मदरिद्रस्तुअंतेचनहरिस्मृतिः । नित्यंखादतितांबूलंवक्रभूपाकरंनरः । नमुच्यत्यच्युतस्येवतस्यमंदिरमिंदिरा । चूर्णपूगदलाधिक्येसाम्येचापिसतिक्रमात् । दुर्गंधारंगसौगंध्यवहुरंगान्विदुर्बुधाः । **मदनरत्नेवसिष्ठः**—पर्णमूलेभवेद्व्याधिःपर्णाग्रेपापसंभवः । चूर्णपर्णंहरेदायुःशिराबुद्धिविनाशिनी । तस्मादग्रंचमूलंचशिराश्चैवविशेषतः । चूर्णपर्णंवर्जयित्वातांबूलंभक्षयेद्बुधः । **आश्वलायनः**—यतेश्चविधवायाश्चदीक्षितस्यचटोरपि ।

---

१ याहृष्टि सर्वभूतानायाचदृष्टि स्वभावजा । तद्दृष्टीनाविनाशायनारदस्मराम्यहम् । इतिसंचिंत्यभुंजानदृष्टिदोषोनबाधते । अजनीगर्भसंभूतकुमारब्रह्मचारिणम् । दृष्टिदोषविनाशायहनूमंतंस्मराम्यहम् ।

तांबूलभक्षणंवर्ज्यमैथुनंचविशेषतः । विद्याकामोऽनिशंरात्रौतांबूलंतुनभक्षयेत् । **कृष्णभट्टीये**—मातापित्रोःक्षयश्राद्धेतथैवक्षयसूतके । तांबूलंचर्वयेद्यस्तुपितृहासनिगद्यते । **हेमाद्रौजाबालः**—दंतधावनतांबूलंतैलाभ्यंगमभोजनम् । रत्नौषधपरान्नंचश्राद्धकृत्सप्तवर्जयेत् । **यत्तुकृष्णभट्टीये**—नित्यश्राद्धेत्वमाश्राद्धेश्राद्धेचापरपक्षिके । तांबूलचर्वणेदोषोनेतिशातातपोऽब्रवीदिति तन्निर्मूलम् । उक्तविरोधात् । **लघुनारदीये**—दशम्यादिमहीपालत्रिदिनंपरिवर्जयेत् । गंधतांबूलपुष्पाणिस्त्रीसंभोगंमहाशयः ।

दिनशेषभागकृत्यम् । विष्णुरहस्ये—गात्राभ्यंगंशिरोभ्यंगंतांबूलंचानुलेपनम् । व्रतस्थोवर्जयेत्सर्वंयच्चान्यच्चनिराकृतम् । **दक्षः**—भुक्त्वातुसुखमास्थायतदन्नपरिणामयेत् । इतिहासपुराणाद्यैःपश्चसप्तमकौनयेत् । अष्टमेलोकयात्रातुबहिःसंध्याततःपुनः । **आयुर्वेदे**—भुक्त्वोपविशतस्तुंदंवलमुत्तानशायिनः । आरोग्यंवामकुक्षौतुमृत्युर्धावतिधावतः । इतिश्रीमन्नारायणभट्टात्मजश्रीमद्रामकृष्णभट्टसुतलक्ष्मणभट्टकृतावाचाररत्नेभोजनप्रकरणम् ॥

सायंसंध्याविचारः । व्यासः—सच्छास्त्रादिविनोदेनसन्मार्गस्याविरोधिना । दिनंनयेत्ततःसंध्यामुपतिष्ठेत्समाहितः । **यमः**—चत्वारिखलुकर्माणिसंध्याकालेपुवर्जयेत् । आहारंमैथुनंनिद्रांस्वाध्यायंचचतुर्थकम् । **संवर्तः**—सादित्यांपश्चिमांसंध्यामर्धास्तमितभास्कराम् । अत्रसायंसंध्यायाःकालकर्तव्यतादिसंध्याप्रकरणेज्ञेयम् । **विशेषमाहचंद्रिकायांव्यासः**—प्रत्यङ्मुखोपविष्टस्तुगायत्रींतुजपेत्ततः।बह्वृचस्त्रेपि—उत्तरापराभिमुखोन्यष्टमदेशंसावित्रींजपेदिति । **श्राद्धेभुक्तवतःसंध्यानिषेधमाहश्राद्धचंद्रोदयेयमः**—पुनर्भोजनमध्वानं

१ वृद्धांसरस्वतींकृष्णांपीतवस्त्रांचतुर्भुजाम् । शंखचक्रगदापद्महस्तांगरुडवाहनाम् । वदर्याश्रमवासांतामायांतींसूर्यमंडलात् । वैष्णवींत्र्यक्षरांसाक्षाद्देवीमावाह-याम्यहम् ॥ इति ।

भारमायासमैथुने । संध्यांप्रतिग्रहंहोमंश्राद्धभोक्तारंवर्जयेत् । अयंसंध्यानिषेधःप्रायश्चित्ताकरणे । तदाह—सायंसंध्यांप्रक्रम्य—दशकृत्वः पिबेदापोगायत्र्याश्राद्धभुग्द्विजः । ततःसंध्यामुपासीतशुध्येच्चतदनंतरम् । अत्रदशकृत्वःपिबेदितिसंबंधः । इदंमनूक्तप्रायश्चित्तंश्राद्धीयविषय मितिमाधवः । संध्याधिकारार्थमितिपृथ्वीचंद्रः । गौडास्तु—सायंसंध्यापरान्नंचछेदनंचवनस्पतेः । अमावास्यांनकुर्वीतरात्रिभोजनमेवच । द्यूतंचकलहंचैवसायंसंध्यादिवाशयम् । श्राद्धकर्तांचभोक्ताचपुनर्भुक्तिंचवर्जयेदितिकामधेनौवाराहात् कर्तुरपिसायंसंध्यानिषेधमाहुस्तन्नि र्मूलम् । यत्तु—द्वादश्यांपंचदश्यांचसंक्रांतौश्राद्धवासरे । सायंसंध्यांनकुर्वीतकुर्वंश्चपितृहाभवेदितिकालकौमुद्यांवचनंतदपिनिर्मूलम् । युक्तंचैतत् । ततःसंध्यामुपासीतेत्युक्तेः । तेनश्राद्धभोजननिमित्तं अन्यत्प्रायश्चित्तम् । पार्वणश्राद्धेतुषट्प्राणायामाइतिविश्वादर्शः । तदिदंनसंध्याधिकारार्थंकिंतुश्राद्धभोजननिमित्तम् । यत्तु—प्राणायामत्रयंकृत्वाप्रणवेनाभिमंत्र्यषट् । ततःसंध्यामुपासीतशुद्धिःस्याच्छ्राद्ध भोजिनामिति तन्नवश्राद्धपरम् । प्रायश्चित्तगौरवादितिप्रयोगपारिजातः । याज्ञवल्क्यः—उपास्यपश्चिमांसंध्यांहुत्वाग्नीन्समुपास्यच । भृत्यैःपरिवृतोभुक्त्वानातितृप्त्याथसंविशेत् । चकारोवैश्वदेवादेरपिग्रहणार्थम् । सायंवैश्वदेवःपाकांतरेणकार्योनपुनर्भुक्तशिष्टेन । नवश्रा द्धस्यच्छिष्टंगृहेपर्युषितंचयत् । दंपत्योर्भुक्तशिष्टंचभुक्त्वाचांद्रायणंचरेदितिचंद्रिकायांवचनात् । यदार्याणामभोज्यंस्यान्नतेनयजेतइत्या पस्तंबोक्तेश्च । विष्णुपुराणे—तत्रापिश्वपचादिभ्यस्तथैवान्नापवर्जनम् । तत्रैव—पुनःपाकमुपादायसायमप्यवनीपते । वैश्वदेव निमित्तवैपद्यासार्धंवलिंहरेत् । सायंत्वन्नस्यसिद्धस्यपद्भ्यमंत्रंवलिंहरेत् । दक्षः—प्रदोषपश्चिमौयामौवेदाभ्यासरतोनयेत् । यामद्वयंशयान स्तुब्रह्मभूयायकल्पते । शौनकः—निशायाःप्रथमेयामेजपयज्ञार्चनादिकम् । स्वाध्यायोभोजनंप्रोक्तंवर्जयित्वामहानिशाम् । व्यासः— महानिशातुविज्ञेयामध्ययामद्वयंनिशि । शौनकः—पश्चात्तनेतथायामेजपयज्ञार्चनादिकम् । ब्रह्माभ्यासोपितत्रैववर्जयित्वातुभोजनम् । इति

शयनविचारः । **हारीतः**—नसंधिवेलायांशयीतननग्नोनाशुचिर्नप्रगेनोचैर्निशायांभापेतेति । प्रगेप्रातः । अतएवपृथ्वीचंद्रोदयेस्मृत्यंतरे—आसनंशयनंयानंजायापत्यंकमंडलुम् । शुचीन्यात्मनएतानिपरेषामशुचीनितु । **कौर्मे**—अश्रद्धोऽशुचिःशयितःस्वाध्यायंस्नानभोजनम् । बहिर्निष्क्रमणंचैवनकुर्वीतकदाचन । नवीजयेच्चवस्त्रेणनदेवायतनेस्वपेत् । **चंद्रिकायांगोभिलः**—स्नातकःस्वापकालेवैणवंदंडमुपनिदधातीति । स्वप्यादित्यनुवृत्तौ**शंखलिखितौ**—नदीर्णायांखट्वायांनान्यसेवितायामनभ्युक्ष्यनभूतग्रहायतनेनश्मशानवृक्षच्छायासुनपर्वणिरभसोत्सवेचेति । पर्वणिप्रतिपत्पंचदश्योःसंधौ । रभसोत्सवेपुत्रजन्मादौ । **हारीतः**—नप्रत्यक्तिर्यगुदक्शिराःकोणशिराःपश्चिमशिराउत्तरशिराश्चेति । **मार्कंडेये**—प्राक्शिरःशयनेविद्याद्धनमायुश्चदक्षिणे । पश्चिमेप्रबलांचिंतांहानिमृत्यूतथोत्तरे । शून्यालयेश्मशानेचपथिवृक्षेचतुष्पथे । महादेवगृहेवापिमातृवेश्मनिनस्वपेत् । नयक्षनागायतनेस्कंदस्यायतनेतथा । कूलच्छायासुचतथाशर्करालोष्ठपांसुषु । नस्वपेच्चतथादर्भेविनादीक्षांकथंचन । धान्यगोदेवविप्राणांगुरूणांचतथोपरि । नाकाशेसर्वतःशून्येनचचैत्यद्रुमेतथा । **गार्ग्यः**—स्वगृहेप्राक्शिराःशेतेश्वाशुर्यैदक्षिणाशिराः । प्रत्यक्शिराःप्रवासेतुनकदाचिदुदक्शिराः । **भारते**—शय्यार्धंतस्यचाप्यत्रस्त्रीपूर्वमधितिष्ठति । तदक्षिणेशयीतेति । **उशना**—नतैलेनाभ्यक्तशिराःस्वपेदिति । **पैठीनसिः**—नादीक्षितःकृष्णचर्मणिसुप्यादिति । **आपस्तंबः**—सदानिशायांदारान्प्रत्यलंकुर्वीतेति । **विष्णुपुराणे**—शुचौदेशेविविक्तेतुगोमयेनोपलेपिते । प्रागुदक्प्रवणेचैवसंविशेत्तुसदाबुधः । मंगल्यंपूर्णकुंभंचशिरोदेशेनिधायतु । वैदिकैर्गारुडैर्मंत्रैरक्षांकृत्वास्वपेत्ततः । **हारीतः**—क्षालितचरणःसर्वतोरक्षांकृत्वोदकपूर्णघटादिमंगलोपेतआत्माभिरुचितामनुग्रहतांसुत्रामाणमितिपठन्शय्यामधिष्ठायरात्रिसूक्तंजप्त्वाविष्णुंनमस्कृत्य । सर्पापसर्पभद्रंतेदूरंगच्छमहाविष । जनमेजयस्ययज्ञांतेआस्तीकवचनंस्मर । आस्तीकवचनंश्रुत्वायःसर्पोनिवर्तते । शतधाभिद्यतेमूर्धिशिंशवृक्षफलंयथा । इत्येतच्छ्लोकद्वयंजप्त्वेष्टदेवतांस्मृत्वा

साधिमाम्नायान्यांश्चवैदिकान्मंत्रान्जस्वामंगलश्रुतिशंखंचशृण्वन्दक्षिणशिराःस्वपेदिति । **विष्णुपुराणे**—रात्रिसूक्तंजपन्स्मृत्वादेवांश्चसुखशायिनः । **तानाहगोभिलः**—अगस्तिर्माधवश्चैवमुचुकुंदोमहामुनिः । कपिलोमुनिरास्तीकःपंचैतेसुखशायिनः । शयीतेत्यधिकृत्यहारीतः—नान्यपूर्वेनानुवंशास्तीर्णेनाश्मपीठोपधानेनचासनेइति । अन्यपूर्वेअन्योपभुक्ते । **चंद्रोदयेस्मृतिः**—आसनंशयनंयानंजायापत्यंकमंडलुम् । शुचीन्यात्मनएतानिपरेषामशुचीनितु । **विष्णुः**—नाकाशेनपालाशेनपंचदारुकृतेनगजभग्नकृतेनभिन्नेनाग्निघुष्टेनघटसिक्तद्रुमजेनदेवायतनेनगणमध्येनहुताशोपरिनभस्यनिनाशुचौदेशेनपर्वतमस्तकेशयीतेति । पंचदारुजेपंचजातीयदारुकृतेइतिटोडरानंदः । तन्न । वक्ष्यमाणविष्णुपुराणविरोधात् । **शंखलिखितौ**—नविशीर्णखट्वायामनभ्युक्ष्यनभूतयक्षग्रहायतनेपुनश्मशानवृक्षच्छायासुशयीतेति । **चंद्रिकायांप्रचेताः**—नविशीर्णखट्वायांनान्यवर्णोपशयितायांस्वपेदिति । **विष्णुपुराणे**—नैकांशालांनवांभग्नांनासमांमलिनांतथा । नचदंतमयींशय्यामधितिष्ठेदनास्तृताम् । मृतदंतमयेविद्युद्गवेदर्भेपलाशजे । नशयीतनरोधान्येशयनेपंचदारुजे । पंचदारूणिचोक्तानिचूतजंबूद्रुमास्तथा । अश्मपीठोत्थितांश्चैवघटसिक्तरूंस्तथा । करिभग्नकृतेचैवनशयीतकचिन्नरः ।

संभोगेनिषिद्धदेशादिनादि माधव्यामादित्यपुराणे संभोगेनिषिद्धदेशाउक्ताः—चैत्यचत्वरसौधेपुनैवदेवचतुष्पथे । नैवश्मशानोपवनसलिलेषुमहीपते । **काशीखंडे**—एककाष्ठमयींशय्यांनातितृप्तोऽथसंविशेत् । **विष्णुः**—नविद्युद्गवेनवाल्पधान्योपरिनसंध्यायांनार्द्रेति । **कल्पतरौकात्यायनः**—पौर्णमास्याममावास्यामधःशय्याविधीयते । अनाहिताग्नेरप्येषापश्चादग्नेर्विधीयते । **टोडरानंदे तीर्थसौख्येस्कांदे**—वार्षिकांश्चतुरोमासान्प्रसुप्तेवैजनार्दने । पंचखट्वादिशयनंवर्जयेद्भक्तिमान्नरः । अनृतौवर्जयेद्भार्यांमांसंमधुपरौदनम् ।

शयनविचारः । हारीतः—नसंधिवेलायांशयीतननग्नोनाशुचिर्नप्रगेनोच्चैर्निशायांभापेतेति । प्रगेप्रातः । अतएवपृथ्वीचंद्रोदयेस्मृत्यंतरे—आसनंशयनंयानंजायापत्यंकमंडलुम् । शुचीन्यात्मनएतानिपरेषामशुचीनितु । **कौर्मे**—अश्रद्धोऽशुचिःशयितःस्वाध्यायंस्नानभोजनम् । बहिर्निष्क्रमणंचैवनकुर्वीतकदाचन । नवीजयेच्चवस्त्रेणनदेवायतनेस्वपेत् । **चंद्रिकायांगोभिलः**—स्नातकःस्वापकालेवैणवंदंडमुपनिदधातीति । स्वप्यादित्यनुवृत्तौशंखलिखितौ—नदीर्णायांखट्वायांनान्यसेवितायामनभ्युक्ष्यनभूतग्रहायतनेनश्मशानवृक्षच्छायासुनपर्वणिरभसोत्सवेचेति । पर्वणिप्रतिपत्संचदश्योःसंधौ । रभसोत्सवेपुत्रजन्मादौ । **हारीतः**—नप्रत्यक्तिर्यगुदक्शिराःकोणशिराःपश्चिमशिराउत्तरशिराश्चेति । **मार्कंडेये**—प्राक्शिरःशयनेविद्याद्धनमायुश्चदक्षिणे । पश्चिमेप्रवलांचिंतांहानिमृत्यूतथोत्तरे । शून्यालयेश्मशानेचपथिवृक्षेचतुष्पथे । महादेवगृहेवापिमातृवेश्मनिनस्वपेत् । नयक्षनागायतनेस्कंदस्यायतनेतथा । कूलच्छायासुचतथाशर्करालोष्ठपांसुषु । नस्वपेच्चतथादर्भेविनादीक्षांकथंचन । धान्यगोदेवविप्राणांगुरूणांचतथोपरि । नाकाशेसर्वतःशून्येनचचैत्यद्रुमेतथा । **गार्ग्यः**—स्वगृहेप्राक्शिराःशेतेश्वाशुर्यैदक्षिणाशिराः । प्रत्यक्शिराःप्रवासेतुनकदाचिदुदक्शिराः । **भारते**—शय्यार्धंतस्यचाप्यत्रस्त्रीपूर्वमधितिष्ठति । तदक्षिणेशयीतेति । **उशना**—नतैलेनाभ्यक्तशिराःस्वपेदिति । **पैठीनसिः**—नादीक्षितःकृष्णचर्मणिसुप्यादिति । **आपस्तंबः**—सदानिशायांदारान्प्रत्यलंकुर्वीतेति । **विष्णुपुराणे**—शुचौदेशेविविक्तेतुगोमयेनोपलेपिते । प्रागुदक्प्रवणेचैवसंविशेत्तुसदाबुधः । मंगल्यंपूर्णकुंभंचशिरोदेशेनिधायतु । वैदिकैर्गारुडैर्मंत्रैरक्षांकृत्वास्वपेत्ततः । **हारीतः**—क्षालितचरणःसर्वतोरक्षांकृत्वोदकपूर्णघटादिमंगलोपेतआत्माभिरुचितामनुपहतांसुत्रामाणमितिपठन्शय्यामधिष्ठायरात्रिसूक्तंजस्वाविष्णुंनमस्कृत्य । सर्पापसर्पभद्रंतेदूरंगच्छमहाविष । जनमेजयस्ययज्ञांतेआस्तीकवचनंस्मर । आस्तीकवचनंश्रुत्वायःसर्पोनिवर्तते । शतधाभिद्यतेर्मूर्ध्निशिंशवृक्षफलंयथा । इत्येतच्छ्लोकद्वयंजस्वेष्टदेवतांस्मृत्वा

साधिमाष्यायान्यांश्चवैदिकान्मंत्रान्जस्वामंगलश्रुतिशंखंचशृण्वन्दक्षिणशिराःस्वपेदिति । **विष्णुपुराणे**—रात्रिसूक्तंजपन्स्मृत्वादेवांश्चसुखशायिनः । **तानाह्गोभिलः**—अगस्तिर्माधवश्चैवमुचुकुंदोमहामुनिः । कपिलोमुनिरास्तीकःपंचैतेसुखशायिनः । शयीतेत्यधिकृत्यह्हारीतः—नान्यपूर्वेनानुवंशास्तीर्णेनाश्मपीठोपधानेनचासनेइति । अन्यपूर्वेअन्योपभुक्ते । **चंद्रोदयेस्मृतिः**—आसनंशयनंयानंजायापत्यंकमंडलुम् । शुचीन्यात्मनएतानिपरेषामशुचीनितु । **विष्णुः**—नाकाशेनपालाशेनपंचदारुकृतेनगजभग्नकृतेनभिन्नेनाग्निघुष्टेनघटसिक्तद्रुमजेनदेवायतनेनगणमध्येनहुताशोपरिनभस्मनिनाशुचौदेशेनपर्वतमस्तकेशयीतेति । पंचदारुजेपंचजातीयदारुकृतेइतिटोडरानंदः । तन्न । वक्ष्यमाणविष्णुपुराणविरोधात् । **शंखलिखितौ**—नविशीर्णखट्वायामनभ्युक्ष्यनभूतयक्षग्रहायतनेपुनश्मशानवृक्षच्छायासुशयीतेति । **चंद्रिकायांप्रचेताः**—नविशीर्णखट्वायांनान्यवर्णोपशयितायांस्वपेदिति । **विष्णुपुराणे**—नैकांशालांनवांभग्नांनासमांमलिनांतथा । नचदंतमयींशय्यामधितिष्ठेदनास्तृताम् । मृतदंतमयेविद्युद्गर्भेदर्भपलाशजे । नशयीतनरोधान्येशयनेपंचदारुजे । पंचदारूणिचोक्तानिचूतजंबूद्रुमास्तथा । अश्मपीठोत्थितांश्चैवघटसिक्तरूंस्तथा । करिभग्नकृतेचैवनशयीतक्वचिन्नरः ।

संभोगेनिषिद्धदेशदिनादि माधव्यामादित्यपुराणे संभोगेनिषिद्धदेशाउक्ताः—चैत्यचत्वरसौधेषुनैवदेवचतुष्पथे । नैवश्मशानोपवनसलिलेषुमहीपते । **काशीखंडे**—एककाष्ठमयींशय्यांनातितृप्तोऽथसंविशेत् । **विष्णुः**—नविद्युद्गर्भेनवाल्पधान्योपरिनसंध्यायांनार्द्रेति । **कल्पतरौकात्यायनः**—पौर्णमास्याममावास्यामधःशय्याविधीयते । अनाहिताग्नेरप्येषापश्चादग्नेर्विधीयते । **टोडरानंदे तीर्थसौख्येस्कांदे**—वार्षिकांश्चतुरोमासान्प्रसुप्तेवैजनार्दने । पंचखट्वादिशयनंवर्जयेद्भक्तिमान्नरः । अनृतौवर्जयेद्भार्यांमांसंमधुपरौदनम् ।

तिथितत्वेस्कांदे—खंडनंनखकेशानांमैथुनाध्वगमेतथा । आमिषंकलहंहिंसांवर्षवृद्धौविवर्जयेत् । **पराशरः**—नर्मदायैनमःप्रातर्नर्मदा यैनमोनिशि । नमोस्तुनर्मदेतुभ्यंत्राहिमांविषसर्पतः । **यमः**—भुंजीतह्यार्द्रपाणिस्तुनार्द्रपाणिःस्वपेन्निशि । **विष्णुः**—निद्रासमयमा साद्यतांवूलंवदनात्त्यजेत् । पर्यंकात्क्षमदांभालात्पुंड्रंपुष्पाणिमस्तकात् । **चौधायनः**—नपर्वण्निश्राद्धेनव्रतीनदीक्षितश्चेति । दीक्षितोदीक्षा ख्यसंस्कारवान् । सोप्यवभृथेष्टियावत् । **पर्वाणिविष्णुपुराणे**—चतुर्दश्यष्टमीचैवअमावास्याचपूर्णिमा । पर्वाण्येतानिराजेंद्ररविसंक्रां तिरेवच । तैलस्त्रीमांससंभोगीपर्वस्वेतेपुयःपुमान् । विण्मूत्रभोजनंनामनरकंप्रतिपद्यते । सामान्यतश्चतुर्दश्यष्टमीग्रहेपिकृष्णपक्षस्यतेग्राह्ये । कृष्णाष्टमीचतुर्दश्योःपूर्णिमादर्शसंक्रमइतिस्कांदादितिपृथ्वीचंद्रः । तन्न । षष्ठचष्टम्यावमावास्याउभेपक्षेचतुर्दशी । मैथुनंचनसेवेतद्वा दशींचममप्रियामितिटोडरानंदेवाराहविरोधात् । **संस्कारटोडरानंदेकौर्मे**—ब्रह्मचारीभवेन्नित्यंतद्वज्जन्मत्रयाहनि । **कल्पतरौचं द्रिकायांवामने**—नाभ्यंगमर्केनचभूमिपुत्रेक्षौरंचशुक्रेथकुजेचमांसम् । बुधेचयोषित्परिवर्जनीयाशेषेपुसर्वाणिसदैवकुर्यात् । मूलेमृगेभाद्रप दासुमांसंयोपिन्मघाकृत्तिकयोत्तरासु । वर्ज्येतिपूर्वार्धानुषंग; । **याज्ञवल्क्यः**—एवंगच्छन्स्त्रियंक्षामांमघांमूलंचवर्जयेत् । **यत्तुरत्नमा लायां** मूलोत्तरयोरुक्तिःसैतद्विरोधादनित्या । **ऋतुः**—ऋतुकालमिगामीस्यात्स्वदारनिरतःसदा । यःस्वदारानृतुस्नातान्स्वस्थःसन्नोपगच्छति । भ्रूणहत्यामवाप्नोतिनात्रकार्याविचारणेतिदेवलोक्तेः ।

ऋतुदिननियमः संभोगोत्तरंशौचंच । ऋतुमाह्याज्ञवल्क्यः—षोडशर्तुर्निशाःस्त्रीणांतस्मिन्युग्मासुसंविशेत् । ब्रह्मचार्येवप

---

१ विष्णुपुराणे—जरत्कारोर्जरत्कार्यांसमुत्पन्नोमहायशाः । आस्तीकःसत्यसंधोमांपन्नगेभ्योभिरक्षतु । रात्रीव्यख्यदायतीइतिरात्रीसूक्तंजप्त्वा नमोनंदिकेश्वरायेतिनत्वाघ्रा ण्यांदक्षिणतोवाशिरःकृत्वास्वपेदितिकमलाकारः । २ **वामनपुराणे**—बुधेचयोषांनखमालभेतपूर्णासुयोषित्परिवर्जनीया ।

र्वण्याद्याश्चतस्रश्चवर्जयेत् । **मनुः**—तासामाद्याश्चतस्रस्तुनिंदितैकादशीचया । चतुर्दशीचशेषाःस्युःप्रशस्तादशरात्रयः । मैथुनप्रशस्तऋतुकालिकदशरात्रमध्येमैथुननिषिद्धतिथिनक्षत्रवारादीनांदशानांक्रमेणसंभवस्तत्रपर्वस्वपिमैथुनेदोषाभावः । ऋतावुपेयादित्यत्यंतायोगात्प्रयोगव्यवच्छेदस्यविध्यर्थत्वादितिशंकरोपाध्यायाः । तन्न । पर्वस्वपिनिषेधात् । अतोयत्रदृष्टार्थोनिषेधःस्मृत्यर्थशास्त्रयोर्विरोधोवातत्रार्थशास्त्रबाधः । **बौधायनः**—एवमजरोव्रजेत्काम्यंयावत्सन्निपातंचसहशय्याततोनानोदकस्पर्शनमपिवालेपान्प्रक्षाल्याचम्यप्रोक्षणमंगानामिति । यावत्स्खलनंतावत्सहवाशय्या ततोनाना पृथक्शयीयातामित्यर्थः । उदकस्पर्शनंस्नानमितिहरदत्तः । एतद्दृष्टौ । अन्यत्रलेपान्प्रक्षाल्येत्यादि । ऋतौतुगर्भशंकित्वात्स्नानंमैथुनिनःस्मृतम् । अनृतौतुयदागच्छेच्छौचंमूत्रपुरीषवदितिवृद्धशातातपात् मूत्रपुरीषवच्छौचद्वयंकार्यमित्यर्थइतिचंद्रिका । अनृतावपिस्नानमुक्तंचंद्रिकायाम्—अष्टम्यांचचतुर्दश्यांदिवापर्वणिमैथुनम् । कृत्वासचैलंस्नात्वातुवारुणीमिश्चमार्जयेत् । **याज्ञवल्क्यः**—नग्नःस्नात्वाचसुप्त्वाचगत्वाचैवदिवास्त्रियम् । **यच्चुशंखः**—दिवातुमैथुनंगत्वानग्नःस्नात्वातथांभसि । नग्नांपरस्त्रियंदृष्ट्वादिनमेकंव्रतीभवेदिति तदभ्यासपरमितिशूलपाणिः । अत्रमैथुनोत्तरंसहशय्यानिषेधात्तदभावेसहशय्या । सन्निहितभर्तृकायाःपृथक्शयनस्यदंडत्वात् । पृथक्शय्यातुनारीणामशस्त्रवधउच्यतइतिवचनात्—तस्मात्सर्वा स्त्रियोबालेभर्त्रासहापिवापृथक् । निशिनोशयनंकुर्युःकंचुकीकर्णभूषणैः । हारैश्चकंठसंसक्तैःसहचेद्विधवास्तुताः । भविष्यंतिनसंदेहःकुर्युःशय्यांपतिव्रताइतिसह्याद्रिखंडाच्च हारादिभिःसहेत्यर्थः । स्नानंपुंसःनस्त्रियाः । तस्याःशुचित्वात् । तदाहयोगयाज्ञवल्क्यः—उभावप्यशुचीस्यातांदंपतीशयनंगतौ । शयनादुत्थितानारीशुचिःस्यादशुचिःपुमान् । **वृद्धपराशरः**—चातुर्वर्ण्यशुचिर्नारीकृताभिगमनापिवा । विप्रेमैथुनिनिस्नानंराजकेपिशिरोविना । नाभियावद्भिशस्तद्वल्लिंगशौचंचशूद्रके । स्त्रियाविशेषमाहसएव—नचकुर्वीतसास्नानंनाभेरधस्तुशोधयेत् । **गौतमः**—नमैथुनीभूयशौचंप्रतिविलंबेदिति । **मनुः**—अमावास्यामष्टमींचपौर्णमासीं

चतुर्दशीम् । ब्रह्मचारीगवेन्नित्यमनृतौस्नातकोद्विजः । ऋतौनिरवकाशेश्राद्धादावपिगच्छेत् । यथापोऽशेहनिपरदेशादागतस्याग्रेऋत्वभावादगमनेदोषोगमनेदातुर्भोक्तुश्चादोषः । तथाचविज्ञानेश्वरः—एवंगच्छन्ब्रह्मचार्येवभवतीति । यत्तुहेमाद्रौशिवरहस्ये—दिवाजन्मदिनेचैवनकुर्यान्मैथुनंव्रती । श्राद्धंदत्वाचभुक्त्वाचश्रेयोर्थीनचपर्वस्विति तदनृतुपरम् । ब्रह्मचार्येवभवतियत्रतत्राश्रमेवसन्निति**मनूक्तेः** । **माधवीयेतु**—ऋतुकालंनियुक्तोवानैवगच्छेत्स्त्रियंक्वचित् । तत्रगच्छन्समाप्नोतिह्यातिष्ठन्फलमेवत्विति**वृद्धमनूक्तेः** । श्राद्धेब्रह्मचर्यमावश्यकमित्युक्तम् । **यत्तुधर्मप्रदीपे**—आमेहैमेतथानित्येनांदीश्राद्धेतथैवच । व्यतीपातादिकेश्राद्धेनियमान्परिवर्जयेदिति तन्निर्मूलम् । **भारते**—स्नातांचतुर्थेदिवसेरात्रौगच्छेद्विचक्षणः । **यत्तुनारदः**—रजोदर्शनतोऽस्पृश्यानार्योदिनचतुष्टयम् । ततःशुद्धक्रियाश्चैताःसर्ववर्णेष्वयंविधिरिति । तत्रास्पृश्यत्वंकर्मानधिकाररूपंज्ञेयम् । स्मृत्यंतरेचतुर्थनिषेधोऽपत्याल्पायुष्ट्वादिदोषार्थः । चतुर्थीप्रभृत्युत्तरोत्तराःप्रजानिःश्रेयसार्थमित्यापस्तंबोक्तेः । रात्रौचतुर्थ्यांपुत्रःस्यादल्पायुर्धनवर्जितइतिव्यासोक्तेश्चेतिटोडरानंदः । अन्येतुस्नानंरजस्वलायास्तुचतुर्थेहनि शस्यते । गम्यानिवृत्तेरजसिनानिवृत्तेकथंचनेत्यापस्तंबोक्तेःरजोनिवृत्त्यनिवृत्तिभ्यांव्यवस्थेत्याहुः । सर्वास्वयुग्मासुगमनं युग्मास्वितिबहुवचनादितिविज्ञानेश्वरः । **अनृतावपिगमनमाहगौतमः**—ऋतावुपेयात्सर्वत्रवाप्रतिषिद्धवर्जमिति । **यत्तुभारते**—अनृतौमैथुनं गच्छेद्बीजस्तैन्यंकरोम्यहमिति तत्तुल्यनिच्छापरम् । **वाराहे**—यस्तुपाणिगृहीतायांमासेकुर्वीतमैथुनम् । भवंतिपितरस्तस्यतंमासं रेतसोभुजः ॥

अगम्याःस्त्रियः । **आश्वलायनः**—प्राग्रजोदर्शनात्सर्वानियाद्गत्वापतत्यधः । एतदपवादःव्यवहारचमत्कारेकश्यपसंहितायाम्—वर्षाद्वादशकादूर्ध्वंयदिपुष्पंबहिर्नहि । अंतःपुष्पंभवत्येवपनसोदुंबरादिवत् । अतस्तत्रप्रकुर्वीततत्संगंबुद्धिमान्नरः । **छंदोगपरि**

शिष्टे—अजातव्यंजनालोमनीनतयासंहसविशेत् । **बौधायनः**—स्वदारेष्वनातीर्थउपेयादिति । तीर्थयोनिः । सएव—नदिवासंध्ययोर्न मलिनांनवयोधिकांनाभ्यक्तोनरोगपरइति । वयोधिकागतरजस्का । **आयुर्वेदे**—ग्राम्यधर्मेत्यजेत्पत्नीमनुत्तानांरजस्वलाम् । अप्रियामप्रियाचारांदुष्टसंकीर्णमैथुनाम् । अतिस्थूलांकृशांमूतांगर्भिणीमन्ययोषितम् । वर्णिनीमन्ययोनिंचगुरुदेवनृपालये । चैत्यश्मशानायतनचत्वरांश्चतुष्पथे । पर्वण्यनंगदिवसेशिरोहृदयताडिनिम् । अत्याशितोधृतःक्षुद्वान्दुःस्थितांग.पिपासितः । बालवृद्धोन्यवेगार्तस्त्यजेद्रोगीचमैथुनम् । ग्राम्यधर्मोमैथुनम् । वेगोविण्मूत्रादिः । अव्यक्तगर्भापतिरब्धियानंमृतस्त्रवाहंक्षुरकर्मसंगम् । तस्मानुयत्नेनगयादितीर्थयागादिकंवास्तुविधिंन कुर्यात् । अव्यक्तगर्भावनितामवेन्मासत्रयात्परम् । संगतेत्यर्थः । **सांबपुराणे**—नदिवामैथुनंगच्छेद्वंधकीमविवक्षिताम् । प्रव्राजिनीनोत्कृष्टापिंगलांकुष्ठिनींयोगिनींचित्रिणीस्वकुलजांसंबंधिनींहीनामपस्मारिणींचवर्जयेदिति । **गारुडे**—शुष्कमांसाःस्त्रियोवृद्धाबालार्कस्तरुणंदधि । प्रभातेमैथुनंनिद्रासद्य.प्राणहराणिषट्इति ।

सुखसंभोगयोगः । तथा—शिरःसुधौतंचरणौसुमार्जितौवरांगनासेवनमल्पभोजनम् । अनग्नशायित्वमपर्वमैथुनंचिरप्रनष्टांश्रियमानयंति । तथा—साभार्यायागृहेदक्षासाभार्यायाप्रियंवदा । साभार्यायाप्रियप्राणासाभार्यायापतिव्रता । नित्यस्नातासुगंधाचनित्यंचप्रियवादिनी । अल्पभुक्चाल्पवादाचसततंमंगलैर्युता । सततंधर्मबहुलासततंऋतुगामिनी । एवंयासत्क्रियायुक्तासर्वसौभाग्यवर्धिनी । यस्येदृशीभवेद्भार्यासदेवेंद्रोनमानुषः । **कौर्मे**—इत्येतदखिलंप्रोक्तमहन्यहनियद्विजाः । ब्राह्मणानांकृत्यजातमपवर्गफलप्रदम् । नास्तिक्यादथवालस्याद्ब्राह्मणोनकरोतियः । सयातिनरकान्घोरान्काकयोनौचजायते ।

अथदुःस्वप्नशांतिः । **शौनकः**—स्वप्नोत्पातेपुचैतेषुकालरात्र्यधिदेवता । पूजाविधानंपूर्वोक्तंकुर्यादत्रापियत्नतः । पूर्वोक्तंरात्रिसूक्तक

ल्पयत् । होमंकुर्यात्प्रयत्नेनरात्रावेवद्विजोत्तमः । उक्तेनैवविधानेनसघृतंपायसंहुनेत् । प्रत्यृचंपायसंहुत्वारात्रीव्यख्यदितिक्रमात् । अष्टोत्तर शतंहुत्वासूक्तेनानेनवित्तथा । स्वप्नाधिपतिमंत्रेणहुनेदष्टोत्तरंशतम् । कालरात्रेर्नाममंत्रेणेत्यर्थः । गुरवेदक्षिणांदद्याद्वस्त्रंहेमपशूनपि । तद्युक्त दक्षिणाभावेप्यशक्तोहोमकर्मणि । हिरण्यंदक्षिणांदद्यात्तदानीमेववायुधः । वस्त्रकुंभादिसकलंतद्धोत्रेप्रतिपादयेत् । ब्राह्मणान्भोजयेच्छक्त्या सुशीलान्वेदपारगान् । भक्ष्यैश्चपायसाद्यैश्चरत्नानिसुबहूनिच । अनेनविधिनायस्तुशांतिंकुर्वीतसंयतः । तस्यवर्षशतायुष्यंभवत्येवनसंशयः । इतिदुःस्वप्नशांतिः ।

अथाशौचेकार्याकार्यनिर्णयः । तत्रप्रयोगपारिजातेजाबालिः—संध्यांपंचमहायज्ञान्नैत्यकंस्मृतिकर्मच । तन्मध्येहापयेत्तेषां दशाहांतेपुनःक्रिया । नैत्यकंनित्यश्राद्धम् । पंचयज्ञसाहचर्यात् । स्मृतिकर्मस्मृत्युक्तंदेवतार्चनादि । पुनस्त्वर्थे । यत्तुपुलस्त्यः—संध्यामिष्टिंचरुंहोमंयावज्जीवंसमाचरेत् । नत्यजेत्सूतकेवापित्यजन्गच्छेदधोगतिमिति । यच्चयोगीश्वरः—संध्यास्नानंत्यजन्विप्रःससाहाच्छूद्रतां व्रजेत् । तस्मात्संध्यांचस्नानंचसूतकेपिनसंत्यजेदिति तन्मानससंध्यापरम् । निषेधस्तुमंत्रोच्चारणपरः । सूतकेमृतकेचैवसंध्याकर्मसमा चरेत् । मनसोच्चारयेन्मंत्रान्प्राणायाममृतेद्विजइतिपुलस्त्योक्तेः—मनसेत्यर्घ्यदानान्यपरम् । सूतकेसावित्र्यांजलिंप्रक्षिप्यप्रदक्षिणंकृत्वासूर्यं ध्यायन्नमस्कुर्यादितिपैठीनसिस्मृतेः । अर्घ्ये सावित्र्याःप्राप्तावपिपुनर्वचनंमानसोच्चारनिवृत्त्यर्थम् । अत्रदशसंख्ययागायत्रीजप्या । आप न्नश्चाशुचौकालेतिष्ठन्नपिजपेद्दशेत्याश्वलायनोक्तेरितिप्रयोगपारिजातः । अष्टाविंशतिकृत्वोत्रगायत्रींमनसाजपेदितिदेवजानीयेभर द्वाजः । सूतकेमृतकेकुर्यात्प्राणायाममंत्रकम् । तथामार्जनमंत्रांस्तुमनसोच्चार्यमार्जयेत् । गायत्रींसम्यगुच्चार्यसूर्यायार्घ्यंनिवेदयेत् । मार्जनंतु नयाकार्यमुपस्थानंनचैवहि । अमंत्रकमितिप्राणायामेमानसोच्चारस्यापिनिवृत्त्यर्थम् । मनसोच्चार्येतितुसर्वस्यमानसोच्चारेप्राप्तेपिस्मृत्यंतरत्वाद

दोषः । तेनार्घ्यदानवर्जसर्वमनसाकार्यमुपस्थानंतुनेतिमाधवप्रयोगपारिजातस्मृतिरत्नावल्यादयः । संध्यायामर्घ्यदानस्यश्रौतत्वात्तदे वाशौचेनुष्ठेयमितिचंद्रिका । विज्ञानेश्वरस्तु—उक्तवचनेपुपदार्थगणनंतदन्यपरिसंख्यार्थम् । अन्यथाविशेषगणनस्यवैयर्थ्यापत्तेः । तेनयावदुक्तमेवमनसाकार्यं उपस्थाननेतिविकल्पार्थमित्याह । दशगायत्रीजपस्तुचंडालादिस्पृष्टस्नानाद्यसंभवपरः । एकादशाहप्रातःसंध्या प्याशौचवदेव तत्कालसदशरात्रांतःपातात् । तदूर्ध्वंतुशुद्धिदशावत् अशुचित्वाभावात् । नचमुख्यकालवदेवगौणकालेपितत्करणमिति युक्तं उक्तहेतोरितिकेचित् । निष्कर्षस्तु सूर्योदयोत्तरदंडत्रयस्यमुख्यकालत्वोक्तेः प्रधानविध्यनुग्रहाच्च सूर्योदयोत्तरंशुद्धकालइवसांगसंध्या वंदनमिति । अर्घ्यीतागानसीसंध्याप्राणायामविवर्जितेतिच्यवनोक्तेरर्घ्यीतासंध्येति तच्चंद्रिकाद्यलिखनान्निर्मूलम् । एतेनाशौचेर्घ्यीता संध्येतिवदनुविधानपारिजातोप्यपास्तः । कात्यायनः—सूतकेमृतकेचैवरोगोत्पत्तौतथाध्वनि । मानसींतुजपेत्संध्यांकुशवारिविवर्जि-ताम् । आशार्के—आशौचेकर्मणांत्यागःसंध्यादीनांविधीयते । होमःश्रौतेतुकर्तव्यःशुष्कान्नेनापिवाफलैः । होमःसायंप्रातर्नतुवैश्वदेवः । जन्महानौसगोत्रस्यकर्मत्यागोनविद्यते । शालाग्नौकेवलेहोमःकार्यएवान्यगोत्रजैरितिजाबालस्मृतेः । विप्रोदशाहमासीतवैश्वदेवविवर्जित इतिसंवर्तोक्तेश्च । पंचयज्ञविधानंतुनकुर्यान्मृत्युजन्मनोरितिसंवर्तेनपंचयज्ञनिषेधाद्वैश्वदेवनिषेधेसिद्धेपुनःपृथङ्निषेधस्तैत्तिरीयाद्यर्थः । तेष पंचयज्ञमिश्रवैश्वदेवोक्तेः । हरदत्तस्तु—बह्वृचानांसूतकेपिवैश्वदेवोभवति—तानेतान्यज्ञानहरहःकुर्वीतेतिसर्वेषांनित्यत्वोक्तावपि—तस्यद्वाव नध्यायौयदात्माशुचिर्यदेशइत्यनेनाशौचादौब्रह्मयज्ञस्यैवविशेषतोनिषेधादित्याह । तन्न । द्वावेवेत्यन्वयेनानध्यायांतरस्यैवव्यावृत्तेः । अत एवश्रुतिः— व्रजन्नासीनःशयानोवेति । नतुतस्यैवेत्यनध्यायांतरव्यावृत्तिर्नस्यात् । वैश्वदेवादिनिषेधविरोधाच्च । अत्रवैश्वदेवनिषेधेप्यसंस्कृ तान्नभोजननिषेधादन्नसंस्कारोभवत्येव । तत्रापि—वैश्वदेवासंभवेतुकुक्कुटांडप्रमाणकमितिमृतपितृकस्यपाकांतरपक्षइवसूतकिनोपिभवतीत्याहुः ।

जातः—अग्निहोत्रेस्वकर्तृकत्वान्यकर्तृकत्वविकल्पः । यच्चस्मृत्यंतरम्—वर्जयेत्सूतकेकर्मनित्यनैमित्तिकादिकम् । आहिताग्नेःसदाशुद्धिःसद्य एवविधीयतइति तत्पूर्वार्धमाशौचेकर्तव्यत्वेनाभिहितनित्यनैमित्तिकपरम् । उत्तरार्धंतुवैतानिकपरमिति । तन्न । श्रौतेऽन्यकर्तृकत्वविध्यभावात् । स्वकर्तृकत्वनिषेधाभावाच्च । नचैवंश्रौतंकार्यमितिवचनवैयर्थ्यं श्रौतनिषेधाभावादितियुक्तम् । अशुचित्वेनभ्रमप्राप्तश्रौतनिवृत्तिनिरासार्थत्वात् । वैतानोपासनाइतियाज्ञवल्क्योक्तिर्नित्यकर्मपरा । दीक्षितानामित्यादितुप्रारब्धकर्मणियाजमानप्रास्यर्थमितिस्मृत्यर्थसारः । स्नानशौचाचमनभोजननियमास्पृश्यस्पर्शेस्नानंकुर्यादितिटोडरानंदे । कालिकापुराणे—जानूर्ध्वंक्षतजेजातेनित्यकर्मनचाचरेत् । नैमित्तिकंचतदधःस्रवद्रक्तेनचाचरेत् । आर्त्विज्यंब्रह्मयज्ञंचश्राद्धंदेवयुतेचयत् । गुरुमाक्षिप्यविप्रंचग्रहत्यैवचपाणिना । नकुर्यान्नित्यकर्माणिरेतःपातेचभैरव ।

अथभोजनोत्तरंकार्याकार्यविचारः । स्नानंकार्यंसायंसंध्यादेःपूर्वंतदधिकारार्थंतदूर्ध्वंतु । प्रदोषपश्चिमेयामेदिनस्नानंसमाचरेदिति पराशरोक्तेः । एतच्चदिनासंभवेइतिहेमाद्रिश्चंद्रिकाच । अतःसंकल्पःस्नानांगतर्पणाद्यपिभवति । नच्चानश्नदधिकारित्वाल्लोपः । स्नानाधिकारेतदशक्तौलोपप्रसंगात् । अतएवगौणस्नानाद्यंगीकारइतिचेत् । अत्रापिगौणकालांगीकारइतितुल्यम् । नह्यस्यभोजनार्थत्वेकिंचित्प्रमाणमस्ति । अतएवस्नानेजीवदधिकारित्वमित्याचारादर्शः । संध्यात्रयंचकार्यम् । संध्यात्रयंचकर्तव्यंद्विजेनात्मविदासदेतिमनूक्तेः । सर्वकालउपस्थानंसंध्ययोःपार्थिवेष्यते । अन्यत्रसूतकाशौचविभ्रमातुरभीतितइतिविष्णुपुराणेसूतकादिमध्येपिकथितत्वाच्च । सायंसंध्यावद्भोजनोत्तरत्वेप्यविरोधाच्च । नचैवंसर्वदातदापत्तिः कालनियमात् । ब्रह्मयज्ञस्तुन—अनिवर्त्यमहायज्ञान्योभुक्त्वाप्रत्यहंगृही । अनातुरःसतिधने सकृच्छ्रार्धेनशुध्यतीतिदक्षोक्तावभोजनेएवाकरणेप्रत्यवायोक्तेः । अकृत्वापंचयज्ञांस्तुभुक्त्वाचांद्रायणंचरेदितिच । अतएवोज्ज्वलायांहरदत्तः—ब्रह्मयज्ञस्यनित्यत्वेपिप्रातराशेकृतेप्रायश्चित्तमेवनब्रह्मयज्ञः । सर्वत्रानश्नदधिकारित्वनियमेपिब्रह्मयज्ञप्रकरणेआपस्तंबकृतावकृतप्रात

राशइतिविशेषोक्तिरिति । अंगत्वेतर्पणमपिन अंनगत्वेतुभवति । देवताश्चमुनींश्चैवपितॄन्वैयोनतर्पयेत् । देवादीनामृणीभूत्वानरकंसव्रजत्यधइतिहेमाद्रौब्रह्मवैवर्तेअकरणेप्रत्यवायश्रुतेः । नचात्राभुंजानस्यप्रत्यवायउक्तः । प्रातर्होमस्तुद्वादशदिनोर्ध्वमपिकिमुत—भोजनोर्ध्वं देवपूजामकृत्वादेवतार्चनम् । भुङ्क्तेसयातिनरकान्सूकरेष्विहजायतइत्यनर्चन्भोजनकरणेप्रत्यवायोक्तेरिति । तत्रएकरात्रपूजाविच्छेदेचौधायनेनपुनःप्रतिष्ठोक्तेः । अतःपूजापिभवति । प्रातर्वैश्वदेवस्तुन अनश्नतेत्युक्तेरितिकेचित् । तन्न । पंचैतान्योमहायज्ञान्कुर्यादहरहर्द्विजइतिसंवर्तोक्तेः—आपद्यपिचकष्टायांपंचयज्ञान्नहापयेदितिव्यासोक्तेश्चावश्यकत्वावगतेर्भोजनोर्ध्वमपिभवति । अतोसंस्कृतान्नभोजननिमित्तमेवप्रायश्चित्तंनतुवैश्वदेवाकरणनिमित्तमिति । अभुक्त्वावलिकर्मचेतिभारताद्बलिदानंनेतिकेचित् ॥ प्राच्यानुदीच्यानथदाक्षिणात्यान्ज्ञात्वाग्रतीच्यान्महतोनिबंधान् । आचाररत्नंसुधियाव्यधायिश्रीरामकृष्णात्मजलक्ष्मणेन ॥ निगदितमिहसाध्वसाधुवायद्भुतमतिनाग्रविचार्यलक्ष्मणेन । तदखिलमपहायदोषदुष्टंचिरमवलोक्यविलोकयंतुसंतः ॥ इतिश्रीमन्नारायणभट्टात्मजश्रीमद्रामकृष्णभट्टसुतलक्ष्मणभट्टकृतावाचाररत्नेसायंकर्तव्यप्रकरणम् ॥ आचाररत्नग्रंथःसंपूर्णः ॥

ग्रंथोप.

इदमाचाररत्नम्—

गोमांतकांतर्गतपेडणेग्रामवास्तव्येन पणशीकरोपाह्वविद्वद्वरश्रीमल्लक्ष्मणशर्मतनुजनुषा वामुदेवशर्मणा संस्कृतं तच्च मुंबय्यां श्रेष्ठिवरैः तुकाराम जावजीलभिख्यैः स्वीये निर्णयसागराख्यमुद्रणयंत्रे रामचंद्र येसु शेडगेद्वारांकयित्वाप्राकाश्यंनीतम् ।

शाकः १८३७, सन १९१५

Pub'ished by Tukaram Javaji, and Printed by Ramchandra Yesu Shedge at the Nirnaya-sagar Press, 23, Kolbhat Lane, Bombay.